Sri Ravi Varma Sanskrit Series No. 9

SRI VAGBHATAVIRACHITHAM

ASHTANGAHRIDAYAM

(CHIKITSITASTHANAM)

Part II

WITH

The Commentaries

SARVANGASUNDARI

&

SASILEKHA

Editor:

SRI K. ACHYUTHA PODUVAL

RETIRED PROFESSOR OF NYAYA

WARIYAM ROAD, ERNAKULAM

Sub Editor:

SRI C. K. RAMAN NAMBIAR

RETIRED PRINCIPAL,

SANSKRIT COLLEGE, TRIPUNITHURA

Publishers:

THE SANSKRIT COLLEGE COMMITTEE

TRIPUNITHURA

1964

Price Rs. 6

Sri Ravi Varma Sanskrit Series No. 9

SRI VAGBHATAVIRACHITHAM

ASHTANGAHRIDAYAM

(CHIKITSITASTHANAM)

Part II

WITH

The Commentaries

SARVANGASUNDARI

&

SASILEKHA

Editor:

SRI K. ACHYUTHA PODUVAL

RETIRED PROFESSOR OF NYAYA

WARIYAM ROAD, ERNAKULAM

Sub Editor:

SRI C. K. RAMAN NAMBIAR

RETIRED PRINCIPAL,

SANSKRIT COLLEGE, TRIPUNITHURA

Publishers:

THE SANSKRIT COLLEGE COMMITTEE

TRIPUNITHURA

1964

Price Rs. 6

★

पुस्तकालय

गुरुकुल कांगड़ी विश्वविद्यालय

तिथि	संख्या	तिथि	संख्या
18 Mr	1972		
A21	21		

तिथि	संख्या	तिथि	संख्या

मूल्यम् रु. ६.

श्रीपूर्णत्रयीपुरस्थ'राज'मुद्रणालये मुद्रितम्।

अष्टाङ्गहृदयम् ।

(चिकित्सितस्थानम्)

द्वितीयो विभागः

सर्वाङ्गसुन्दरी-शशिलेखाख्यव्याख्याद्वयसमन्वितम्

सम्पादकः

पण्डितराजः श्री. के. अच्युतप्पोतुवाळ्

उपसम्पादकः

पण्डितराजः श्री. सी. के. रामन् नम्प्यार्

पूर्णत्रयीपुरस्थसंस्कृतकलाशालानिर्वाहकसमित्या प्रकाशिता

मूल्यम् रु. ६.

श्रीपूर्णत्रयीपुरस्थ'राज'मुद्रणालये मुद्रितम् ।

सप्तमोऽध्यायः ।

छर्द्यादिचिकित्सितादनन्तरं मदात्ययचिकित्सितारम्भे चिकित्सासामान्यं हेतुः, यतस्तृष्णाया यथा वातपित्ते कारणं तथा मदात्ययस्यापि । मदात्ययश्च पित्तमारुतपर्यन्त इत्याह ॥

अथाऽतो मदात्ययचिकित्सितं नामाध्यायं व्याख्यास्यामः ॥
इति ह स्माहुरात्रेयादयो महर्षयः ।

यं दोषमधिकं पश्येत्तस्यादौ प्रतिकारयेत् ।
कफस्थानानुपूर्व्या वा तुल्यदोषे मदात्यये ॥ १ ॥

पित्तमारुतपर्यन्तः प्रायेण हि मदात्ययः ।

सर्वाङ्गसुन्दरी

अथात इत्यादि ॥ मदयतीति मदः । मद्यपानजातः अन्यः यो व्याधिविशेषस्तस्य चिकित्सितम् । शेषं पूर्ववद्व्याख्येयम् । यं दोषं वाताद्यन्यतममधिकं पश्येदुपलक्षयेत्तस्य दोषस्यादौ पूर्वं प्रतिकारयेत् । न हीनममध्ययोः । तदनु तयोः प्रतिकारयितव्यम् । एव विषमदोषो मदात्ययश्चिकित्स्यः । तुल्यदोषे पुनर्मदात्यये कफस्थानानुपूर्व्या दोषान् प्रतिकारयेत् । कफस्थानानुपूर्वीव्याख्यानं कफचिकित्सिते व्याख्यातम् । किमेवं क्रियत इत्याह---- पित्तेत्यादि । हि यस्मात् पित्तमारुतावसानो बाहुल्येन मदात्ययः स्यात् । प्रथमं कफस्याधिक्यम् । [पि]त्तमारुतावधिकौ भवतः ॥

शशिलेखा

[...] क्रमप्राप्तं मदात्ययचिकित्सितं निर्णेतुमध्याय आरभ्यते । सर्वस्य मदात्ययस्य त्रिदोषजत्वादुच्यते —दोषमित्यादि । यत्र पुनर्न कस्यचिदाधिक्यं सर्वे समाः, तत्र कफस्थानानुपूर्व्या । आदौ कफः पश्चात् पित्त ततो वायुः । अस्मिन् क्रमे युक्तिः पित्तमारुतेत्यादि । सर्वस्मिन् मदात्यये कालक्रमेण पित्तमारुतावधिकौ भवतः ।प्रथमन्तु कफस्यैवाधिक्यम् ॥

तीक्ष्णोष्णाद्यैः पुरा प्रोक्तैर्दीपनाद्यैस्तथागुणैः ।
सात्म्यत्वाच्च तदेवास्य धातुसाम्यकरं परम् ॥ ९ ॥

सर्वाङ्गसुन्दरी

क्षारो हीत्यादि ॥ ननु कथं तान् मद्यमेव निहन्तीत्याह—यस्मात् क्षारोऽम्लोपसंहितो द्रागेव माधुर्यं याति । अम्लेषु मध्ये मद्यं श्रेष्ठं दोषविष्यन्दनात् पर्याप्तम् । पुरा मदात्ययनिदानोक्तैस्तीक्ष्णोष्णाद्यैर्गुणैस्तथा मद्यवर्गोक्तैर्दीपनाद्यैर्गुणैः करणभूतैः तदेव मद्यमस्य पुरुषस्य सात्म्यत्वाच्च सुष्ठु धातुसाम्यकरम् ।

शशिलेखा

मद्योद्भवानां मद्येनैव शान्तेः प्रकारान्तरेण युक्तिरुच्यते—क्षारो हीत्यादि । प्रथमेन मद्येनान्नरसे क्षारतां गते रोगा उत्पद्यन्ते । क्षारश्चाम्लोपसंहितः सन् माधुर्यं शीघ्रं याति । अम्लेषु च मद्यं श्रेष्ठमतस्तदेव विकारनाशनम् । तथा तीक्ष्णोष्णाद्यैः पुरा निदानस्थानप्रोक्तैः दीपनाद्यैश्च दोषाणां विष्यन्दनात् स्रावणात्तदेव पथ्यम् । अस्य च पुरुषस्य सात्म्याद्धेतोस्तदेव परं धातुसाम्यकरम् ॥

सप्ताहमष्टरात्रं वा कुर्यात् पानात्ययौषधम् ।
जीर्यत्येतावता पानं कालेन विपथाश्रितम् ॥ १० ॥

परं ततोऽनुबध्नाति यो रोगस्तस्य भेषजम् ।
यथायथं प्रयुञ्जीत कृतपानात्ययौषधम् ॥ ११ ॥

सर्वाङ्गसुन्दरी

सप्ताहमित्यादि— ततः सप्ताहमथवाऽष्टरात्रं पानात्ययौषधं कुर्यात् । यस्मादेतावता कालेन विपथाश्रितं विमार्गस्थं पानं जीर्यति परिणमति । तत एतस्मात् कालात् परमूर्ध्वं यो रोगः कृतपानात्ययौषधं नरमनुबध्नाति, तस्य रोगस्य यथायथं यथास्वं भेषजं प्रयुञ्जीत ।

शशिलेखा

यच्च मदात्ययोद्देशे औषधमुक्तं तत् सप्ताहमष्टरात्रं वा कुर्यात् । एतावता हि कालेन विपथाश्रितं विमार्गस्थं मद्यं जीर्यति। तत ऊर्ध्वं य एव रोगः कृत-

पानात्ययौषधमातुरमनुबध्नाति, तस्यैव भेषजं कुर्यात्। यथायथमिति दोषाद्यपेक्षया स्वस्य प्रकरणे विहितम् ॥

तत्र वातोल्बणे मद्यं दद्यात् पिष्टकृतं युतम्।
बीजपूरकवृक्षाम्लकोलडाडिमदीप्यकैः ॥ १२ ॥

यवानीहपुषाजाजीव्योषत्रिलवणार्द्रकैः।
शूल्यैर्मांसैर्हरितकैः स्नेहवद्भिश्च सक्तुभिः ॥ १३ ॥

उष्णस्निग्धाम्ललवणा मेद्यमांसरसा हिताः।
आम्राम्रातकपेशीभिः संस्कृता रागषाडवाः ॥ १४ ॥

गोधूममाषविकृतीर्मृदुचित्रा मुखप्रियाः।
आर्द्रिकार्द्रककुल्माषशुक्तमांसादिगर्भिणीः ॥ १५ ॥

सुरभिर्लवणाशीतानिगदावाच्छवारुणी।
स्वरसो डाडिमात् क्वाथः पञ्चमूलात् कनीयसः ॥ १६ ॥

शुण्ठीधान्यात्तथा मस्तुशुक्ताम्भोच्छाम्लकाञ्चिकम्।
अभ्यङ्गोद्वर्त्तनस्नानमुष्णं प्रावरणं घनम् ॥ १७ ॥

घनश्चागरुजो धूपः पङ्कश्चागरुकुङ्कुमात्।
कुचोरुश्रोणिशालिन्यो यौवनोष्णाङ्गयष्टयः ॥ १८ ॥

हर्षेणालिङ्गने युक्ताः प्रियाः संवाहनेषु च।

सर्वाङ्गसुन्दरी

इति सामान्येन चिकित्सितमुक्त्वा विशेषेणाह—

तत्रेत्यादि—तत्र तेषु मदात्ययेषु मध्ये वाताधिके मदात्यये पिष्टकृतं मद्यं दद्यात्। बीजपूरकादिभिर्देशसात्म्यादिवशात् समस्तैर्व्यस्तैर्वा यथायोगं युक्तं तथा मेद्यस्य मेदुरस्य मांसस्य रसा हिताः। किंभूताः। उष्णाः स्निग्धाम्ललवणाश्च।

ദീപ്യകം=കൊട്ടവേലി; അജാജി=അയമോദകം; ഹരിതകം=പച്ചക്കറി;

तथा रागाः षाडबाश्चाम्राम्रातकपेशीभिः संस्कृता हिताः। लक्षणमेषामृतुचर्यायामुक्तम्। तथा गोधूममाषयोः विकृतीर्हिताः। किंभूताः— मृदवोऽतीक्ष्णाः चित्रा नानाप्रकाराः मुखप्रिया वदनरुचिकृतः। तथा आर्द्रिकादिगर्भिणीः अच्छवारुणी च हिता। किंभूताः— सुरभिर्लवणा शीता च। तथा निगदा पुराणा वा। तथा डाडिमात् स्वरसो हितः। पञ्चमूलात् कनीयसो ह्रस्वात् क्वाथः शुण्ठीधान्याच्च क्वाथो हितः। तथा मस्त्वादि हितम्। तथा अभ्यङ्गादि उष्णं हितम्। प्रावरणमाच्छादनं घनं हितम्। अगरुजश्च धूपो घनो बहलो हितः। अगरुकुङ्कुमपङ्काऽनुलेपने हितः। तथा प्रियाः हर्षेण प्रीत्या आलिङ्गनं परिष्वङ्गस्तत्र युक्ताः। संवाहनेषु शरीरमर्दनेषु च युक्ता हिताः। किंभूताः— कुचाश्चोरवश्च श्रोणयश्च तैः शालिन्यः श्लाघ्या यास्ता एवम्। तथा यौवनेनोष्णा अङ्गयष्टिः शरीरलता यासां ता एवम्॥

शशिलेखा

तत्रेत्यादिना पानात्ययौषधं प्रदर्श्यते। शालिपिष्टकृतं मद्यं बीजपूरकादिभिर्यथोपयोगं युक्तं मदात्यये वातोल्बणे दद्यात्। तत्र चोष्णादिगुणा मांसरसा हिताः। सुबोधम्। पेश्यः खण्डाः। मृद्वादिगुणयुक्ता गोधूममाषविकृतीः चित्रा भक्ष्यादिनानेकप्रकाराः। तथा आर्द्रिकादिमिश्रा विकृतीः। कुल्माषोर्धस्विन्नानि सस्यानि। गर्भिणीरन्तरान्तरा युक्ताः। अच्छवारुणी सुरभित्वादिगुणयुक्ता हिता। सुबोधम्। शुण्ठीधान्यात् क्वाथः। धूपो घनः प्रभूतः। पङ्कः कर्दमः। प्रियाश्च हिताः। कीदृग्भूताः— कुचादिभी रमणीयत्वेन याः श्लाघन्ते। याश्च यौवनोष्णाङ्गयष्टयो हर्षेण प्रीत्या आलिङ्गने संवाहनेषु च युक्ताः अनुरूपाः॥

पित्तोल्बणे बहुजलं शार्करं मधु वा युतम् ॥ १९ ॥

रसैर्डाडिमखर्जूरभव्यद्राक्षापरूषजैः।
सुशीतं ससितासक्तु योज्यं तादृक् च पानकम् ॥ २० ॥

स्वादुवर्गकषायैर्वा युक्तं मद्यं समाक्षिकम्।
शालिषष्टिकमश्नीयाच्छशाजैणकपिञ्जलैः ॥ २१ ॥

सतीनमुद्गामलकपटोलीडाडिमैरपि।

ഭവ്യം=മധുരനാരങ്ങ; സതീനം=വട്ടക്കടല.

सर्वाङ्गसुन्दरी

पित्तोल्बण इत्यादि ॥ पित्ताधिके मदात्यये बहुजलं शार्करं मद्यविशेषं योज्यम् । मधु मार्द्वीकं वा रसैर्डाडिमादिजैर्युक्तं तच्च सुष्ठु शीतं कृत्वा योज्यम् । परूषकाण्यत्र मधुराणि योज्यानि । नाम्लानि । तेषां कफपित्तकरत्वात् । तथा च मुनिः—"अम्लं परूषकं द्राक्षा बदराण्यारुकाणि च । पित्तश्लेष्मप्रकोपीनि" इति । तादृक् सुशीतं पानकञ्च योज्यम् । किंभूतम्—सह सितासक्तुभिर्वर्त्तते यत्तदेवम् । सक्तवश्च शालीनां योज्याः योग्यतरत्त्वान्नतु यवानाम् । तथा स्वादुवर्गस्य क्वाथेन युक्तं मद्यं समाक्षिकं योज्म् । शालिषष्टिकं भुञ्जीत । कैस्सह—शशादिजैः रसैः ॥

शशिलेखा

पित्तोल्बणे मदात्यये बहुना जलेन मिश्रितं शार्करं मधु मार्द्वीकं वा बहुजलं डाडिमादिजै रसैर्युक्तमुभयमपि योज्यम् । तच्च सुशीतत्वादिस्वरूपं योज्यम् । पानकमपि तादृक् सशर्करं ससक्तु च । सुबोधम् ॥

कफपित्तं समुत्क्लिष्टमुल्लिखेत्तृड्विदाहवान् ॥ २२ ॥

पीत्वाम्बु शीतं मद्यं वा भूरीक्षुरससंयुतम् ।
द्राक्षारसं वा संसर्गी तर्पणादिः परं हिता ॥ २३ ॥

तथाग्निर्दीप्यते तस्य दोषशेषान्नपाचनः ।
कासे सरक्तनिष्ठीवे पार्श्वस्तनरुजासु च ॥ २४ ॥

तृष्णायां सविदाहायां सोत्क्लेशे हृदयोरसि ।
गुडूचीभद्रमुस्तानां पटोलस्याथवा रसम् ॥ २५ ॥

सशृङ्गिबेरं युञ्जीत तित्तिरिप्रतिभोजनम् ।

सर्वाङ्गसुन्दरी

कफपित्तमित्यादि ॥ तृड्विदाहवान् मदात्ययी कफपित्तं समुत्क्लिष्टं स्वस्थानाच्चलितं समुल्लिखेत् सम्यग्वमेत् । किं कृत्वा—अम्बु शीतं पीत्वा मद्यं वा भूरिणेक्षुरसेन संयुतं पीत्वा । परमनन्तरं संसर्गी तर्पणादिर्हिता । कृत-

वमनादिकस्यानन्तरं पेयादिकः क्रमः संसर्गीत्युच्यते। एवं कृते सति तस्य मदास्ययिनोऽग्निर्दीप्यते। किंभूतः—दोषशेषस्यान्नस्याहारस्य पाचनः। कासे रक्तनिष्ठीवसहिते पार्श्वरुजासु च तृष्णायां विदाहसहितायां हृदये उरसि च सोत्क्लेशे सति गुळूच्यादीनां रसमथवा पटोलस्य रसं सनागरं युञ्जीत। तित्तिरिप्रतिभोजनम्। अल्पस्तित्तिरिस्तित्तिरिप्रति। 'सुप्रतिना मात्रार्थे' इत्यव्ययीभावः॥

शशिलेखा

कफपित्तमित्यादि सुबोधम्। संसर्गी शोधने पेयादिक्रमाख्या तर्पणादिका हिता। तर्पणाः सक्तवः पेयास्थाने तत्र योज्याः न तु पेयाः। तथा शोधनसंसर्गीक्रमेणाग्निर्दीप्यते, योऽग्निर्दोषशेषमन्नञ्च पचति। कासादिके गुळूच्यादीनां क्वाथः सनागरः। भोजनं तित्तिरिणा रसादिप्रयुक्तेन॥

तृष्यते चाऽतिबलवद्वातपित्ते समुद्धते ॥ २६ ॥

दद्याद् द्राक्षारसं पानं शीतं दोषानुलोमनम्।
जीर्णेऽद्यान्मधुराम्लेन छागमांसरसेन वा ॥ २७ ॥

तृष्यल्पशः पिबेन्मद्यं मदं रक्षन् बहूदकम्।
मुस्तडाडिमलाजाम्बु जलं वा पर्णिनीशृतम् ॥ २८ ॥

पाटल्युत्पलकन्दैर्वा स्वभावादेव वा हिमम्।

सर्वाङ्गसुन्दरी

तृष्यत इत्यादि॥ अतितृष्यते च पुरुषाय वातपित्तेऽधिके सति द्राक्षारसं पानं दद्यात्। किंभूतम्—शीतलं तथा दोषानुलोमनम्। जीर्णे च तस्मिन् छागमांसरसेन मधुराम्लेनाश्नीयात्। तृषि सत्यामल्पं मद्यं मदं रक्षन् बहूदकं पिबेत्। मुस्तादिजलं वा पिबेत्। पर्णिनीभिः क्वथितं वा पाटल्यादिभिः शृतं वा। सर्वमेतच्छीतं पातव्यम्। यतो वक्ति 'स्वभावादेव वा हिमम्' इति॥

शशिलेखा

तृष्यत इत्यादि सुबोधम्। जीर्ण इति द्राक्षारसे। तृषि सत्यामल्पं मद्यं पिबेत्। यदा पिबेत्तदा बहुनोदकेन युक्तं पिबेत्। मदं रक्षन् मुस्ताद्यम्बु वा पर्णिनीचतुष्टयकृतं वा जलं केवलमेव वा स्वभावशीतम्॥

मद्यातिपानादब्धातौ क्षीणे तेजसि चोद्धते ॥ २९ ॥

यः शुष्कगलताल्वोष्ठो जिह्वां निष्क्रम्य वेष्टते ।
पाययेत् कामतोऽम्भस्तं निशीथपवनाहतम् ॥ ३० ॥

कोलडाडिमवृक्षाम्लचुक्रीकाचुक्रिकारसः ।
पञ्चाम्लको मुखालेपः सद्यस्तृष्णां नियच्छति ॥ ३१ ॥

सर्वाङ्गसुन्दरी

मद्यातिपानादित्यादि ॥ मद्यस्यातिपानाद्धेतोरब्धातौ क्षीणेऽल्पीभूते तेजसि चोद्धते क्षोभिते सति यः पुरुषः शुष्कगलताल्वोष्ठः सन् जिह्वां निष्क्रम्य निस्सार्य वेष्टते इतश्चेतश्च लुठति तं नरं कामत इच्छयाम्भो निशीथे यः पवनस्तेनाहतं पाययेत् । कोलादिभिः पञ्चाम्लको मुखालेपो द्राक् तृष्णां शमयति ॥

शशिलेखा

मद्यातिपानादित्यादि सुबोधम् । कामतो यथेच्छं तमातुरमम्भः पाययेद्रात्रौ प्रवातस्थितम् । कोलादिको मुखालेपो नाम्ना पञ्चाम्लकस्तृष्णां सद्यो नियच्छति । कोलो बदरः । डाडिमवृक्षाम्लौ प्रसिद्धौ । चुक्रीका अम्लवेतसः । चुक्रिका चाङ्गेरी ॥

[1]त्वचं प्राप्तश्च मद्योष्मा पित्तरक्ताभिमूर्छितः ।
दाहं प्रकुरुते घोरं तत्राऽतिशिशिरो विधिः ॥ ३२ ॥

[2]अशाम्यति रसैस्तृप्ते रोहिणीं व्यधयेत्सिराम् ।

सर्वाङ्गसुन्दरी

त्वचमित्यादि ॥ पानस्य मद्यस्योष्मा त्वचं प्राप्तः पित्तरक्ताभ्यामभिमूर्छितो मिश्रितः दाहं दारुणं प्रकर्षेण कुरुते । तत्र दाहेऽतिशीतो विधिः कार्यः । शीतोपचारेणाप्यशाम्यति सति दाहे मांसरसैस्तृप्ते नरे रोहिणीसंज्ञां सिरां व्यधयेत् । वैद्य इति शेषः । व्यधयेदिति घटादित्वान्मित्वे ह्रस्वः ॥

---

1 "पानोष्मा" इति सङ्ग्रहे । 2 शाखाश्रया बाहुजङ्घाश्रया । रोहिणी लोहिता सिरा इति डल्हणाचार्यः ।

शशिलेखा

पानकृत ऊष्मा पित्तरक्ताभ्यां विमिश्रितः सन् त्वचं प्राप्तो घोरं दाहं प्रकुरुते। मोहस्तृष्णादिकरत्वात् घोरत्वम्। तत्र दाहाधिक्ये अतिशिशिरो विधिर्दाहज्वरादावुक्तः कार्यः। सङ्ग्रहे तूक्तम्। "प्रभातमारुतोद्धूताः प्रालेयजलवर्षिणः। स्मर्यमाणा अपि घ्नन्ति दाहं मलयपादपाः" इत्यादि। एवमप्यशाम्यति दाहे रसैर्जाङ्गलैरिति युक्त्या कृततर्पणे पुरुषे सति रोहिणीं शुद्धशोणितवहां सिरां शाखाश्रितामित्यर्थात् व्यधयेत्॥

उल्लेखनोपवासाभ्यां जयेच्छ्लेष्मोल्वणं पिबेत् ॥ ३३ ॥

शीतं शुण्ठीस्थिरोदीच्यदुःस्पर्शान्यतमोदकम्।
निरामं क्षुधितं काले पाययेद्बहुमाक्षिकम् ॥ ३४ ॥
शार्करं मधु वा जीर्णमरिष्टं शीधुमेव वा।
रूक्षतर्पणसंयुक्तं यवानीनागरान्वितम् ॥ ३५ ॥

सर्वाङ्गसुन्दरी

उल्लेखनमित्यादि॥ श्लेष्माधिकं मदात्ययं वमनोपवासाभ्यां जयेत्। शुण्ठ्याद्यन्यतमोदकं शीतं पिबेत्। ततो निरामं जातक्षुधं सन्तं काले यथोचिते शार्करं मधु मार्द्वीकं वा बहुक्षौद्रं पाययेत्। किंभूतम्--रूक्षा ये तर्पणास्तैः संयुक्तं तथा यवानीशुण्ठीभ्याञ्च युक्तम्॥

शशिलेखा

कफोल्बणन्तु मदात्ययमुल्लेखनोपवासाभ्यां जयेत्। उल्लेखनं वमनम्। दोषाद्यपेक्षयैतयोरुपयोगः। कफमदात्ययी तृड्वानिति प्रकरणात् शुण्ठ्यादीनामन्यतमेन सिद्धमुदकं शीतं पिबेत्। निरामं मदात्ययिनं क्षुधितं रूक्षैरस्नेहैस्तर्पणैर्लाजसक्तुभिः संयुक्तं शार्करं वा जीर्णं वा मधु द्राक्षारसमरिष्टं शीधुमेव वा बहुना माक्षिकेण युक्तं काले पाययेत्। एतच्च सर्वं यवानीनागराभ्यामन्वितं युतम्॥

यूषेण यवगोधूमं तनुनाऽल्पेन भोजयेत्।
उष्णाम्लकटुतिक्तेन कौलत्थेनाल्पसर्पिषा ॥ ३६ ॥

शुष्कमूलकजैश्छागै रसैर्वा धन्वचारिणाम् ।
साम्लवेतसवृक्षाम्लपटोलीव्योषडाडिमैः ॥ ३७ ॥

सर्वाङ्गसुन्दरी

यूषेणेत्यादि ॥ तथा कौलत्थेन यूषेण यवगोधूमं भोजयेत् । किंभूतेन—तनुना स्वच्छेन । तथाऽल्पेनाल्पमात्रेण तथोष्णाम्लकटुतिक्तेनाल्पघृतेन अथवा शुष्कमूलकजै रसैश्छागैर्वा रसैर्धन्वचारिणां वा रसैर्भोजयेत् । किंभूतैः—सहाम्लवेतसवृक्षाम्लपटोलत्रिकटुडाडिमैः ॥

शशिलेखा

कौलत्थेन च यूषेण तनुना स्वच्छेनाल्पेन चोष्णगुणादिविशिष्टेनाल्पसर्पिषा यवगोधूमं भोजयेत् । रसैर्वा भोजयेत् । कैरित्याह —शुष्कमूलकच्छागकृतैर्धन्वचारिणां संबन्धिभिर्वा ॥

प्रभूतशुण्ठीमरिचहरितार्द्रकपेशिकम् ।
बीजपूररसाद्यम्लं भृष्टं नीरसवर्तितम्[1] ॥ ३८ ॥

करीरकरमर्दादि रोचिष्णु बहुसाळनम् ।
प्रव्यक्ताष्टाङ्गलवणं विकल्पितनिमर्दकम् ॥ ३९ ॥

यथाग्नि भक्षयन् मांसं माधवं निगदं पिबेत् ।
सितासौवर्चलाजाजीतिन्त्रिणीकाम्लवेतसम् ॥ ४० ॥

त्वगेलामरिचार्धांशमष्टाङ्गलवणं हितम् ।
स्रोतोविशुद्ध्यग्निकरं कफप्राये मदात्यये ॥ ४१ ॥

सर्वाङ्गसुन्दरी

प्रभूत इत्यादि ॥ मांसं यथाग्नि अग्न्यनतिक्रमेण भक्षयन्माधवं निगदं पुराणं पिबेत् । किंभूतं मांसम् —विविधैः प्रकारैः कल्पितो निष्पादितो निमर्दको येन मांसेन तद्विकल्पितनिमर्दकम् । तदेव विविधप्रकारत्वं निमर्दकस्याह—प्रभूता उत्कटाः शुण्ठीमरिचहरितार्द्रकपेशयो यस्मिंस्तदेवम् । हरितार्द्रकस्य

1 जज्जटस्तु एवमाह—"नीरसवर्तितं निर्गतो रसोऽस्येति नीरसम् । वर्तितं वृत्ततां यातं परिशुष्कम् । व्यञ्जनमिति यावदि"ति ।

शस्त्रकृता दीर्घाकारा अवयवाः पेशय उच्यन्ते। तथा बीजपूररसादिभिरम्लः। तथा भृष्टः यथायथं स्नेहेन नीरसः शुष्कप्रायो वर्तितो व्यञ्जनप्रकारो यत्र तदेवम्। तथा करीरकरमर्दादीनि रोचिष्णूनि रोचनानि बहूनि साळनानि शाकानि यत्र तदेवम्। तथा प्रकर्षेण व्यक्तं स्फुटमष्टाङ्गलवणं वक्ष्यमाणं यत्र तदेवम्। क्रियाविशेषणान्येतानि। सिताद्येतदष्टाङ्गलवणमन्वर्थसंज्ञं कफाधिके मदात्यये हितं स्रोतःशुद्धिकृदग्निदीपनञ्च॥

शशिलेखा

तस्मिंश्च मदात्यये यथाग्नि मांसं भक्षयन् निगदं निर्दोषं माधवं पिबेत्। तच्च मांसं प्रभूतशुण्ठ्यादिकम्। आर्द्रकपेशिका आर्द्रकदलानि। बीजपूररसादिना चाम्लम्। भृष्टं घृते। नीरसवर्तितं समचिक्कणपक्वम्। करीरादिकं रोचिष्णु बहु च साळनमुपदंशो यस्मिन् मांसे। तथा प्रव्यक्तं प्रभूतमष्टाङ्गाख्यं वक्ष्यमाणं लवणं यत्र। विकल्पिता निमर्दका येन मांसेन। मांसहरितकवर्गादिनानारसोऽच्छगोधूमावेष्टितो वटकाकृत्या छिन्नो निमर्दक उच्यते। सितादिकमष्टाङ्गलवणाख्यं कफप्राये मदात्यये हितं स्रोतोविशुद्ध्यग्निकरञ्च। एको भागः सितादीनां ततोऽर्धेन द्वितीयस्त्वगादीनाम्॥

रूक्षोष्णोद्वर्त्तनोद्घर्षस्नानभोजनलङ्घनैः।
सकामाभिः सह स्त्रीभिर्युक्त्या जागरणेन च ॥ ४३ ॥
मदात्ययः कफप्रायः शीघ्रं समुपशाम्यति

सर्वाङ्गसुन्दरी

रूक्षोष्णेत्यादि॥ रूक्षोष्णोद्वर्तनादिभिर्लङ्घनैस्तथा युक्त्या देशकालसात्म्याद्यपेक्षिण्या सकामाभिर्दयितादिभिः सह यज्जागरणं तेन च कफाधिको मदात्ययो द्रागेव शमं याति॥

शशिलेखा

रूक्षोष्णोद्वर्तनादिभिः कफप्रायो मदात्ययः शीघ्रं समुपशाम्यति॥

यदिदं कर्म निर्दिष्टं पृथग् दोषबलं प्रति ॥ ४४ ॥
सन्निपाते दशविधे तच्छेषेऽपि विकल्पयेत्।

सर्वाङ्गसुन्दरी

यदिदमित्यादि ।। तत्र वातोल्बणे मदात्यये मद्यमित्यादि, तथा पित्तोल्बणे बहुजलमित्यादि, तथा उल्लेखनोपवासाभ्यां जयेच्छ्लेष्मोल्बणमित्यादि च त्रिविधं सन्निपातं पृथग्दोषबलं प्रति लक्षीकृत्य यदिदं कर्म निर्दिष्टमुक्तं तत् कर्म न केवलमत्र त्रिविधे सन्निपाते किन्तु शेषे दशविधे सन्निपातेऽपि विकल्पयेद्द्विविधं कृत्वा कल्पयेत् कुर्यात् । वैद्य इति शेषः । एतदुक्तं भवति —वातोल्बणे मदात्ययजे सन्निपाते यत् कर्म निर्दिष्टं तथा पित्तोल्बणे मदात्ययजे सन्निपाते च यत् कर्म निर्दिष्टं तदेव वातपित्तोल्बणे कुर्यात् । एवं दोषबलमपेक्ष्य सर्वस्मिन् मदात्यये चिकित्सितं कुर्यात् । स दशविधः सन्निपातः शिष्यहिताय पद्येन प्रदर्श्यते ।।

"उत्कर्षेण यदा त्वेको मध्येन द्वौ तदादिमः ।
उत्कर्षेण यदा द्वौ तु मध्येनैको द्वितीयकः ।।

एको मध्येन दोषः स्याद् द्वावल्पेन तृतीयकः ।
उत्कर्षेणैक एव स्यादल्पेन द्वौ चतुर्थकः ।।

उत्कर्षेण यदा द्वौ तु अल्पेनैकश्च पञ्चमः ।
एकोऽल्पेन तु मध्येन द्वौ दोषाविति षष्ठकः ।।

उत्कर्षिणः समस्ताः स्युरेवं भवति सप्तमः ।
मध्येन सर्वेऽपि यदा तदा भवति चाष्टमः ।।

अल्पेन सर्वेऽपि यदा तदा तु नवमः स्मृतः ।
अल्पेनैको मध्येनाप्येक उत्कर्षतः स्मृतः ।।
सन्निपातस्य मुनिना दश भेदाः प्रकीर्तिताः ।।"

शशिलेखा

पृथग्वातादिदोषबलं प्रति निर्दिष्टं यत्कर्म तन्मिश्रीकृत्य तारतम्यविकल्पेन च शेषे दशविधे सन्निपातेऽपि विकल्पयेत् । पूर्वं हि त्रयोदशविधः सन्निपात उक्तः । तत्र एकदोषातिशयेन यः सोऽत्र प्रदर्शितः । द्व्यतिशयेन त्रयस्तुल्याधिकैश्चैकः सन्निपातः तारतम्यविकल्पनाच्च षट्कमित्येतद्दशकम् ।।

त्वङ्नागपुष्पमगधामरिचाजाजिधान्यकैः ।। ४५ ।।

परूषकमधूकैलासुराह्वैश्च सितान्वितैः ।
सकपित्थरसं हृद्यं पानकं शशिबोधितम् ॥ ४६ ॥

मदात्ययेषु सर्वेषु पेयं रुच्यग्निदीपनम् ।
नाविक्षोभ्य मनो मद्यं शरीरमविहन्य वा ॥ ४७ ॥

कुर्यान्मदात्ययं तस्मादिष्यते हर्षणी क्रिया ।

सर्वाङ्गसुन्दरी

त्वगित्यादि ॥ त्वगादिभिः सितान्वितैः कपित्थरससंयुक्तं कर्पूरकृताधिवासं हृद्यं पानकं सर्वेषु मदात्ययेषु पातव्यं रुच्यमग्नेर्वृद्धिकरम् ॥ मद्यं यस्मान्मानसं नाविक्षोभ्यापि तु मनसः क्षोभणं कृत्वा न च शरीरस्य विहननमकृत्वैव यथाकथञ्चिन्मदात्ययं कुर्यात् । यत एवं तस्माद्धेतोर्हर्षोत्पादिका क्रिया इष्यते ॥ "नाक्षोभ्ये"त्ययन्तु पाठो न श्रेयान् । ल्यबादेशस्यात्र दुर्लभत्वात् ॥

शशिलेखा

त्वगादिभिः शशिबोधितं नाम पानकम् । सुबोधम् । नागपुष्पं नागकेसरम् । मगधा मागधी । शशी कर्पूरम् । सर्वस्मिन् मदात्यये हर्षणी क्रियेऽष्यते । यस्मान्मद्यं मनो नाक्षोभ्यापि तु संक्षोभ्य मदात्ययं कुरुते शरीरञ्चाविहन्यापि तु विहन्य उभयत्रापि हर्षणी क्रिया हिता ॥

संशुद्धिशमनाद्येषु मददोषः कृतेष्वपि ॥ ४८ ॥
न चेच्छाम्येत् कफे क्षीणे जाते दौर्बल्यलाघवे ।
तस्य मद्यविदग्धस्य वातपित्ताधिकस्य च ॥ ४९ ॥

ग्रीष्मोपतप्तस्य तरोर्यथा वर्षं तथा पयः ।
मद्यक्षीणस्य हि क्षीणं क्षीरमाश्वेव पुष्यति ॥ ५० ॥

ओजस्तुल्यं गुणैः सर्वैर्विपरीतं च मद्यतः ।

सर्वाङ्गसुन्दरी

संशुद्धीत्यादि ॥ संशुद्धिशमनाद्येषूपक्रमेषु कृतेष्वपि यदि मददोषो मद्योत्थो व्याधिर्न शाम्येत्तस्य मद्येन विदग्धस्यात एव च कफे सौम्यधातौ क्षीणे अत

एव जाते दौर्बल्यलाघवे अल्पप्राणत्वे कार्श्ये च सति तदानीं सामर्थ्याद्वातपित्तयोरतिरिक्तता। वातपित्ताधिकस्य च क्षीणौजस्त्वात्तथा पयः पथ्यं यथा ग्रीष्मोपतप्तस्य तरोर्वर्षम्। वर्षमिति वृषेः कृद्विधौ भयादीनामुपसंख्यानमित्यच्। हि यस्मात् तुल्यं गुणैः सर्वैर्गुर्वादिभिरोजसः क्षीरं मद्याच्च विपरीतं गुणैः। तथा च मुनिः—"स्वादु शीत मृदु स्निग्धं बहळं श्लक्ष्णपिच्छिलम्। गुरु मन्दं प्रसन्नञ्च गव्यं दशगुणं पयः॥ तदेवंगुणमेवौजः सामान्यादभिवर्धयेत्" इति॥ यतश्चैवं तस्मान्मद्यक्षीणस्य क्षीणमोजः क्षीरमाश्वेव पुष्यति वृद्धिं प्रापयति। नत्वपरं द्रव्यं यथोक्तहेत्वभावात्॥

शशिलेखा

संशुद्धीत्यादिना क्षीरस्य विषय उच्यते। मद्येन क्षीणस्य पुरुषस्य यत् किञ्चित् क्षीणमोजस्तत् क्षीरं शीघ्रमेव पुष्यति यतस्तत् क्षीरमोजसो गुणैः सर्वैस्तुल्यं मद्यस्य च विपरीतम्॥

पयसा विजिते रोगे बले जाते निवर्तयेत् ॥ ५१ ॥

क्षीरप्रयोगं मद्यञ्च क्रमेणाल्पाल्पमाचरेत्।
न विक्षयध्वंसकोत्थैः स्पृश्येतोपद्रवैर्यथा ॥ ५२ ॥

तयोस्तु स्याद्घृतं क्षीरं वस्तयो बृंहणाः शिवाः।
अभ्यङ्गोद्वर्तनस्नानमन्नपानञ्च वातजित्। ॥ ५३ ॥

सर्वाङ्गसुन्दरी

पय इत्यादि ॥ पयसा रोगे मदात्ययाख्ये विजिते निवर्तिते बले जाते सति मद्योचितः पुमान् क्षीरप्रयोगं निवर्तयेत्। मद्यञ्चाल्पाल्पं क्रमेणोपयुञ्जीत। यथा विक्षयध्वंसकोद्भवैरुपद्रवैरसौ न स्पृश्येत। विक्षयोद्भवा विकाराः कायशिरोरोगाद्याः ध्वंसकोद्भवा उपद्रवाः श्लेष्मनिष्ठीवादयः। तयोर्विक्षयध्वंसकयोस्तु घृतं क्षीरं चिकित्सितं स्यात्। तथा वस्तयो बृंहणाः शिवा निरपायाः। तथाऽभ्यङ्गादीनि यच्च वातजिदन्नपानं तच्च स्यात्॥

शशिलेखा

तयोर्विक्षयध्वंसकयोस्तु घृतादिकं वातजित् स्यात्॥

युक्तमद्यस्य मद्योत्थो न व्याधिरुपजायते ।
अतोऽस्य वक्ष्यते योगो यः सुखायैव केवलम् ॥ ५४ ॥

सर्वाङ्गसुन्दरी

युक्तमद्यस्येत्यादि ॥ युक्तमद्यस्य पुंसो मद्योत्थो व्याधिर्नोपजायते । युक्तमद्यत्वाद्यतोऽतोस्माद्धेतोरस्य मद्यस्य स योगो वक्ष्यते यः केवलं सुखायैव स्यात् ॥

शशिलेखा

उपयुक्तमद्यस्य पुंसो मद्योत्थो व्याधिर्न जायत एव यतोऽतः कारणादस्य मद्यस्य योगो वक्ष्यते यः सुखायैव केवलम् ॥

आश्विनं या महत्तेजो बलं सारस्वतं च या ।
दधात्यैन्द्रं च या वीर्यं प्रभावं वैष्णवं च या ॥ ५५ ॥

अस्त्र मकरकेतोर्या पुरुषार्थो बलस्य या ।
सौत्रामण्यां द्विजमुखे या हुताशे च हूयते ॥ ५६ ॥

या सर्वौषधिसंपूर्णान्मथ्यमानात्सुरासुरैः ।
महोदधेः समुद्भूता श्रीशशाङ्कामृतैः सह ॥ ५७ ॥

मधुमाधवमैरेयशीधुगौडासवादिभिः ।
मदशक्तिमनुज्झन्ती या रूपैर्बहुभिः स्थिता ॥ ५८ ॥

यामास्वाद्य विलासिन्यो यथार्थं नाम बिभ्रति ।
कुलाङ्गनाऽपि यां पीत्वा नयत्युद्धतमानसा ॥ ५९ ॥

अनङ्गालिङ्गितरङ्गैः क्वापि चेतो मुनेरपि ।
तरङ्गभङ्गभ्रुकुटीतर्जनैर्मानिनीमनः ॥ ६० ॥

एकं प्रसाद्य कुरुते या द्वयोरपि निर्वृतिम् ।
यथाकामभटावासिपरिहृष्टाप्सरोगणे ॥ ६१ ॥

तृणवत् पुरुषा युद्धे यामास्वाद्य त्यजन्त्यसून् ।
यां शीलयित्वापि चिरं बहुधा बहुविग्रहाम् ॥ ६२ ॥

नित्यं हर्षातिवेगेन तत्पूर्वमिव सेवते।
शोकोद्वेगारतिभयैर्यां दृष्ट्वा नाभिभूयते ॥ ६३ ॥

गोष्ठीमहोत्सवोद्यानं न यस्याः शोभते विना।
स्मृत्वा स्मृत्वा च बहुशो वियुक्तः शोचते यया ॥ ६४ ॥

अप्रसन्नाऽपि या प्रीत्यै प्रसन्ना स्वर्ग एव या।
अपीन्द्रं मन्यते दुःस्थ हृदयस्थितया यया ॥ ६५ ॥

अनिर्देश्यसुखास्वादा स्वसंवेद्यैव या परम्।
इति चित्रास्ववस्थासु प्रियामनुकरोति या ॥ ६६ ॥

प्रियातिप्रियतां याति यत्प्रियस्य विशेषतः।
या प्रीतिर्या रतिर्या वाग्या पुष्टिरिति च स्तुता ॥ ६७ ॥

देवदानवगन्धर्वयक्षराक्षसमानुषैः।
पानप्रवृत्तौ सत्यान्तु तां सुरां विधिना पिबेत् ॥ ६८ ॥

सर्वाङ्गसुन्दरी

अधुना सुरां प्रशंसन्नाह—आश्विनमित्यादि ॥ या सुरा आश्विनं महत्तेजो दीप्तिं दधाति। आश्विनमिति 'अश्विनोरिदम्'इत्यण्। 'नस्तद्धित' इति टिलोपे प्राप्ते 'इनण्यनपत्य' इति प्रकृतिभावः। या सुरा सारस्वतं बलमुत्साहमैन्द्रञ्च वीर्यं शक्तिं वैष्णवञ्च प्रभावं माहात्म्यं दधाति। या च मदनस्यास्त्रं प्रहरणम्। बलभद्रस्य या पुरुषार्थः परं प्रयोजनम्। या च सौत्रामण्यां यज्ञे द्विजास्ये हुताशे च हूयते। या च महोदधेः सर्वौषधिसम्पूर्णाद्देवदानवैर्विलोड्यमानाल्लक्ष्म्यादिभिस्सहोत्पन्ना। या च सुरा मदशक्तिमत्यजन्ती बहुभिर्मध्वादिभिराकारैः स्थिता। यां सुरां पीत्वा विलासिन्यो मृगलोचना यथार्थमन्वर्थं नाम बिभ्रति विलासो विद्यते यासामिति। यां पीत्वा कुलवामलोचनाऽपि उद्धतमानसा सत्यनङ्गालिङ्गितैरङ्गैर्मुनेरपि चेतः क्वापि नयति। तरङ्गभङ्गा कुटिला भ्रुकुटिस्तरङ्गभङ्गभ्रुकुटिस्तया तर्जनानि प्रणयकलहविशेषास्तैर्मानिन्यः मानसमेकं प्रसाद्य द्वयोरपि स्त्रीपुंसोर्निर्वृतिं सौख्यं या सुरा करोति। यां सुरामास्वाद्य नराः समरे तृणमिव प्राणांस्त्यजन्ति। कीदृशे युद्धे —यथेष्टं भटस्य शूरपुरुषस्य याऽध्यासिस्तया परिहृष्टो मुदितोऽस्परः-सङ्घो यस्मिन्नाहवे तस्मिन्। यां सुरां बहुभिः प्रकारैराहारादिमध्यावसान-

लक्षणैस्तथा बहुविग्रहां मधुमाधवादिभिरनेकशरीरां शीलयित्वाऽपि नित्यं हर्षस्यातिवेगेन तत्पूर्वमिव तत्प्रथममिव सेवते। यां दृष्ट्वा उपलभ्यास्वादादिन शोकादिभिर्नाभिभूयते। यस्याः सुराय ऋते गोष्ठ्यादिर्न शोभते। यया च वियुक्तो बहुशः स्मृत्वा स्मृत्वा शोचते। स्मृत्वा शोचत इति तच्चित्तः। या चाऽप्रसन्ना कलुषाऽपि प्रीत्यै। प्रसन्ना स्वच्छा सती स्वर्ग एव या। यया चाऽन्तःस्थितया इन्द्रमपि दुःस्थितं मन्यते। अनिर्देश्यमभाषणीयं सुखं यस्मिन्नास्वादे स तथाविध आस्वादो यस्याः सैवम्। या केवलमात्मनैव वेद्या। इति पूर्वोक्तेन प्रकारेण चित्रासु नानाविधास्ववस्थासु प्रियां वल्लभामनुकरोत्यनुसरति। प्रियापक्षे विग्रहः प्रणयकलहः। अप्रसन्ना कुपिता। प्रसन्ना त्यक्तकोपा। अनिर्देश्यः सुखास्वादः सुखोपलम्भो यस्या इति योज्यम्। एवं यां शीलयित्वेत्यादिकः सर्वो ग्रन्थोऽपि प्रियायामपि योज्यः। तथा या सुरा प्रिया इष्टा अतिप्रियतां सुष्ठु वल्लभत्वं याति। यत्प्रियस्य प्रकृतत्वात् सुराप्रियस्य विशेषेण प्रियतां याति। या सुरा प्रीतिर्या रतिर्या वागिति या पुष्टिरिति च देवादिभिः स्तुता। पानप्रवृत्तौ सत्यान्तु येषां पानाधिकारोऽस्ति धर्मशास्त्रेष्वनिषिद्धत्वात् तां पूर्वोक्तगुणां सुरां विधिना वक्ष्यमाणेन पिबेत्॥

शशिलेखा

आश्विनमित्यादेस्तां सुरां विधिना पिबेदित्यनेन संबन्धः। एवमितिहासेषु श्रूयते, यथा किल—सुराया अश्विभ्यां स्वतेजो दत्तम्। सरस्वत्या च बलं इन्द्रेण वीर्यं विष्णुना प्रभाव इति। या च सुरा मकरकेतोः कामस्यास्त्रम्। बलस्य च हलभृतो या पुरुषार्थः। या च सौत्रामण्यामध्वरे द्विजमुखे ब्राह्मणप्रत्यक्षमग्नौ हूयते। या च महोदधेः सर्वौषधिसम्पूर्णात् सुरासुरैर्मथ्यमानात् श्रयादिभिः सहोत्पन्ना। या च मद्यादिभिर्बहुभी रूपैर्मदशक्तिमनुझन्ती स्थिता। यां चास्वाद्य विलासिन्यः कन्यों विलासिनीति नाम यथार्थं बिभ्रति, सुराया विलासस्यागमनात्। यां सुरां पीत्वा कुलाङ्गनाऽपि लज्जादिमत्त्वादललिताऽपि मुनेरप्यभ्यस्तधैर्यस्याऽपि क्वापि चेतो नयत्यनङ्गेन कामेनालिङ्गितैरङ्गैः करणभूतैः। या च सुरा एकं मानिनीमनः प्रसाद्य द्वयोरपि मानिनीवल्लभयोर्निर्वृतिं कुरुते। अतिनिबिडमानावष्टम्भपरवशाप्यास्वादितकादम्बरीरसा मानं पृष्ठतः कृत्वा अवधीरितपूर्वमपि प्रेयांसं प्रार्थयितुं यतते। तत्र चैवमुत्प्रेक्ष्यते यस्याः सुराया ये तरङ्गभङ्गाः सैव भ्रुकुटी तया तर्जनेन सखीव सख्या वल्लभावधीरणानुतापमियेव मानिन्या मानमवधीर्य मनः प्रसादयति, तया च प्रसन्नमनसा

द्वितीयो निर्वृतिमासादयति। तदिदं सुराया महत् कौशलम्। यदेकत्र प्रसादमापाद्या-न्यत्र निर्वृतिमातनोति। यां च सुरामास्वाद्य युद्धे पुरुषास्तृणवदसून् प्राणां-स्त्यजन्ति। किंभूते युद्धे। आह—यथेत्यादि। यथाकामं यथेच्छं या भटानामवाप्तिस्तया परिहृष्टोऽप्सरोगणो यस्मिन्युद्धे। "इति चित्रास्ववस्थासु प्रिया-मनुकरोति या" इति वक्ष्यमाणत्वात् सर्वत्रापीतःप्रभृति सुरायाः प्रियायाश्च श्लेषः। तथा च येनैव प्रिया आस्वादिता भवति, स एवाप्सरोविषये अतिशयं पश्यंस्तल्ला-भोपाये युद्धे तृणवदसूंस्त्यजति। यां सुरां बहुधा मध्वादिना बहुविग्रहां चिरं शील-यित्वाऽपि पुरुषो नित्यं तत्पूर्वमिव सेवते सदैवाभिनवामेवातिप्रियत्वाज्जानातीत्यर्थः। प्रियाऽपि बहुधा रतिप्रयोगैर्बहुविग्रहानेकशः कृतप्रणयकलहाऽपि नित्यं हर्षा-वेगेनाभिनवेव सेव्यते। यां च सुरां दृष्ट्वा शोकादिभिर्नाभिभूयते। प्रिया मपि दृष्ट्वा शोकादिभिर्नाभिभूयते। दर्शनाभिभवयोः शोकादय एव कर्तृत्वेन नीयन्ते येन समानकर्तृकत्वं भवति। तत्सन्निधाने शोकादयो न भवन्तीति तात्पर्यम्। यस्याश्च सुराया विना गोष्ठ्यादिकं न शोभते। प्रियया वा विना न शोभते। यया च सुरया वियुक्तस्तां स्मृत्वा स्मृत्वात्मानं शोचते। प्रियया वियुक्तश्च शोचते। या सुरा अप्रसन्नापि कलुषाऽपि प्रीत्यै भवति। प्रसन्ना स्वर्ग एव। प्रियाऽप्यकृतप्रसादापि प्रीत्यै भवति। प्रसन्ना पुनः स्वर्ग एव। यया च सुरया हृदयस्थितया पीतया पुरुषः इन्द्रमपि दुःस्थं मन्यते, आत्मानमेव सुस्थम्। तद्वत् प्रिययापि हृदयस्थितया मनसि गृहीतया। या च सुरा अनिर्देश्यसुखा-स्वादा। सुखमास्वादश्च यस्याः परस्य निर्देष्टुमिदन्तया न पार्यते। प्रियाऽप्येवम्। या च सुरा परं स्वसंवेद्यैव। प्रियाऽपि तद्वत्। इत्येवमनन्तरोक्तप्रकारेण चित्रासु विचित्रास्ववस्थासु या सुरा प्रियामनुकरोति, तां सुरां विधिना पिबेदिति सर्वत्र संबध्यते। यत् प्रियस्य पुरुषस्य प्रियाऽतिप्रियतां याति तां सुरां पिबेदिति सुरायाः प्रत्यवमर्शः। यस्य हि सुरा प्रिया तस्य पीतमात्रायामेव तस्यां वल्लभाऽपि नितरां वल्लभात्वं याति। प्रीत्यादिशब्दैश्च या देवादिभिःस्तुता। तां सुरां मद्यपानप्रवृत्तौ सत्यां पिबेद्वक्ष्यमाणेन विधिना। न तु यथेच्छम्॥

सम्भवन्ति न ते रोगा मेदोऽनिलकफोद्भवाः।
विधियुक्तादृते मद्याद्ये न सिध्यन्ति दारुणाः ॥ ६९ ॥

अस्ति देहस्य सावस्था यस्यां पानं निवार्यते।
अन्यत्र मद्यान्निगदाद्विविधौषधसम्भृतात् ॥ ७० ॥

आनूपं जाङ्गलं मांसं विधिनाऽप्युपकल्पितम् ।
मद्यं सहायमप्राप्य सम्यक् परिणमेत् कथम् ॥ ७१ ॥

सर्वाङ्गसुन्दरी

संभवन्तीत्यादि ॥ ते मेदोऽनिलकफोद्भवा रोगा न सम्भवन्ति । दारुणा दुःसाधाः । ये विधियुक्तान्मद्यादृते न सिद्ध्यन्ति । विधियुक्तेन मद्येन सर्वमेदोनिलकफजा रोगाः सिद्ध्यन्तीति भावः । देहस्य सावस्था प्रक्लिन्नदेह-मेहादिकाऽस्ति यस्यां पानं निवार्यते । मद्यादन्यत्र । किंभूतात्--- निगदात् । तथा विविधौषधसंस्कृतात् । मद्यमेवंविधं वर्जयित्वा पानं निषिध्यत इत्यर्थः । आनूपं जाङ्गलञ्च मांसं विधिनाऽप्युपकल्पितं मद्यं विनाऽप्युक्तं कथं सम्यक् परिणमेत् ॥

शशिलेखा

किं तया सुरया विधिना पीतया भवतीत्याह --सम्भवन्तीत्यादि । ये रोगा मेदःप्रभृतिजा दारुणास्ते विधियुक्तान्मद्यादृते द्रव्यान्तरेण न सिद्ध्यन्ति । विधियुक्तेन मद्येनैव सिद्ध्यन्ति । ते रोगा विधिपीतया सुरया न सम्भवन्ति न जायन्ते । एवंविधमपि विधियुक्तं पानं न सर्वत्र प्रयोज्यमिति प्रदर्शनार्थमाह--- अस्तीत्यादि । सुबोधम् । आनूपेत्यादिना मद्यसंस्कारा उच्यन्ते । मद्येन सहायेन मांसं सम्यक् परिणतिं यातीति तात्पर्यार्थः ॥

सुतीव्रमारुतव्याधिघातिनो लशुनस्य च ।
मद्यमांसवियुक्तस्य प्रयोगे स्यात् कियान् गुणः ॥ ७२ ॥

निगूढशल्याहरणे शस्त्रक्षाराग्निकर्मणि ।
पीतमद्यो विसहते सुखं वैद्यविकत्थनाम् ॥ ७३ ॥

अनलोत्तेजनं रुच्यं शोकश्रमविनाशनम् ।
न चातःपरमस्त्यन्यदारोग्यबलपुष्टिकृत् ॥ ७४ ॥

सर्वाङ्गसुन्दरी

पुनरपि मद्यमेव विशेषयन्नाह—सुतीव्रमारुत इत्यादि ॥ लशुनस्य दारुणतरवातव्याधिनाशिनः मद्यमांसरहितस्य प्रयोगे कियान् गुणः स्यात् । अल्प-

एवेत्यर्थः। तथा निगूढस्यात्यर्थं प्रणष्टस्य शल्यस्याहरणे तथा शस्त्रादिकर्मणि पीतमद्यो नरः सुखमक्लेशेन वैद्यविकत्थनां कदर्थनां सहते। तथा अनलस्याग्नेरुत्तेजनं वर्धकं रुच्यं शोकादिघ्नं न च किञ्चिदतोऽस्मान्मद्यात् परं श्रेष्ठमन्यदस्त्यारोग्यादिकृत्॥

शशिलेखा

महागुणस्य च लशुनस्य मद्यमांससंयुक्तस्यैव सफलत्वम्। तथा निगूढस्य देहे दूरप्राप्तस्यादृश्यस्य शल्यस्याहरणे शस्त्रादिकर्मणि वैद्यविकत्थनां वैद्यकदर्थनां पीतमद्य एव सुखं विषहते साधु सोढुं शक्नोति। सुबोधम्। अत इति मद्यात्॥

रक्षता जीवितं तस्मात् पेयमात्मवता सदा।
आश्रितोपाश्रितहितं परमं धर्मसाधनम्॥ ७५॥

सर्वाङ्गसुन्दरी

रक्षतेत्यादि॥ यत एवं महागुणं मद्यं तस्माज्जीवितं रक्षता नरेण तथाऽऽत्मवता धीमता सदा पेयमाश्रितानामुपाश्रितानां च हितम्। परमं धर्मस्य साधनमुपायः॥

शशिलेखा

तस्मान्मद्यमात्मवता बुद्धिमता जीविते रक्षां कुर्वता सदा पेयम्। मद्ये त्वनेकधा जीवितापाय आशङ्क्यते। आश्रितेत्यादि मद्यविशेषणम्। आश्रिता उपकृता भृत्यबान्धवाद्याः। उपाश्रिता आश्रिताश्रिताः॥

स्नातः प्रणम्य सुरविप्रगुरून्यथास्वं
वृत्तिं विधाय च समस्तपरिग्रहस्य।
आपानभूमिमथ गन्धजलाभिषिक्ता-
माहारमण्डपसमीपगतां श्रयेत॥ ७६॥

स्वास्तृतेऽथ शयने कमनीये
भृत्यमित्ररमणीसमवेतः

स्वं यशः कथकचारणसङ्घै-
रुद्धतं निशमयन्नतिलोकम् ॥ ७७ ॥

विलासिनीनाञ्च विलासशोभि
गीतं सनृत्तं कळतूर्यघोषैः ।
काञ्चीकलापैश्चलकिङ्किणीकैः
क्रीडाविहङ्गैश्च कृतानुनादम् ॥ ७८ ॥

मणिकनकसमुद्रैरावरैर्यैर्विचित्रैः
सजलविविधलेखक्षौमवस्त्रावृताङ्गैः ।
अपि मुनिजनचित्तक्षोभसम्पादिनीभि-
श्चकितहरिणलोलप्रेक्षणीभिः प्रियाभिः ॥ ७९ ॥

स्तननितम्बकृतादतिगौरवा-
दलसमाकुलमीश्वरसंश्रयात्[1] ।
इति गतं दधतीभिरसंस्थितं
तरुणचित्तविलोभनकार्मणम् ॥ ८० ॥

यौवनासवमत्ताभिर्विलासाधिष्ठितात्मभिः ।
सञ्चार्यमाणं युगपत्तन्वङ्गीभिरितस्ततः ॥ ८१ ॥

तालवृन्तनळिनीदळानिलैः
शीतळीकृतमतीव शीतळैः ।
दर्शनेऽपि विदधद्वशानुगं
स्वादितं किमुत चित्तजन्मनः ॥ ८२ ॥

चूतरसेन्दुमृगैः कृतवासं
मल्लिकयोऽज्ज्वलया च सनाथम् ।
स्फाटिकशुक्तिगतं सतरङ्गं
कान्तमनङ्गमिवोद्वहदङ्गम् ॥ ८३ ॥

तालीसाद्यं चूर्णमेलादिकं वा ।
हृद्यं प्राश्य प्राग्वयःस्थापनं वा ।

1 "सम्भ्रमादितीन्दुः" ।

तत्प्रार्थिभ्यो भूमिभागे सुमृष्टे
तोयोन्मिश्रं दापयित्वा ततश्च ॥ ८४ ॥

धृतिमान् स्मृतिमान्नित्यमनूनाधिकमाचरन् ।
उचितेनोपचारेण सर्वमेवोपपादयन्[1] ॥ ८५ ॥

जितविकसितामितसरोज-
नयनसंक्रान्तिवर्धितश्रीकम् ।
कान्तामुखमिव सौरभ-
हृतमधुपगणं पिबेन्मद्यम् ॥ ८६ ॥

सर्वाङ्गसुन्दरी

अथास्य पाने विधिमाह—**स्नात इत्यादि** ॥ स्नातो नरः सुरादीन् प्रणम्य यथास्वं यथायोग्यं समस्तस्य परिग्रहस्य परिकरस्य वृत्तिं कृत्वाऽथापानभूमिं गन्धजलेन कर्पूरोशीरादिसाधितेनाम्बुनाऽभिषिक्तामाश्रयेत् । पुनः कीदृशीम् । आहारमण्डपस्य समीपगतां निकटस्थिताम् । पीतमद्यस्य हि दूरं व्रजत आयासेन शरीरसादादि स्यात् । वसन्ततिलकं वृत्तम् । अथ भूमिश्रयणादनन्तरं शयने स्थितो मद्यं पिबेदिति वक्ष्यमाणेन संबन्धः । किंभूते शयने । सुष्ठु आस्तृते प्रदत्तप्रच्छदपटे । तथा कमनीये रम्ये । मित्रादिसहितः । किं कुर्वन् । स्वमात्मीयं यशः कथकादिसंघैर्निशमयन् श्रावयन् । कीदृशम् । उद्धतम् । तथाऽतिलोकमद्भुतस्वरूपम् । स्वागतावृत्तम् । तथा विलासिनीनां संबन्धि गीतं निशमयन् । किंभूतम् । सह नृत्तेन सनृत्तम् । द्वयमपि विलासशोभि । विलासलक्षणश्चोक्तम् । स्थानासनगमनानां हस्तभ्रूनेत्रकर्मणाञ्चैव । उत्पद्यते विशेषो यः श्लिष्टः स तु विलासः स्या"दिति । पुनः किंभूतं गीतम् । मधुरतूर्यशब्दैः तथा काञ्चीकलापैः चलन्त्यः किंकिण्यः सूक्ष्मघण्टिका येषां तैस्तथाविधैः । तथा क्रीडाविहङ्गैः सारसादिभिश्च कृतानुनादम् । उपजाति-र्वृत्तम्—किंभूतं मद्यम् । आवर्यैर्डौल्लिङ्गकनामभिर्भाण्डविशेषैस्तन्वङ्गीभिर्युगप-दितस्ततः सञ्चार्यमाणम् । एवं ह्यनुभूयमानं रामणीयकं धत्ते । किंभूतैरावर्यैः । मणिकनकसमुत्थैस्तथा विचित्रैर्नानाविधैस्तथा सजलं नानाप्रकारलेखं यत् क्षौम-वस्त्रं तेनावृतमङ्गं येषां तैः । किंभूताभिस्तन्वङ्गीभिः । अपि मुनिजनचित्त-

1 सर्वमेवोपलालयन्निति‌इन्दुः ।

क्षोभसम्पादिनीभिः। तथा चकितस्त्रस्तो यो हरिणस्तद्वल्लोलं प्रेक्षणं यासां ताभिः। बाहुलकात् कर्तरि ल्युट्र्। तथा प्रियाभिर्वल्लभाभिः। मालिनीवृत्तम्। तथा इति गतं गमनं दधतीभिः। किंभूतमसंस्थितमनवस्थितस्वरूपम्। तथा स्तनाभ्यां नितम्बेन च कृशादधिकं गौरवादलसं मन्दम्। तथेऽश्वरस्य प्रभोर्यः संश्रयमाश्रयणं तस्मादाकुलमत एव तरुणचित्तानां विलोभने कार्मणं वशीकरणम्। द्रुतविलम्बितमाह नभौ भरौ। किंभूताभिस्तन्वङ्गीभिः। यौवनासवाभ्यां मत्ताभिः। तथा विलासेनाधिष्ठित आत्मा चित्तं यासां ताभिः। पुनः कीदृश मद्यम्। तालवृन्तादिभिरतिशीतैः शीतलीकृतम्। दर्शनेऽप्येवंरूपं मद्यं कामस्य वशानुगं जनं विदधत् कन्दर्पोद्दीपनत्वात्। किमुत किं पुनः स्वादितं पीतं सत् कामवशानुगं जनं न कुर्यात्। नौरलौ गुरुयुता रथोद्धता। तथा चूतरसादिभि कृतवासं सुगन्धीकृतम्। तथा मल्लिकया पुष्पविशेषेण उज्वलया विकसितया सनाथं युक्तम्। तथा स्फटिकस्य विकारः स्फाटिकी स्फाटि की चासौ शुक्तिश्च तस्यां गतं स्थितम्। स्फटिकस्येयं स्फाटिकीति व्युत्पत्त्यां पुंवत्भावो दुर्निवारः स्यात्। तथा सतरङ्गम्। एवञ्च कान्तं रम्यमङ्गमुद्वहत्। उत्प्रेक्षते। अनङ्गं पञ्च-शरमिव चारुतरत्वेन कामोत्पादकत्वात्। दोधकं वृत्तम्। प्राक् पूर्वं ताली-साद्यं चूर्णमेलादिकं वा हृद्यमथवा वयःस्थापनं रसायनोक्तं प्राश्य भक्षयित्वा। तथा सुमृष्ट उपलिप्ते भूमिभागे तत्प्रार्थिभ्यो मद्यपानरतेभ्योऽधिकृतेभ्यो देवदानव-कूश्माण्डादिभ्यस्तोयोन्मिश्रं मद्यं दापयित्वा पश्चाज्जलं दापयितव्यमित्यर्थः। तत-श्चानन्तरं पिबेत्। शालिनीवृत्तम्। किं कुर्वन्। अनूनाधिकं पूर्वोक्तं नित्यमा-चरन्। धृतिमान् स्मृतिमांश्च सन् उचितेन योग्येनोपचारेण सर्वमेवोपपादयन्। किंभूतं मद्यम्। विकसितञ्च तदसितं च सरोजं विकसितासितसरोजम्। जितं न्यक्कृतं विकसितासितसरोजं याभ्यां नयनाभ्यां ते तथाविधे तयोः संक्रान्त्या प्रतिबिंबत्वेन संवर्द्धिता श्रीर्यस्य तदेवम्। तथा सौरभेण हृतोऽनन्यगतित्वात् भ्रमरसार्थो येन तदेवम्। सुरभेर्भावः सौरभम्। इगन्ताच्च लघुपूर्वादित्यण्। तच्च कान्तामुखमिव। यतो जितविकसितासितसरोजनयनयोर्या संक्रान्तिः सञ्चारः स कटाक्षेक्षितादिना तया संवर्धिता श्रीः शोभा यस्य तदेवम्। सक-टाक्षेक्षितं हि मुखं नितरां राजते। तथोक्तमुत्तमस्त्रीणां मुखं सुगन्धि भवतीति सौरभहृतमधुपगणम्। विपुलतयान्यथा पादभाक्॥

शशिलेखा

तच्च मद्यमेवंविधं पिबेदिति प्रदर्शनार्थमाह स्नात — इत्यादि। स्नातः सुरादीन् प्रणम्य सर्वस्य परिग्रहस्य यथास्वं वृत्तिं विधाय न तु भृत्यादेरसंविभज्य। एतत् कृत्वा प्रथममेवापानभूमिमाश्रयेत। किं भूतामाह। गन्धजलाभिषिक्तामाहारमण्डपनिकटवर्तिनीम्। अथ स्वास्तृते शयने स्थित इदमिदं कुर्वन् मद्यं पिबेत्। कमनीये कान्ते। कथकादिसंघैरुद्धतं स्वं यशः निशमयन् मनसा गृह्णन्। उत्कर्षेण लोकमतिक्रान्तमतिलोकम्। विलासिनीनाञ्च सनृत्तादिकं गीतं निशमयन्। तच्च गीतं काञ्चीकलापादिभिः कृतानुनादम्। तच्च मद्यमेवंविधमेवंविधाभिस्तन्वङ्गीभिः सञ्चार्यमाणम्। किंभूतं मद्यमाह मणीत्यादि। आवरेयैर्भाण्डविशेषैर्मणिमयैः कनकमयैर्वा। विचित्रैः रमणीयसंस्थानादिभिः। अन्यच्च किंभूतैरावरेयैः सजलानि जलार्द्राणि विविधभक्तीनि नानाविधरचितशकुनिपत्रादिविच्छेदानि यानि क्षौमाणि तैराच्छादितशरीरैः। किंभूताभिस्तन्वङ्गीभिः। अपि मुनिजनचित्तक्षोभसम्पादिनीभिस्तथा चकितहरिणवत् लोलप्रेक्षणीभिश्चञ्चलप्रेक्षणीभिस्तथा प्रियाभिस्ताभिश्च तन्वङ्गीभिर्गतं दधतीभिर्गमनं धारयन्तीभिः। किंभूतं स्तनाभ्यां नितंबेन च यत् कृतं देहस्य गौरवं तेनालसम्। ईश्वरहेतुकाच्च संभ्रमादाकुलम्। तथा असंस्थितमनेकरूपम्। तरुणचित्तस्य विलोभने कार्मणं वशीकरणप्रयोगम्। यौवनमेव मदहेतुत्वादासवस्तेन मत्ताभिस्तन्वङ्गीभिस्तथा विलासेनाधिष्ठित आत्मा स्वभावो यासां ताभिर्युगपत् बह्वीभिः। तच्च मद्यं तालवृन्ताद्यनिलैश्चन्दनाद्यम्बुसंयोगादतीव शीतलैः शीतलीकृतम्। तालवृन्तं व्यजनम्। तथा यन्मद्यं दर्शनमात्रेऽपि चित्तजन्मनः कामस्य सर्वं वशानुगं विदधत्। किमुत स्वादितम्। चूतरसादिभिः कृतवासनम्। चूतरसः सहकारः। इन्दुः कर्पूरम्। मृगः कस्तूरिका। मल्लिका प्रसिद्धः पुष्पविशेषः। तत् कान्तं मद्यमनङ्गमिवोद्वहदङ्गं सशरीरम्। सुबोधम्। वयःस्थापनं यत्किञ्चिज्जरापहारकृत्। ततोऽनन्तरं इदं कृत्वैव मद्यं पिबेदिति संबन्धः किंकृत्वेत्याह—तत्प्रार्थिभ्य इत्यादि। तन्मद्यं ये प्रार्थयन्त्यभिलषन्ति भूतविशेषास्तेभ्यस्तोयोन्मिश्रं तोयमिश्रितं तद्दापयित्वा धृतिमत्वादियुतः पिबेत्। अनूनाधिकं तत्र मद्यपाने नित्यमाचरन्। तथाविधेनोपचारेण सर्वमेव परिवारमुपलाळयन् सान्त्वयन्। तच्च मद्यं जितानि शोभातिशयेन पराभूतानि विकसितान्यसितसरोजानि नीलोत्पलानि याभ्यां नयनाभ्यां ताभ्यां विवर्द्धितश्रीकम्। कान्तामुखसदृशं यतः सौरभेण हृतो मधुपगणोऽलिसमूहो येन एवंभूतं मद्यं पिबेत्॥

पीत्वैवं चषकत्रयं परिजनं संम्मान्य सर्वं ततो
गत्वाऽऽहारभुवं पुरः सुभिषजो भुञ्जीत भूयोऽत्र च।
मांसापूपघृतार्द्रकादिहरितैर्युक्तं ससौवर्चलै-
र्द्विस्त्रिर्वा निशि चाल्पमेव वनितासंवल्गनार्थं पिबेत् ॥ ८७ ॥

सर्वाङ्गसुन्दरी

पीत्वेत्यादि ॥ एवमनेन प्रकारेण चषकत्रयं पीत्वा ततोऽनन्तरं परिजनं सर्वं दासवेश्यादिकमपि सम्मान्य तथा आहारभुवं गत्वा सुभिषजः शोभनवैद्यस्य पुरोऽग्रे भुञ्जीत। अत्र चाहारभुवि मांसापूपादिभिर्युक्तं द्विस्त्रिर्वा सरकं पिबेत्। मांसापूपेति केचित्। निशि च कान्तायाः संवल्गनार्थं रञ्जनार्थमल्पमेव पिबेत् न तु बहु। शार्दूलविक्रीडितं वृत्तम् ॥

शशिलेखा

एवमनन्तरोक्तप्रकारेण चषकत्रयं पीत्वा सर्वञ्च परिजनमुचितेन प्रकारेण सम्मान्य तत आहारभुवं गत्वा सुभिषजः पुर उत्कृष्टस्य वैद्यस्याग्रतः स्थितो भुञ्जीत। अत्र च भोजने भूयः पुनर्म्मांसादियुक्तं सत् द्वौ वारौ त्रीन् वा वारान् पिबेत्। निशि रात्रावल्पं वनितासंवल्गानावहमात्रं पिबेद्यावता चित्तोल्लासेन केळीसुखं भवति ॥

कान्तारञ्जनपानं श्लाघयन्नाह —

रहसि दयितामङ्के कृत्वा भुजान्तरपीडना-
त्पुळकिततनुं जातस्वेदां सकम्प्रपयोधराम्[1]।
यदि सरभसं शीधोर्वारं न पाययते कृती
किमनुभवति क्लेशप्रायं तदा गृहतन्त्रताम् ॥ ८८ ॥

सर्वाङ्गसुन्दरी

रहसीत्यादि ॥ कृती प्रवीणो यदि प्रियां शीधोश्चषकं न पाययते तदा किं कस्मात् गृहतन्त्रतां गृहोपकरणसम्पादनक्लेशमनुभवति। किं कृत्वा। रह-

---

1 सकम्पपयोधरामिति सङ्ग्रहे। "ततो गृहतन्त्रतां" इत्यपि पाठः।

स्यङ्क उत्सङ्गे दयितां कृत्वा । किंभूताम् । भुजान्तरपीडनात् पुळकितशरीराम् । तथा जातस्वेदाम् । तथा सवेपथुकुचाम् । रोमाञ्चस्वेदकम्पाः सात्विका भावाः शृङ्गारस्याविर्भावकाः । दयिताया गतिबुद्धीत्यादिना कर्मत्वम् । पाययत इति निगरणचलनार्थेभ्यश्चेति परस्मैपदे प्राप्ते न पादम्येत्यादिना निषिद्धे णिचश्चेत्यात्मनेपदम् । भवति हरिणी न्सौ म्रौ स्लौ गौरसोदधिसप्तिभिः ॥

शशिलेखा

रहस्येकान्ते दयितामङ्के उत्सङ्गे कृत्वा यदि शीथोर्वारमेकं चषकं न पाययते तदा गृहतन्त्रतां गृहविषमतां स कृती किमर्थमनुभवति । क्लेशप्रायं बहुक्लेशम् । किंभूतां दयितामाह । भुजान्तरपीडनात् पुळकिततनुं तथा जातस्वेदां रतिश्रमात् सकम्पौ पयोधरौ यस्यास्तथाविधाम् ॥

वरतनुवक्त्रसङ्गतिसुगन्धितरं सरकं
द्रुतमिव पद्मरागमणिमासवरूपधरम् ।
भवति रतिश्रमेण च मदः पिबतोऽल्पमपि
क्षयमत ओजसः परिहरन् स शयीत परम् ॥ ८९ ॥

सर्वाङ्गसुन्दरी

वरतन्वित्यादि ॥ किंभूतं मद्यम् । वरतनुवक्त्रसङ्गत्या सुरभितरम् । तथा पद्मरागमणिं द्रुतमिव द्रवत्वमिव प्राप्तमासवरूपधरम् । यतश्च रतिश्रमेणाल्पमपि मद्यं पिबतो मदो भवति तथा मद्यमोजसः क्षये हेतुः । अत ओजसः क्षयं परिहरन् स मद्यपायी परमनन्तरं शयीत स्वप्यात् । नजभजजलगाश्च यदि नर्कुटकन्तु तदा ॥

शशिलेखा

वरतन्वित्यादिना नर्कुटकाख्येन सुराफलम् । तच्च सरकमेवंभूतं सदल्पमपि पिबतो रतिश्रमेणैव मदो भवत्यतोऽनन्तरं स पुमानोजसः क्षयं परिहरन् शयीत । किंभूतं सरकम् । वरतनोः कान्ताया वक्त्रसङ्गत्या स्वभावसुगन्ध्यपि सुगन्धितरम् । एवमुत्प्रेक्षते द्रुतमिव पद्मरागमणिमासवरूपधरम् ॥

इत्थं युक्त्या पिबन्मद्यं न त्रिवर्गाद्विहीयते ।

असारसंसारसुखं परमं चाधिगच्छति ॥ ९० ॥
ऐश्वर्यस्योपभोगोऽयं स्पृहणीयः सुरैरपि ।

सर्वाङ्गसुन्दरी

इत्थमित्यादि ॥ इत्थमेवंप्रकारया युक्त्या मद्यं पिबन् पुरुषस्त्रिवर्गाद्धर्मार्थकामलक्षणान्न विहीयते। विहीयत इति कर्मकर्त्तरि तङ्। असारसंसारस्य परमं सुखञ्चाधिगछति प्राप्नोति। अयं मद्यपानलक्षण ऐश्वर्यस्योपभोगः सुरैरपि स्पृहणीयः ॥

शशिलेखा

इत्थमनया युक्त्या मद्यं पिबन् पुरुषस्त्रिवर्गाद्धर्मार्थकामान्न विहीयते। न तस्य त्रिवर्गहानिर्भवतीत्यर्थः। असारस्य च संसारस्य यत् परमं स्वादु विषयोपभोगाख्यं सुखं तदधिगछति प्राप्नोति ॥ अयं च यो मद्यस्य विधिरुक्तः स ऐश्वर्यस्योपभोगः सुरैरपि स्पृहणीयः ॥

अन्यथा हि विपत्सु स्यात् पश्चात्तापेन्धनं धनम् ॥ ९१ ॥

सर्वाङ्गसुन्दरी

अन्यथेत्यादि ॥ अन्यथा एवमुपभोगमकुर्वतो हि विपत्सु दुःखेषु धननाशजेषु धनं द्रव्यं पश्चात्तापेन्धनं स्यात्। स ह्येवं विपदि चिन्तयति किं मया धनं प्राप्योपभोगो न कृत इति ॥

शशिलेखा

अन्यथा यो धनवानैश्वर्यवान् नोपभुङ्क्ते तस्य विपत्सु राजोपद्रवादिषु धनं पश्चात्तापेन्धनं पश्चात्तापस्येन्धनमुद्दीपकं स्यात् ॥

उपभोगेन रहितो[1]ऽभोगवानिति निन्द्यते ।
निर्मितोऽतिकदर्योऽयं विधिना निधिपालकः ॥ ९२ ॥

तस्माद्व्यवस्थया पानं पानस्य सततं हितम् ।
जित्वा विषयलुब्धानामिन्द्रियाणां स्वतन्त्रताम् ॥ ९३ ॥

---

1 रहितो भोगवानितीन्दुः ।

सर्वाङ्गसुन्दरी

उपभोग इत्यादि ॥ यश्च धनस्योपभोगेन रहितोऽभोगवानिति जनैर्निन्द्यते। निन्दाप्रकारमेवाह — निर्मित इत्यादि। अयमतिकदर्यः कथं कृत्वा विधिना निधिपालको वा निर्मितः कृतः। यत एवं तस्मात् पानस्य मद्यस्य व्यवस्थया नियमेन पानं हितम्। ननु कथं निसर्गतो विषयलुब्धेष्विन्द्रियेषु व्यवस्था पालयितुं शक्यत इत्याह — जित्वेत्यादि। विषयाभिलाषिणामिन्द्रियाणां स्वातन्त्र्यं जित्वा व्यवस्थया पानं हितं कर्तुं शक्यत इत्यर्थः ॥

शशिलेखा

यश्चाधनस्योपभोगेन रहितोऽभोगवानिति जनैर्निन्द्यते। कथमेवं यथायमतिकदर्यो विधिना निधिपालको निर्मितः। तस्माद्विषयेषु लुब्धानामिन्द्रियाणां स्वतन्त्रतां जित्वा पानस्य मद्यस्य पानं व्यवस्थया हितं न त्वनियमेन ॥

विधिर्वसुमतामेष भविष्यद्वसवस्तु ये।
यथोपपत्ति तैर्मद्यं पातव्यं मात्रया हितम् ॥ ९४ ॥

यावद्दृष्टेर्न संभ्रान्तिर्यावन्न क्षोभते[1] मनः।
तावदेव विरन्तव्यं मद्यादात्मवता सदा ॥ ९५ ॥

सर्वाङ्गसुन्दरी

विधिरित्यादि ॥ वसुमतां धनिनामेष पूर्वोक्तो विधिः। ये तु भविष्यद्वसवस्तैर्यथोपपत्ति यथायुक्तिहितं मद्यं मात्रया पातव्यम्। यावदेव दृष्टेर्न संभ्रान्तिर्यावदेव मनो न क्षोभं याति तावदेव मद्याद्धीमता सर्वदा विरन्तव्यं निवृत्तिः कार्या। एष एव समयोगः। एतदतिक्रमोऽतियोगः। यथोक्तात्समयोगाद्धीनलक्षणो हीनयोगः। दोषदेशप्रकृत्यन्नपानादीनपरीक्ष्य मिथ्यायोगः ॥

शशिलेखा

एष च यथोक्तो विधिर्वसुमतां धनिनां विज्ञेयः। ये पुनर्भविष्यद्वसवस्तैर्मद्यं यथोपपत्ति यथासंभवमुपचारेण मात्रया पातव्यम्। हितं पथ्यम्। भविष्यद्वसुशब्देन व्युत्पत्त्या दरिद्रा उक्ताः भविष्यन्ति वसूनि येषामिति कृत्वा। यावदित्यादिना मद्यपानावधिः सुबोधः ॥

---

1 "क्षोभ्यते" इतीन्दुः।

अभ्यङ्गोद्वर्तनस्नानवासधूपानुलेपनैः
स्निग्धोष्णैर्भावितश्चान्नैः पानं वातोत्तरः पिबेत् ॥ ९६ ॥

शीतोपचारैर्विविधैर्मधुरस्निग्धशीतलैः
पैत्तिको भावितश्चान्नैः पिबन् मद्यं न सीदति ॥ ९७ ॥

उपचारैरशिशिरैर्यवगोधूमभुक् पिबेत् ।
श्लैष्मिको जाङ्गलैर्मांसैर्मद्यं मारिचिकैः सह ॥ ९८ ॥

सर्वाङ्गसुन्दरी

अभ्यङ्ग इत्यादि ॥ वाताधिको नरोऽभ्यङ्गोद्वर्तनादिभिः स्निग्धोष्णैर्भावितो मद्यं पिबेत् । पैत्तिको विविधैः शीतोपचारैश्चन्दनानुलेपनादिभिर्मधुरस्निग्धशीतलैश्चान्नैः भावितः मद्यं पिबन् न सीदति । श्लैष्मिको नर उष्णैरुपचारैः कुङ्कुमागरुविलेपनाद्यैर्भावितः यवगोधूमान्नभुक् सन् मांसैर्द्धन्वोद्भवैर्मरिचसंस्कृतैः सह मद्यं पिबेत् ॥

शशिलेखा

तच्च मद्यमभ्यङ्गादिभिर्भावित आहितसंस्कारः सन् वाताधिकः पुरुषः पिबेत् । वासः पटवासः । शीतोपचारादिभिः पैत्तिको मद्यं पिबन् न सीदति । अशिशिरोपचारादिना श्लैष्मिको मद्यं पिबेत् । अशिशिरशब्देनातिशिशिरस्य प्रतिषेधः नोष्णविधानम् । उष्णोपचारस्य मद्ये प्रतिषेधात् । मरिचेन संस्कृतं मारिचिकम् । धन्वजं जाङ्गलम् ॥

तत्र वाते हितं मद्यं प्रायः पैष्टिकगौडिकम् ।
पित्ते सांभोमधु कफे मार्द्वीकारिष्टमाधवम् ॥ ९९ ॥

प्राक् पिबेत् श्लैष्मिको मद्यं भुक्तस्योपरि पैत्तिकः ।
वातिकस्तु पिबेन्मध्ये समदोषो यथेच्छया ॥ १०० ॥

सर्वाङ्गसुन्दरी

तत्रेत्यादि ॥ तत्र तेषु मद्येषु मध्ये वाताधिके नरे प्रायो बाहुल्येन पैष्टिकं गौडिकं च मद्यं हितम् । शालिपिष्टेन कृतं पैष्टिकम् । गुडेन कृतं गौडिकम् । पित्ते मधु मार्द्वीकं साम्भः सजलं हितम् । कफे मार्द्वीकादि हितम् ।

श्लैष्मिकः भुक्तस्य प्राक् मद्यं पिबेत्। पैत्तिको भक्तं भुक्त्वा मद्यं पिबेत्। वातोत्तरः पुनर्मध्ये भक्तस्य पिबेत्। समदोषो यथेच्छया भक्तस्य पूर्वं मध्येऽन्ते वा पिबेत्॥

शशिलेखा

तत्रेत्यादि सुबोधम्। शालिपिष्टेन पैष्टिकम्। गुळेन गौळिकम्। पित्ते मधु माक्षिकं साम्भः। कफे मार्द्वीकादि। प्रागित्यादिना मद्यस्य दोषविशेषाश्रयेण कालनियमः सुबोधः॥

मदेषु वातपित्तघ्नं प्रायो मूर्छासु चेष्यते।
सर्वत्राऽपि विशेषेण पित्तमेवोपलक्षयेत् ॥ १०१ ॥

शीताः प्रदेहा मणयः सेका व्यजनमारुताः।
सिताद्राक्षेक्षुखर्जूरकाश्मर्यस्वरसाः पयः ॥ १०२ ॥

सिद्धं मधुरवर्गेण रसाः यूपाः सडाडिमाः।
षष्टिकाः शालयो रक्ता यवाः सर्पिश्च जीवनम् ॥ १०३ ॥

कल्याणकं महातिक्तं षट्पलं पयसाग्निकः।
पिप्पल्यो वा शिलाह्वं वा रसायनविधानतः ॥ १०४ ॥

त्रिफला वा प्रयोक्तव्या सघृतक्षौद्रशर्करा।

सर्वाङ्गसुन्दरी

मदेष्वित्यादि॥ मदेषु प्रायेण वातपित्तघ्नं चिकित्सितं मूर्छासु मूर्छायेषु चेष्यते। सर्वत्रैव मदे मूर्छाये च पित्तमेवाधिकं जानीयादत एवं तेषामुपक्रमः। शीताः प्रदेहादयः। पयो मधुरवर्गेण द्राक्षादिना सिद्धम्। तथा रसा मांसरसाः। यूषाश्च डाडमान्विताः। षष्टिकादयश्च। तथा घृतं जीवनीयं जीवनीयसिद्धं कल्याणकमुन्मादप्रतिषेधोक्तं महातिक्तं कुष्ठचिकित्सितोक्तं षट्पलं राजयक्ष्मचिकित्सितोक्तम्। तथा क्षीरेण चित्रकः। तथा पिप्पल्यो रसायनविधानेन। अथवा शिलाजतु रसायनविधानेन। अथवा त्रिफला सघृतक्षौद्रशर्करा प्रयोक्तव्या॥

शशिलेखा

मदेष्वित्यादिना क्रमप्राप्तानां मदमूर्च्छायसन्यासानां चिकित्सा। प्रायोग्रहणं क्वचिद्व्यभिचारसूचनार्थम्। सर्वत्राऽपि मद्यविकारेषु पित्तमेव चिकरस्यत्वे-

नोपलक्षयेत्। सर्वत्र शीताः प्रदेहादयः प्रयोक्तव्याः। तथा सितादिमधुरस्कन्धेन शृतं पयः। सुबोधम्। कल्याणकादीनि वक्ष्यन्ते। षट्पलमुक्तं यक्ष्मणि॥

प्रसक्तवेगेषु हितं मुखनासावरोधनम् ॥ १०५ ॥

पिबेद्वा मानुषीक्षीरं तेन दद्याच्च नावनम्।
मृणालबिसकृष्णा वा लिह्यात् क्षौद्रेण साभयाः ॥ १०६ ॥

दुरालभां वा मुस्तां वा शीतेन सलिलेन वा।
पिबेन्मरिचकोलास्थिमज्जोशीराहिकेसरम् ॥ १०७ ॥

धात्रीफलरसे सिद्धं पथ्याक्काथेन वा घृतम्।
कुर्यात् क्रियां ज्वरोक्तांश्च यथादोषबलोदयम् ॥ १०८ ॥

पञ्चकर्माणि चेष्टानि मोचनं शोणितस्य च।
सत्वस्यालम्बनं ज्ञानमगृद्धिर्विषयेषु च ॥ १०९ ॥

सर्वाङ्गसुन्दरी

प्रसक्तवेगेष्वित्यादि ॥ प्रसक्तवेगेषु मदादिषु मुखस्य नासायाश्च पाण्यादिनावरोधनं हितम्। मानुष्या वा क्षीर पिबेत्। तेन मानुषीक्षीरेण नस्यं च दद्यात्। मृणालादीन् वा सहरीतकीन् माक्षिकेण लिह्यात्। अथवा दुरालभां मुस्तां वा मधुना लिह्यात्। अथवा शीतेन सलिलेन मरिचादीन् पिबेत्। अहिकेसरं नागकेसरम्। अथवाऽमलकरसेन सिद्धं घृतं पथ्याक्वाथेन सिद्धं वा घृतं पिबेत्। ज्वरोक्ताञ्च क्रियां दोषबलोदयानुसारेण कुर्यात्। पञ्चकर्माणि वमनविरेचनास्थापनान्वासननस्याख्यानि चेष्टानि रक्तमोक्षश्च। सत्वस्यालम्बनमाश्रयणं तथा ज्ञानं महाभूतेन्द्रियतन्मात्रमनोबुध्यहंकारपुरुषादीनाम्। विषयेष्वगृद्धिरनभिलाषः॥

शशिलेखा

प्रसक्तवेगेषु सन्ततवेगेषु मदमूर्छायेषु मुखनासस्य पाण्यादिकेनावरोधनं हितम्। अथवा मानुषीक्षीरं पिबेत्। तेन मानुषीक्षीरेण नस्यम्। मृणालाद्यभयान्तं क्षौद्रेण लेहः। दुरालभां वा क्षौद्रेण मुस्तां वा। मरिचादिकं शीतेन सलिलेन पिबेत्। धात्रीफलरसेन वा चतुर्गुणेन सिद्धं घृतम्। पथ्याक्वाथेन वा स्नेहचतुर्गुणेन सिद्धं घृतं पिबेत्। दोषबलोदयानतिक्रमेण च मदमूर्छा-

यथोः ज्वरोक्तां क्रियां कुर्यात्। सुबोधम्। सत्वस्यालम्बनं धैर्यस्यावष्टम्भः। गृद्धिर्लोलुपता विषयेषु शब्दादिषु ॥

मदेष्वतिप्रवृद्धेषु मूर्छायेषु च योजयेत्।
तीक्ष्णं सन्यासविहितं विषघ्नं विषजेषु च ॥ ११० ॥

सर्वाङ्गसुन्दरी

मदेष्वित्यादि ॥ मदेषु मूर्छायेषु चातिप्रवृद्धेषु तीक्ष्णं नस्यादि सन्यासोक्तं योजयेत्। तथा विषजेषु मदेषु विषघ्नं चिकित्सितं योजयेत् ॥

शशिलेखा

सन्यासविहितं तीक्ष्णं नस्यादि यत् तत् सर्वमतिप्रवृद्धेषु सर्वेषु मदेषु मूर्छायेषु च योजयेत्। विषजेषु मदेषु विषघ्नञ्च योजयेत् ॥

आशु प्रयोज्यं सन्यासे सुतीक्ष्णं नस्यमञ्जनम्।
धूमः प्रधमनं तोदः सूचीभिश्च नखान्तरे ॥ १११ ॥
केशानां लुञ्चनं दाहो दंशो दशनवृश्चिकैः।
कट्वम्लगाळनं वक्त्रे कपिकच्छ्वावघर्षणम् ॥ ११२ ॥
उत्थितो लब्धसंज्ञश्च लशुनस्य रसं पिबेत्।
खादेत् सव्योषलवणं बीजपूरककेसरम् ॥ ११३ ॥
लघ्वन्नप्रति तीक्ष्णोष्णमद्यात् स्रोतोविशुद्धये।

सर्वाङ्गसुन्दरी

आशु प्रयोज्यमित्यादि ॥ सन्यासे सुष्ठु तीक्ष्णं नस्यमञ्जनं धूमः प्रधमनं नासायां चूर्णञ्च प्रयोज्यम्। तथा नखमांसयोर्मध्ये सूचीभिस्तोदः प्रयोज्यः। तथा केशलुञ्चादिकञ्च प्रयोज्यम्। वक्त्रे कटूनां मरिचादीनामम्लानां मातुलुङ्गादीनां च गाळनं प्रयोज्यम्। तथा कपिकच्छ्वा अवघर्षणम्। एवमुपक्रान्तः सन्नुत्थितो लब्धसंज्ञश्च लशुनस्य रसं पिबेत्। तथा बीजपूरककेसरं सव्योषलवणं भक्षयेत्। स्रोतोविशोधनार्थं लघ्वन्नं प्रतिभुञ्जीत। कीदृशं तीक्ष्णोष्णम्। लघ्वन्नप्रति अल्पं लघ्वन्नम्। सुप्रतिना मात्रार्थ इति समासः ॥

शशिलेखा

दुर्ज्जयत्वेन प्राधान्यात् सन्यासस्य चिकित्सा पृथगुच्यते—आश्वित्यादि—। सन्यासे शीघ्रमेव सुतीक्ष्णं नस्यादिकं प्रयोज्यम्। प्रधमनान्तानां सुती-

क्षणशब्देन सम्बन्धः । प्रधमनं नासायां चूर्णेन । नखमांसयोर्मध्ये सूचीभिस्तोदः । लुञ्चनमपनयनम् । दाहोऽङ्गेष्वग्न्यादिना । दन्तैर्वृश्चिकैश्चाङ्गेषु दंशः । वक्त्रे कटूनां मरिचादीनामम्लानां धात्रीफलादीनां गाळनमवकिरणेन स्रावणम् ॥

विस्मापनैः संस्मरणैः प्रियश्रवणदर्शनैः ॥ ११४ ॥
पटुभिर्गीतवादित्रशब्दैर्व्यायामशीलनैः ।
स्रंसनोल्लेखनैर्धूमैः शोणितस्य च सेचनैः ॥ ११५ ॥
उपाचरेत्तं प्रततमनुबन्धभयात् पुनः ।
तस्य संरक्षितव्यं च मनः प्रळयहेतुतः ॥ ११६ ॥

सर्वाङ्गसुन्दरी

विस्मापनैरित्यादि ॥ तञ्च सन्यासवन्तं प्रततमनवरतमुपाचरेत् । कैः विस्मापनैर्विस्मयकारिभिः । विपूर्वात् स्मिङो णिचि नित्य स्मयतेरित्यात्वे पुकि ल्युटि च विस्मापनैरिति रूपम् । तथा संस्मरणैस्तथा प्रियस्य श्रवणेन दर्शनेन च तथा गीतवादित्रशब्दैः पटुभिर्मनोहरैः । तथा व्यायामशीलनैस्तथा स्रंसनोल्लेखनैर्वमनविरेचनैस्तथा धूमैस्तथा शोणितस्य सेचनैः स्रावणैश्च । शोणितस्य चेत्यत्र च शब्दादन्यान्यपि सर्वदोषप्रशमनान्युपयोक्तव्यानीति गमयति । उक्तञ्च खरनादे । "कृष्णा हरीतकी शुण्ठी गुळमाक्षिकसैन्धवैः । प्रलेहस्सर्वदोषघ्नः स्मृतिवर्णाग्निवर्धनः । त्रिदोषघ्नाश्च ये योगा मद्यदोषे हिताश्च ते" इति । उक्तञ्च हारितीये "मदात्यये हरीतक्यामलकबिभीतकानां चूर्णं पूर्वकल्पेन मधुना सह लिह्यात् त्रिदोषघ्नानि योजयेत्तथा व्यायामशीलनैर्वमनविरेचनाभ्यां धूमेन शोणितस्रावेण चे" ति । पुनरनुबन्धभयात् कारणात्तस्यातुरस्य मनः प्रलयहेतुतः सम्यग्रक्षितव्यं यतस्तत इदं कार्यमिति ॥

शशिलेखा

तस्य च निवृत्तसन्यासस्य प्रळयहेतोश्चित्तक्लेशान्मनो विस्मापनादिभिः संरक्षितव्यं पुनरनुबन्धं येन न गृह्णाति ॥

इति चिकित्सिते सप्तमोऽध्यः ।

अष्टमोऽध्यायः ।

अस्मादनन्तरमर्शश्चिकित्सितमारभ्यते । सम्बन्धश्चास्य निदान एवोक्तः ॥

अथातोऽर्शसां चिकित्सितं नामाध्यायं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ॥

काले साधारणे व्यभ्रे नातिदुर्बलमर्शसम् ।
विशुद्धकोष्ठं लघ्वन्नमनुलोमनमाशितम् ॥ १ ॥

शुचिं कृतस्वस्त्ययनं मुक्तविण्मूत्रमव्यथम् ।
शयने फलके वान्यनरोत्सङ्गे व्यपाश्रितम् ॥ २ ॥

पूर्वेण कायेनोत्तानं प्रत्यादित्यगुदं समे ।
समुन्नतकटीदेशमथ यन्त्रणवाससा ॥ ३ ॥

सक्थ्नोः शिरोधरायां च परिक्षिप्तमृजुस्थितम् ।
आलम्बितं परिचरैः सर्पिषाभ्यक्तपायवे ॥ ४ ॥

ततोऽस्मै सर्पिषाभ्यक्तं निदध्यादृजुयन्त्रकम् ।
शनैरनुसुखं पायौ....................

सर्वाङ्गसुन्दरी

काल इत्यादि ॥ साधारणे शरद्वसन्तादिके काले तथा व्यभ्रे विगताभ्रे तथा नातिदुर्बलमर्शसमपि तु किञ्चित्सप्राणम् । अत्र च योग्यपदत्वात् कृत्वेत्यध्याहृत्य संबन्धः कार्यः । तथा विशुद्धकोष्ठादिकं कृत्वा ततोऽस्मै अर्शसाय यन्त्रं निदध्यादिति संबन्धः । अर्शसमिति अर्शांसि विद्यन्ते यस्येत्यर्श आदित्वादच् । किंभूतम् । विशुद्धो वमनविरेचनादिना कोष्ठो यस्य तम् । तथान्नमाशितं कृत्वा । किंभूतम् । लघु स्वभावादल्पञ्च मात्रया । तथानुलोमनं वातवर्चसोः प्रायेण प्रवर्तकम् । तथा शुचिं मृज्जलाभ्यां कृत्वा । तथा कृतं स्वस्त्ययनं यस्य तम् । तथा मुक्ते विसृष्टे विण्मूत्रे येन तम् । तथा अव्यथं

व्यथारहितमन्येन व्याधिना अपीडितम्। तथा शयने व्यपाश्रितं शय्यामाश्रित्य स्थितम्। अथवा फलक आसनविशेषे व्यपाश्रितम्। अथवान्यनरोत्सङ्गे व्यपाश्रितम्। नरोत्सङ्गे व्यपाश्रितमित्येवं सिद्धे अन्यग्रहणं वैद्यस्य निरासार्थम्। कथं कृत्वा। पूर्वेण कायेन उत्तानं कृत्वा नापरेण। तथा प्रत्यादित्यगुदम्। प्रत्यभिमुखेनादित्यं प्रत्यादित्यं गुदं यस्य तम्। यस्यां दिश्यादित्यो गतस्तस्यां दिश्यर्शसेन सम्मुखं गुदं कृत्वा स्थातव्यमित्यर्थः। सम इति फलकविशेषणम्। समदेश इति च समे शुचौ विविक्ते देश इति सङ्ग्रहदर्शनात्। तथा सम्यग्यथावदुन्नतः कटीदेशो यस्य तम्। अथ समुन्नतकटीदेशकरणादनन्तरमर्शसं सक्थ्नोस्तथा शिरोधरायाश्च परिक्षिप्तं समन्तात् क्षिप्तमाक्रान्तं कृत्वा। केन। यन्त्रणवाससा। यन्त्रणार्थं वासः कार्पासादिमयं यन्त्रणवासस्तेन। तथा ऋजु स्पष्टं कृत्वा स्थितम्। तथा परिचरैः परिचारकैरालम्बित निश्चलं कृत्वा अवष्टभ्य सम्यक् स्थापितम्। ततोऽनन्तरमस्मै दुर्नामवते सर्पिषाऽभ्यक्तपायवे घृताभ्यक्तं यन्त्रकमृज्वनुसुखं कृत्वा शनैर्निदध्यात् प्रणयेत्। सङ्ग्रहे चोक्तम्। "अथ खलु बलवन्तमर्शोभिरुपद्रुतं यथ हस्नेहोपस्निग्धस्विन्नमनिलवेदनावृद्धिशमनार्थं स्निग्धमुष्णमल्पमन्नं द्रवप्रायं भुक्तवन्तं शुचिं कृतस्वस्त्ययनं मुक्तविण्मूत्रमव्यथं समे शुचौ विविक्ते देशे साधारणे व्यभ्रे काले शय्यायां समे फलके वा प्रत्यादित्यगुदमन्यस्योत्सङ्गे निषण्णपूर्वकायमुत्तानमुन्नतकटीदेशं यन्त्रणशाटकेन परिक्षिप्तग्रीवासक्थिसन्धिमलज्जार्हैराप्तपरिचारकैः सुपरिगृहीतं कृत्वा ततोऽस्मै घृताभ्यक्तगुदाय घृताभ्यक्तं यन्त्रकमृज्वनुसुखं शनैः पायौ प्रणिदद्ध्या"दिति॥

शशिलेखा

काले साधारण इत्यादि। सर्वं सुबोधनत्वान्न व्याख्यायते। साधारणे नातिशीतोष्णे। नातिदुर्बलमित्यतिदुर्बलस्य क्षारप्रतिषेधप्रदर्शनम्। विशुद्धकोष्ठं वमनादिना। अनुलोमनं वातवर्चःप्रवर्तकम्। लघु मात्रया स्वभावतश्चान्नमाशितं भुक्तवन्तं शयने शय्यायां वा फलके वा अन्यनरस्योत्सङ्गे वा पूर्वेण कायेन व्यपाश्रितं निषण्णं प्रत्यादित्यगुदमादित्याभिमुखगुदमुपविष्टमुत्ताननिषण्णस्य सक्थिनी ग्रीवाञ्च यन्त्रणवाससा एकेन शाटकेत वेष्टितं परिचारकैरालम्बितं सुपरिगृहीतं कृत्वा ततोऽनन्तरं सर्पिषाभ्यक्तगुदाय घृताभ्यक्तं यन्त्रकमुभयपार्श्वच्छिद्रं यन्त्रविधावुक्तमनुसुखं सुखानुगुण्येन शनैः शनैः पायौ प्रणिदध्यात्।

.... ततो दृष्ट्वा प्रवाहणात् ॥ ५ ॥
यन्त्रे प्रविष्टं दुर्नाम प्लोतगुण्ठितयाऽनु च ।
शलाकयोत्पीड्य भिषक् यथोक्तविधिना दहेत् ॥ ६ ॥
क्षारेणैवार्द्रमितरत्क्षारेण ज्वलनेन वा ।
महद्वा बलिनश्छित्वा वीतयन्त्रमथातुरम् ॥ ७ ॥
स्वभ्यक्तपायुजघनमवगाहे निधापयेत् ।
निर्वातमन्दिरस्थस्य ततोऽस्याचारमादिशेत् ॥ ८ ॥
एकैकमिति सप्ताहात् सप्ताहात्समुपाचरेत् ।

सर्वाङ्गसुन्दरी

तत इति ॥ ततोऽनन्तरं गुदप्रणिहिते यन्त्रे प्रवाहणात् प्रवाहणेन हेतुना यन्त्रे प्रविष्टं दुर्नाम दृष्ट्वा अनु पश्चात् शलाकया चैलखण्डप्रावृतदेहयोत्पीड्य प्रकृतत्वाद्दुर्नाम ऊर्ध्वं पीडयित्वा वैद्यो यथोक्तविधिना सूत्रस्थानोदितेन मृदुना क्षारेणार्द्रमर्शो दहेत् । एवेत्यवधारणे । क्षारेणैव नाग्निना । इतरत् शुष्कं दुर्नाम क्षारेण ज्वलनेनाग्निना वा दहेत । यथोक्तविधिनेत्यत्रापि योज्यम् । महद्वेति । यच्च दुर्नाम महत् तत्तु बलवतः पुंसः छित्वा वा शस्त्रेण क्षाराग्निभ्यां यथायोगं दहेत् । अथानन्तरमातुरं वीतयन्त्रं विधाय स्वभ्यक्तपायुजघनमवगाहे निधापयेत् । तत्र निहितं विदध्यादित्यर्थः । ततोऽनन्तरं निर्वातमन्दिरस्थस्याचारमुष्णोदकोपचारी स्यादित्यादिकमादिशेत् । एकैकं दुर्नाम इत्यनेन पूर्वोक्तेन प्रकारेण सप्ताहात् सप्ताहात् परं समुपाचरेन्न तुल्यकालं सर्वाण्यर्शांसि ॥

शशिलेखा

ततोऽनन्तरं प्रवाहणात् पार्श्वछिद्रेण प्रविष्टं दुर्नामार्शः समीक्ष्य प्लोतेन चैलखण्डेन कुण्ठितया प्रावृतया शलाकया उत्पीड्य भिषग्यथोक्तेन सूत्रस्थानप्रदर्शितेन विधिना दहेत् । आर्द्रमस्रपित्तजातमर्शः क्षारेणैव मृदुना । इतरच्छुष्कम् । बलवतः पुरुषस्य महदर्शः प्रथमं शस्त्रेण छित्वा ततो दहेत् । अथाऽर्शोदहनानन्तरमातुरमपनीतयन्त्रं स्वभ्यक्तपायुजघनं विधायावगाहे निधापयेत् स्थापयेत् । सङ्ग्रहेऽप्युक्तं । "तथा यन्त्रमपनीयोऽस्थाप्यातुरं स्वभ्यक्तगुदजघनवंक्षणं यथाकालमुष्णोदककोष्ठे शीतोदककोष्ठे वाऽवगाहयेदि"ति । अस्यार्थः । तत इति

दग्धेष्वर्शस्सु शीते काले उष्णेनोष्णे शीतेनोदकेन। कोष्ठो जलाधार इति। तत इत्यवगाहनस्य पश्चात् निवातागारप्रविष्टस्यास्य आचारिकमुष्णोदकोपचारी स्यादित्यादिकमुपदिशेत्। इत्यनेन प्रकारेण एकैकमर्शः सप्ताहात् सप्ताहात् समुपाचरेत् ॥

अथैषां कर्मणि क्रमं दर्शयितुमाह---

प्राग्दक्षिणं ततो वाममर्शः पृष्ठाग्रजं ततः ॥ ९ ॥

बह्वर्शसः सुदग्धस्य स्याद्वायोरनुलोमता।
रुचिरन्नेऽग्निपटुता स्वास्थ्यं वर्णबलोदयः ॥ १० ॥

वस्तिशूले त्वधोनाभेर्लेपयेच्छ्लक्ष्णकल्कितैः।
वर्षाभूकुष्ठसुरभिमिसिलोहामराह्वयैः ॥ ११ ॥

सर्वाङ्गसुन्दरी

प्रागित्यादि ॥ बह्वर्शसः प्राक् पूर्वं दक्षिणदेशस्थमर्श उपाचरेत्। अनन्तरं वामं ततः पृष्ठाग्रे जातमुपाचरेत्। सुदग्धार्शसो वातस्यानुलोमनं स्यात्तथाऽन्नेऽभिलाषः अग्नेः पाटवं तथा स्वास्थ्यं वर्णबलयोरुद्भूतिश्च। वस्तिशूले सति पुनर्नाभेरधो वर्षाभ्वादिभिः सुपिष्टैर्लेपयेत् ॥

शशिलेखा

बह्वर्शसः प्रथमं दक्षिणदेशस्थमर्शः उपाचरेदनन्तरं वामम्। वामादनु पृष्ठजं ततोऽग्रजमर्श उपक्रमेत्। सम्यग्दग्धलक्षणमाह --- सुदग्धस्येत्यादि। सम्यग्दग्धे सति वातानुलोम्यं स्यादन्नेऽभिरुचिरग्नेः पटुता दीप्तिः। स्वास्थ्यमुपद्रवराहित्यम्। वर्णबलयोरुदय उत्पत्तिः। हीनातियोगः सूत्रोक्तः। वस्तिवेदनायां वर्षाभ्वादिभिर्नाभेरधो लेपः। वर्षाभूः पुनर्नवा। सुरभिर्गन्धसुरा ([illegible])। मिसिः शतपुष्पा। लोहमगरु। अमराह्वयं देवदारु ॥

शकृन्मूत्रप्रतीघाते परिषेकावगाहयोः।
वरणालम्बुषैरण्डगोकण्टकपुनर्नवैः ॥ १२ ॥

सुषवीसुरभीभ्यां च क्वाथमुष्णं प्रयोजयेत्।
सस्नेहमथवा क्षीरं तैलं वा वातनाशनम् ॥ १३ ॥

युञ्जीतान्नं शकृद्भेदि स्नेहान् वातघ्नदीपनान्।

सर्वाङ्गसुन्दरी

शकृदित्यादि ॥ शकृतो मूत्रस्य च प्रतीघाते विबन्धे सति वरणादिभिः क्काथं परिषेकावगाहयोरुष्णं सस्नेहं प्रयोजयेदथवा क्षीरं सस्नेहमथवा वातनाशनं बलातैलादिकं तैलं परिषेकावगाहयोः प्रयोजयेत्। अन्नञ्च वाट्यादिकं शकृत्-विबन्धघ्नं तथा स्नेहान् वातघ्नान् दीपनांश्च प्रयोजयेत् ॥

शशिलेखा

विण्मूत्राघाते परिषेकावगाहे वा वरणादीनां कषायं सुखोष्णं सस्नेहं क्षीरं वा तैलं वा वातनाशनं बलातैलादि प्रयोजयेत्। अलम्बुषा हपुषा। गोकण्टकः श्वदंष्ट्रा। सुषवी पानीयवल्ली। शकृद्भेद्यन्नं तथा वातघ्नान् दीपनान् स्नेहांश्च प्रयुञ्जीत इति। सङ्ग्रहे चोऽक्तम्। "दर्भेष्वर्शस्सु शकृच्छैथिल्यार्थं त्रिवृद्द्राक्षातुकापोदकाचुञ्चुपर्णीशाकयुक्तमन्नमश्नीयात्। अनिलानलरक्षणोत्तेजनार्थं देहपुष्टये च स्नेहादीन् सम्यगासेवेत" इति। अनिलस्य रक्षार्थं कोपात्। अग्नेरुत्तेजनार्थम् ॥

अथाऽप्रयोज्यदाहस्य निर्गतान् कफवातजान् ॥ १४ ॥

सस्तंभकण्डूरुक्शोफानभ्यज्य गुदकीलकान्।
त्रिल्वमूलाग्निकक्षारकुष्ठैः सिद्धेन सेचयेत् ॥ १५ ॥

तैलेनाहिबिडालोष्ट्रवराहवसयाऽथवा।
स्वेदयेदनु पिण्डेन द्रवस्वेदेन वा पुनः ॥ १६ ॥

सक्तूनां पिण्डिकाभिर्वा स्निग्धानां तैलसर्पिषा।
रास्नाया हपुषाया वा पिण्डैर्वा कार्ष्ण्यगन्धिकैः ॥ १७ ॥

सर्वाङ्गसुन्दरी

अथेत्यादि ॥ न प्रयोज्यो निषिद्धो दाहो यस्यासावप्रयोज्यदाहो दाहानर्हस्तस्य निर्गतान् बहिर्भूतान् तथा कफवातजान् गुदकीलकानर्शांस्यऽभ्यज्य विल्वादिसिद्धेन तैलेन सेचयेत्। किंभूतान्। सस्तंभकण्डूरुक्शोफान्। एवंभूतान् नान्यलक्षणान्। अथवा भुजङ्गादिवसयाऽभ्यज्य सेचयेत्। अनु सेकाभ्यङ्गाभ्यां पश्चात् पिण्डेन पिण्डस्वेदेन स्वेदयेत्। पिण्डस्वेदो मुनिनोक्तः

यथा—"तिलमाषकुलत्थाम्लघृततैलामिषोदनैः। पायसैः कृसरैर्मांसैः पिण्डस्वेदं प्रयोजयेदि"ति। अथवा द्रवस्वेदेन स्वेदविध्युक्तेन स्वेदयेत्। पुनःशब्दोऽत्र लौकिक्या उक्त्या प्रयुक्तः। यथेदं सारमिदं पुनरसारमिति। अथवा सक्तूनां तैलसर्पिषा स्निग्धानां पिण्डिकाभिः स्वेदयेत्। अथवा रास्नाया हिपुषाया वा पिण्डैः कार्ष्ण्यगन्धिकैर्वा स्वेदयेत्। तैलसर्पिषा स्निग्धैरित्यत्रानुवर्तते। कृष्णगन्धाया इमे कार्ष्ण्यगन्धिकास्तैरध्यात्मादित्वात् ठञ्॥

शशिलेखा

अप्रयोज्यदाहस्यानवचारणीयक्षाराग्निदाहस्य दोषपूर्णत्वान्निर्गतान् स्तंभादियुक्तान् कफवातजान् गुदकीलकानर्शांसि विल्वमूलादिभिः पक्वेन तैलेनाभ्यज्य तेनैव सेचयेत्। कृष्णाहिमार्ज्जारादीनां वसया वाभ्यज्य सेचयेत्। पिण्डस्वेदः सङ्ग्रहे सूत्रे प्रदर्शितः। द्रवस्वेदोऽत्रैव स्वेदविधावुक्तः। कृष्णगन्धा सौभञ्जनकः॥ (പുനർമ്മുരിങ്ങ)

अर्कमूलं शमीपत्रं नृकेशाः सर्पकञ्चुकम्।
मार्जारचर्म सर्पिश्च धूपनं हितमर्शसाम् ॥ १८ ॥

तथाऽश्वगन्धा सुरसा बृहती पिप्पली घृतम्।
धान्याम्लपिष्टैर्जीमूतबीजैस्तज्जालकं मृदु ॥ १९ ॥

लेपितं छायया शुष्कं वर्तिर्गुदजशातनी।
सजालमूलजीमूतलेहे वा क्षारसंयुते ॥ २० ॥

गुञ्जासूरणकूश्माण्डबीजैर्वर्तिस्तथागुणा।
स्नुक्क्षीरार्द्रनिशालेपस्तथा गोमूत्रकल्कितैः ॥ २१ ॥

कृकवाकुशकृत्कृष्णानिशागुञ्जाफलैस्तथा।
स्नुक्क्षीरपिष्टैः षड्ग्रन्थाफलिनीवारणास्थिभिः ॥ २२ ॥

कुलीरशृङ्गीविजयाकुष्ठारुष्करतुत्थकैः।
शिग्रुमूलकजैर्बीजैः पत्रैरश्वघ्ननिम्बजैः ॥ २३ ॥

पीलुमूलेन विल्वेन हिङ्गुना च समन्वितैः।
कुष्ठं शिरीषबीजानि पिप्पल्यः सैन्धवं गुडः ॥ २४ ॥

अर्कक्षीरं सुधाक्षीरं त्रिफला च प्रलेपनम् ।
आर्कं पयः स्नुहीकाण्डं कटुकालाबुपल्लवाः ॥ २५ ॥
करञ्जो वस्तमूत्रश्च लेपनं श्रेष्ठमर्शसाम् ।
आनुवासनिकैर्लेपः पिप्पल्याद्यैश्च पूजितः ॥ २६ ॥
एभिरेवौषधैः कुर्यात्तैलान्यभ्यञ्जनानि च ।

सर्वाङ्गसुन्दरी

अर्कमूलमित्यादि ॥ अर्कमूलादि चर्मसर्पिरन्तं धूपनं हितम् । तथाश्वगन्धादि धूपनम् । धान्याम्लेन काञ्चिकेन पिष्टैर्जीमूतस्य बीजैस्तज्जालकं तस्य जीमूतफलस्य जालकं जालकाकारं फलबहिर्भागो मृद्वकर्कशं लेपितं छायाशुष्कमित्येषा वर्त्तिर्गुदजशातनी । सजालमूलजीमूतेन कृतो यो लेहस्तस्मिन् लेहे क्षारसंयुते गुञ्जादिबीजैः कृता वर्तिस्तथागुणा गुदजशातनी । स्नुक्क्षीरेणार्द्रीकृता निशा हरिद्रा तया लेपः स्नक्क्षीरार्द्रनिशालेपः तथा पूर्वगुणः । गोमूत्रेण कल्कितैः पिष्टैः कुक्कुटशकृदादिभिर्लेपः पूर्वगुणः । स्नुक्क्षीरपिष्टैः षड्ग्रन्थादिभिः पीलुमूलेन बिल्वेन हिङ्गुना च युक्तैर्लेपः पूर्वगुणः । कुष्ठमित्यादित्रिफलान्तं प्रलेपनं पूर्वगुणम् । अर्कक्षीरादिबस्तमूत्रान्तं प्रलेपनमर्शसां श्रेष्ठं स्यात् । आनुवासनिकैरिति अनुवासनस्यैतानि इति अध्यात्मादित्वात् ठञ् । तैर्द्रव्यैः पिप्पलीमदनमित्यादिभिर्वक्ष्यमाणैर्लेपोऽर्शस्सु पूजितः । एभिरेव पूर्वोक्तैर्लेपनद्रव्यैरभ्यञ्जनानि तैलानि च कुर्यात् ॥

शशिलेखा

अर्कमूलमित्यादि सुबोधम् । नृकेशा मानुषकचाः । सर्पस्य कञ्चुकं निर्मोकः । अश्वगन्धादिभिर्वा धूपयेत् । स्नुक्क्षीरेणार्द्रया निशया लेपः । कृकवाकुः कुक्कुटः । कृष्णा पिप्पली । एभिर्गोमूत्रपिष्टैर्लेपः तथा गुदजनाशनः । स्नुक्क्षीरपिष्टैः षड्ग्रन्थादिभिर्लेपः । षड्ग्रन्था वचा । वारणास्थि गजास्थि । कुळीरश्रृङ्गी कर्कटश्रृङ्गी । अरुष्करं भल्लातकम् । अश्वघ्नोऽश्वमारः । कुष्ठादिप्रलेपनं पूर्वगुणम् । अर्कक्षीरादिलेपनं श्रेष्ठं स्यात् । सुधा स्नुही । कटुका कटुकरोहिणी । बस्तः छागः । आनुवासनिकैरनुवासनद्रव्यैर्वक्ष्यमाणैः पिप्पल्यादिभिः । एभिः षड्ग्रन्थाफलिन्यादिभिर्यथालाभमभ्यञ्जनानि तैलानि च कुर्यात् ॥ [जीमूतं=देवदाळी]

धूपनालेपनाभ्यङ्गैः प्रस्रवन्ति गुदाङ्कुराः ॥ २७ ॥

सञ्चितं दुष्टरुधिरं ततः सम्पद्यते सुखी ।
अवर्तमानमुच्छूनकठिनेभ्यो हरेदसृक् ॥ २८ ॥

अर्शोभ्यो जलजाशस्त्रसूचीकूर्चैः पुनः पुनः ।
शीतोष्णस्निग्धरूक्षाद्यैर्न व्याधिरुपशाम्यति ॥ २९ ॥

रक्ते दुष्टे भिषक् तस्माद्रक्तमेवात्रसेचयेत् ।

सर्वाङ्गसुन्दरी

धूपनमित्यादि ॥ धूपनादिभिर्गुदाङ्कुराः सञ्चितं दुष्टरुधिरं प्रस्रवन्ति । ततस्तस्माद्रक्तस्रुतेः परमर्शसः सुखी रुजारहितः सम्पद्यते । अर्शोभ्य उच्छून-कठिनेभ्योऽसृक् दुष्टरक्तमवर्त्तमानं जलौकादिभिरसकृद्धरेदासुखोत्पत्तेः । शीतो-ष्णादिभिरुपक्रमः कस्मादत्र न क्रियत इत्याह -- प्रयोजितैः शीतोष्णस्निग्धरूक्षाद्यै-रुपक्रमैर्यस्माद्व्याधिर्न्न उपशाम्यति रक्ते दुष्टे सति तस्माद्धेतोर्भिषक् जलजादिभी रक्तमेवावसेचयेन्न तु शीतादिर्योज्यः ।

शशिलेखा

धूपनमित्यादि सुबोधम् । अवर्तमानमप्रवर्तमानम् । उच्छूनकठिनत्वं रक्तविस्रावणहेतुः । जलजा जलूका । सूचीकूर्चः शस्त्रविधावुक्तः । सुबोधम् ॥

यो जातो गोरसः क्षीराद्बह्विमूलावचूर्णितात्[1] ॥ ३० ॥

पिबंस्तमेव तेनैव भुञ्जानो गुदजान् जयेत् ।
कोविदारस्य मूलानां मथितेन रजः पिबेत् ॥ ३१ ॥

अश्नन् जीर्णे च पथ्यानि मुच्यते हतनामभिः ।
गुदश्वयथुशूलार्त्तो मन्दाग्निर्गौलिमकान् पिबेत् ॥ ३२ ॥

हिङ्ग्वादीननुतक्रां वा खादेत्गुळहरीतकीम् ।
तक्रेण वा पिबेत् पथ्यावेल्लाग्निकुटजत्वचः ॥ ३३ ॥

---

1 बहुमूलावचूर्णितादिति केचित् पठन्ति । बहुमूला शतावरी । गोरसं तक्रम् ।

कलिङ्गमगधाज्योतिसूरणान् वांशवर्द्धितान् ।
कोष्णाम्बुना वा त्रिपट्व्योषहिङ्ग्वम्लवेतसान्   ॥ ३४ ॥

सर्वाङ्गसुन्दरी

यो जात इत्यादि ॥ यो गोरसः क्षीराज्जात उत्पन्नः। किंभूतात्। वह्निमूलावचूर्णिताच्चित्रकमूलावकीर्णात्तमेव गोरसं पिबन्ननन्तरं तेनैव च गोरसेन भुञ्जानो गुदजान् जयेत्। कोविदारमूलचूर्णं मथितेन पिबेत्। जीर्णे च तस्मिन् पथ्यान्यश्नन् दुर्नामभिर्मुच्यते। नश्यन्ति तान्यस्येत्यर्थः। गुदश्वयथुशूलार्तो मन्दाग्निर्नरो गौल्मिकान् गुल्मचिकित्सिते भवान् हिङ्ग्वादिचूर्णान् पिबेत्। इह द्रवानिर्देशादनन्तरञ्च मथितशब्दश्रवणादर्शोविकारे विहितत्वाच्च हिङ्ग्वादीन् चूर्णान् तक्रेणैव पिबेदिति बोध्यम्। अनुतक्रां वा तक्रानुपानां गुळहरीतकीं भक्षयेत्। अथवा पथ्यादींस्तक्रेण पिबेत्। अथवा कलिङ्गादीनंशवर्द्धितान् मूलद्रव्यापेक्षया भागेन यथोत्तरं वर्द्धितांस्तक्रेण पिबेत्। ज्योतिश्चित्रकः। अथ वोष्णजलेन त्रिपट्वादीन् पिबेत् ॥

शशिलेखा

गुळसहितां हरीतकीम् तक्रानुपानाम्। पथ्यादिकं तक्रेण। सुबोधम् ॥

युक्तं बिल्वकपित्थाभ्यां महौषधबिडेन वा ।
आरुष्करैर्यवान्या वा प्रदद्यात्तक्रतर्पणम्   ॥ ३५ ॥

दद्याद्वा हपुषाहिङ्गुचित्रकं तक्रसंयुतम् ।
मासं तक्रानुपानानि खादेत् पीलुफलानि वा   ॥ ३६ ॥

पिबेदहरहस्तक्रं निरन्नो वा प्रकामतः ।
अत्यर्थं मन्दकायाग्नेस्तक्रमेवावचारयेत्   ॥ ३७ ॥

सप्ताहं वा दशाहं वा मासार्धं मासमेव वा ।
बलकालविकारज्ञो भिषक् तक्रं प्रयोजयेत्   ॥ ३८ ॥

सायं वा लाजसक्तूनां दद्यात्तक्रावलेहिकाम् ।
जीर्णे तक्रे प्रदद्याद्वा तक्रपेयां ससैन्धवाम्   ॥ ३९ ॥

तक्रानुपानं सस्नेहं तक्रोदनमतः परम् ।
यूषैः रसैर्वा तक्राढ्यैः शालीन् युञ्जीत मात्रया ॥ ४० ॥

सर्वाङ्गसुन्दरी

युक्तमित्यादि ॥ तक्रेण तर्पणं यवसक्तून् प्रदद्यात्। किंभूतम् बिल्वकपित्थाभ्यां युक्तमथवा शुण्ठीविडेन युक्तं भल्लातकैर्युक्तमथवा यवान्या युक्तम्। तक्रतर्पणमेव बिल्वादिभिर्यथोक्तैः सह भुञ्जीत। नान्यत् किञ्चिदिति सूचयितुं प्रशब्दोऽत्र न्यस्तः। अथवा हपुषादिकं तक्रान्वितं दद्यात्। मासं पीलुफलानि वा तक्रानुपानानि खादेत्। अथवा इच्छयाऽहरहर्निरन्नोऽनन्नाशी तक्रं पिबेत्। अत्यर्थं मन्दकायाग्नेर्नरस्य सायं प्रातर्वा तक्रमेवावचारयेद्वैद्यो न त्वन्नमत एवैवकारोऽत्र निर्दिष्टः। सप्ताहं वा दशाहं वा मासार्धं मासं वा यावत् बलादिविद्वैद्यो मथितं प्रयोजयेत्। अथवा यदा तक्रेण केवलेन वर्तितुमशक्तस्तदा सायं दिनान्ते लाजसक्तूनां सम्बन्धिनीं तक्रावलेहिकां दद्यात्। अथवा तक्रे जीर्णे तक्रसिद्धां पेयां सैन्धवान्वितां दद्यात्। सैन्धवशब्दस्यान्ते श्रुतत्वादुभयोरप्यवलेहिकापेययोः सैन्धवेन योगो वेद्यः। अतः परमवलेहिकापेयातोऽनन्तरं तक्रेण सहोदनमीषत्स्नेहं तक्रानुपानं दद्यात्। अथवा यूषै रसैर्वा तक्रभूयिष्ठैः शालीन् मात्रया भुञ्जीत। कार्ये भक्तादौ कारणत्वेनोपचारात् शालीन् भक्तत्वेन परिणतानद्यादिति वेद्यम् ॥

शशिलेखा

युक्तमित्यादि सुबोधम्। पीलुफलानि वा तक्रानुपानानि मासं खादेत्। अहरहः केवलं तक्रं प्रातः पिबेन्निरन्नो वा। अतिशयेन मन्दाग्नेः केवलमेव तक्रमवचारयेत्। बलकालाद्यपेक्षया द्विविधोऽपि कालो विवक्षितः। सायं तक्रे जीर्णे तक्रेणैव वा लाजसक्तूनवलिह्यात्। तक्रपेयां वा दद्यात्। अतः परं तक्रोदनं दद्यात्। तक्राढ्यैस्तक्रभूयिष्ठैः सिद्धैः सुबोधम् ॥

सर्वथाऽत्र तक्रप्रयोगः प्रायेण पूजित इत्याह —

रूक्षमर्द्धोद्धृतस्नेहं यतश्चानुद्धृतं घृतम् ।
तक्रं दोषाग्निबलवित्त्रिविधं तत् प्रयोजयेत् ॥ ४१ ॥
न विरोहन्ति गुदजाः पुनस्तक्रसमाहताः ।

निषिक्तं तद्धि दहति भूमावपि तृणोलुपम् ॥ ४२ ॥

स्रोतःसु तक्रशुद्धेषु रसो धातूनुपैति यः ।
तेन पुष्टिर्बलं वर्णः परं तुष्टिश्च जायते ॥ ४३ ॥

वातश्लेष्मविकाराणां शतं च विनिवर्तते ।

सर्वाङ्गसुन्दरी

रूक्षमित्यादि ॥ यथायोगं कदाचिद्रूक्षं निश्शेषमुद्धृतस्नेहमथवार्द्धोद्धृतस्नेहं कदाचिदनुद्धृतं यस्मात् घृतम्। कारणे नवनीते कार्योपचारादेवमुक्तम्। तदेतत्त्रिविधं तक्रं दोषादिवित् प्रयोजयेत्। एवं तक्रप्रयोगे कृते को गुण इत्याह— न विरोहन्तीत्यादि । तक्रेण समाहता उन्मूलिता गुदजाः न पुनर्विरोहन्ति। समूला नश्यन्तीत्यर्थः। कथमेतदवगम्यत इत्याशंक्याह । हि यस्मात्तक्रं भूमावपि निषिक्तं तृणोलुपं विशेषेण दहत्यपुनरुत्पत्यापादनात् । भूमावपीत्यपिशब्दो न केवलं शरीरे बाह्यायामपि भुवीति सन्दर्शनार्थः । तृणोलुपं कठिनं यद्दहति तदवश्यमर्शांसि मृदूनि मांसप्रायाणि दहत्येव । वातसहितेन श्लेष्मणावृतेषु स्रोतःसु तक्रेण विशुद्धेषु सत्सु यो रस आहाररसो धातूनुपैति सम्प्राप्नोति तेन रसेन प्राप्तेन पुष्ट्यादयो जायन्ते। तथा वातश्लेष्मविकाराणां शतं विनिवर्त्तते शाम्यति च ॥

शशिलेखा

रूक्षमित्यादि सुबोधम् । तक्रेण समाहता विहता गुदजाः पुनर्न प्ररोहन्ति । अर्शोघ्नत्वेन तक्रमाहात्म्यम् । भूमावपि निषिक्तं तत्तक्रं तृणोलुपं दहत्युच्छिनत्ति। तक्रविशुद्धेषु स्रोतःसु आवरणरहितेषु सत्सु अन्नरसो धातून् रसादीनुपैति । तेनान्नरसोपचयेन बलादिकं जायते ॥

मथितं भाजने क्षुद्रबृहतीफललेपिते ॥ ४४ ॥

निशां पर्युषितं पेयमिच्छद्भिर्गुदजक्षयम् ।
धान्योपकुञ्चिकाजाजीहपुषापिप्पलीद्वयैः ॥ ४५ ॥

कारवीग्रन्थिकशठीयवान्यग्नियवानकैः ।
चूर्णितैर्घृतपात्रस्थं नात्यम्लं तक्रमासुतम् ॥ ४६ ॥

तक्रारिष्टं पिबेज्जातं व्यक्ताम्लकटु कामतः ।
दीपनं रोचनं वर्ण्यं कफवातानुलोमनम् ॥ ४७ ॥

गुदश्वयथुकण्ड्वर्तिनाशनं बलवर्धनम् ।
त्वचं चित्रकमूलस्य पिष्ट्वा कुम्भं प्रलेपयेत् ॥ ४८ ॥

तक्रं वा दधि वा तत्र जातमर्शोहरं पिबेत् ।
भार्ङ्ग्यास्फोतामृतापञ्चकोलेष्वप्येष संविधिः ॥ ४९ ॥

सर्वाङ्गसुन्दरी

मथितमित्यादि ॥ कण्टकारिकाफललेपिते भाजने मथितं निशां स्थितं गुदजक्षयमिच्छद्भिः पेयम् । धान्योपकुञ्चिकादिभिश्चूर्णितैर्घृतपात्रस्थं नात्यम्लं तक्रमासुतं कृत्वाऽनन्तरं व्यक्तावम्लकटू यस्य तद्व्यक्ताम्लकटु जातं सत् तक्रारिष्टं कामतः पिबेत् । तच्च पीतं दीपनादिगुणं स्यात् । अत्र च तक्रे पलशतमात्रे धान्यादीनि पलमानानि देयानीति वृद्धवैद्यव्यवहारः । चित्रकमूलस्य त्वचं जलेन पिष्ट्वा कुम्भं प्रलेपयेत् । ततस्तत्र जातं तक्रमथवा दधि जातमर्शोहरं पिबेत् । भार्ङ्ग्यादिष्वप्येष संविधिरेतैर्भाजनलेपनादिकं कार्यमित्यर्थः ॥

शशिलेखा

क्षुद्रबृहतीफललेपिते शुष्के भाजने घृतकुम्भे निशां पर्युषितम् धान्यादीनां चूर्णयुतं तक्रम् । धान्यादिचूर्णं दोषाद्यपेक्षम् तक्रसंस्कारादियोग्यं घृतकुम्भ आसुतं जातं तक्रं पिबेत् । चित्रकमूलत्वक्कल्कं कलशेऽन्तर्लेपयेत् । तत्र शुष्के कुम्भे जातं तक्रं वा दधि वा पिबेत् । चित्रमूलवत् भार्ङ्ग्यादिष्वपि कल्पः । धान्यं धान्याकम् । पिप्पलीद्वयं पिप्पली हस्तिपिप्पली च । ग्रन्थिकं पिप्पलीमूलम् । अग्निश्चित्रकः । यवानकमजमोदः यवानीभेदो वा । आस्फोतोऽर्कः । अमृता गुळूची ॥

पिष्टैर्गजकणापाठाकारवीपञ्चकोलकैः ।
तुंबुर्वजाजीधनिकाविल्वमध्यैश्च कल्पयेत् ॥ ५० ॥

फलाम्लान्यमकस्नेहान् पेयायूषरसादिकान् ।
एभिरेवौषधैः साध्यं वारि सर्पिश्च दीपनम् ॥ ५१ ॥

क्रमोऽयं भिन्नशकृतां वक्ष्यते गाढवर्चसाम् ।

सर्वाङ्गसुन्दरी

पिष्टैरित्यादि ॥ हस्तिपिप्पल्यादिभिः पिष्टैः कल्कितैस्तथा फलैर्बीजपूरादिभिरम्लान्यमकस्नेहान् पेयादिकान् कुर्यात्। एभिरेव हस्तिपिप्पल्यादिभिरौषधैर्वारि साध्यं श्रपणीयं सर्पिश्च साध्यं तच्च द्वयं दीपनं स्यात्। अयं पूर्वोक्तः क्रमो भिन्नशकृतां भिन्नपुरीषाणाम्। गाढपुरीषाणान्तु वक्ष्यते भणिष्यते॥

शशिलेखा

पिष्टैर्गजकणादिभिः पेयादीनन्नपानप्रकारान् कुर्यात्। तांश्च फलैर्दाडिमतिन्तिणीकादिभिरम्लान् यमकेन स्नेहद्वयेन यथायोग्येन स्निग्धान्। गजकणा हस्तिपिप्पली। कारवी शतपुष्पा। धनिका धान्याकम्। विल्वमध्यं विल्वशलाटु। एभिर्गजकणादिभिः पेयादिसाधनैः पेयादिप्रयोगवत् पानार्थं वारि जलं साधयेत्। एभिर्हस्तिपिप्पल्यादिभिर्घृतञ्च॥

स्नेहाढ्यैः सक्तुभिर्युक्तां लवणां वारुणीं पिबेत् ॥ ५२ ॥

लवणा एव वा तक्रशीधुधान्याम्लवारुणीः।
प्राग्भक्तान् यमके भृष्टान् सक्तुभिश्चावचूर्णितान ॥ ५३ ॥

करञ्जपल्लवान् खादेद्वातवर्चोनुलोमनान्।
सगुडं नागरं पाठां गुडक्षारघृतानि वा ॥ ५४ ॥

गोमूत्राध्युषितामद्यात् सगुडां वा हरीतकीम्।

सर्वाङ्गसुन्दरी

स्नेहाढ्यैरित्यादि ॥ स्नेहाढ्यैर्बहुस्नेहसंयुक्तैः सक्तुभिर्युक्तां लवणां वारुणीं पिबेत्। तक्रशीध्वादीन् वा लवणानेव पृथग्यथायोगं पिबेत्। एवशब्दोऽत्र केवलानेवैतान् सक्तुरहितान् पिबेदिति द्योतयति। तथा करञ्जपल्लवान् भक्षयेत्। किंभूतान्। प्राग्भक्तान्। भक्तात् प्राक्। मयूरव्यंसकादित्वात्समासः। करञ्जपल्लवान् भुक्त्वाऽन्नं भोक्तव्यमित्यर्थः। पुनः किंभूतान्। यमके स्नेहद्वये भृष्टान् पक्वान्। तथा सक्तुभिः सुष्ठ्ववचूर्णितान् तांश्च वातवर्चोनुलोमनान्। तथा गुडेन सह शुण्ठीं पाठां वाऽश्नीयात्। अथवा गुडयवक्षारसर्पींष्यद्यात्। गुडेन वा सह हरीतकीमद्यात्। किंभूताम्। गोमूत्रेऽध्युषितां निशास्थिताम्॥

शशिलेखा

स्नेहाद्यैरित्यादि सुबोधम् । प्राग्भक्तान् यमकस्नेहे भृष्टान् सक्तुयुतान् करञ्जपल्लवान् करञ्जपत्रांकुरान् खादेत् । तांश्च वातवर्चोनुलोमनान् । गुडेन सह शुण्ठीं पाठां वाऽश्नीयात् । अथवा गुडयवक्षाराज्यान्यथवा गोमूत्रे रात्रि मुषितां सगुडां प्राणदामद्यात् ॥

पथ्याशतद्वयं मूत्रद्रोणेनामूत्रसंक्षयात् ॥ ५५ ॥
पक्त्वा खादेत्समधुनी द्वे द्वे हन्ति कफोद्भवान् ।
दुर्नामकुष्ठश्वयथुगुल्ममेहोदरकृमीन् ॥ ५६ ॥
ग्रन्थ्यर्बुदापचीस्थौल्यपाण्डुरोगाढ्यमारुतान् ।

सर्वाङ्गसुन्दरी

पथ्याशतद्वयमित्यादि ॥ पथ्यानां शतद्वयं पथ्याशतद्वयं गोमूत्रद्रोणेन मूत्रसंक्षयं यावत् मूत्रक्षयावधि पक्त्वा द्वे द्वे फले पथ्याख्ये खादेत् । किंभूते । समधुनी माक्षिकयुक्ते । पथ्याशतद्वयञ्चोपयुक्तं कफोद्भवानामयान् दुर्नामादीन् हन्ति ॥

शशिलेखा

गोमूत्रस्य द्रोणं पलशतानि पञ्च द्वादशपलाधिकानि । सुबोधम् ॥

अजशृङ्गीजटाकल्कमजामूत्रेण यः पिबेत् ॥ ५७ ॥
गुडवार्त्ताकभुक्तस्य नश्यन्त्याशु गुदाङ्कुराः ।
श्रेष्ठारसेन त्रिवृतां पथ्यां तक्रेण वा सह ॥ ५८ ॥
पथ्यां वा पिप्पलीयुक्तां घृतभृष्टां गुळान्विताम् ।
अथवा सत्रिवृद्दन्तीं भक्षयेदनुलोमनीम् ॥ ५९ ॥
हृते गुदाश्रये दोषे गुदजा यान्ति संक्षयम् ।
डाडिमस्वरसाजाजीयवानीगुडनागरैः ॥ ६० ॥
पाठया च युतं तक्रं वातवर्चोनुलोपनम् ।
शीधुं वा गौडमथवा सचित्रकमहौषधम् ॥ ६१ ॥
पिबेत्सुरां वा हपुषापाठासौवर्चलान्विताम् ॥

सर्वाङ्गसुन्दरी

अजशृङ्गीत्यादि ॥ अजशृङ्गीमूलकल्कं यः पुरुषोऽजामूत्रेण पिबेत्। किंभूतः। गुडवार्ताकभुक् एतदाहारस्तस्य पुरुषस्य द्राक् दुर्नामानि नश्यन्ति। श्रेष्ठारसेन त्रिफलाक्वाथेन त्रिवृतामद्यात्। अभयां वा तक्रेण सहाद्यात्। पथ्यां वा पिप्पलीयुक्तां घृतभृष्टां गुळयुक्तां भुञ्जीत। अथवा पथ्यां त्रिवृद्दन्तीभ्यां सहानुलोमनकर्तीं भक्षयेत्। गुदाश्रये दोषे हृते सति गुदजाः संक्षयं यान्ति। आश्रयाभावे आश्रितानुपपत्तेः। तस्मादनुलोमनमर्शःसु हितमित्यर्थः। डाडिमस्वरसादिभिर्युतं तक्रं पाठया च वातवर्चोनुलोमनं स्यात्। अथवा शीधुं चित्रकशुण्ठीयुतं पिबेत्। गौडं वा चित्रकशुण्ठीयुतं पिबेत्। अथवा सुरां हपुषादियुक्तां पिबेत् ॥

शशिलेखा

अजशृङ्गीत्यादि सुबोधम्। श्रेष्ठारसेन त्रिफलाक्वाथेन सह त्रिवृच्चूर्णं तक्रेण सह हरीतकीं वाद्यात्। पिप्पलीभिर्वा सह हरीतकीं घृतभृष्टां सगुडाम्। सकुंभनिकुंभां वा हरीतकीं घृतभृष्टां सगुडाम्। हृते गुदाश्रय इत्यादिना विरेचनप्रयोगे हेतुमाह। डाडीमस्वरसादिभिः पाठान्तैर्युतं तक्रं वातस्य वर्चसश्चानुलोमनम्। चित्रकनागरचूर्णान्वितं शीधुं गौडं वा हपुषाद्यन्वितां सुरां वा पिबेन्मद्यप इत्यर्थात् ॥

दशादिदशकैर्वृद्धाः पिप्पलीर्द्विपिचुं तिलात् ॥ ६२ ॥
पीत्वा क्षीरेण लभते बलं देहहुताशयोः।
दुस्पर्शकेन बिल्वेन यवान्या नागरेण वा ॥ ६३ ॥

एकैकेनाऽपि संयुक्ता पाठा हन्त्यर्शसां रुजम्।
सलिलस्य वहे पक्त्वा प्रस्थार्धमभयात्वचाम् ॥ ६४ ॥

प्रस्थं धात्र्या दशपलं कपित्थानां ततोऽर्द्धतः।
विशालां लोद्ध्रमरिचकृष्णावेल्लैलवालुकम् ॥ ६५ ॥

द्विपलांशं पृथक्पादशेषे पूते गुडात्तुले।
दत्वा प्रस्थञ्च धातक्या स्थापयेद्घृतभाजने ॥ ६६ ॥

पक्षात्स शीलितोऽरिष्टः करोत्यग्निं निहन्ति च।
गुदजग्रहणीपाण्डुकुष्ठोदरगरज्वरान् ॥ ६७ ॥
श्वयथुप्लीहहृद्रोगगुल्मयक्ष्मवमिक्रुमीन्।

सर्वाङ्गसुन्दरी

दशादीत्यादि ॥ दशादिदशकैर्वृद्धाः पिप्पलीस्तथा तिलात् द्विपिचुं क्षीरेण पीत्वा देहस्य वह्नेश्च बलं प्राप्नोति। दश पिप्पल्य आदिः प्रथमदिनं येषां दशकानां त एवम्। दशादयश्च ते दशकाश्च दशादिदशकाः। तैर्वृद्धाः। एवं प्रथमे दिने दश पिप्पल्यस्तिलकर्षद्वयश्च क्षीरेण पेयाः। अनन्तरं प्रतिदिनं दश दश पिप्पलीः पिप्पलीवर्द्धमानन्यायेन वृद्धाः तिलकर्षद्वयेन सह क्षीरेण पीत्वा देहस्याग्नेश्च बलं लभते। अत्र कालस्यानिर्द्दिष्टत्वात् देहाग्न्योर्बलमिच्छता यथेष्ट-कालमुपयोगः कार्यः। क्षीरस्य चात्र प्रमाणेऽनुक्ते सामान्यपरिभाषया "पेष्यस्य कर्षमालोड्यं तद्द्रवस्य पलत्रये" इति परिमाणं कल्प्यम्। तिलास्तु कृष्णा निस्त्वचो ग्राह्याः। धन्वयवाषकेण बिल्वेन यवान्या शुण्ठ्या वैकैकेनाप्येवं पाठा युक्ता दुर्नाम्नां रुजं हन्ति। एकैकेनाऽपीत्यपिशब्देन द्वाभ्यां त्रिभिश्चतुर्भिश्च युक्तेति। एकैकेनेत्येकशब्दस्यैकं बहुव्रीहिवदिति द्वित्वबहुव्रीहिवद्भावात् सुपो लुक्। सलिलस्य वहे द्रोणचतुष्टये पक्त्वा हरीतकीत्वचां प्रस्थार्द्धमष्टपलान्यामलकफलानां प्रस्थं कपित्थस्य पलानि दश ततः कपित्थादर्द्धेन विशालां पञ्चपलानि लोध्रादिकं द्विपलांशं पृथक् पृथगेतत् सर्वं पक्त्वा पादशेषे पूते गालिते चास्मिन् गुडात्तुले द्वे दत्वा धातक्याः प्रस्थञ्च ततो धृतरूढे भाजने स्थापयेत्। पक्षादूर्ध्वं शीलितः सोभयारिष्टसंज्ञोऽग्निं करोति दीपयति। गुदजादींश्च हन्ति ॥

शशिलेखा

दशादिदशकेत्यादि सुबोधम्। अभयात्वचां प्रस्थार्धमष्टौ पलानि। धात्र्याः षोडशपलानि। कपित्थमध्यस्य दशपलम्। विशालायाः पलपञ्चकम्। द्विपलांशानि लोध्रादीनि। सलिलस्य वहे अष्टचत्वारिंशत्पलाधिके भारे विपाचयेत्। भारं पलशतानि विंशतिः। पादश्चतुर्थो भागः पञ्चशतपलानि द्वादशपलाधिकानि। पूते वस्त्रगालिते गुलतुलाद्वयं धातक्याः प्रस्थञ्च दत्वा पुनर्घृतभाविते भाजने घटे निदध्यात्। मासार्धं स्थितः सोऽभयारिष्टः

शीलितोऽग्निं करोति गुदजादीन्निहन्ति च। विशाला गवाक्षी। सैवेन्द्र-वारुणी। वेल्लं विळङ्गम् ॥

जलद्रोणे पचेद्दन्तीदशमूलवराग्निकान् ॥ ६८ ॥
पालिकान् पादशेषे तु क्षिपेद्गुडतुलां परम्।
पूर्ववत्सर्वमस्य स्यादानुलोमतरस्त्वयम् ॥ ६९ ॥

सर्वाङ्गसुन्दरी

जलद्रोण इत्यादि ॥ जलद्रोणे दन्त्यादीन् पालिकान् पचेत्। पाद-शेषे तस्मिंस्तु गुडात्तुलां क्षिपेत्। परमन्यत् सर्वमस्य दन्त्यरिष्टस्य पूर्ववदभयारिष्ट-तुल्यं धातकीपरिमाणं घृतभाजने स्थापनं पक्षोत्तरकालपानादि स्यात्। आनुलो-मीत्यादि। आनुलोमी वातविबन्धनुदभयारिष्टः। अयं पुनस्ततोऽप्यानुलोमितरः ॥

शशिलेखा

जलद्रोण इत्यादि सुबोधम्। अस्य दन्त्यरिष्टस्य परं धातकीप्रक्षेपमासार्ध-स्थापनादि सर्वं प्राग्वत्। अयन्तु दन्त्यरिष्टः पूर्वस्मादनुलोमतरः। वरा त्रिफला। अग्निकश्चित्रकः ॥

पचेद्दुरालभाप्रस्थं द्रोणेऽपां प्रसृतैः सह।
दन्तीपाठाग्निविजयावाशामलकनागरैः ॥ ७० ॥
तस्मिन् सिताशतं दद्यात् पादस्थेऽन्यच्च पूर्ववत्।
लिम्पेत् कुंभन्तु फलिनीकृष्णाचव्याज्यमाक्षिकैः ॥ ७१ ॥

सर्वाङ्गसुन्दरी

पचेदित्यादि ॥ अपां द्रोणे धन्वयासप्रस्थं दन्त्यादिभिर्द्विपलिकैः सह पचेत। पादस्थे तस्मिन् क्वाथे सितायाः शतं पलशतं दद्यात। अन्यद्धातकी-परिमाणादिकं पूर्ववदभयारिष्टवत् कार्यम्। लिम्पेदित्यादि। तुर्विशेषे। विशेषस्तु फलिन्यादिभिः कुम्भं लिम्पेद्यत्रायं निक्षिप्यते। अयं दुरालभारिष्टः। इति ॥

शशिलेखा

दुरालभायाः दुस्पर्शायाः प्रस्थं षोडशपलानि दन्त्यादीनां प्रत्येकं द्विपलं जलद्रोणे पचेत्। पादशिष्टे पूते शीते च शकरातुलां दद्यात्। अन्यच्च पूर्ववदिति दन्त्यरिष्टवत्। अग्निश्चित्रकः। विजयाऽभया। फलिनी प्रियङ्गुः। कुम्भे लेपोऽर्धाङ्गुलः ॥

प्राग्भक्तमानुलोम्याय फलाम्लं वा पिबेत् घृतम्।
चव्यचित्रकसिद्धं वा यवक्षारगुडान्वितम् ॥ ७२ ॥

पिप्पलीमूलसिद्धं वा सगुडक्षारनागरम्।
पिप्पलीपिप्पलीमूलधानकाडाडिमैर्घृतम् ॥ ७३ ॥

दद्ध्ना च साधितं वातशकृन्मूत्रविबन्धहृत्।
पलाशक्षारतोयेन त्रिगुणेन पचेत् घृतम् ॥ ७४ ॥

वत्सकादिप्रतीवापमर्शोघ्नं दीपनं परम्।
पञ्चकोलाभयाक्षारयवानीबिडसैन्धवैः ॥ ७५ ॥

सपाठाधान्यमरिचैः सबिल्वैर्दधिमत् घृतम्।
साधयेत् तज्जयत्याशु गुदवंक्षणवेदनाम् ॥ ७६ ॥

प्रवाहिकां गुदभ्रंशं मूत्रकृच्छ्रं परिस्रवम्।
पाठाजमोदधनिकाश्वदंष्ट्रापञ्चकोलकैः ॥ ७७ ॥

सबिल्वैर्दद्ध्नि चाङ्गेरीस्वरसे च चतुर्गुणे।
हन्त्याज्यं सिद्धमानाहं मूत्रकृच्छ्रं प्रवाहिकाम् ॥ ७८ ॥

गुदभ्रंशार्तिगुदजग्रहणीकफमारुतान्।

सर्वाङ्गसुन्दरी

प्राग्भक्तमित्यादि ॥ प्राग्भक्तं भक्तात् पूर्वं घृतं फलैर्मातुलुङ्गादिभिरनुलोमनप्रायैरम्लं तैः पक्वं वा पिबेत्। चव्यचित्रकाभ्यां सिद्धं पक्वं यवक्षारगुडाभ्यां युक्तं वा घृतं पिबेत्। अथवा पिप्पलीमूलसिद्धं गुडयवक्षारनागरसहितं पिबेत्। पिप्पल्यादिभिर्दधिसहितैः साधितं घृतं वातशकृन्मूत्रविबन्धहृत्। पलाशक्षारस्य जलेन त्रिगुणेन वत्सकादिप्रतीवापं घृतं पचेत्। तच्चार्शोघ्नं परं

दीपनञ्च। पञ्चकोलादिभिर्दधिसहितं घृतं पचेत्। तच्च गुदादिवेदनादीनाशु जयति। पाठादिभिश्चाङ्गेरीस्वरसे दध्नि च चतुर्गुणे पक्वं घृतं चाङ्गेरीघृतमेतदानाहादीन् हन्ति॥

शशिलेखा

फलाम्लं डाडिमाद्यम्लं घृतं प्राग्भक्तं पिबेत्। चव्यादिसिद्धं वा घृतं यवक्षारचूर्णगुडयुतम्। पिप्पलीमूलसिद्धं गुडक्षारनागरसहितं वा पाठादिभिर्बिल्वसहितैः दध्नि चतुर्गुणे चाङ्गेरीस्वरसे च सिद्धं घृतमानाहादीन् हन्ति। धनिका धान्याकम्। श्वदंष्ट्रा गोक्षुरकः। बिल्वं बिल्वफलम्॥

शिखितित्तिरिलावानां रसानम्लान् सुसंस्कृतान् ॥ ७९ ॥

दक्षाणां वर्तकानां वा दद्याद्विड्वातसङ्ग्रहे।
वास्तुकाग्नित्रिवृद्दन्तीपाठाम्लीकादिपल्लवान् ॥ ८० ॥

अन्यच्च कफवातघ्नं शाकञ्च लघु भेदि च।
सहिङ्गु यमके भृष्टं सिद्धं दधिसरैः सह ॥ ८१ ॥

धनिकापञ्चकोलाभ्यां पिष्टाभ्यां डाडिमाम्बुना।
आर्द्रिकायाः किसलयैः शकलैरार्द्रकस्य च। ॥ ८२ ॥

युक्तमङ्गारधूपेन हृद्येन सुरभीकृतम्।
सजीरकं समरिचं विडसौवर्चलोत्कटम्। ॥ ८३ ॥

वातोत्तरस्य रूक्षस्य मन्दाग्नेर्बद्धवर्चसः।
कल्पयेद्रक्तशाल्यन्नव्यञ्जनं शाकवद्रसान् ॥ ८४ ॥
गोगोधाछागलोष्ट्राणां विशेषात् क्रव्यभोजिनाम्।

सर्वाङ्गसुन्दरी

शिखीत्यादि॥ मयूरतित्तिर्यादीनां सुसंस्कृतानम्लान् मांसरसान् विड्वातसङ्ग्रहनिवृत्त्यर्थं दद्यात्। वास्तुकादीनां शाकं तथाऽन्यदपरमपि शाकं यत् कफवातघ्नं कोशातकावल्गुजकादि लघु च भेदि च तत् सहिङ्गु तथा यमके स्नेहद्वये भृष्टं सन्तलितम्। तथा दधिसरेण धनिकापञ्चकोलाभ्यां पिष्टाभ्यां डाडिमाम्बुना च सिद्धं तथाऽर्द्रिकाया धनिकायाः किसलयैः पल्लवैर्युक्तम्।

तथाऽर्द्रकस्य च शकलैर्युक्तम्। तथा हृद्येन मनःप्रियेणाङ्गारधूपेन अङ्गारैर्यो धूपो हिङ्ग्वादिना प्रसिद्धस्तेन सुरभीकृतम्। तथा सजीरकम्। तथा समरिचम्। तथा विडसौवर्चललवणाभ्यां उत्कटमधिकम्। वातोत्तरस्य पवनाधिकस्य पुरुषस्य तथा रूक्षस्य तथा मन्दाग्नेस्तथा बद्धवर्चसो रक्तशालिभक्तस्य व्यञ्जनं तेमनाख्यं शाकवत् कल्पयेत् शाकसंस्कारेण कुर्यादित्यर्थः "व्यञ्जनानि" ति पाठे पुंस्त्वं चिन्त्यम्। तथा रसान्। केषाम्। गोगोधादीनां विशेषेण रूक्षभोजिनां मांसभक्षिणाम्॥

शशिलेखा

विड्वातसङ्ग्रहे शिख्यादीनां रसान् डाडिमतिन्तिणीकबदरमातुलुङ्गाद्यम्लान् दद्यात्। वास्तुकाद्यन्यतमाङ्कुरान्। अन्यच्चेति चाङ्गेरीलोणीकाचोदकादिकं हिङ्गुसहितं यमके भृष्टं दधिसरैर्डाडिमाम्बुना पिष्टाभ्यां धनिकापञ्चकोलाभ्यामार्द्रिकाया किसलयैरार्द्रकस्य शकलैश्च युक्तं हृद्येन हृदयप्रियेणाङ्गारधूपेन सुरभीकृतं जीरकादिसहितं वातोत्तरत्वादिविशिष्टस्य पुरुषस्य रक्तशाल्यन्नस्य व्यञ्जनं कल्पयेद्द्यात्। तथा शाकवत् गवादीनां रसान् कल्पयेत्। तदेवमाहारं निरूप्य पानं निरूपयन्नाह॥

मदिरां शार्करं गौडं शीधुं तक्रं तुषोदकम् ॥ ८५ ॥

अरिष्टं मस्तु पानीयं पानीयं वाल्पकं शृतम्।
धान्येन धान्यशुण्ठीभ्यां कण्टकारिकयाऽथवा ॥ ८६ ॥

अन्ते भक्तस्य मध्ये वा वातवर्चोनुलोमनम्।
विड्वातकफपित्तानामानुलोम्ये हि निर्मले ॥ ८७ ॥

गुदे शाम्यन्ति गुदजाः पावकश्चाभिवर्धते।
उदावर्तपरीता ये ये चात्यर्थं विरूक्षिताः ॥ ८८ ॥

विलोमवाताः शूलार्तास्तेष्विष्टमनुवासनम्।
पिप्पलीं मदनं विल्वं शताह्वां मधुकं वचाम् ॥ ८९ ॥

कुष्ठं शुण्ठीं पुष्कराह्वं चित्रकं देवदारु च।
पिष्ट्वा तैलं विपक्तव्यं द्विगुणक्षीरसंयुतम् ॥ ९० ॥

अर्शसां मूढवातानां तच्छ्रेष्ठमनुवासनम्।

गुदनिःसरणं शूलं मूत्रकृच्छ्रं प्रवाहिकाम् ॥ ९१ ॥
कट्यूरुपृष्ठदौर्बल्यमानाहं वंक्षणाश्रयम् ।
पिच्छास्रावं गुदे शोफं वातवर्चोविनिग्रहम् ॥ ९२ ॥
उत्थानं बहुशो यच्च जयेत्तच्चानुवासनात् ।
निरूहं वा प्रयुञ्जीत सक्षीरं पाञ्चमूलिकम् ॥ ९३ ॥
समूत्रस्नेहलवणं कल्कैर्युक्तं फलादिभिः ।

सर्वाङ्गसुन्दरी

मदिरामित्यादि ॥ मदिरादि पानीयं पातव्यम् । अथवा पानीयम् जलमल्पकमतिशयेनाल्पं शृतं यथायोगं कदाचिद्धान्येन कदाचिद्धान्यशुण्ठीभ्यां कदाचित् कण्टकारिकया शृतं कदाचित् भक्तस्यान्ते कदाचिन्मध्ये योग्यतावशाद्येषां मारुतविषमत्वं तेषां भक्तस्य मध्येऽन्येषामन्ते मदिरादिपानं वातवर्चोऽनुलोमनम्। तयोरप्रवर्त्तनोपारूढयोर्यथामार्गप्रवर्त्तनमित्यर्थः । वातस्यानुलोमनं यत्तत् कफपित्तयोरप्यनुलोमनम् । पवनो हि क्रियावानक्रियावतां देहगतानां भावाना मनुलोमकः संभाव्यते । तथा च प्रागभ्यधायि । "विट्श्लेष्मपित्तादिमला-चयानां विक्षेपसंहारकरः स यस्मादि"त्यादि। अर्शःसु सदा चानुलोमनं भेषजान्नपानं कार्यमित्यत्र हेतुमाह —विड्वातेत्यादि । हि यस्माद्विड्वातादीना मानुलोम्ये सति गुदं निर्मलं भवति । गुदे च निर्मले सति गुदजाः शाम्यन्ति । पावकः कायाग्निश्चाभिवर्धते'यतस्तस्मादर्शसाय विड्वातकफपित्तानुलोमनं भेषजान्न पानमतियत्नेन देयमिति भावः । ये पुरुषा उदावर्तयुक्ता ये चाऽतिशयेन विरूक्षि-तास्तथा विगुणपवनाः शूलपीडिताश्च तेष्वनुवासनमिष्टम् । तन्त्रकृतामिति शेषः । तदेवानुवासनमाह-- पिप्पलीमित्यादि। पिप्पल्यादीनि पिष्ट्वा जलेन तैलं द्विगुण-क्षीरयुतं विपक्तव्यम् । जलस्यात्रानुक्तस्यापि चतुर्गुणत्वं कल्प्यम् । एवं हि द्रव्याणि सम्यङ्मुक्तरसानि स्युः । तन्त्रान्तरे चोक्तम् । 'स्नेहस्य क्षीरमूत्राद्यैः पाको यत्रेरितः क्वचित्। जलं चतुर्गुणं तत्र वीर्याधानार्थमावपेत् ॥ न मुञ्चति रसं द्रव्यं क्षीरादिभिरुपस्कृतम् । सम्यक्पाको न जायेत तस्मात्तोयं विनिक्षि-पेदि"ति । तच्च तैलं विगुणपवनानामर्शसां श्रेष्ठम् । अनुवासनाच्चैतत्तैलं गुदनि-स्सरणादीन् जयेत् । अथवा निरूहं पाञ्चमूलिकं समानक्षीरं मूत्रस्नेहलवणान्वितं फलादिभिः पूर्वोक्तैरनुवासनद्रव्यैः कल्कैर्युक्तं प्रयुञ्जीत। स च पूर्वोक्तगुणः ।

समानं क्षीरं यस्मिन् तत्सक्षीरम्। समानस्य छन्दसीति योगविभागात् सभावः। सह मूत्रस्नेहलवणैर्वर्तते समूत्रस्नेहलवणस्तम्। वोपसर्जनस्येति सभावः। अत्र सशब्द ईषच्छब्दार्थः॥

शशिलेखा

मदिरामित्यादि सुबोधम्। धान्येन शृतं शीतं पानीयम्। जलमल्पक मत्यल्पं पानीयं पातव्यम्। तथा धान्यनागराभ्यां शृतं जलमल्पकं कण्टकारिकया वा शृतं जलमल्पकम्। सुबोधम्। पिप्पलीत्यादि—पिप्पल्यादिकं स्नेहाच्चतुर्थांशम्। तैलाद्द्विगुणं क्षीरम्। जलं चतुर्गुणम्। शताह्वा शतपुष्पा। पुष्कराह्वं पुष्करमूलम्। पिच्छा मण्डप्राया। फलादिभिरनुवासनोक्तैः। सुबोधम्॥

अर्शसां शुष्कार्द्रत्वेन द्वैविध्यम्। तत्र शुष्कार्शसां चिकित्सितमुक्त्वाऽधुनाऽर्द्राणां रक्तार्शसामाह—

अथ रक्तार्शसां वीक्ष्य मारुतस्य कफस्य वा ॥ ९४ ॥
अनुबन्धं ततः स्निग्धं रूक्षं वा योजयेद्विधिम्।
शकृच्छ्यावं खरं रूक्षमधो निर्याति नानिलः ॥ ९५ ॥
कट्यूरुगुदशूलञ्च हेतुर्यदि च रूक्षणम्।
तत्रानुबन्धो वातस्य श्लेष्मणो यदि विट् श्लथा ॥ ९६ ॥
श्वेता पीता गुरुः स्निग्धा सपिच्छा स्तिमितो गुदः।
हेतुः स्निग्धगुरुर्विद्याद्यथास्वं चास्रलक्षणात् ॥ ९७ ॥
दुष्टेऽस्रे शोधनं कार्यं लङ्घनं च यथाबलम्।
यावच्च दोषैः कालुष्यं स्रुतेस्तावदुपेक्षणम् ॥ ९८ ॥

सर्वाङ्गसुन्दरी

अथेत्यादि॥ रक्तार्शसां पित्तानुबन्धस्यावचनं पित्तस्य सर्वदाऽव्यभिचारित्वात्। कदाचिन्मारुतानुबन्धं कदाचित् कफानुबन्धं स्वलिङ्गतो वीक्ष्योपलभ्य स्निग्धं रूक्षं वा पानाद्यौषधं योजयेत्। एतच्च त्रयमपि शीतं न तूष्णम्। पित्तस्याऽत्र नित्यं सन्निहितत्वात्। मारुतानुबन्धं वीक्ष्य स्निग्धं चिकित्सितं योज्यम्। कफानुबन्धं वीक्ष्य रूक्षं चिकित्सितं योज्यम्। वातानुबन्धकफानुबन्धयोर्लक्षणमाह —शकृदित्यादि। शकृच्छ्यावादिशूलपर्यन्तं लक्षणं यदि स्यात्तत्रानुबन्धो वातस्येत्येवं बोध्यम्। हेतुर्यदि च रूक्षणं रूक्षणं च हेतुरासेवितः शकृच्छ्यावादिलक्षण-

ञ्चोल्वत्वं तदा वातानुबन्धत्वं ज्ञेयम्। तथैव यदा विड्श्लथादिलक्षणं गुदश्च स्तिमितो निश्चलं स्निग्धगुरुणा सेवितेन हेतुना सहितं तदा श्लेष्मणोऽनुबन्धस्यानुमापकम्। अस्रस्य लक्षणाच्च यथायथं सिराव्यधविध्युक्ता"द्वाताच्छ्यावारुण"मित्यादिकाच्च लक्षणाद्वातस्यानुबन्धं विद्यात्। "कफात् स्निग्ध"मित्यादिकाल्लक्षणात् कफस्यानुबन्धं विद्यात्। दुष्टे वातादिदूषितेऽस्रे शोधनं कार्यम्। यथाबलं बलानतिक्रमेण कदाचिल्लङ्घनं कार्यम्। बहुदोषस्य शोधनमितरस्य लङ्घनमुपवासलक्षणं कार्यम्। यावच्च दोषैरस्रस्य कालुष्यमनैर्मल्यं तावत् स्रुतेः प्रकृतत्वाद्दोषदुष्टस्यापानमार्गतः प्रवृत्तस्यास्रस्योपेक्षणं कार्यम्। तथाभूताया दुष्टरक्तस्रुतेः सङ्ग्रहणाय यत्नो न कार्य इत्यर्थः॥

शशिलेखा

अथेत्यादि सुबोधम्। अशुद्धं स्रवद्रक्तं यावद्दोषैः कालुष्यम् तावदुपेक्षेत। न स्तम्भयेदित्यर्थः॥

दोषाणां पाचनार्थं च वह्निसन्धुक्षणाय च।
सङ्ग्रहाय च रक्तस्य परं तिक्तैरुपाचरेत् ॥ ९९ ॥

यत्तु प्रक्षीणदोषस्य रक्तं वातोल्बणस्य वा।
स्नेहैस्तत्साधयेद्युक्तैः पानाभ्यञ्जनवस्तिषु ॥ १०० ॥

यत्तु पित्तोल्बणं रक्तं घर्मकाले प्रवर्तते।
स्तम्भनीयं तदेकान्तान्न चेद्वातकफानुगम् ॥ १०१ ॥

सकफेऽस्रे पिबेत् पाक्यं शुण्ठीकुटजवल्कजम्।
किराततिक्तकं शुण्ठीं धन्वयासं कुचन्दनम् ॥ १०२ ॥

दार्वीत्वङ्निम्बसेव्यानि त्वचं वा डाडिमोद्भवाम्।
कुटजत्वक्फलं तार्क्ष्यं माक्षिकं घुणवल्लभाम् ॥ १०३ ॥

पिबेत्तण्डुलतोयेन कल्कितं वा मयूरकम्।

सर्वाङ्गसुन्दरी

दोषाणामित्यादि॥ कालुष्यसहिताया रक्तस्रुतेः परमनन्तरं दोषाणां सामानां पक्त्यर्थं तथा वह्नेः सन्धुक्षणाय तथा रक्तस्य सङ्ग्रहार्थं तिक्तैस्तिक्तरसै-

र्द्रव्यैस्तमर्शसमुपाचरेदिति सामदोषजरक्तार्शोविकारशान्त्यर्थमुपक्रम उपदिष्टः। यत् पुनः प्रक्षीणदोषस्य निरामस्य रक्तं स्रवेत वाताधिकस्य वा पुरुषस्य यद्रक्तं स्रवेत तत् स्नेहैः पानादियुक्तैः साधयेत् चिकित्सेत् । यत्पुनः पित्तोल्बणं रक्तं ग्रीष्मर्त्तौ प्रवर्तते तदेकान्तेनावश्यं स्तम्भनीयं नोपेक्षणीयं शीघ्रकारित्वात् । किं सर्वमेकान्तात् स्तम्भनीयम् । नेत्याह । नचेद्वातकफानुगं वातकफानुबद्धन्तु लङ्घनादिभिरेव चिकित्सेत् । कफानुगे रक्ते शुण्ठीकुटजवल्कलं क्वथितं पिबेत् । किराततिक्तकादीन् क्वथितान् पिबेत् । अथवा डाडिमजां त्वचं क्वथितां पिबेत्। कुडजत्वचं फलमिन्द्रयवान् रसाञ्जनादींश्च तण्डुलजलेन पिबेत् । माक्षिकं मधु । घुणवल्लभाऽतिविषा । अथवा तेनैव तण्डुलजलेन पिष्टमपामार्गं पिबेत् ॥

शशिलेखा

दोषाणामित्यादि सुबोधम् । सकफे श्लेष्मोल्बणे शुण्ठीकुटजत्वक्कषायादि पिबेत्। सुबोधम् । कुटजत्वगादिकं समधु तण्डुलोदकेन । तार्क्ष्यं रसाञ्जनम्। घुणवल्लभाऽतिविषा । मयूरकं वा तण्डुलप्रक्षाळनजलेन पिबेत् ॥

तुलां दिव्येऽम्भसि पचेदार्द्रायाः कुटजत्वचः ॥ १०४ ॥

नीरसायां त्वचि क्वाथे पूते सूक्ष्मरजीकृतान् ।
समङ्गाफलिनीमोचरसान्मुष्ट्यंशकान् समान् ॥ १०५ ॥

तैश्च शक्रयवान् दद्यात् ततो दर्वीप्रलेपनम् ।
पक्त्वावलेहं लीढ्वा च तं यथाग्निबलं पिबेत् ॥ १०६ ॥

पेयां मण्डं पयश्छागं गव्यं वा छागदुग्धभुक् ।
लेहोऽयं शमयत्याशु रक्तातीसारपायुजान् ॥ १०७ ॥

बलवद्रक्तपित्तञ्च स्रवदूर्ध्वमधोऽपि वा ।

सर्वाङ्गसुन्दरी

तुलामित्यादि ॥ कुटजत्वच आर्द्रायास्तुलां दिव्येऽम्भसि आन्तरिक्षे जले पचेत् । दिवि भवं दिव्यम् । दिगादित्वाद्यत् । एतच्च द्रव्यं सामान्यपरिभाषापरिमाणकल्पनयैव क्वाथ्यम् । सामान्यपरिभाषापरिमाणेनैव क्वथितशेषत्वं प्राप्तमिति तदपवादार्थमाह--नीरसायामित्यादि । तावत् पचेद्यावदेषा कुटजस्य त्वक् नीरसा स्यात् । नीरसत्वञ्च प्रायेणाष्टांशशेषे क्वाथे भवति । तस्यां

नीरसायां सत्यां यत्परिमाणः क्वाथोऽवशिष्यते तस्मिन् क्वाथे पूते सूक्ष्मचूर्णीकृतान् समङ्गादीन् मुष्ट्यंशकान् पलपरिमाणान् दद्यात्। तैश्च समङ्गादिभिः सर्वैः समानिन्द्रयवान् दद्यात्। ततोऽनन्तरं दर्वीप्रलेपनं पक्त्वा तं लेहं लीढ्वा च लेहनादनन्तरं यथाग्निबलमग्निबलानुसारेण पेयादिकं पिबेत्। किम्भूतः सन्। छागदुग्धभुक् छागदुग्धभोजनः। अयं लेहो रक्तातीसारं रक्तार्शश्चाशु शमयति रक्तपित्तञ्च बलवत् प्रवृद्धमूर्ध्वमधोऽपि वा स्रवच्छमयति॥

शशिलेखा

कुटजस्यार्द्रायास्त्वचस्तुलां पलशतं दिव्ये जले सामान्यपरिभाषया पचेत्। त्वचि नीरसायां क्वाथे पूते गालिते सूक्ष्मरजीकृतान् वस्त्रेत उच्चालितान् मुष्ट्यंशकान् पालिकान् समङ्गादीन् तैः समङ्गादिभिः समान् शक्रयवान्। कुटजबीजस्य त्रिपलमित्यर्थः। प्रक्षिप्य दर्वीलिपनात् पक्त्वा तं लेहं लीढ्वा छागक्षीरभुक् पेयाद्यन्यतमं पिबेत्। ऊर्ध्वं नामास्यादितः अधो गुदोपस्थयोर्वा प्रवृत्तं रक्तपित्तञ्चाशु शमयति। समङ्गा मञ्जिष्ठा। फलिनी प्रियङ्गुः। मोचरसः शाल्मलीनिर्यासः॥

कुटजत्वक्तुलां द्रोणे पचेदष्टांशशेषिते ॥ १०८ ॥
कल्कीकृत्य क्षिपेत्तत्र तार्क्ष्यशैलं कटुत्रयम्।

लोध्रद्वयं मोचरसं बालडाडिमजां त्वचम् ॥ १०९ ॥
बिल्वकर्कटिका मुस्तं समङ्गां धातकीफलम्।

पलोन्मितं दशपलं कुटजस्यैव च त्वचः ॥ ११० ॥
त्रिंशत्पलानि गुडतो घृतात् पूते च विंशतिम्।

तत्पक्वं लेहतां यातं धान्ये पक्षस्थितं लिहन् ॥ १११ ॥
सर्वार्शोग्रहणीदोषश्वासकासान्नियच्छति।

सर्वाङ्गसुन्दरी

कुटजत्वगित्यादि॥ वत्सकस्य त्वचस्तुलां जलद्रोणे पचेदष्टांशशेषितं यावत्। तत्र चाष्टांशशेषिते क्वाथे पूते सति कल्कीकृत्य तार्क्ष्यशैलादीन् पलप्रमाणान् क्षिपेत्। बिल्वकर्कटिका बिल्वशलाटु। कुटजत्वचश्च दशपलम्।

गुडपलानि त्रिंशत्। घृतस्य पलानि विंशतिः। तदेतत् सर्वं पक्वं सल्लेहतां यातं धान्यराशिमध्ये मासार्धं स्थितं लिहन् सर्वानर्शःप्रभृतीन् जयेत् ॥

शशिलेखा

कुटजवल्कपलं शतं द्रोणे जलस्येति प्रकरणात् पचेत्। अष्टांशशेषिते चतुष्षष्टिपलपरिमिते क्वाथे पूते सति तार्क्ष्यशैलादिकं प्रत्येकं पलप्रमाणं कुटजत्वचो दशपलं गुडात्त्रिंशत् पलानि घृतात् पलानि विंशतिं क्षिपेत्। तत्पक्वं घनत्वापादनेन लेहीभूतं धान्ये पक्षं मासार्धं स्थितं गुप्तं स्थापितं लिहन् सर्वार्शोग्रहण्यादीन्नियच्छति। तार्क्ष्यशैलं रसाञ्जनम्। लोध्रः तुवरकः। बालडाडिमत्वक् डाडिमशलाटुत्वक्। विल्वकर्कटिका विल्वशलाटु ॥

लोध्रं तिलान्मोचरसं समङ्गां चन्दनोत्पलम् ॥ ११२ ॥
पाययित्वाऽजदुग्धेन शालींस्तेनैव भोजयेत्।
यष्ट्याह्वपद्मकानन्तापयस्याक्षीरमोरटम् ॥ ११३ ॥
ससितामधु पातव्यं शीततोयेन तेन वा।
लोध्रकट्वङ्गकुटजसमङ्गाशाल्मलीत्वचम् ॥ ११४ ॥
हिमकेसरयष्ट्याह्वसेव्यं वा तण्डुलाम्बुना।
यवानीन्द्रयवाः पाठा विल्वं शुण्ठी रसाञ्जनम् ॥ ११५ ॥
चूर्णः शूले हितश्चात्र प्रवृत्ते चातिशोणिते।

सर्वाङ्गसुन्दरी

लोध्रमित्यादि ॥ लोध्रादीनाजदुग्धेन पाययित्वाऽतुरं शालींस्तेनैवाजक्षीरेण भोजयेत्। एतच्चोपयुक्तं पूर्वगुणम्। यष्ट्याह्वादि सशर्करामाक्षिकं शीतजलेन तेनाजपयसा वा पातव्यम्। क्षीरमोरटम् मधुस्रवा (ഒപാലങ്കത്തമ്പ) लोध्रादिकं तण्डुलाम्बुना पातव्यम्। अथवा चन्दननागकेसरमधुकोशीरं तण्डुलाम्भसा पातव्यं पूर्वोक्तगुणम्। अत्रास्मिन् रक्तार्शसि यवान्यादीनां चूर्णो जलेन पीतः शूले च प्रवृत्ते अतिशयेन रक्ते च हितः ॥

शशिलेखा

लोध्रादीनजाक्षीरेण पाययेत्तेनैवाजाक्षीरेण शालीन् भोजयेत्। सुबोधम् ॥

दुग्धिकाकण्टकारीभ्यां सिद्धं सर्पिः प्रशस्यते ॥ ११६ ॥

अथवा धातकीलोध्रकुटजत्वक्फलोत्पलैः ।
सकेसरैर्यवक्षारडाडिमस्वरसेन वा ॥ ११७ ॥

शर्कराम्भोजकिञ्जल्कसहितं सह वा तिलैः ।
अभ्यस्तं रक्तगुदजान् नवनीतं नियच्छति ॥ ११८ ॥

छागानि नवनीताज्यक्षीरमांसानि जाङ्गलः ।
अनम्लो वा कदम्लो वा सवास्तुकरसो रसः ॥ ११९ ॥

रक्तशालिः सरो दध्नः षष्टिकस्तरुणी सुरा ।
तरुणश्च सुरामण्डः शोणितस्यौषधं परम् ॥ १२० ॥

पेयायूषरसाद्येषु पलाण्डुः केवलोऽपि वा ।
जयत्यत्युल्बणं रक्तं मारुतं च प्रयोजितः ॥ १२० ॥

वातोल्बणानि प्रायेण भवन्त्यस्रेऽतिनिःसृते ।
अर्शांसि तस्मादधिकं तज्जये यत्नमाचरेत् ॥ १२२ ॥

दृष्ट्वाऽस्रपित्तं प्रबलमबलौ च कफानिलौ ।
शीतोपचारः कर्तव्यः सर्वथा तत्प्रशान्तये ॥ १२३ ॥

सर्वाङ्गसुन्दरी

दुग्धिकेत्यादि ॥ दुग्धिकाकण्टकारीभ्यां सिद्धं सर्पिरस्मिन्विषये प्रशस्यते । दुग्धिका शुक्लशारिबा । अथवा सकेसरैर्धातक्यादिभिः सिद्धं घृतं हितम् । केसरं नागकेसरम् । यवक्षारडाडिमस्वरसेन वा सिद्धं घृतं हितम् । शर्करा-पद्मकिञ्जल्कसहितमभ्यस्तमहन्यहनि भुक्तं नवनीतं रक्तार्शांसि शमयति । तिलैर्वा सहाभ्यस्तं नवनीतं रक्तार्शांसि शमयति । छागसंबन्धीनि नवनीतादीनि तथा जाङ्गलरसादीनि च रक्तस्य परमौषधम् । किंभूतो जाङ्गलरसः । सह वास्तुकरसेन वर्तत इति सवास्तुकरसः । अनम्लोऽम्लरहितो वा कदम्ल ईषदम्लो वा । रक्तशालिस्तज्जो भक्त इत्यर्थः । दध्नः सरो दध्युत्तरः । षष्टिको व्रीहिः । तरुणी सुरा सञ्जातमधुरप्राया । तरुणः सुरामण्डः सरः । पेयादिषु प्रयोजितः पलाण्डुः केवलोऽपि वा रक्तमत्युल्बणं वातञ्च जयति । प्रायेण रक्तेऽतिस्रुते वाताधिकानि दुर्नामानि यतो भवन्ति तस्माद्धेतोस्तज्जये पवनजये यत्नं कुर्यात् ।

रक्तपित्तं प्रवृद्धं दृष्ट्वा कफानिलावबलावालक्ष्य तत्प्रशान्त्यर्थं शीतोपचारः कर्तव्यः कार्यः ॥

शशिलेखा

दुग्धिकेत्यादि सुबोधम्। जाङ्गलो रसः मृगविष्किरप्रतुदानां मांसरसः निरम्ल ईषदम्लो वा। भोजने रक्तशालिः षष्टिकश्च। परमौषधमतिप्रवर्तमानमपि रक्तं जयति। पलाण्डुश्चोपयुक्तोऽतिप्रवर्तमानं रक्तं जयति। किंभूतः पलाण्डुः। पेयायूषरसखळशाकघृतादिभिर्युक्तः केवलो वा। सुबोधम् ॥

न चेदेवं शमस्तस्य स्निग्धोष्णैस्तर्पयेत्तदा।
रसैः कोष्णैश्च सर्पिर्भिरवपीडकयोजितैः ॥ १२४ ॥
सेचयेत्तं कवोष्णैश्च कामं तैलपयोघृतैः।

सर्वाङ्गसुन्दरी

नचेदित्यादि ॥ यद्येवं शमो न स्यात्तदा रसैस्तर्पयेत्। "रस इत्यविशेषोक्तौ ज्ञेयो मांसभवो रसः"। किंभूतैः। स्निग्धोष्णैः। तथा कोष्णैर्घृतैश्च पुनस्तर्पयेत्। किंभूतैः। अवपीडकेन रोगानुत्पादनीयोक्तेन प्रयोजितैः। तञ्च कवोष्णैर्यथायोगं तैलपयोघृतैः सेचयेत् ॥

शशिलेखा

स्निग्धोष्णैर्मांसरसैः कोष्णैर्घृतैश्च। अवपीडकसंज्ञं योजनाद्वयं रोगानुत्पादनीये पूर्वमुक्तम्। तैलक्षीराज्यैः सेचयेत्। काममित्यङ्गीकारे।

यवासकुशकाशानां मूलं पुष्पञ्च शाल्मलेः ॥ १२५ ॥
न्यग्रोधोदुम्बराश्वत्थशुङ्गाश्च द्विपलोन्मिताः।
त्रिप्रस्थे सलिलस्यैतत्क्षीरप्रस्थे च साधयेत् ॥ १२६ ॥
क्षीरशेषे कषाये च तस्मिन् पूते विमिश्रयेत्।
कल्कीकृतं मोचरसं समङ्गां चन्दनोत्पलम् ॥ १२७ ॥
प्रियङ्गुं कौटजं बीजं कमलस्य च केसरम्।
पिच्छावस्तिरयं सिद्धः सघृतक्षौद्रशर्करः ॥ १२८ ॥
प्रवाहिकागुदभ्रंशरक्तस्रावज्वरापहः।

सर्वाङ्गसुन्दरी

यवाषेत्यादि ॥ यवाषादीनां मूलं शाल्मलेः पुष्पं तथा न्यग्रोधादीनां शुङ्गाश्चैतत् द्रव्यकदंबकं प्रत्येकं द्विपलप्रमाणं जलप्रस्थत्रये क्षीरप्रस्थे च पाचयेत् । क्षीरशेषे च कषाये तस्मिन् पूते सति कल्कीकृतं मोचरसादि विमिश्रयेत् । मोचरसादयोऽत्र पृथक् सत्रिभागोनशाणार्धकर्षमात्रा ग्राह्याः । वस्तिकल्पे कोशातकादौ निरूहे विंशतिपलप्रमाणे कार्षिकाणामेव कल्कद्रव्याणामभ्यनुज्ञानात् । अयं पिच्छावस्तिः सिद्धो घृतमाक्षिकशर्करान्वितः प्रवाहिकादिहरः । अल्पया मात्रया निरूहवस्तिरेव पिच्छावस्तिरिष्यते । मधुयष्टिकया प्रपौण्डरीकेण तथा मोचरसादिभिः पूर्वोक्तैः कल्कीकृतैः क्षीरद्विगुणितः सन् पक्वः स्नेहोऽनुवासनं देयः ॥

शशिलेखा

यवाषो यवासकः । शाल्मलं पुष्पं शाल्मलीकुसुमम् । वटादीनामङ्कुरं प्रसृतांशमेतज्जलस्य त्रिप्रस्थे क्षीरप्रस्थेन युते क्षीरशेषं पक्वाऽवतारयेत् । पुनः पूते तस्मिन् क्वाथे मोचरसं शाल्मलीनिर्यासं कौटजं बीजमिन्द्रयवं पद्मकेसरञ्च कल्कितं मिश्रयेत् । घृताद्युपेतोऽयं पिच्छावस्तिः सिद्धो दृष्टफलः । स्नेहो दोषाद्यपेक्षयान्यतमः अनुवासनं देयः ॥

मधुकोत्पललोध्राम्बुसमङ्गाबिल्वचन्दनम् ॥ १३० ॥

चविकातिविषामुस्तं पाठा क्षारो यवाग्रजः ।
दार्वीत्वङ्नागरं मांसी चित्रको देवदारु च ॥ १३१ ॥

चाङ्गेरीस्वरसे सर्पिः साधितं तैस्त्रिदोषजित् ।
अर्शोतिसारग्रहणीपाण्डुरोगज्वरारुचौ ॥ १३२ ॥

मूत्रकृच्छ्रे गुदभ्रंशे वस्त्यानाहे प्रवाहणे ।
पिच्छास्रावेऽर्शसां शूले देयं तत्परमौषधम् ॥ १३३ ॥

व्यत्यासान्मधुराम्लानि शीतोष्णानि च योजयेत् ।
नित्यमग्निबलापेक्षी जयत्यर्शःकृतान् गदान् ॥ १३४ ॥

सर्वाङ्गसुन्दरी

मधुकोत्पलमित्यादि ॥ मधुकादिद्रव्यैः स्नेहचतुर्भागप्रमाणैश्चाङ्गेरीस्वरसे घृताच्चतुर्गुणे घृतं साधितं त्रिदोषजित्। अर्शःप्रभृतिषु तत् घृतं देयं यतः परमौषधम्। व्यत्यासेन विपर्ययेण मधुराम्लानि शीतोष्णानि च नित्यमग्निबलापेक्षी योजयेत्। एवञ्चार्शःकृतामतिशयिनीं रुजाञ्जयति ॥

शशिलेखा

मधुकमित्यादि — तैर्मधुकादिभिः कल्कीकृतैश्चाङ्गेर्याः स्वरसे घृताच्चतुर्गुणे साधितं घृतं त्रिदोषघ्नादिगुणम्। अर्शःप्रभृतिषु तत् घृतं परमौषधम्। अम्बु ह्रीबेरम्। अग्निबलमिच्छन् व्यत्यासात् पर्यायेण नित्यं मधुराम्लानि योजयेत्। तद्वच्छीतोष्णानि च। सोऽर्शःकृतान् गुदजाञ्जयति ॥

उदावर्तार्तमभ्यज्य तैलैः शीतज्वरापहैः।
सुस्निग्धैः स्वेदयेत् पिण्डैर्वर्तिमस्मै गुदे ततः ॥ १३५ ॥

अभ्यक्तेऽक्तां कराङ्गुष्ठसन्निभामनुलोमनीम्।
दद्याच्छ्यामात्रिवृद्दन्ती पिप्पलीनीलिनीफलैः ॥ १३६ ॥

विचूर्णितैर्द्विलवणैर्गुडगोमूत्रसंयुतैः।
तद्वन्मागधिकाराठागृहधूमैः ससर्षपैः ॥ १३७ ॥

एतेषामेव वा चूर्णं गुदे नाड्या विनिर्धमेत्।
तद्विघाते सुतीक्ष्णन्तु वस्तिं स्निग्धं प्रपीडयेत् ॥ १३८ ॥

ऋजू कुर्याद्गुदसिरा विण्मूत्रमरुतोऽस्य याः।
भूयोऽनुबन्धे वातघ्नैर्विरेच्यः स्नेहरेचनैः ॥ १३९ ॥

अनुवास्यश्च रौक्ष्याद्धि सङ्गो मारुतवर्चसोः।

सर्वाङ्गसुन्दरी

उदावर्तमित्यादि ॥ उदावर्तेनार्तं नरं तैलैः शीतज्वरापहैस्तगरागरुकुंकुमादिद्रव्यसाधितैरभ्यज्य सुस्निग्धैः पिण्डैः स्वेदयेत्। ततः स्वेदादनन्तरमस्मै उदावर्तवते गुदेऽभ्यक्ते अभ्यक्तां वर्तिं कराङ्गुष्ठसन्निभामातुरहस्ताङ्गुष्ठ-

सदृशीं तथानुलोमकरीं दद्यात् क्षिपेत्। कैः कृतां वर्तिमित्याह --श्यामेत्यादि। श्यामादिभिर्द्विलवणैः द्विगुणसैन्धवलवणयुक्तैः सूक्ष्मरजीकृतैः गुळगोमूत्रसंयुतैः कृताम्। तथैव मागधिकामदनफलगृहधूमसर्षपैर्गुळगोमूत्रान्वितैर्वर्ति क्षिपेत्। अथवैतेषामेव पूर्वोक्तानामेव चूर्णं नाड्या गुदे विनिर्धमेत्। तद्विघाते कार्यं कर्तुमशक्ते तस्मिंश्चूर्णे वस्तिं स्निग्धं स्नेहसहितं सुष्टु तीक्ष्णं दद्यात्। स वस्तिरस्यातुरस्य गुदसिराविण्मूत्रवातानुलोमयेत्। पुनरनुबन्धे सति वातघ्नैः स्नेहरेचनैर्विरेचनीयः अनुवासनीयश्च। हि यस्माद्रौक्ष्याद्धेतोर्मारुतस्य पुरीषस्य च सङ्गो भवति ॥

शशिलेखा

उदावर्ते तु शीतज्वरघ्नतैलाभ्यङ्गस्वेदौ दोषविलयनाय। ततः स्वेदानन्तरं श्यामादिभिर्द्विगुणलवणैः सगुळगोमूत्रैरातुरकराङ्गुष्ठाकारां वर्तिं कृत्वाऽभ्यक्ते गुदेऽभ्यक्तां वर्तिं वातानुलोमनार्थं दद्यात्। दन्ती निकुम्भः। तद्वदित्यादि। मागधिका पिप्पली। राठा मदनफलम्। गृहधूमं धूममलम्। एभिर्वर्तिं कृत्वा गुदे प्रणिदध्यादित्यर्थः। तद्वदिति द्विगुणलवणादिभिः एतेषामिति पूर्वोक्तानामौषधानाम्। तद्विघाते वर्त्या चूर्णेन वा मलस्याप्रवृत्तौ मूत्रलवणक्षारादियोगात् सुतीक्ष्णं वस्तिमास्थापनम्। अनुबन्धोऽनन्तरोक्तया चिकित्सयानुपशमः ॥

त्रिकटुत्रिपटुश्रेष्ठादन्त्यरुष्करचित्रकम् ॥ १४० ॥
जर्जरं स्नेहमूत्राक्तमन्तर्धूमं विपाचयेत्।
शरावसन्धौ मृल्लिप्ते क्षारः कल्याणकाह्वयः ॥ १४१ ॥
स पीतः सर्पिषा युक्तो भक्ते वा स्निग्धभोजिना।
उदावर्तविबन्धार्शोगुल्मपाण्डूदरकृमीन् ॥ १४२ ॥
मूत्रसङ्गाश्मरीशोफहृद्रोगग्रहणीगदान्।
मेहप्लीहरुजानाहश्वासकासांश्च नाशयेत् ॥ १४३ ॥
सर्वश्च कुर्याद्यत्प्रोक्तमर्शसां गाढवर्चसाम्।

सर्वाङ्गसुन्दरी

त्रिकट्वित्यादि ॥ त्रिकट्वादि जर्जरीकृतं स्नेहमूत्राभ्यामभ्यक्तमन्तर्धूमं कृत्वा विपाचयेच्छरावसम्पुटे। अत एवाह—शरावसन्धौ मृल्लिप्त इति।

अयं च कल्याणको नाम क्षारः सर्पिषा पीतः स्नेहभोजिना वा भक्ते युक्तः सन्नुदावर्तादीन् नाशयेत्। यच्च गाढशकृतामर्शसां प्रोक्तां तच्च सर्वं कुर्यात् ॥

शशिलेखा

त्रिकटु व्यूषणम्। त्रिपटु त्रिलवणम्। श्रेष्ठा त्रिफला। दन्ती निकुम्भः। अरुष्करं भल्लातकम्। जर्जरं क्षुण्णम्। सस्नेहमूत्रमेतत् सर्वम्। शरावद्वयकोष्ठे मृत्प्रलिप्तेऽन्तर्धूमं विपाचयेत्। स कल्याणकसंज्ञः क्षारः क्षीरमांसरसाशिनाऽज्येन पीतो भक्तेऽन्ने वा युक्त उदावर्तादिहृत्। रुजा शूलम्। सुबोधम् ॥

द्रोणेऽपां पूतिवल्कद्वितुलमथ पचेत्
पादशेषे च तस्मिन्
देयाऽशीतिर्गुडस्य प्रतनुकरजसो-
व्योषतोऽष्टौ पलानि।
एतन्मासेन जातं जनयति परमा-
मूष्मणः पक्तिशक्तिं
शुक्तं कृत्वाऽनुलोम्यं प्रजयति गुदज-
प्लीहगुल्मोदराणि ॥ १४४ ॥

सर्वाङ्गसुन्दरी

द्रोण इत्यदि ॥ द्वयोस्तुलयोः समाहारो द्वितुलम्। पूतीकरञ्जस्य त्वचस्तुलाद्वयं पलशतद्वयं जलद्रोणे पचेत्। तस्मिंश्च पादशेषे सति गुडस्याशीतिः पलानि क्षेप्तव्यानि। त्रिकटुकस्य सूक्ष्मचूर्णीकृतस्याष्टौ पलानि देयानि। एतत् सर्वं मासेन शुक्तं जातमूष्मणोऽग्नेः प्रबलां पक्तिशक्तिं कुरुते। आनुलोम्यं कृत्वा गुदजादीन् जयति। स्रग्धरावृत्तम् ॥

शशिलेखा

अपां द्रोणं पञ्चपलशतानि द्वादशपलसहितानि। तत्र पूतीकरञ्जत्वक् पलशतद्वयं क्वाथयेत्। पादशिष्टेऽष्टाविंशत्यधिके पलशते तस्मिन् क्वाथे पूते गुडस्य पलान्यशीतिः सूक्ष्मचूर्णितस्य त्रिकटुकस्याष्टौ पलानि च दत्वा यवपल्ले

घृतकुंभस्थं मासेन शुक्तं जातमेतदूष्मणोऽग्नेः परमां पचनशक्तिं जनयति। वाताद्यानुलोम्यं कृत्वा गुदजादीन् प्रजयति च ॥

पचेत्तुलां पूतिकरञ्जवल्कात् ।
द्वे मूलतश्चित्रककण्टकार्योः ॥
द्रोणत्रयेऽपां चरणावशेषे ।
पूते शतं तत्र गुडस्य दद्यात् ॥ १४५ ॥

पलिकश्च सुचूर्णितं त्रिजात-
त्रिकटुग्रन्थिकडाडिमाश्मभेदम् ।
पुरपुष्करमूलधान्यचव्यं
हपुषामार्द्रकमम्लवेतसश्च ॥ १४६ ॥

शीतीभूतं क्षौद्रविंशत्युपेत-
मार्द्रद्राक्षाबीजपूरार्धकैश्च ।
युक्तं कामं गण्डिकाभिस्तथेक्षोः
सर्पिःपात्रे मासमात्रेण जातम् ॥ १४७ ॥

शुक्तं क्रकचमिवेदं दुर्नाम्नां वह्निदीपनं परमम् ।
पाण्डुगरोदरगुल्मप्लीहानाहाश्मकृच्छ्रघ्नम् ॥ १४८ ॥

द्रोणं पीलुरसस्य वस्त्रगळितं न्यस्तं हविर्भाजने
युञ्जीत द्विपलैर्मदामधुफला खर्जूरधात्रीफलैः ।
पाठामाद्रिदुरालभाम्लविदुलव्योषत्वगेलोल्लकैः
स्पृक्काकोललवङ्गवेल्लचपलामूलाग्निकैः पालिकैः ॥ १४९ ॥

गुडपलशतयोजितं निवाते
निहितमिदं प्रपिबंश्च पक्षमात्रात् ।
प्रशमयति गुदाङ्कुरान् सगुल्मा-
ननलबलं प्रबलं करोति चाशु ॥ १५० ॥

एकैकशो दशपले दशमूलकुंभ-
पाठाद्वयार्कघुणवल्लभकट्फलानाम् ।
दग्धे स्नुतेऽम्बुकलशेन जले तु पक्वे
पादस्थिते गुडतुलां पलपञ्चकञ्च ॥ १५१ ॥

दद्यात् प्रत्येकं व्योपचव्याभयानां
वह्नेर्मुष्टी द्वे यवक्षारतश्च ।
दर्वीमालिम्पन् हन्ति लीढो गुडोऽयं
गुल्मप्लीहार्शःकुष्ठमेहाग्निसादान् ॥ १५२ ॥

तोयद्रोणे चित्रकमूलतुलार्धं
साध्यं यावत् पादपदस्थमथेदम् ।
अष्टौ दत्वा जीर्णगुडस्य पलानि
क्वाथ्यं भूयः सान्द्रतया सममेतत् ॥ १५३ ॥

त्रिकटुकमिसिपथ्याकुष्ठमुस्तावराङ्ग-
क्रिमिरिपुदहनैलाचूर्णकीर्णोऽवलेहः ।
जयति गुदजकुष्ठप्लीहगुल्मोदराणि
प्रबलयति हुताशं शश्वदभ्यस्यमानः ॥ १५४ ॥

गुडव्योपवरावेल्लतिलारुष्करचित्रकैः ।
अर्शांसि हन्ति गुडिका त्वग्विकारश्च शीलिता ॥ १५५ ॥

मृल्लिप्तं सौरणं कन्दं पक्त्वाऽग्नौ पुटपाकवत् ।
अद्यात्सतैललवणं दुर्नामविनिवृत्तये ॥ १५६ ॥

मरिचपिप्पलिनागरचित्रकान्
क्रमविवर्धितभागसमाहृतान् ।
शिखिचतुर्गुणसूरणयोजितान्
कुरु गुडेन गुडान् गुदजच्छिदः ॥ १५७ ॥

चूर्णीकृताः षोडश सूरणस्य
भागास्ततोऽर्धेन च चित्रकस्य ।
महौषधाद्वौ मरिचस्य चैको
गुडेन दुर्नामजयाय पिण्डी ॥ १५८ ॥

पथ्यानागरकृष्णाकरञ्जवेल्लाग्निभिः सितातुल्यैः ।
वडवानल इव जरयति बहुगुर्वपि भोजनं चूर्णम् ॥ १५९ ॥

कलिङ्गलाङ्गलीकृष्णावह्निचपामार्गतण्डुलैः ।
भूनिम्बसैन्धवगुडैर्गुडा गुदजनाशनाः ॥ १६० ॥

लवणोत्तमवह्निकलिङ्गयवां-
श्चिरिविल्वमहापिचुमन्दयुतान् ।
पिब सप्तदिनं मथितालुलितान्
यदि मर्दितुमिच्छसि पायुरुहान् ॥ १६१ ॥

शुष्केषु भल्लातकमग्र्यमुक्तं
भैषज्यमार्द्रेषु तु वत्सकत्वक्
सर्वेषु सर्वर्तुषु कालशेय-
मर्शःसु बल्यं च मलापहं च ॥ १६२ ॥

सर्वाङ्गसुन्दरी

पचेदित्यादि ॥ पूतीकरञ्जत्वचस्तुलां चित्रककण्टकारीमूलयोर्द्वे तुले जलद्रोणत्रये पचेत् । पादशेषे च तस्मिन् पूते गुडस्य शतं पलशतं दद्यात् । उपजातिवृत्तम् । त्रिजातकादि सूक्ष्मरजीकृतं प्रत्येकं पलप्रमाणं निक्षिपेत् दद्यात् । औपच्छन्दसिकम् । एतच्च शीतीभूतं सत् क्षौद्रविंशतिपलैरार्द्रद्राक्षादिभिश्चोपेतं युक्तमिक्षुगण्डिकाभिरिक्षुकाण्डैश्च कामं यथेष्टं युक्तं सर्पिःपात्रे मासमात्रेण जातं शुक्तमिति वक्ष्यमाणेन संबन्धः । शुक्तमिदमर्शसां क्रकचमिव करपत्रतुल्यं दारणशक्तिसामान्यात् । तथा परमं वह्निदीपनं पाण्ड्वादिघ्नश्च । शालिनीवृत्तमार्या च । द्रोणमित्यादि—पीलुफलानां रसस्य

द्रोणं वस्त्रपूतं सर्पिर्भाण्डे न्यस्तं मदादिभिर्द्विपलप्रमाणैः पाठादिभिश्च पालिकै-र्युञ्जीत। मदा धातकी। मधुफला द्राक्षा। माद्री रेणुका। विदुलो वेतसः। शार्दूलविक्रीडितं वृत्तम्। तथा गुडपलशतेन योजितं निवाते निहितं पक्षमात्रादनन्तरं प्रपिबन्नर इदं गुदाङ्कुरानर्शांसि गुल्मञ्च शमयति। द्रागग्निबलञ्च प्रकृष्टं विधत्ते। पुष्पिताग्रा। (ചില = കാപ്പ്) एकैकश इत्यादि—दशमूलादीनां प्रत्येकं दशपले दग्धे अम्बुकलशेन जलद्रोणेन गाळिते स्रुते जले पक्के पादशेषे चास्मिन् गुडतुलां व्योषादीनाञ्च प्रत्येकं पलपञ्चकं दद्यात्। चित्रकस्य पलद्वयं यवक्षारस्य च पलद्वयं दद्यात्। दर्वीमालिम्पन् दर्वीलेपी सन्नयं गुडो लीढो भक्षितो गुल्मादीन् पराकरोति। वसन्ततिलकं वृत्तम्। वैश्वदेवी च। तोयद्रोण इत्यादि—तोयस्य द्रोणे चित्रकमूलस्य तुलार्धं साध्यं यावत् पादपदस्थमष्टांशशेषितमिदं स्यात्। ततः पुराणगुडपलान्यष्टौ दत्वा पुन-रपि क्वाथ्यं यावत् सान्द्रत्वं गतम्। भद्रावृत्तम्। म्लौ ज्यौ भद्रा वेदवसू च विरामः। त्रिकटुकादिचूर्णयुक्तोऽयं लेह्यो नित्यमभ्यस्यमानो गुदजकुष्ठादीनि जयति। अग्निञ्च प्रकृष्टं कुरुते करोति। मालिनीवृत्तम्। गुडादिभिर्गुळिका कृता अभ्यस्ता दुर्ना-मानि हन्ति त्वग्विकारञ्च। सौरणं कन्दं मृदालिप्तमग्नौ पुटपाकवत् पक्वं तैललवणा-न्वितमश्नीयाद्दुर्नामोपशान्तये। मरिचादीन् क्रमविवर्द्धितभागसमाहृतान् चित्रक-चतुर्गुणसूरणयोजितान् गुडेन सह गुडान् कुरु गुदाङ्कुरच्छिदः। द्रुतविळंबि-तम्। सूक्ष्मरजीकृताः सूरणभागाः षोडश। चित्रकभागा अष्टौ। नाग रस्य द्वौ। मरिचस्य चैकः। गुडेनैषां पिण्डी दुर्नामजयाय स्यात्। उपजा-तिवृत्तम्। पथ्यादिभिः सितातुल्यैश्चूर्णो बहुगुरु च भोजनं बडवानल इव जरयति। बडवानलो वाडवाग्निः। आर्या गीतिः। कलिङ्गादिभिर्गुडा वटका अर्शोघ्नाः। सैन्धवादीनि तक्रालोळितानि पिब सप्ताहं यद्यर्शांसि जिघांससि। अथ तोटकमब्धिसकारयुतम्। शुष्केष्वर्शःसु भल्लातकं भैषज्यमग्र्यं प्रधा-नमुदितम्। आर्द्रेषु पुनरर्शःसु कुटजत्वग्भैषज्यमग्र्यं कथितम्। सर्वेष्वर्शःसु शुष्केष्वार्द्रेषु च सर्वर्तुषु सर्वकालं काळशेयं मथितमग्र्यं बल्यं बलावहं मलापहं दोषापहञ्च। इन्द्रवज्रावृत्तम्॥

शशिलेखा

पचेत्तुलामित्यादि सुबोधम् । शुष्केष्वर्शःसु भल्लातकमग्र्यं एककार्यकराणामौषधानां योऽत्यर्थं कार्यकरः । सोऽग्र्य इत्युक्तम् । आर्द्रेष्वर्शःसु तच्छमनकर्तृभ्योऽन्येभ्यो वत्सकस्य कुटजस्य त्वगग्र्या श्रेष्ठा । सर्वेषु शुष्केष्वार्द्रेषु चार्शःसु सर्वर्तुषु सर्वकालं काळशेयं तक्रमग्र्यं बल्यं बलकरं मलापहं दोषहरञ्च ॥

भित्वा विबन्धाननुलोमनाय
यन्मारुतस्याऽग्निबलाय यच्च ।
तदन्नपानौषधमर्शसेन
सेव्यं विवर्ज्यं विपरीतमस्मात् ॥ १६३ ॥

सर्वाङ्गसुन्दरी

भित्वेत्यादि ॥ विबन्धान् वातस्त्यानकफादिभिः कृतान् भित्वा यदन्नपानौषधमासेवितं मारुतस्यानुलोमनाय स्ववर्त्मप्रवर्तनाय तथा यच्चाग्निबलायाग्निवर्धनाय सम्पद्यते तदेवान्नपानौषधं दुर्नामवता सेव्यं स्यात् । अस्माद्यथोक्ताद्विपरीतं यदन्नपानौषधं मारुतस्य विबन्धकरमग्निसादनञ्च तत्तेन विवर्ज्यं तन्न सेव्यम् । उपजातिवृत्तम् ॥

शशिलेखा

विबन्धान् भित्वा यदनुलोमनायान्नपानौषधं स्यात् तत् सेव्यं तद्विपरीतं वर्ज्यम् ॥

अर्शोऽतिसारग्रहणीविकाराः
प्रायेण चान्योन्यनिदानभूताः ।
सन्नेऽनले सन्ति न सन्ति दीप्ते
रक्षेदतस्तेषु विशेषतोऽग्निम् ॥ १६४ ॥

सर्वाङ्गसुन्दरी

अर्शोऽतिसार इत्यादि ॥ अर्शोतिसारग्रहण्योऽन्योन्यनिदानभूताः परस्परं हेतुभूताः बाहुल्येनानले सन्ने एते रोगा भवन्ति । दीप्ते त्वग्नौ न सन्ति। यतोऽतः अस्मात् कारणात् तेषु रोगेषु विशेषेणाग्निं रक्षेदिति । इन्द्रवज्रावृत्तम् ॥

शशिलेखा

अर्शःप्रभृतयः परस्परेण निदानभूताः। रोगश्च रोगस्य हेतुभवतीत्युक्तम् । ते च सर्वे मन्देऽग्नौ यतो भवन्त्यतो विशेषतोऽग्निं रक्षेत् ॥

इति चिकित्सितेऽष्टमोऽध्यायः ॥

नवमोऽध्यायः ।

अस्मादनन्तरमतिसारचिकित्सितमारभ्यते । अर्शोऽतिसारयोः परस्पर-निदानभूतत्वेन चिकित्सासामान्यात् । अत आह—

अथातोऽतीसारचिकित्सितं नामाध्यायं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ॥

अतीसारो हि भूयिष्ठं भवत्यामाशयान्वयः ।
हत्वाग्निं वातजेऽप्यस्मात् प्रागस्मिंल्लङ्घनं हितम् ॥ १ ॥

शूलानाहप्रसेकार्तं वामयेदतिसारिणम् ।
दोषाः सन्निचिता ये च विदग्धाहारमूर्छिताः ॥ २ ॥

अतीसाराय कल्पन्ते तेषूपेक्षैव भेषजम् ।
भृशोत्क्लेशप्रवृत्तेषु स्वयमेव चलात्मसु ॥ ३ ॥

प्रयोज्यं न तु सङ्ग्राहि पूर्वमामातिसारिणि ।
अपि चाध्मानगुरुताशूलस्तैमित्यकारिणि ॥ ४ ॥

प्राणदा प्राणदा दोषे विबद्धे संप्रवर्तिनि ।

सर्वाङ्गसुन्दरी

अतीसार इत्यादि ॥ हि यस्मात् बाहुल्येनाग्निं हत्वा मन्दीकृत्यामाशयान्वयो भवत्यतिसारः, अस्मात् कारणादस्मिन्नतीसाराख्ये व्याधौ वातजेऽपि पूर्वं लङ्घनं हितम्, आमाशयोऽन्वयो जन्मभूरुत्पत्तिस्थानं यस्य स आमाशयान्वयः । अपिशब्दात् कफादिजे सुतरां लङ्घनं हितमिति द्योतयति । लङ्घनशब्देन चोपवास एवेह गृह्यते । शोधनादीनां लङ्घनानामवस्थावशादुच्यमानत्वात् । भूयिष्ठग्रहणेन क्वचित् भयजादावतीसारे व्यभिचारः । नासावामाशयान्वयः । प्राग्ग्रहणात् नोत्तरकाले लङ्घनं हितम् । तदा हि रोगस्वभावाद्धात्वपचयोऽवश्यंभावी

लङ्घनमपि धात्वपचयहेतुरतस्तदा तन्न युक्तमिति। शूलादिभिरार्तमतिसारिणं वामयेन्न तत्र प्राग्लङ्घनं हितम्। वमनं चैतत् सामान्यं पित्तजादिष्वप्येवंरूपेषु चिकित्सितं बोध्यम्। न केवलं वातजे। ये च दोषाः सन्निचिता अतिशयेन वृद्धिं गतास्तथा विदग्धेन पक्वापक्वरूपेणाहारेण मूर्छिता एकतां प्राप्ता अतीसाराय कल्पन्ते सम्पद्यन्ते तेषु, तथा उत्क्लेशनमुत्क्लेशो विकारकरणं प्रत्युन्मुखता बीजस्याङ्कुरोत्पत्तावुच्छूनावस्थेव, अतिशयेनोत्क्लेशो भृशोत्क्लेशः तेन प्रवृत्ता अतिसारकरणं प्रति समुद्यतास्तेषु, तथा स्वयमेव यत्नं विना चलात्मसु चलस्वभावेषु तेषु तथाभूतेषु दोषेषूपेक्षा पथ्याशित्वेन सम्यक् प्रवर्तनमेव भेषजम्। न तु पाचनादि रूपमित्यर्थः। सङ्ग्रहणौषधं कुटजत्वगादिकं व्याधिप्रतिपक्षभूतं कस्मादत्र न प्रयुज्यते। अपि चाग्रचसङ्ग्रहे पठिष्यति — "कुटजोऽतिसार" इति। तस्मादत्र सङ्ग्राह्यौषधं दातुमुचितमिति यो मन्येत, तं प्रत्याह — प्रयोज्यमित्यादि। सङ्ग्रहणं भेषजं पूर्वमामातिसारिणि पुरुषे न प्रयोज्यम्। तुशब्दोऽवधारणार्थः। अत्र पूर्वग्रहणं पश्चादीषदामातिसारिणि दीयमानं युज्यत एवेति द्योतयति। सामे दोषेऽतीसारकारिणि प्रथममपि भेदनश्चौषधं दत्तं विशिष्टायामवस्थायां समानकार्यमपि कदाचिदतीसारिणो गुणाय सम्पद्यते। नातीसारप्रतिपक्षभूतमपि सङ्ग्रहणमौषधमिति कृत्वाह — अपिचेत्यादि। विबद्धे अल्पाल्पं कृत्वा संप्रवर्तमाने दोषे अत एव विबद्धत्वादाध्मानादिकारिणि तथाभूतेऽस्मिन्दोषे सङ्ग्रहणमपथ्यम्, अपि तु प्राणदा हरीतकी प्राणदा भवति। प्राणान् ददातीति प्राणदा। एवं बहुदोषाणामतीसारिणां प्रायेणैष उपक्रमो बोध्यः॥

शशिलेखा

यस्मादतीसारो भूयिष्ठं प्रायेणामाशयान्वय आमाशयाधिष्ठानोऽग्निमुपहत्य भवत्यस्मात् कारणाद्वातजेऽस्मिन्नतीसारेऽपि लङ्घनमपाचनार्थं हितम्। भूयिष्ठग्रहणं भयशोकपरिहारार्थम्। लङ्घनशब्देन सर्वं लङ्घनं सङ्गृहीतम्। शूलाद्यार्तमतीसारिणं वामयेत्। साम इति युक्त्या। सुबोधम्। प्रयोज्यमित्यादिना सामे पूर्वं सङ्ग्रहणप्रतिषेधः। अपि चेति समुच्चये। दोषे मले विबद्धे विबन्धनप्रवृत्त्या आध्मानादिकं कुर्वति प्राणदा हरीतकी उष्णाम्बुपीता प्राणदा प्राणान् ददातीति। तथा पुनरस्य सुखसङ्ग्रहणं कार्यमिति भावः॥

मध्यदोषाल्पदोषयोस्त्वाह —

पिबेत् प्रक्वथितास्तोये मध्यदोषो विशोषयन् ॥ ५ ॥

भूतीकपिप्पलीशुण्ठीवचाधान्यहरीतकीः ।
अथवा बिल्वधनिकामुस्तानागरवालकम् ॥ ६ ॥

विडपाठावचापथ्याक्रिमिजिन्नागराणि वा ।
शुण्ठीघनवचामाद्रीविल्ववत्सकहिङ्गु वा ॥ ७ ॥

सर्वाङ्गसुन्दरी

पिबेदित्यादि ॥ मध्यदोषोऽतीसारी भूतीकादीन् पिबेत् । किम्भूतान्— जले प्रकथितान् । ननु प्रशब्दमन्तरेणापि शृतार्थस्य लब्धत्वात् प्रशब्दोपादानमनर्थकम् । कथिता इत्येतावदेवास्तु । किं प्रशब्देन । नैवम्, आचार्याभिप्रायानवबोधनात् । तथा हि— तन्त्रस्य कर्तुरिदमभिप्रेतम् । प्रकर्षेण कथिताः प्रमथ्यारूपेण शृताः प्रकथिता इत्यस्यार्थस्य प्रतिपादनाय प्रशब्दोऽकारि । प्रमथ्यायाश्च तन्त्रान्तरे लक्षणमुक्तम् । यथा "शृतः कषायो निर्यूहः क्वाथो यूपः कृतश्च सः । कृतयूषः प्रमथ्या च द्रव्यात् कल्कीकृताच्छृतात्" इति । अस्यार्थः । तदेवं द्रव्यं कल्कीकृत्य पिष्ट्वा यत् क्रियते, स कृतयूषो भण्यते । स एव च प्रमथ्याशब्दवाच्यः । तस्मान्मध्यदोषोऽतीसारी भूतीकादीनि पिष्ट्वा प्रकर्षेण क्वाथयित्वा प्रमथ्यारूपेण पिबेदित्यवतिष्ठते । मुनिनाप्युक्तं —"प्रमथ्यां मध्यदोषेभ्यो दद्याद्दीपनपाचनीम्"इति । किं कुर्वन् पिबेत्— विशोषयन् लङ्घयन् प्रकृतत्वादात्मानमेव । अथवा बिल्वधनिकादीनि पिबेत् । अथवा विडादीनि शुण्ठ्यादीनि वा पिबेत् ॥

शशिलेखा

मध्यदोषोऽतिसारी विशोषयन्नुपवासं कुर्वन् तोये प्रक्वथिता भूतीकादीरथवा बिल्वादीनि पिबेत् । प्रमथ्याख्यासूचनार्थमत्र प्रक्वथिता इत्युक्तम् । सङ्ग्रहे तु उभयमपि चैतत् प्रमथ्याख्यमित्युक्तम् । धान्यं धान्याकम् । बिल्वं बिल्वपेशिकामज्जा । धनिका धान्याकम् । मुस्ता जलदम् । वालकं जलम् । अथवा विडादीनि क्वथितानि चूर्णितानि वा । लवणानां सर्वत्र चूर्णितानामेव प्रयोगः । विडं विडलवणम् । पथ्या अभया । क्रिमिजिद्विडङ्गम् । शुण्ठ्यादीनि वा । माद्री अतिविषा । बिल्वं बिल्वफलमध्यम् । इति मध्यदोषे ॥

शस्यते त्वल्पदोषाणामुपवासोऽतिसारिणाम् ।
वचाप्रतिविषाभ्यां वा मुस्तापर्पटकेन वा ॥ ८ ॥

ह्रीबेरनागराभ्यां वा विपक्वं पाययेज्जलम् ।

सर्वाङ्गसुन्दरी

शस्यत इत्यादि ॥ अल्पदोषाणामतीसारिणामुपवासः शस्यते । तुशब्दोऽवधारणार्थः। अत्र उपवास एवाल्पदोषाणां शस्यते । न बहुदोषमध्यदोषोक्तो योऽपर उपक्रमः, स तथा तेषां शस्यत इति । सर्वमतीसारिणं दोषदेशाद्यनुरोधेन कदाचिल्लङ्घयेत् । अतिसारिणः तृषि सञ्जातायां दोष-देशाद्यनुरोधेन कदाचिद्वचाप्रतिविषाभ्यां विपक्वं जलं पाययेत् । कदाचिन्मु-स्तापर्पटकेन कदाचिद्वालकनागराभ्याम् । पाययेदित्यत्र कर्त्रभिप्राये क्रियाफले परस्मैपदम् । अन्यथा 'न पादम्ये'त्यादिना परस्मैपदनिषेधः स्यात् ॥

शशिलेखा

अल्पदोषाणामतिसारिणामुपवासो यावल्लङ्घितलिङ्गम् । सर्वस्यातिसारिण-स्तृष्णायां वचादिद्वयैः क्वथितानि जलानि यथायोग्यं पानम् । स्वच्छमल्पौषधं जलं पानमिच्छन्ति । प्रतिविषा अतिविषा ॥

युक्तेऽन्नकाले क्षुत्क्षामं लघ्वन्नप्रति भोजयेत् ॥ ९ ॥

तथा स शीघ्रं प्राप्नोति रुचिमग्निबलं बलम् ।
तक्रेणावन्तिसोमेन यवाग्वा तर्पणेन वा ॥ १० ॥

सुरया मधुना वाथ यथासात्म्यमुपाचरेत् ।

सर्वाङ्गसुन्दरी

युक्त इत्यादि ॥ युक्ते योग्येऽन्नकाले क्षुत्क्षाममतीसारिणं लघ्वन्नप्रति भोजयेत् । नापरव्याध्यार्तमिव लङ्घनोचितं सम्यग्लङ्घनादनन्तरमेव भोजयेत् । अपि तु सम्यग्लङ्घितलक्षणोत्पन्नमप्यतीसारिणं किञ्चित्कालप्रतीक्षणं कृत्वा भोजये-दिति क्षुत्क्षामशब्देन द्योतयति । अल्पं लघ्वन्नं लघ्वन्नप्रति । 'सुप्रतिना मात्रार्थे' इति समासोऽव्ययीभावः । एवं क्रियमाणे सोऽतीसारी द्रागेव रुचिं

प्राप्नोति तथा वह्निबलं देहबलं च। एवञ्च भुञ्जानस्य पानमुपदिशति — तक्रेणेत्यादि। कदाचित्तक्रेण कदाचिदवन्तिसोमेन काञ्जिकेन कदाचित् पेयया कदाचित्तर्पणेन कदाचित् सुरया कदाचिन्मधुना मार्द्वीकेणेति यथासात्म्यमुपाचरेत् ॥

शशिलेखा

युक्तेऽन्नकाले क्षुत्क्षाममतीसारिणं लघ्वन्नं वक्ष्यमाणबालविल्वादिक्वाथैः साधितं प्रतिभोजयेत्। तथा अनन्तरोक्तलङ्घनादिक्रमे कृते सोऽतीसारी रुच्याद्याप्नोति। अथ भोजनानन्तरं यथासात्म्यं तक्राद्यन्यतमेनोपाचरेत्। तृषित इत्यर्थात् ॥

भोज्यानि कल्पयेदूर्ध्वं ग्राहिदीपनपाचनैः ॥ ११ ॥

बालविल्वशठीधान्यहिङ्गुवृक्षाम्लदाडिमैः।
पलाशहपुषाजाजीयवानीविडसैन्धवैः ॥ १२ ॥

लघुना पञ्चमूलेन पञ्चकोलेन पाठया।

सर्वाङ्गसुन्दरी

भोज्यानीत्यादि ॥ अस्मात् क्रमादूर्ध्वमनन्तरं भोज्यानि भोक्तव्यानि कल्पयेदतीसारिणे। ग्राहिदीपनपाचनैः एवं सङ्ग्रहणानि दीपनानि पाचनानि च यानि द्रव्याणि, तानि सर्वाण्यतीसारिणे पथ्यानीति। एवं संक्षेपेण सामान्येन चिकित्सितमुक्तम्। तदेव दिङ्मात्रं दर्शयति—बालेत्यादि। बालविल्वादिभिर्भोज्यानि कल्पयेत् ॥

शशिलेखा

भोज्यानीत्यादि सुबोधम्। ऊर्ध्वमनन्तरं ग्राह्यादिगुणैर्बालविल्वादिभिर्भोज्यान्यन्नपानयूषयवाग्वादीनि कल्पयेत्। वृक्षाम्लं तिन्त्रिणीकम् ॥

सालपर्णीबलाविल्वैः पृश्निपर्ण्या च साधिता ॥ १३ ॥

दाडिमाम्ला हिता पेया कफपित्ते समुल्वणे।
अभयापिप्पलीमूलविल्वैर्वातानुलोमनी ॥ १४ ॥

विबद्धं दोषबहुलो दीप्ताग्नियोऽतिसार्यते।

कृष्णाविडङ्गत्रिफलाकषायैस्तं विरेचयेत् ॥ १५ ॥
पेयां युञ्ज्याद्विरिक्तस्य वातघ्नैर्दीपनैः कृताम् ।

सर्वाङ्गसुन्दरी

सालपर्णीत्यादि ॥ सालपर्ण्यादिभिः साधिता डाडिमाम्ला पेया कफपित्तेऽधिके हिता। अभयादिभिः पेया वातानुलोमनी। यो दीप्ताग्निर्बहुदोषो विबद्धमल्पाल्पं कृत्वाऽतिसार्यते, तं कृष्णादिकषायैर्विरेचयेत्। विरिक्तस्य सतः पेयां वातघ्नैर्दीपनैश्च द्रव्यैः कृतां युञ्ज्यात् ॥

शशिलेखा

कफपित्तयोरुल्बणयोः सालपर्ण्यादिभिः साधिता पेया। पृश्निपर्णी पृथक्पर्णी। अभयादिभिः पेया वातस्यानुलोमनी। अभया हरीतकी। बिल्वं बिल्वशलाटु ॥

आमे परिणते यस्तु दीप्तेऽग्नावुपवेश्यते ॥ १६ ॥
सफेनपिच्छं सरुजं सविबन्धं पुनः पुनः ।
अल्पाल्पमल्पशमलं निर्विड्वा सप्रवाहिकम् ॥ १७ ॥
दधितैलघृतक्षीरैः स शुण्ठीं सगुडां पिबेत् ।
स्विन्नानि गुडतैलेन भक्षयेद्बदराणि वा ॥ १८ ॥
गाढविड्विहितैः शाकैर्बहुस्नेहैस्तथा रसैः ।
क्षुधितं भोजयेदेनं दधिडाडिमसाधितैः ॥ १९ ॥
शाल्योदनं तिलैर्माषैर्मुद्गैर्वा साधु साधितम् ।
शट्या मूलकपोतायाः पाठायाः स्वस्तिकस्य वा ॥ २० ॥
श्रूषायवानीकर्कारुक्षीरिणीचिर्भटस्य वा ।
उपोदकाया जीवन्त्या वाकुच्या वास्तुकस्य वा ॥ २१ ॥
सुवर्चलायाश्चुञ्चोर्वा लोणिकाया रसैरपि ।
कूर्मवर्तकलोपाकशिखितित्तिरिकौक्कुटैः ॥ २२ ॥

---

1 സപ്പ്ലികം=നിരാരൽ, ശ്രൂഷാ=നിലവാക, ചിർഭിടം=കാട്ടു വെള്ളരി.

सर्वाङ्गसुन्दरी

आम इत्यादि ॥ योऽतीसार्यामे परिणतेऽग्नौ दीप्ते सत्युपवेश्यते सफेनपिच्छं तथा सरुजं तथा सविबन्धं पुनः पुनः तथाल्पाल्पं तथाल्पपुरीषं निर्विड्वा पुरीषरहितं वा तथा सप्रवाहिकं निश्चारिकरुजासहितम्। "स्रुते रक्ते पुरीषे च वायुना विड्विवर्जितम्। प्रवाहिकेति तत् ख्यातं यत् फेनाभं प्रवर्तते" इति प्रवाहिकालक्षणम्। य एवंविधोऽतीसारी, स दधितैलघृतक्षीरैः समुदितैः शुण्ठीं सगुडां पिबेत्। अथवा स्विन्नानि बदराणि गुडतैलेनाश्नीयात्। एवं दोषादिवशाच्छुण्ठीं पाययित्वा कदाचित् पूर्वोक्तानि बदराणि भक्षयित्वा अनन्तरं क्षुधितं संजातबुभुक्षमेनमतीसारिणं गाढविड्विहितैर्वास्तुकादिभिः शाकैस्तथा मांसरसैर्बहुस्नेहैर्दधिडाडिमसंस्कृतैः शाल्योदनं भोजयेत्। अथवा तिलैर्माषैर्मुद्गैर्वा साधु शोभनं कृत्वा साधितं शाल्योदनं भोजयेत्। तथा शश्यादीनां रसैः। अपिशब्दात् कूर्मादीनां रसैर्मांसरसैश्च शाल्योदनं भोजयेत्। मूलकपोता लघुमूलकं तोतिकासंज्ञं देशान्तरे कुरुक्षेत्रादौ प्रसिद्धम् ॥

शशिलेखा

विबद्धमित्यादि सुबोधम्। आमे परिणते पक्वेऽग्नौ च दीप्ते सति योऽतिसारी फेनादियुतमुपवेश्यतेऽतिसार्यते। शमलं शकृत्। प्रवाहिकालक्षणमेवमुक्तं सङ्ग्रहे। यथा—"पक्वदोषोऽपि तु योऽतिसार्यते बहुशोऽनिलेन विबद्धं सपिच्छं सफेनं सशूलपरिकर्तिकं सरोमहर्षं निष्पुरीषं च तां प्रवाहिकां बिम्बिसीमिति चाचक्षते" इति। स एवंविधोऽतिसारी दध्यादिभिर्गुडयुतां शुण्ठीं पिबेत्। सुबोधम् ॥

बिल्वमुस्ताक्षिभैषज्यधातकीपुष्पनागरैः।
पक्वातीसारजित्तक्रे यवागूर्दाधिकी तथा ॥ २३ ॥

कपित्थकच्छुराभार्ङ्गीयूथिकावटशैलुजैः।
डाडिमीचणकार्पासीशाल्मलीनां च पल्लवैः ॥ २४ ॥

कल्को बिल्वशलाटूनां तिलकल्कश्च तत्समः।
दध्नः सरोऽम्लः सस्नेहः खलो हन्ति प्रवाहिकाम् ॥ २५ ॥

---

1 അക്ഷിഭൈഷജ്യം=വെളുത്തപാച്ചോറ്റി, യൂഥികാ=കാട്ടുമുല്ല.

मरिचं धनिकाजाजीतिन्त्रिणीकशठीविडम् ।
डाडिमं धातकी पाठा त्रिफला पञ्चकोलकम् ॥ २६ ॥

यावशूकं कपित्थाम्रजम्बूमध्यं सदीप्यकम् ।
पिष्टैः षड्गुणविल्वैस्तैर्दध्नि मुद्गरसे गुडे ॥ २७ ॥

स्नेहे च यमके सिद्धः खळोऽयमपराजितः ।
दीपनः पाचनो ग्राही रुच्यो विम्बिसिनाशनः ॥ २८ ॥

सर्वाङ्गसुन्दरी

विल्वमित्यादि ॥ विल्वादिभिस्तक्रसाधिता यवागूः पक्वातीसारजित् । दाधिकीति । कपित्थादिजैः पल्लवैः डाडिमादीनां पल्लवैश्च दध्नि सिद्धा दाधिकी तथा पक्वातीसारजित् । कच्छुरा दुरालभा । विल्वशलाटूनां स्तोककालजातानां लघूनां विल्वशलाटूनां कल्कस्तथा तिलकल्कश्च तत्समो विल्वशलाटुसमस्तथा दध्नः सरो मस्तु अम्लो न मधुरः सस्नेहो देशाद्यनुरोधात् घृतादिना स्नेहेन यथायथं युक्तोऽयं खळः प्रवाहिकां हन्ति । मरिचादिभिः पिष्टैः षड्गुणं विल्वं विल्वफलमज्जा येषां तैः सिद्धः पक्वः । तथा दध्नि तथा मुद्गरसे गुडे तथा यमके च स्नेहे सिद्धः खळोऽयमपराजितो नाम दीपनादिगुणः तथा बिम्बिसिनाशनः प्रवाहिकाघ्नः ॥

शशिलेखा

बालविल्वकल्कस्तिलकल्कश्च समौ दध्नोऽम्लः सरः स्नेहश्च एभिः खळः प्रवाहिकां बिम्बिसीं हन्ति । मरिचादिभिर्यथोक्तप्रमाणैः पिष्टैः सिद्धः खळोऽपराजिताख्यो भवति । दध्यादीन्यत्र संस्कारयोग्यानि । अयं खळो दीपनत्वादियुक्तः । बिम्बिसी प्रवाहिका । धनिका धान्याकम् । कपित्थानां मध्यस्थि । विल्वं विल्वशलाटु ॥

कोलानां बालविल्वानां कल्कः शालियवस्य च ।
मुद्गमाषतिलानाञ्च धान्ययूषं प्रकल्पयेत् ॥ २९ ॥

ऐकध्यं यमके भृष्टं दधिडाडिमसारिकम् ।
वर्चःक्षये शुष्कमुखं शाल्यन्नं तेन भोजयेत् ॥ ३० ॥

दध्नः सरं वा यमके भृष्टं सगुडनागरम् ।
सुरां वा यमके भृष्टां व्यञ्जनार्थं प्रकल्पयेत् ॥ ३१ ॥

फलाम्लं यमके भृष्टं यूषं गृञ्जनकस्य वा ।
भृष्टान्वा यमके सक्तून् खादेद्व्योपावचूर्णितान् ॥ ३२ ॥

माषान् सुसिद्धांस्तद्वद्वा घृतमण्डोपसेचितान्[1] ।
रसं सुसिद्धं पूतं वा छागमेषान्तराधिजम् ॥ ३३ ॥

पचेद्दाडिमसाराम्लं सधान्यस्नेहनागरम् ।
रक्तशाल्योदनं तेन भुञ्जानः प्रपिबंश्च तम् ॥ ३४ ॥

वर्चःक्षयकृतैराशु विकारैः परिमुच्यते ।
बालबिल्वं गुडं तैलं पिप्पलीविश्वभेषजम् ॥ ३५ ॥

लिह्याद्वाते प्रतिहते सशूलः सप्रवाहिकः ।
वल्कलं शाबरं पुष्पं धातक्या बदरीदलम् ॥ ३६ ॥

पिबेद्दधिसरक्षौद्रकपित्थस्वरसाप्लुतम् ।

सर्वाङ्गसुन्दरी

कोलानामित्यादि ॥ कोलानां बालबिल्वानां शालेर्यवस्य च मुद्गादीनाञ्च कल्कैरेकध्यमेकपात्रे संभूय धान्ययूषं प्रकल्पयेत् । किंभूतम्—यमके स्नेहद्वये भृष्टम् । तथा दधिडाडिमसारिकम् । दधिडाडिमसारौ विद्येते यस्मिन् तद्दधिडाडिमसारिकम् । वर्चःक्षये पुरीषक्षये शुष्कमुखं मुखशोषोपद्रवान्वितमतीसारिणं तेन धान्ययूषेण शाल्यन्नं भोजयेत् । शालिग्रहणेन रक्तशाल्यादीनां ग्रहणम् । अथवा दध्नः सरं यमके भृष्टं गुडनागरसहितं व्यञ्जनार्थं प्रकल्पयेत् । अथवा सुरां यमके भृष्टां व्यञ्जनार्थं प्रकल्पयेत् । अथवा गृञ्जनकस्य हरितकविशेषस्य यूषं यमके भृष्टं फलैः कोलडाडिमादिभिरम्लैरम्लमम्लीकृतं व्यञ्जनार्थं प्रकल्पयेत् । अथवा यमके स्नेहद्वये भृष्टान् यवसक्तून् व्योषावचूर्णितान् भक्षयेत् । अथवा तथैव माषान् सुस्विन्नान् घृतमण्डेन उपसेचितान् खादेत् । अथवा छागमेषयोरन्तराधिजं रसं सुसिद्धपूतं शोभनं कृत्वा पूर्वं सिद्धं पश्चात् पूतं निर्मलीकृतं तथा डाडिमसारेणाम्लं धान्यक-

1 'घृतमण्डोपसेवितान्' इति पाठः इन्दुनाङ्गीकृतः ।

स्नेहशुण्ठीयुतं व्यञ्जनार्थं पचेत्। तेन रसेन रक्तशाल्यन्नं भुञ्जानस्तमेव मांसरसं पिबन् वर्चःक्षयकृतैर्विकारैः "पुरीषवायुरान्त्राणी"त्यादिभिः सूत्रस्थानोदितैराशु परिमुच्यते। प्रवाहिका च वर्चःक्षये सति स्यात्तस्मात्तयापि मुच्यते। वाते प्रतिहते प्रवाहिकाशूलवान् बालविल्वादिकं लिह्यात्। लोध्रत्वक् धातकीपुष्पं बदरीपत्रमेतद्दधिसरादिभिराप्लुतमालोळितं पिबेत्॥

शशिलेखा

कोलानामित्यादि॥ सुबोधम्। कोलादितिलान्तानां कल्कैर्यमके भृष्टं धान्ययूषं प्रकल्पयेत्। तेन यूषेण शाल्यन्नं वर्चसः पुरीषस्य क्षये शुष्कमुखं तृष्णायुतमतीसारिणं भोजयेत्। गुडादियुतं दधिसरं यमके भृष्टं व्यञ्जनार्थं प्रकल्पयेत्। अथवा यमके स्नेहद्वये भृष्टां सुराम् अथवा गृञ्जनकस्य मधुशिग्रोर्यूषं डाडिमाद्यम्ळफलैरम्ळं यमके भृष्टं व्यञ्जनार्थं प्रकल्पयेत्। अथवा यमके भृष्टान् यवसक्तून् सव्योषचूर्णान् खादेत्। अथवा सुसिद्धान् माषान् घृतमण्डोपसेवितांस्तद्वत् सव्योषचूर्णान् खादेत्। अथवा छागस्य मेषस्य वा अन्तराधिजं रसं मध्यमांसरसं सुसिद्धपूतं डाडिमसारेणाम्ळं धान्यादियुतं पचेत्। तेन मांसरसेन रक्तशालीनामन्नं भुञ्जानस्तं मांसरसमेव पिबंश्च वर्चःक्षयकृतैः "पुरीषवायुरान्त्राणी"त्यादिभिर्विकारैः परिमुच्यते। वाते प्रतिहते सशूलः सप्रवाहिकश्च यः, स बालविल्वादिकं लिह्यात्। बालविल्वं विल्वशलाटु। विश्वभेषजं शुण्ठी। गुडतैलाभ्यां लेहः। शाबरं वल्कलं लोध्रत्वचं धातक्याः पुष्पं बदरीदलञ्च दधिसराद्यन्यतमेनाप्लुतमालोळितं पिबेत्। इत्येषः प्रवाहिकायां वर्चःक्षये विधिः॥

विबद्धवातवर्चास्तु बहुशूलप्रवाहिकः ॥ ३७ ॥

सरक्तपिच्छस्तृष्णार्तः क्षीरसौहित्यमर्हति।
यमकस्योपरि क्षीरं धारोष्णं वा प्रयोजयेत् ॥ ३८ ॥

शृतमेरण्डमूलेन बालविल्वेन वा पुनः।
पयस्युत्क्वाथ्य मुस्तानां विंशतिं त्रिगुणाम्भसि ॥ ३९ ॥

क्षीरावशिष्टं तत्पीतं हन्यादामं सवेदनम्।

पिप्पल्याः पिबतः सूक्ष्मं रजो मरिचजन्म वा ॥ ४० ॥
चिरकालानुषक्तापि नश्यत्याशु प्रवाहिका ।

सर्वाङ्गसुन्दरी

विबद्ध इत्यादि ॥ विबद्धे वातवर्चसी यस्य तथा प्रभूते शूलप्रवाहिके यस्य तथा सह रक्तेन पिच्छया च यो वर्तते तथा तृष्णयार्त एवंविधो नरः क्षीरसौहित्यं दुग्धतृप्तिमर्हति । यमकस्योपरि यमकस्नेहं पीत्वा अनु धारोष्णं क्षीरं वा एरण्डमूलेन शृतं वा बालबिल्वेन शृतं क्षीरं वा प्रयोजयेत् पिबेत् । क्षीरे त्रिगुणाम्भसि मुस्ताविंशतिमुत्क्वाथ्य तत् क्षीरावशिष्टं पीतमामं सरुजं हन्यात् । अत्र विंशतिभिर्मुस्तैः प्रायेण पलं भवति । सामान्यकल्पनया च षोडशभिः सलिलपलैः पलमेकमुत्क्वाथ्य चत्वारि पलानि चतुर्भागावशेषितया कार्याणि । तदेवं क्षीरपलानि चत्वारि पानीयपलानि द्वादश । मुस्ताविंशतिं दत्वा क्षीरावशिष्टं पेयमित्ययमत्र क्रमो वेद्यः । पिप्पल्याः सूक्ष्मं चूर्णं क्षीरेण पिबतो मरिचस्य वा पिबतो बहुकालानुषक्तापि प्रवाहिका नश्यति ॥

शशिलेखा

विबद्धवातवर्चा इत्यादि ॥ सुबोधम् । सरक्तपिच्छः रक्तपिच्छोपवेशी । तृष्णार्तस्तृष्णापीडितः क्षीरसौहित्यं पानान्नप्रतिषेधेनाकाङ्क्षं क्षीरपानमर्हति । यमकस्योपरि धारोष्णस्य पयसो विधानम् । एरण्डमूलेन अथवा बालबिल्वेन शृतं क्षीरं प्रयोजयेत् । केवलेन क्षीरेण पिप्पलीरजः अथवा मरिचरजः पिबतश्चिरकालानुषक्तापि प्रवाहिका नश्यति ॥

निरामरूपं शूलार्तं लङ्घनाद्यैश्च कर्शितम् ॥ ४१ ॥

रूक्षकोष्ठमवेक्ष्याग्निं सक्षारं पाययेद् घृतम् ।
सिद्धं दधिसुरामण्डे दशमूलस्य चाम्भसि ॥ ४२ ॥

सिन्धूत्थपञ्चकोलाभ्यां तैलं सद्योऽर्तिनाशनम् ।
षड्भिः शुण्ठ्याः पलैर्द्वाभ्यां द्वाभ्यां ग्रन्थ्यग्निसैन्धवात् ॥ ४३ ॥

---

1 क्षीरेणैव वा पिप्पलीमिति सङ्ग्रहे ।

तैलप्रस्थं पचेद्दध्ना निश्वारकरुजापहम् ।
एकतो मांसदुग्धाज्यं पुरीषग्रहशूलजित् ॥ ४४ ॥

पानानुवासनाभ्यङ्गप्रयुक्तं तैलमेकतः ।
तद्धि वातजितामग्र्यं शूलश्च विगुणोऽनिलः ॥ ४५ ॥

धात्वन्तरोपमर्देद्धः चलो व्यापी स्वधामगः ।
तैलं मन्दानलस्यापि युक्त्या शर्मकरं परम् ॥ ४६ ॥

वाय्वाशये सतैले हि विम्बिसी नावतिष्ठते ।
क्षीणे मले स्वायतनच्युतेषु
दोषान्तरेष्वीरण एकवीरे ।
को निष्टनन्प्राणिति कोष्ठशूली
नान्तर्बहिस्तैलपरो यदि स्यात् ॥ ४७ ॥

गुदरुग्भ्रंशयोर्युञ्ज्यात्सक्षीरं साधितं हविः ।
रसे कोलाम्लचाङ्गेर्योर्दध्नि पिष्टे च नागरे ॥ ४८ ॥

तैरेव चाम्लैः संयोज्य सिद्धं सुश्लक्ष्णकल्कितैः ।
धान्योषणविडाजाजीपञ्चकोलकडाडिमैः ॥ ४९ ॥

योजयेत् स्नेहवस्तिं वा दशमूलेन साधितम् ।
शठीशताह्वाकुष्ठैर्वा वचया चित्रकेण वा ॥ ५० ॥

प्रवाहणे गुदभ्रंशे मूत्राघाते कटिग्रहे ।
मधुराम्लैः शृतं तैलं घृतं वाप्यनुवासनम् ॥ ५१ ॥

सर्वाङ्गसुन्दरी

निरामरूपमित्यादि ॥ निरामरूपं तथा शूलेन पीडितं तथा लङ्घनाद्यैः कर्मभिः कर्शितं तथा रूक्षकोष्ठञ्चावेक्ष्याग्निं क्षारसहितं घृतं पाययेत् । दध्नि सुरामण्डे दशमूलक्वाथे च सैन्धवपञ्चकोलकल्केन तैलं सिद्धं सद्यो रुजाहरम् । शुण्ठ्याः पलैः षड्भिः पिप्पलीमूलपलद्वयेन चित्रकपलद्वयेन सैन्धवपलद्वयेन च तैलप्रस्थं द्वात्रिंशत्पलानि दध्ना सह पचेत् । तन्निश्वारकरुजापहं भवति । एकत

इत्यादि—एकत एकस्मिन् पुरीषग्रहशूलजित्त्वपक्षे मांसदुग्धाज्यं त्रयमेतत् प्रयुक्तं पुरीषग्रहशूलजित् । एकत एकस्मिन् पुरीषग्रहशूलजित्त्वपक्षे पानानुवासनाभ्यङ्गैः प्रयुक्तं तैलं पुरीषग्रहशूलजित् सम्पद्यत इति शेषः । कथमेवमित्याह—तद्धीत्यादि । तच्चैलं यस्मात् सर्वेषां वातजितामग्र्यं प्रधानम् । शूलञ्च विगुणोऽनिलः प्रकुपितः पवनो नापरः कश्चित् । शूलानिलयोः कार्यकारणभावाद्व्यतिरेके सत्यपि शूलस्य वातकार्यस्य वातप्रकोपे सत्यविनाभावित्वं सूचयितुं "शूलञ्च विगुणोऽनिल" इत्येवमुक्तम् । कुपितश्चेद्वायुरुत्पन्नमेव शूलमित्यर्थः । वायोर्वैगुण्ये धातुक्षय एवात्र हेतुरत एवाह—धात्वन्तरोपमर्देद्ध इत्यादि । वायुमपेक्ष्यान्ये पित्तश्लेष्मादयो धात्वन्तराः तेषामुपमर्दोऽन्यग्भावस्तेन इद्ध एधितश्चलो वाय्वाख्यः स व्यापी सकलशरीरव्यापनशीलोऽपि स्वधामगः पक्वाशयस्थः, तत्राधिक्येन तस्य वृत्तेः । अस्यामवस्थायामतीसारिणस्तैलं मन्दानलस्यापि युक्त्या योगविशेषेण परमतिशयेन शर्मकरं रोगस्य दुःखहेतोः शमनात् । अपिशब्दात् किमु दीप्ताग्नेरतिसारिणो न सुखकरं भवति । अत्रैव हेतुमाह—वाय्वाशये पक्वाशयाख्ये सतैले विंविसी प्रवाहिका नावतिष्ठते न स्थितिं प्राप्नोति। क्षीण इत्यादि—मले पुरीषाख्ये क्षीणे तथा दोषान्तरेषु वातवर्जितेषु पित्तकफादिषु स्वायतनच्युतेषु स्वस्थानभ्रष्टेषु । व्यक्त्यपेक्षया बहुवचनम् । ईरणे वायावेकवीरे एकनायके शेषदोषाणां स्वस्थानभ्रष्टत्वात् कोऽतीसारी निष्टनन् पीडाशब्दं कुर्वन् प्राणिति न कश्चिज्जीवति । यदि नान्तर्बहिरुभयत्र पानानुवासनाभ्यङ्गैस्तैलपरोऽतिशयेन तैलसेवी न स्यात् । आक्रन्दनपूर्वं सशूलमुपवेशनं निष्टनमुच्यते । इन्द्रवज्रावृत्तम् । गुदरुजि गुदभ्रंशे च घृतं सक्षीरं कोलादिरसे दध्नि नागरे च कल्किते पक्वं युञ्ज्यात् । अत्र च क्षीरं सर्पिःप्रमाणम् । घृतात् कोलादिरसः चतुर्गुणः । शुण्ठीचतुर्गुणं घृतमिति पाकक्रमः । तैरेव पूर्वोक्तैः कोलादिभिरम्लैः संयोज्य सूक्ष्मरजीकृतैश्च धान्यादिभिः सिद्धं घृतं पूर्वगुणम् । गुदशूली च दशमूलेन साधितं हविर्घृतं स्नेहवस्तिं वा योजयेत् । षड्यादिभिर्वा वचया चित्रकेण वा साधितं सर्पिर्योजयेत् । तच्च पूर्वगुणम् । प्रवाहणादिषु मधुराम्लैः शृतं तैलं घृतं वानुवासनं योजयेत् ॥

शशिलेखा

निरामरूपमित्यादि सुबोधम् । गुदशूले गुदभ्रंशे चाम्लबदरचाङ्गेरीरसयोर्दध्नश्च मिश्रीभूतानां सर्पिस्समत्वं यवक्षारशुण्ठीकल्कः स्नेहाच्चतुर्थांशेन । एतत

घृतं पाययेत्। अत्र तु "सक्षारं साधितं हवि"रिति च पाठः। तैरेव पूर्वोक्तैः कोलाम्लादिभिरम्लैः सुश्लक्ष्णकल्कितैर्धान्यादिभिश्च संयोज्य सिद्धं वाऽज्यं युञ्ज्यात्। धान्यं धान्याकम्। ऊषणं मरिचम्। दशमूलसिद्धस्नेहेनानुवासनं युञ्ज्यात्। सुबोधम्॥

प्रवेशयेद्गुदं स्तब्धमभ्यक्तं स्वेदितं मृदु।
कुर्याच्च गोःफणाबन्धं मध्यच्छिद्रेण चर्मणा॥ ५२॥

पञ्चमूलस्य महतः क्वाथं क्षीरे विपाचयेत्।
उन्दुरुं चान्त्ररहितं तेन वातघ्नकल्कवत्॥ ५३॥

तैलं पचेद्गुदभ्रंशं पानाभ्यङ्गेन तज्जयेत्।

सर्वाङ्गसुन्दरी

प्रवेशयेदित्यादि॥ गुदं स्तब्धं सदभ्यक्तं स्वेदितञ्च मृदु कृत्वाऽन्तः प्रवेशयेत्। गोःफणाबन्धश्चर्मणा मध्यच्छिद्रवता कुर्यात्। महतः पञ्चमूलस्य विल्वादेः क्वाथं तैलसमं कृत्वा क्षीरे विपाचयेत्। उन्दुरुश्चान्त्ररहितं तस्मिन्नेव क्षीरे विपाचयेत्। तेनैव क्षीरेण तैलं पचेत्। किंभूतम्—वातघ्नकल्कवत्। वातघ्नानां रास्नैरण्डादीनां कल्कः स यस्यास्ति तद्वातघ्नकल्कवत्। उन्दुरोरत्र रास्नादिघृतानुसारेण प्रमाणं निरूप्य कार्यम्। तत्र चैवं पठ्यते—"तुलार्धञ्चाजमांसस्य"इति। एवमुत्तरत्र मायूरादिष्वपि घृतेषु मयूरादीनां प्रमाणं चिन्त्यम्। तेन तैलं पचेदिति वचनाच्च क्षीरं तैलाच्चतुर्गुणं कार्यम्। अत्र द्रवस्यापरस्याभावात्तैलाच्च द्रवं चतुर्गुणं कार्यमिति पाकक्रमः। तस्मान्नान्यस्नेहवदत्र क्षीरं ग्राह्यम्। अन्यत्र ह्येवमधीतम्—"द्रव्याच्चतुर्गुणः स्नेहः स्नेहात् क्वाथश्चतुर्गुणः। क्षीरं स्नेहसमं कार्यं स्नेहपाके त्वयं विधिः"इति। बहुक्षीरत्वेन च वातकार्यस्य गुदभ्रंशाख्यस्य शीघ्रं शमं करोति। अतश्चतुर्गुणमेवात्र क्षीरं न्याय्यम्॥

शशिलेखा

गुदमतीसारतो निस्सृतं स्तब्धं सन्तमभ्यङ्गपूर्वं मृदु स्वेदितमनन्तरं स्वेदमृदूभूतं यथोक्तेन प्रकारेण प्रवेशयेत्। सूत्रस्थानोक्ते गोःफणाबन्धे चर्ममये मध्ये छिद्रं कृत्वा तेन गुदं बध्नीयात्। सच्छिद्रेण हि चर्मणा गुदोऽतिशयेन न पीड्यते। महापञ्चमूलस्य कषायमान्त्ररहितमुन्दुरुं मूषिकञ्च क्षीरे कृत्वा

विपाचयेत्। महापञ्चमूलकषायस्तैलसमः। तद्वत् क्षीरम्। मूषिके त्वेकसङ्ख्या न विवक्षिता, तत्संस्कारापादनात्। तेन क्षीरेण वातघ्नद्रव्यकल्केन स्नेहाच्चतुर्थांशेन तैलं पचेत्॥

पैत्ते तु सामे तीक्ष्णोष्णवर्ज्यं प्रागिव लङ्घनम्॥ ५४॥

तृड्वान् पिबेत् षडङ्गाम्बु सभूनिम्बं सशारिवम्।
पेयादि क्षुधितस्यान्नमग्निसन्धुक्षणं हितम्॥ ५५॥

बृहत्यादिगणाभीरुद्विबलासूप्यपर्णिभिः।

सर्वाङ्गसुन्दरी

पैत्त इत्यादि॥ पैत्ते त्वतिसारे सामे प्रागिव वातातीसारवत् पूर्वं लङ्घनं शरीरलाघवं कर्तुं यत्कर्म द्रव्यं वा निर्दिष्टं, तत्सर्वं तीक्ष्णोष्णवर्ज्यमस्मिन् कार्यमिति शेषः। पित्तातिसारी तृड्वान् षडङ्गाम्बु ज्वरचिकित्सितोक्तं भूनिम्बशारिवाभ्यां सहितं पिबेत्। एवमष्टाङ्गजलं तेन पेयमित्यवतिष्ठते। क्षुधितस्यातिशयेन बुभुक्षितस्य पेयाद्यन्नमग्निसन्धुक्षणं हितम्। बृहत्यादिना गणेनाभीरुणा तथा बलाद्वयेन सूप्यपर्णीद्वयेन च साधितम्॥

शशिलेखा

पैत्ते त्वित्यादि सुबोधम्। ज्वरविहिते लङ्घनादिके षडङ्गे भूनिम्बशारिवे अधिके संयोज्य पित्तातिसारे प्रयोगः। सामपित्तातिसारिणोऽन्नकाले बृहत्यादिगणसाधितं पेयाद्यन्नं हितम्। बृहत्यादिगणं ह्रस्वपञ्चमूलम्। अभीरु शतावरी। द्विबला बलाद्वयम्॥

पाययेदनुबन्धे तु सक्षौद्रं तण्डुलाम्भसा॥ ५६॥

कुटजस्य फलं पिष्टं सवल्कं सघुणप्रियम्।
पाठावत्सकबीजत्वग्दार्वीग्रन्थिकशुण्ठि वा॥ ५७॥

क्वाथं वाऽतिविषाबिल्ववत्सकोदीच्यमुस्तजम्।
अथवाऽतिविषामूर्वानिशेन्द्रयवतार्क्ष्यजम्॥ ५८॥

समध्वतिविषाशुण्ठीमुस्तेन्द्रयवकट्फलम्।
फलं वत्सकबीजस्य श्रपयित्वा रसं पिबेत्॥ ५९॥

यो रसाशी जयेच्छीघ्रं स पैत्तं जठरामयम् ।
मुस्ताकषायमेकं वा पिबेन्मधुसमायुतम् ॥ ६० ॥

सक्षौद्रं शाल्मलीवृन्तकषायं वा हिमाह्वयम् ।
किराततिक्तकं मुस्तं वत्सकं सरसाञ्जनम् ॥ ६१ ॥

कटंकटेरी ह्रीबेरं बिल्वमध्यं दुरालभाम् ।
तिलान् मोचरसं लोध्रं समङ्गां कमलोत्पलम् ॥ ६२ ॥

नागरं धातकीपुष्पं डाडिमस्य त्वगुत्पलम् ।
अर्धश्लोकैः स्मृता योगाः सक्षौद्रास्तण्डुलाम्बुना ॥ ६३ ॥

निशेन्द्रयवलोध्रैलाक्काथः पक्कातिसारनुत् ।
लोध्राम्बष्ठाप्रियङ्ग्वादिगणांस्तद्वत् पृथक् पिबेत् ॥ ६४ ॥

कट्वङ्गवल्कयष्ट्याह्वफलिनीडाडिमाङ्कुरैः ।
पेयाविलेपीखळकान् कुर्यात्सदधिडाडिमान् ॥ ६५ ॥

तद्वद्दधित्थबिल्वाम्रजम्बुमध्यैः प्रकल्पयेत् ।

सर्वाङ्गसुन्दरी

पाययेदित्यादि ॥ एवं लङ्घनपेयादिके कृतेऽप्यनुबन्धे सत्यतीसारस्य तमतीसारिणं कुटजस्य फलं शक्रयवाख्यं पिष्टं सवल्कं प्रकृतत्वात्तस्यैव कुटजस्य त्वचा युक्तं तथा सघुणप्रियं तथा सक्षौद्रं तण्डुलाम्भसा पाययेत् । अथवा पाठादिपिष्टं तण्डुलाम्भसा सक्षौद्रं तमतीसारिणं पाययेत् । अथवा क्काथमतिविषादिजं तं पाययेत् । अथवा अतिविषामूर्वादिजं पाययेत् । तार्क्ष्यजं रसाञ्जनम् । समध्वित्यादि । समाक्षिकमतिविषादिकञ्च पाययेत् । वत्सकबीजस्य फलं जलेन क्काथयित्वा तद्रसं यो मांसरसाशी सन् पिबेत्, स पित्तजमतीसारं जयेत् । मुस्ताकषायमेकं वा समाक्षिकं रसभोजनस्सन् यः पिबेत् स पैत्तं जठरामयं जयेत् । सुश्रुते चोऽक्तम्, "मौस्तं कषायमेकं वा पेयं मधुसमायुतम्" इति । कषायमेकं वेति कथमेतदुच्यते । मधुनोऽपि विद्यमानत्वात् । नैवम् । तस्य संस्कारकत्वेन प्रधानकत्वात् । अयं योगः पक्वपित्तरक्तातिसारे विशेषेण बोद्धव्य इति । शाल्मलीवृन्तकषायं हिमाह्वयं शीतकषायं सक्षौद्रं वा पिबेत् । किराततिक्तादयश्चत्वारो योगा अर्धश्लोकैः स्मृताः समाक्षिकास्तण्डुलजलेन योज्याः ।

निशादिक्वाथः पक्कातीसारजित्। लोध्रादीन् गणान् पृथगसहितांस्तथैव कथितान् समाक्षिकान् पिबेत्। कट्वङ्गत्वगादिभिः पेयादीन् सदधिडाडिमान् कुर्यात। तथैव दधित्थादिभिः पेयादीन् सदधिडाडिमान् कल्पयेत्। दधित्थः कपित्थः॥

शशिलेखा

अनुबन्ध उक्तया चिकित्सयाऽनुपशमः। तस्मिन् कुटजस्य फलं वल्कञ्च सातिविषं क्षौद्रयुतं तण्डुलाम्बुना पाययेदिति संबन्धः। कुटजो वत्सकः। घुणप्रिया अतिविषा। पाठादीनि वा तद्वत् पाययेत्। वत्सकबीजमिन्द्रयवम्। वत्सकस्यैव त्वग्वल्कलम्। ग्रन्थिकं पिप्पलीमूलम्। अतिविषादिक्वाथं वा। उदीच्यं वाळकम्। अतिविषामूर्वादिक्वाथं वा। निशा हरिद्रा। तार्क्ष्यजं रसाञ्जनम्। केवलस्य वत्सकबीजस्य पलं कर्षचतुष्टयं कथितं तद्रसं यो मांसरसाशी सन् पिबेत् स पित्तजमतीसारं जयेत्। केवलं वा मुस्ताक्वाथं समधु। शाल्मलीवृन्तानि शाल्मलीपत्राणि। तेषां शीतकषायं समधु पिबेद्वा। किराततिक्तककटंकटेरीतिलनागरादिभिरर्धश्लोकैश्चत्वारो योगाः। कटंकटेरी दार्वी। सुबोधम्। लोध्रादिगणं तद्वत् कथितं सक्षौद्रमिति प्रकरणात्। तद्वदम्बष्ठादिं प्रियङ्ग्वादिञ्च गणम्। कट्वङ्गत्वगादिभिः कल्कितैः कृतान् पेयादीन् सदधिडाडिमान् कुर्यात्। यष्ट्याह्वं यष्टीमधुकम्। फलिनी प्रियङ्गुः। दधित्थमध्यादिभिः तद्वत् पेयादीन् कल्पयेत्। दधित्थमध्यं कपित्थास्थि॥

अजापयः परं पथ्यं निरामे तेन चेच्छमः ॥ ६६ ॥

दोषाधिक्यान्न जायेत बलिनं तं विरेचयेत्।
व्यत्यासेन शकृद्रक्तमुपवेश्येत योऽपि वा ॥ ६७ ॥

पलाशफलनिर्यूहं युक्तं वा पयसा पिबेत्।
ततोऽनु कोष्णं पातव्यं क्षीरमेव यथाबलम् ॥ ६८ ॥

प्रवाहिते तेन मले प्रशाम्यत्युदरामयः।
पलाशवत् प्रयोज्या वा त्रायमाणा विशोधनी ॥ ६९ ॥

संसर्ग्यां क्रियमाणायां शूलं यद्यनुवर्तते।
स्रुतदोषस्य तं शीघ्रं यथावह्यनुवासयेत् ॥ ७० ॥

शतपुष्पावरीभ्यां च विल्वेन मधुकेन च ।
तैलपादं पयोयुक्तं पक्वमन्वासनं घृतम् ॥ ७१ ॥

सर्वाङ्गसुन्दरी

अजापय इत्यादि ॥ अजापयः परं पथ्यं निरामे स्मृतम् । तेनाजाक्षीरेण यदि दोषाभिक्रयाद्धेतोः शमो न भवेत्, तदा तं बलवन्तं विरेचयेन्न दुर्बलम् । व्यत्यासः परस्परक्षेपणम् । शकृद्रक्तं क्षिपति रक्तं शकृत् क्षिपत्येवं व्यत्यासः, तेन य उपवेश्येत स पलाशफलक्वाथं केवलं पिबेदथवा पयसा युक्तम् । ततस्तत्कषायं पीत्वाऽनन्तरं कोष्णं क्षीरमेव यथाबलं बलानतिक्रमेण पेयम् । तेन क्वाथेन मले प्रवाहिते निस्सारिते सत्यतीसारः प्रशाम्यति । पलाशफलं यथा तथा त्रायमाणा विशोधनाय प्रयोज्यम् । स्रुतदोषस्याऽपचितमलस्यातीसारिणः संसर्ग्यां क्रियमाणायां पेयादिके क्रमे विधीयमाने यदि शूलमनुवर्तते निवृत्तिं न याति, तमातुरमाशु यथावह्न्यग्न्यनतिक्रमेणानुवासयेत् । तदेवानुवासनस्नेहमाह — शतपुष्पादिभिस्तैलपादं क्षीरयुतं घृतं पक्वमनुवासनं स्यात् ॥

शशिलेखा

निरामे निरामकोष्ठे अजापय आजं क्षीरं परं पथ्यम् । सुबोधम् । ततः पलाशफलक्वाथपानानन्तरं क्षीरपानानन्तरं वा यथाबलं क्षीरमेव कोष्णं पिबेत् । तेन क्वाथपानेन मले पुराणशकृति प्रवाहिते निस्सृते उदरामयोऽतिसारः शान्तिमेति । पलाशवत् पलाशफलमिव त्रायमाणा त्रायन्ती । विरेचने प्रयुक्ते स्रुतदोषस्य निस्सृतपुरीषस्य सर्जनकाले यदि शूलमनुवर्तते, तमाशु यथावह्न्यनुवासयेत् । केनेत्याह —शतपुष्पेत्यादि । सुबोधम् । वरी शतावरी । क्षीरं स्नेहसमम् ॥

अशान्तावित्यतीसारे पिच्छावस्तिः परं हितः ।
परिवेष्ट्य कुशैरार्द्रैरार्द्रवृन्तानि शाल्मलेः ॥ ७२ ॥

कृष्णमृत्तिकयाऽलिप्य स्वेदयेद्गोमयाग्निना ।
मृच्छोषे तानि संक्षुद्य तत्पिण्डं मुष्टिसंमितम् ॥ ७३ ॥

मर्दयेत् पयसः प्रस्थे पूतेनास्थापयेत्ततः ।
नतयष्ट्याह्वकल्काज्यक्षौद्रतैलवताऽनु च ॥ ७४ ॥

स्नातो भुञ्जीत पयसा जाङ्गलेन रसेन वा ।
पित्तातिसारज्वरशोफगुल्म-
समीरणास्रग्रहणीविकारान् ।
जयत्ययं शीघ्रमतिप्रवृत्तिं
विरेचनास्थापनयोश्च वस्तिः ॥ ७५ ॥

फाणितं कुटजोत्थश्च सर्वातीसारनाशनम् ।
वत्सकादिसमायुक्तं साम्बष्ठादि समाक्षिकम् ॥ ७६ ॥

निरुद्धनिरामं दीप्ताग्नेरपि सास्रं चिरोत्थितम् ।
नानावर्णमतीसारं पुटपाकैरुपाचरेत् ॥ ७७ ॥

त्वक्पिण्डाद्दीर्घवृन्तस्य श्रीपर्णीपत्रसंवृतात् ।
मृल्लिप्तादग्निना स्विन्नाद्रसं निष्पीडितं हिमम् ॥ ७८ ॥

अतीसारी पिबेद्युक्तं मधुना सितयाथवा ।
एवं क्षीरद्रुमत्वग्भिस्तत्प्ररोहैश्च कल्पयेत् ॥ ७९ ॥

कट्वङ्गत्वग्घृतयुता स्वेदिता सलिलोष्मणा ।
सक्षौद्रा हन्त्यतीसारं बलवन्तमपि द्रुतम् ॥ ८० ॥

सर्वाङ्गसुन्दरी

अशान्तावित्यादि ॥ इत्यनेन प्रकारेण कृतेनातीसारस्याशान्तौ सत्यां परमनन्तरं पिच्छावस्तिर्वक्ष्यमाणो हितः । स्वल्पया मात्रया निरूहाख्यो वस्तिः पिच्छावस्तिः । परिवेष्ट्येत्यादि -- आर्द्रैरशुष्कैर्दर्भैः शाल्मलेरार्द्रवृन्तानि कुसमबन्धनानि परिवेष्ट्य ततः कृष्णमृत्तिकयाऽलिप्य गोमयाग्निना स्वेदयेत् । मृच्छोषे सति तानि संक्षुद्य क्षोदयित्वा तत्पिण्डं मुष्टिसम्मितं पलपरिमितं पयसः प्रस्थे मर्दयेत् । तेन पूतेन परिस्रुतेनाऽस्थापयेत् । किंभूतेन — तगरयष्टिकल्कघृतक्षौद्रतैलवता । अनु पश्चात् स्नातः पयसा भुञ्जीत । सात्म्यादिवशाज्जाङ्गलानां रसेन वा । अयं पिच्छावस्तिः प्रयुक्तः पित्तातीसारादिविकारान् विरेचनास्थापनयोश्चातिप्रवृत्तिं दोषाणामतियोगञ्च जयति । एतदुक्तं भवति । बहुदोषस्य या प्रवृत्तिर्विरेचनविषय आस्थापनविषये वा, तां च प्रयुक्तोऽयं जयति । उपजातिः । पुटपाकानाञ्च सर्वेषामयमेव विधिः । कुटजोत्थं फाणितञ्च वत्सकादियुक्तमम्बष्ठादिसहितं माक्षिकयुक्तम् । सर्वातीसारः आमातीसारः पक्वातीसारश्च तस्य नाशनं स्यात् ।

निरुक् चासौ निरामश्च निरुङ्निरामः । तथा सास्रम् । अपिशब्दात् किमुत निरस्रम् । तथा चिरोत्थितं तथा नानावर्णमनेकवर्णं दीप्ताग्नेः पुटपाकैरुपाचरेत् । त्वक्-पिण्डादित्यादि । त्वचः पिण्डस्त्वक्पिण्डः । दीर्घवृन्तस्य त्वक्पिण्डात् काश्मर्य-पत्रसंछादितात् मृल्लिप्तात् । सामान्योक्तावपि कृष्णमृत्तिकयाऽलिप्तादिति गम्यते । प्रागुक्तं कृष्णमृत्तिकयाऽलिप्येति । अनन्तरमग्निना स्विन्नाद्रसं निष्पीडितं शीतं कृत्वाऽतीसारी मधुना युक्तमथवा सितया युक्तं पिबेत् । दीर्घवृन्तः श्योनाकः । एवमनेन प्रकारेण क्षीरद्रुमाणां त्वग्भिस्तत्प्ररोहैः कोमलैर्दलैरगतमूलैश्च कल्पयेत् । प्ररोहा अङ्कुरा इत्यन्ये । श्योनाकत्वक् घृतयुता सलिलोष्मणा स्वेदिता माक्षिकयुक्ताऽतीसारं बलवन्तमपि शीघ्रं हन्ति ॥

शशिलेखा

इति विरेचनादिके कृतेऽप्यतीसारस्यानुबन्धे सति परमनन्तरं पिच्छावस्ति-र्वक्ष्यमाणो हितः । शाल्मलेर्वृन्तानि पत्राणि आर्द्रैः कुशैर्दर्भैर्वेष्टयित्वा कृष्ण-मृदाऽवलिप्य गोमयाग्निना स्वेदयेत् । शुष्कायां मृदि स्विन्नानि वृन्तान्युलूखले कृत्वा संक्षुद्य जर्जरीकृत्य तत्पिण्डं तेषां स्विन्नानां शाल्मलीवृन्तानां पिण्डं मुष्टिसंमितं पलप्रमाणं पयसा क्षीरस्य प्रस्थे द्वात्रिंशत्पलपरिमिते विमर्दयेत् । ततस्तेन पयसा पूतेन नतयष्ट्याह्वकल्कादियुतेनास्थापयेत् । कल्कादीनान्तु वस्तिविध्युक्तविधानं स्मर्तव्यम् । अनु च प्रत्याहृते स्नातः सन् पयसा श्रृतेन जाङ्गलरसेन वाऽश्नीयात् । अयं पिच्छावस्तिः पित्तातिसारादीन् विरेचनास्थापन-योरतिप्रवृत्तिमतियोगञ्चाशु जयति । सुबोधम् । नीरुगवेदनं निरामं पक्वं चिरोत्थितमशाम्यन्तमतीसारं पुटपाकैरुपाचरेत् । पुटपाकविधिः सूत्रोक्तः । दीर्घवृन्तस्यारलोस्त्वक्पिण्डं श्रीपर्णीपत्रप्रच्छन्नं कृष्णमृल्लिप्तं गोमयाग्निना पाचयेत् । तद्रसं निष्पीडितं शीतं मधुना पिबेत् । सितान्वितं वा तद्रसं पिबेत् । क्षीरि-द्रुमाणां वटादीनां त्वग्भिर्वल्कलैस्तेषां प्ररोहैरङ्कुरैश्चैवं पुटपाकं कल्पयेत् । सुबोधम् ॥

पित्तातिसारी सेवेत पित्तलान्येव यः पुनः ।
रक्तातिसारं कुरुते तस्य पित्तं सतृड्ज्वरम् ॥ ८१ ॥

दारुणं गुदपाकञ्च तत्र छागं पयो हितम् ।
पद्मोत्पलसमङ्गाभिः श्रृतं मोचरसेन वा ॥ ८२ ॥

शारिवायष्टिलोध्रैर्वा प्रसवैर्वा वटादिजैः ।
सक्षौद्रशर्करं पाने भोजने गुदसेचने ॥ ८३ ॥

तद्वद्रसादयोऽनम्लाः साज्याः पानान्नयोर्हिताः ।
काश्मर्यफलयूषश्च किञ्चिदम्लः सशर्करः ॥ ८४ ॥

पयस्यर्धोदके छागे ह्रीवेरोत्पलनागरैः ।
पेया रक्तातिसारघ्नी पृश्निपर्णीरसान्विता ॥ ८५ ॥

प्राग्भक्तं नवनीतं वा लिह्यान्मधुसितायुतम् ।

सर्वाङ्गसुन्दरी

पित्तातिसारीत्यादि ॥ पित्तातिसारी यः पुनः पित्तळान्येवान्नपानानि सेवेत, तस्य पित्तं कर्तृ रक्तातिसारं कुरुते। किंभूतम्—तृष्णाज्वरयुतम्। तथा दारुणं गुदपाकञ्च करोति। तत्रैवंविधेऽतीसारे छागं क्षीरं पद्मादिभिर्मोचरसेन वा श्रृतं हितम्। अथवा शारिवादिभिः श्रृतं छागं क्षीरं हितम्। अथवा वटादिजैः पल्लवैः श्रृतं क्षौद्रशर्करान्वितं पाने भोजने गुदसेचने च छागं पयो हितम्। तथैव रसयूषादयोऽनम्लाः साज्याः पानान्नयोर्हिताः। काष्मर्यफलयूषश्च किञ्चिदम्लः सशर्करो हितः। छागे पयस्यर्धोदके वाळकोत्पलनागरैः पृश्निपर्णीक्वाथेन च युक्ता पेया रक्तातीसारं हन्ति। अथवा नवनीतं प्राग्भक्तं मधुशर्करान्वितं लिह्यात्॥

शशिलेखा

यस्तु पित्तातिसारी पित्तळान्येव सेवेत, तस्य पित्तमतिवृद्धं रक्तातिसारं सतृड्ज्वरं करोति। गुदपाकश्च दारुणम्। गुदशूलादिबाहुल्यात्। तत्र रक्तातिसारे पद्मादिभिः श्रृतमाजं पयः सक्षौद्रशर्करं पानादौ हितम्। शारिवामधुयष्ट्यादिभिः श्रृतं वा छागं पयः समधुसितम्। वटादीत्यादिग्रहणेन वटसमानरसादीनामन्येषां ग्रहणम्। प्रसवाः पल्लाङ्कुराः। तैः श्रृतं समधुसितं पानादौ हितम्। तद्वत् क्षौद्रादियुता रसादयः। सुबोधम्॥

बलिन्यस्रेऽस्रमेवाजं मार्गं वा घृतभर्जितम् ॥ ८६ ॥

क्षीरानुपानं क्षीराशी त्र्यहं क्षीरोद्भवं घृतम् ।
कपिञ्जलरसाशी वा लिहन्नारोग्यमश्नुते ॥ ८७ ॥

पीत्वा शतावरीकल्कं क्षीरेण क्षीरभोजनः ।
रक्तातिसारं हन्त्याशु तया वा साधितं घृतम् ॥ ८८ ॥

लाक्षानागरवैदेहीकटुकादार्विवल्कलैः ।
सर्पिः सेन्द्रयवैः सिद्धं पेयामण्डावचारितम् ॥ ८९ ॥

अतीसारं जयेच्छीघ्रं त्रिदोषमपि दारुणम् ।
कृष्णमृच्छङ्खयष्ट्याह्वक्षौद्रासृक्तण्डुलोदकम् ॥ ९० ॥

जयत्यस्रं प्रियङ्गुश्च तण्डुलाम्बुमधुप्लुता ।
कल्कस्तिलानां कृष्णानां शर्करापाञ्चभागिकः ॥ ९१ ॥

आजेन पयसा पीतः सद्यो रक्तं नियच्छति ।
पीत्वा सशर्कराक्षौद्रं चन्दनं तण्डुलाम्बुना ॥ ९२ ॥

दाहतृष्णाप्रमोहेभ्यो रक्तस्रावाच्च मुच्यते ।
गुदस्य दाहे पाके वा सेकलेपा हिता हिमाः ॥ ९३ ॥

सर्वाङ्गसुन्दरी

बलिन्यस्र इत्यादि ॥ प्रवृद्धे रक्ते छागं रक्तमथवा मार्गं मृगसम्बन्धि रक्तं घृतभर्जितं भुञ्जीत । एवकारान्न त्वपरं किञ्चिदजस्य मृगस्य वेति गम्यते। उभयमपि क्षीरानुपानं क्षीराशी सन् भुञ्जीत । अथवा क्षीरोद्भवं घृतं त्र्यहं लिहन् कपिञ्जलरसाशनो नर आरोग्यं प्राप्नोति । शतावरीकल्कं क्षीरेण पीत्वा क्षीराशी सन् रक्तातीसारं द्रागेव पराकरोति। अथवा तया शतावर्या पक्वं घृतं रक्तातिसारं हन्ति । लाक्षादिभिः साधितं घृतं पेयामण्डेनावचारितं शीघ्रं त्रिदोषमप्यतीसारं घोरं जयेत् । अपिशब्दाद्रक्तातीसारमपि । कृष्णमृदादिकं तण्डुलजलालोलितं पीतं सद्रक्तं जयति। तथा तण्डुलाम्बुमधुयुक्ता प्रियगुङ्श्च पीता रक्तं जयति । कल्क इत्यादि । पञ्चमो भागः स यस्याऽस्ति स पाञ्चभागिकः । कोऽसौ कृष्णतिलानां कल्कः । शर्करायाः पाञ्चभागिकः कृष्णतिलानां कल्कः छागक्षीरेण पीतः सन् सद्यो रक्तं नियच्छति । तण्डुलजलेन चन्दनं शर्करामाक्षिकान्वितं पीत्वा दाहादिभ्यो मुच्यते । मुच्यत इति कर्मकर्तरि तङ् । गुदस्य पाके दाहे च सति सेका लेपा हिमा हिताः ॥

शशिलेखा

अजस्य मृगस्य वास्रं रक्तं घृतभृष्टं लिह्यात्। क्षीरोद्भवं क्षीरं प्रमथ्य यदुत्पादितं घृतं तत् क्षीराशी कपिञ्जलरसाशी वा क्षीरानुपानं त्र्यहं लिहन्नारोग्यमश्नुते। सुबोधम्। तया वा साधितं घृतमित्यनेन गुह्यरोगप्रतिषेधे वक्ष्यमाणं शतावरीघृतं ज्ञाप्यते। लाक्षादिभिरिन्द्रयवान्तैः सिद्धं पक्वं सर्पिः पेयामण्डेनावचारितं पीतमाशु त्रिदोषजमप्यत एव दारुणमतीसारं जयेत्। वैदेही कृष्णा। कृष्णमृदादिकं तण्डुलोदकेन पीतमस्रं जयति। प्रियङ्गुः फलिनी। सुबोधम्। हिमाः सेकलेपाः सङ्ग्रहादवगन्तव्याः ॥

अल्पाल्पं बहुशो रक्तं सशूलमुपवेश्यते।
यदा विबद्धो वायुश्च कृच्छ्राच्चरति वा न वा ॥ ९४ ॥

पिच्छावस्तिं तदा तस्य पूर्वोक्तमुपकल्पयेत्।
पल्लवान् जर्जरीकृत्य शिंशिपाकच्छुदारयोः ॥ ९५ ॥

पचेद्यवांश्च स क्वाथो घृतक्षीरसमन्वितः।
पिच्छास्रुतौ गुदभ्रंशे प्रवाहणरुजासु च ॥ ९६ ॥

पिच्छावस्तिः प्रयोक्तव्यः क्षतक्षीणबलावहः
प्रपौण्डरीकसिद्धेन सर्पिषा चाऽनुवासनम् ॥ ९७ ॥

सर्वाङ्गसुन्दरी

अल्पाल्पमित्यादि ॥ अल्पाऽल्पं बहुशः पुनः पुनः शूलेन सह यो रक्तमुपवेश्यते, वायुश्च यदा विबद्धो नानुलोमगोऽत एव कृच्छ्रेण चरति नैव वा चरति, तदा तस्य पुरुषस्य पूर्वोक्तं "परिवेष्ट्य कुशैरित्यादिकम्" पिच्छावस्तिमुपकल्पयेत्। शिंशपाकच्छुदारयोः पल्लवान् जर्जरीकृत्य यवांश्च पचेत्। स क्वाथो घृतक्षीरसंयुक्तः पिच्छास्रुत्यादिषु पिच्छावस्तिः प्रयोक्तव्यः। स च क्षतक्षीणानां बलकृत्। प्रपौण्डरीकपक्वेन घृतेनाऽनुवासनं प्रयोक्तव्यम् ॥

शशिलेखा

यदा रक्तमल्पमल्पं बहुशस्सशूलमुपवेश्यते अतिसार्यते, यदा च वायुर्विबद्धः कृच्छ्राच्चरति नैव वा चरति, तदा तस्य पूर्वोक्तं पिच्छावस्तिमुपकल्पयेत्। सुबोधम् ॥

रक्तं विट्सहितं पूर्वं पश्चाद्वा योऽतिसार्यते ।
शतावरीघृतं तस्य लेहार्थमुपकल्पयेत् ॥ ९८ ॥

शर्करार्धांशकं लीढं नवनीतं नवोद्धृतम् ।
क्षौद्रपादं जयेच्छीघ्रं तं विकारं हिताशिनः ॥ ९९ ॥

न्यग्रोधोदुम्बराश्वत्थशृङ्गानापोथ्य वासयेत् ।
अहोरात्रं जले तप्ते घृतं तेनाम्भसा पचेत् ॥ १०० ॥

तदर्धशर्करायुक्तं लेहयेत् क्षौद्रपादिकम् ।
अधो वा यदि वाऽप्यूर्ध्वं यस्य रक्तं प्रवर्तते ॥ १०१ ॥

श्लेष्मातिसारे वातोक्तं विशेषादामपाचनम् ।
कर्तव्यमनुबन्धेऽस्य पिबेत् पक्त्वाऽग्निदीपनम् ॥ १०२ ॥

बिल्वकर्कटिकामुस्तप्राणदाविश्वभेषजम् ।
वचाविडङ्गपूतीकधानकामरदारु वा ॥ १०३ ॥

अथवा पिप्पलीमूलपिप्पलीद्वयचित्रकान् ।
पाठाग्निवत्सकग्रन्थितिक्ताशुण्ठीवचाभयाः ॥ १०४ ॥

क्वथिता यदि वा पिष्टाः श्लेष्मातीसारभेषजम् ।
सौवर्चलवचाव्योषहिङ्गुप्रतिविषाभयाः ॥ १०५ ॥

पिबेच्छ्लेष्मातिसारार्तश्चूर्णिताः कोष्णवारिणा ।
मध्यं लीढ्वा कपित्थस्य सव्योषक्षौद्रशर्करम् ॥ १०६ ॥

कट्फलं मधुयुक्तं वा मुच्यते जठरामयात् ।
कणां मधुयुतां लीढ्वा तक्रं पीत्वा सचित्रकम् ॥ १०७ ॥

भुक्त्वा वा बालबिल्वानि व्यपोहत्युदरामयम् ।
पाठामोचरसाम्भोदधातकीबिल्वनागरम् ॥ १०८ ॥

सुकृच्छ्रमप्यतीसारं गुडतक्रेण नाशयेत् ।

सर्वाङ्गसुन्दरी

रक्तं विट्सहितमित्यादि ॥ रक्तं विष्ठासहितमथवा पूर्वं पश्चाद्वा योऽतिसार्यते, तस्य लेहार्थं शतावरीघृतमुपकल्पयेत् । नवनीतं नवं शर्करायाा अर्ध-

भागेन युक्तं माक्षिकस्य चतुर्भागेनान्वितं लीढं तत् पूर्वोक्तं विकारं हिताहारस्य शीघ्रं जयेत्। न्यग्रोधादीनां शृङ्गानापोथ्य जर्जरीकृत्य तप्ते जलेऽहोरात्रं वासयेत्। तेनाम्बुना युक्तं घृतं पचेत्। अधो वा ऊर्ध्वं वा यस्य रक्तं प्रवर्तते, सः तत् घृतं शर्कराया अर्धभागेन युक्तं माक्षिकचतुर्थांशकं लेहयेत्। पूर्वगुणम्। श्लेष्मातिसार इत्यादि—श्लेष्मातिसारे वातातिसारोक्तं यदामपाचनं तद्विशेषात् कर्तव्यम्। न तथा वातातीसारोक्तान्य उपक्रमः कार्य इति विशेषशब्दस्यार्थः। अस्यातीसारस्यानुबन्धे चिकित्सायां सम्यक्कृतायामप्यनुपशमे सति विल्वकर्कटिकादिकं पक्त्वाग्निदीपनं पिबेत्। अथवा वचादीनि पिबेत्। अथवा पिप्पलीमूलादिकं पक्त्वाऽग्निदीपनं पिबेत्। पाठेत्यादि—एते पाठादयः कथिताः पाचनन्यायेन चूर्णिताः पानन्यायेन वा श्लेष्मातीसारभेषजं भवति। अत्रापि वक्ष्यमाणं सिंहावलोकितन्यायेन कोष्णवारिणेत्येतत् सम्बध्यते। सौवर्चलादांश्चूर्णितान् कोष्णजलेन श्लेष्मातिसारार्तः पिबेत्। कपित्थस्य मध्यं सव्योषमाक्षिकशर्करं लीढ्वाऽथवा कट्फलं माक्षिकान्वितं लीढ्वा जठररोगात् मुच्यते। कणां माक्षिकान्वितां लीढ्वा तक्रं च सचित्रकं पीत्वा बालविल्वानि वा भुक्त्वा जठररोगं व्यपोहति। 'उपसर्गादस्यत्यूहोर्वा वचनम्' इति तङ्। पाठादिगुडतक्रेण पीत्वातीसारं सुकृच्छ्रमपि नाशयेत्। श्लेष्मातिसारे प्रकृतेऽप्यतिसारग्रहणमन्यस्यापि निरामस्यैतन्नाशनमिति द्योतनार्थम्॥

शशिलेखा

श्लेष्मातिसारे वातोक्तं वातातिसारोक्तमामपाचनं विशेषात् सुतरां कर्तव्यम्। अस्य भूयोऽप्यनुबन्धे विल्वकर्कटिकादिवचादिपिप्पलीमूलादिक्वाथा यथायोग्यं योज्याः। पाठादयः कथिता यदि वा पिष्टाः कोष्णाम्बुना पीताः श्लेष्मातीसारभेषजम्। ग्रन्थिः पिप्पलीमूलम्। तिक्ता कटुकरोहिणी। श्लेष्मातिसारार्तः सौवर्चलादयश्चूर्णिताः कोष्णाम्बुना पिबेत्। व्योषादियुतं कपित्थमध्यं वा मधुयुतं कट्फलं वा लीढ्वा जठरामयादतीसारग्रहण्यादेर्मुच्यते। सुबोधम्॥

यवानीपिप्पलीमूलचातुर्जातकनागरैः ॥ १०९ ॥

मरिचाग्निजलाजाजीधान्यसौवर्चलैः समैः।
वृक्षाम्लधातकीकृष्णाविल्वडाडिमदीप्यकैः ॥ ११० ॥

त्रिगुणैः [1]षड्गुणसितैः कपित्थाष्टगुणैः कृतः ।
चूर्णोऽतिसारग्रहणीक्षयगुल्मोदरामयान् ॥ १११ ॥

कासश्वासाग्निसादार्शःपीनसारोचकान् जयेत् ।
[2]कर्षोन्मितं तुकाक्षीरीचातुर्जातं द्विकार्षिकम् ॥ ११२ ॥

यवानीधान्यकाजाजी ग्रन्थिव्योषं पलांशकम् ।
पलानि डाडिमादष्टौ सितायाश्चैकतः कृतः ॥ ११३ ॥

गुणैः कपित्थाष्टकवच्चूर्णोऽयं डाडिमाष्टकः ।
भोज्यो वातातिसारोक्तैर्यथावस्थं खलादिभिः ॥ ११४ ॥

सविडङ्गः समरिचः सकपित्थः सनागरः ।
चाङ्गेरीतक्रकोलाम्लः खलः श्लेष्मातिसारजित् ॥ ११५ ॥

क्षीणे श्लेष्मणि पूर्वोक्तमम्लं लाक्षादि षट्पलम् ।
पुराणं वा घृतं दद्याद्यवागूमण्डमिश्रितम् ॥ ११६ ॥

वातश्लेष्मविबन्धे च स्रवत्यतिकफेऽपि वा ।
शूले प्रवाहिकायां वा पिच्छाबस्तिः प्रशस्यते ॥ ११७ ॥

वचाबिल्वकणाकुष्ठशताह्वालवणान्वितः ।
बिल्वतैलेन तैलेन वचाद्यैः साधितेन वा ॥ ११८ ॥

बहुशः कफवातार्ते कोष्णेनान्वासनं हितम् ।

सर्वाङ्गसुन्दरी

यवानीत्यादि ॥ यवान्यादिभिर्द्रव्यैः समैः वृक्षाम्लादिभिस्त्रिगुणैर्मूलद्रव्यापेक्षया । किंभूतैः — षड्गुणा सिता येषां वृक्षाम्लादीनां त एवम् । तैः षड्गुण-

---

1 "षड्गुणसिते कपित्थेऽष्टगुणे" इत्यपि पाठो दृश्यते । "अष्टौ भागाः कपित्थस्य षड्भागा शर्करा मता । डाडिमं तिन्त्रिणीकं च श्रीफलं धातकी तथा ॥ अजमोदा च पिप्पल्यः प्रत्येकं स्युस्त्रिभागिकाः । मरिचं जीरकं धान्यं ग्रन्थिकं वाळकं तथा । सौवर्चलं यवानी च चातुर्जातं सचित्रकम् । नागरं चैकभागाः स्युः प्रत्येकं सूक्ष्मचूर्णितम् ॥" इति शार्ङ्गधरे ।

2 'डाडिमस्य पलान्यष्टौ शर्करायाः पलाष्टकम् । पिप्पली पिप्पलीमूलं यवानी मरिचं तथा ॥ धान्यकं जीरकं शुण्ठी प्रत्येकं पलसम्मितम् । कर्षमात्रा तुगाक्षीरी त्वक्पत्रैलाश्च केसरम् । प्रत्येकं कोलमात्राः स्युस्तच्चूर्णं डाडिमाष्टकम् ।' इति शार्ङ्गधरे ।

सितैः। शर्कराभागानामेवं शतमष्टाधिकं भवति। पुनः किंभूतैः—कपित्थाष्टगुणैः। मूलद्रव्यापेक्षया अष्टगुणैः कपित्थैः कृतश्चूर्ण इति योज्यम्। केचित्त्वेवं पठन्ति—'षड्गुणसिते कपित्थेऽष्टगुण' इति। तत्र चेदं व्याख्यानम्। मूलद्रव्यापेक्षया कपित्थेऽष्टगुणे। तथा किंभूते—षड्गुणा सिता यस्मात्तस्मिन्। एवं शर्कराभागा अष्टचत्वारिंशत् इति। अयं चूर्णोऽतीसारादीन् जयेत्। कर्षोन्मितमित्यादि—तुकाक्षीरी-चातुर्जातञ्च कर्षोन्मितं कर्षप्रमाणम्। यवानी च धान्यकञ्चाजाजी च यवानी-धान्यकाजाजी द्विकार्षिकम्। ग्रन्थिश्च व्योषञ्च तत्पलांशकं पलभागिकम्। पलानि डाडिमादष्टौ। चशब्दात् सिताया अप्यष्टौ पलानि। एवमयमेकत एकस्मिन् कृतश्चूर्णो डाडिमाष्टकसंज्ञः। तेन चतुर्जातकमेकमेवास्य समुदायाद्य-थोक्त एक एव भागः। एवं द्रव्यसमुदायस्यैकत्वकल्पनाऽप्यत्राचार्यस्याभिम-तैव। यथा—"त्रिकटूत्तमातिलारुष्कराज्यमाक्षिकसितोपला विहिता। गुळिका रसायनं स्यात् कुष्ठजिच्च वृष्या च सप्तसम" इति। तस्मात्तुकाक्षीर्येका। चतुर्जातं द्वितीयम्। यवानी तृतीया। धान्यकं चतुर्थम्। अजाजी पञ्चमी। पिप्पलीमूलं षष्ठम्। व्योषं सप्तमम्। डाडिममष्टममिति। अन्ये त्वेवं व्याचक्षते। पलमिति प्रकृतम्। डाडिममष्टकमष्टपलप्रमाणं यस्मिश्चूर्णे स डाडिमाष्टक इति। यथा वाऽक्षिरोगे—"सितमरिचभागमेकं चतुर्मनोह्वं द्विरष्टशावरम्" इत्यादि। तच्चूर्णं वातातिसारोक्तैरवस्थावशात् खळपेयादिभिः सह भोजनीयम्। सविडङ्ग इत्यादि—खळः श्लेष्मातिसारजित्। किंभूतः—विळङ्गादियुतः। चाङ्गेरीतक्रकोलैरम्लः। क्षीणे श्लेष्मणि पूर्वोक्तमम्लं घृतम्। "गुदरुग्भ्रंशयोर्युञ्ज्यात् सक्षीरं साधितं हविः" इत्यादि। तथा लाक्षादि "लाक्षानागर वैदेही" इत्यादि। षट्पलं यक्ष्मोक्तम्। पुराणं वा घृतं यवागूमण्डमिश्रितं दद्यात्। वातकफविबन्धेऽथवाऽतिशयेन कफे स्रवति तथा शूले सति प्रवाहिकायां वा सत्यां पिच्छावस्तिः पूर्वोक्त एव "पल्लवान् जर्जरीकृत्य" इत्यादिको वचादिभिर्युक्तः प्रशस्यते। बिल्वेत्यादि—बिल्वमज्जभ्य उत्पन्नं तैलं बिल्वतैलम्। तेन वचाद्यैरनन्तरोक्तैर्वचाबिल्वादिभिः पक्वेनाथवा तैलेन तिलतैलेन वचाद्यैः साधितेनो-भयेनाप्युष्णेन बहुशोऽनुवासनं कफवातार्ते हितम्॥

शशिलेखा

यवन्यादिभिः कपित्थाष्टकः। कर्षोन्मितमित्यादिभिः डाडिमाष्टकः। सविळङ्ग इत्यादि सुबोधम्। वातश्लेष्मविबन्ध इत्यादि सुबोधम्। कोष्णेन बिल्वशृततैलेन बहुशोऽन्वासनं वचाबिल्वादिसाधितेन वा तैलेन॥

क्षीणे कफे गुदे दीर्घकालातीसारदुर्बले ॥ ११९ ॥
अनिलः प्रबलोऽवश्यं स्वस्थानस्थः प्रजायते ।
स बली सहसा हन्यात्तस्मात्तं त्वरया जयेत् ॥ १२० ॥
वायोरनन्तरं पित्तं पित्तस्यानन्तरं कफम् ।
जयेत् पूर्वं त्रयाणां वा भवेद्यो बलवत्तमः ॥ १२१ ॥

सर्वाङ्गसुन्दरी

क्षीण इत्यादि ॥ कफे क्षीणे गुदे च दीर्घकालं योऽतीसारस्तेन दुर्बले बलहीने सत्यनिलः स्वस्य स्थाने स्थितः पायुस्थितोऽवश्यं प्रबलो जायते। स वायुर्बलवान् सहसा झटित्येनं व्यापादयेत् । तस्मात्तं वायुं शीघ्रं जयेत्। वायोरनन्तरमित्यादिना सन्निपातातीसारचिकित्सितमाह—प्रथमतः वायुं जित्वा अनन्तरं पित्तं जयेत् । पित्तस्यानन्तरं कफं जयेत् । अथवा त्रयाणां मध्ये यो बलवत्तमो दोषस्तमेव पूर्वं जयेत् । अयं च क्रमो निरामसन्निपातातीसार एव ज्ञेयः ॥

शशिलेखा

अतिसारवतो लङ्घनादिना दीर्घकालातिसरणेन च क्रमेण कफे क्षीणेऽनिलः स्वस्थाने पक्वाशये स्थितस्तत्रावश्यं प्रबलो जायते वृद्धिं याति । स च मारुतो वृद्धः सहसा हन्यात्। तस्मात्तं मारुतं त्वरया जयेत् । सुबोधम् ॥

भीशोकाभ्यामपि चलः शीघ्रं कुप्यत्यतस्तयोः ।
कार्या क्रिया वातहरा हर्षणाश्वासनानि च ॥ १२२ ॥
यस्योच्चाराद्विना मूत्रं पवनो वा प्रवर्तते ।
दीप्ताग्नेर्लघुकोष्ठस्य शान्तस्तस्योदरामयः ॥ १२३ ॥

सर्वाङ्गसुन्दरी

भीशोकाभ्यामित्यादि ॥ भीशोकाभ्यामप्यनिलो यस्मात् कुप्यत्यतस्तयोर्भयशोकातिसारयोर्वातहरा क्रिया कार्या । न केवलं वातहरक्रिया हर्षणाश्वासनानि च कार्याणि । यस्य पुरुषस्य उच्चारान्मलप्रवृत्तेर्विना मूत्रमथवा वातः प्रवर्तते दीप्ताग्नेर्लघुकोष्ठस्य सतस्तस्य जठररोगः शान्त इति ॥

शशिलेखा

भीशोकाभ्यामित्यादि सुबोधम् । तयोरिति भीशोकयोः । यस्येत्यादि विगतातीसारलक्षणम् ॥

इति चिकित्सिते नवमोऽध्यायः ॥

दशमोऽध्यायः ।

अतीसारचिकित्सितादनन्तरं ग्रहणीदोषचिकित्सितमुच्यते, निदानसामान्यात् । तथा च प्रागुक्तम्—"अर्शोऽतिसारग्रहणीविकाराः" इत्यादि । अत आह—अथात इत्यादि ॥

अथातो ग्रहणीदोषचिकित्सितं नामाध्यायं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ॥

ग्रहणीमाश्रितो दोषो ग्रहणीदोषः । तदाश्रितस्थानोचितरोगकारी वाताद्यन्यतमस्तस्य चिकित्सितं ग्रहणीदोषचिकित्सितम् । शेषं पूर्ववत् ॥

ग्रहणीमाश्रितं दोषमजीर्णवदुपाचरेत् ।
अतीसारोक्तविधिना तस्यामं च विपाचयेत् ॥ १ ॥

अन्नकाले यवाग्वादि पञ्चकोलादिभिर्युतम् ।
वितरेत् पटुलघ्वन्नं पुनर्योगांश्च दीपनान् ॥ २ ॥

दद्यात्सातिविषां पेयामामे साम्लां सनागराम् ।
पानेऽतीसारविहितं वारि तक्रं सुरादि च ॥ ३ ॥

ग्रहणीदोषिणां तक्रं दीपनग्राहिलाघवात् ।
पथ्यं मधुरपाकित्वान्न च पित्तप्रदूषणम् ॥ ४ ॥

कषायोष्णविकाषित्वाद्रूक्षत्वाच्च कफे हितम् ।
वाते स्वाद्वम्लसान्द्रत्वात्सद्यस्कमविदाहि तत् ॥ ५ ॥

सर्वाङ्गसुन्दरी

ग्रहणीमित्यादि ॥ ग्रहणीसमाश्रितं दोषमजीर्णवदुपाचरेत् । तत्तुल्यसाधनेन लङ्घनोष्णोपचारादिनोपक्रमेत् । आमातीसारोक्तविधिना तस्य ग्रह-

---

1 "आदावेव यथास्वमजीर्णानुसारतः मात्राशीतीयोक्तविधानेन उपक्रमेत । अथातीसारविधिना च" इति सङ्ग्रहे। 'पञ्चकोलाभिसंयुतम्" इति पाठः इन्दुनाङ्गीक्रियते ।

णीदोषवतः पुंसो यथादोषमामं विपाचयेत्। अन्नकाले सम्यक् जातायां क्षुधि यवाग्वाद्यन्नं पेयाविलेप्योदनलक्षणं तस्मै वितरेद्दद्यात्। किंभूतम् —पञ्चकोलादिभिर्दीपनैर्द्रव्यैर्युतम्। आदिशब्देनान्यैरप्येवंप्रकारैर्द्रव्यैर्दीपनादिगुणयुक्तैर्युक्तम्। तथा पटु लवणम्। लघूभयथा मात्रया प्रकृत्या च। पुनर्भूयो दीपनान् षाडबादीन्योगान्वितरेत्। तथामे सति पेयां दद्यात्। किंभूताम् ---नागरातिविषायुताम्। तथा साम्लामीषदम्लाम्। पानेऽतीसारविहितं वारि तक्रं सुरादि च सात्म्यादिवशाद्यथायोग्यं तस्मै दद्यात्। ग्रहणीत्यादि— ग्रहणीदोषिणां तक्रं पथ्यम्। कस्मात्—दीपनग्राहिलाघवात्। दीपनग्राहिशब्दयोरत्र भावप्रधानो निर्देशः। यथा 'द्व्येकयोर्द्विवचनैकवचने' इत्यत्र। अत एवैतौ भावप्रत्ययान्तेन लाघवशब्देन सह निर्दिष्टौ। भाष्यकारस्त्वाह—"द्वन्द्वात् परं यः श्रूयते, स सर्वैः सम्बध्यते" इति। तेन दीपनग्राहिशब्दयोरपि भावप्रत्ययसम्बन्धो भवतीति। मधुरपाकित्वात् पित्तप्रदूषणं न भवति। नपदेन प्रकर्षदूषणं पित्तस्य तक्रेण निषिध्यते। तेनार्थात् किञ्चित् पित्तकरमित्युक्तं भवति। कषायोष्णविकाषित्वाद्रूक्षत्वाच्च कफे हितं तक्रम्। रूक्षत्वाच्चेति पृथङ्निर्देशाद्रूक्षत्वस्य तक्रगतस्य यथा कफे हितत्वं द्रव्यस्वभावान्न तथा कषायादीनामित्येतद्द्योतयति। वाते स्वाद्वम्लसान्द्रत्वात्तक्रं पथ्यम्। किंभूतम्—सद्यस्कम्। सद्योविलोडितमत एवाऽविदाहि तत्। ननु ग्रहणीदोषिणां तक्रं पथ्यमित्येतावदस्तु। किं हेतुनिर्देशेन। अत्रोच्यते—लघ्वादिगुणेभ्यः प्राङ्निरूपितेभ्योऽधिकान् विकाषित्वमधुरपाकित्वादीनभिधातुम्। दीपनादयोऽपि तत्प्रसङ्गान्निर्दिष्टाः। अपि च ग्रहणीदोषिणां तक्रं यथा पथ्यं दीपनादिगुणयोगात्तथान्यदपि यद्द्रव्यमेवंगुणं ग्रहणीदोषचिकित्सिते नोक्तं, तदपि ग्रहणीदोषिणां पथ्यमिति हेतुनिर्देशेन द्योत्यते। द्रव्यस्वभावात्तु विशेषेण ग्रहणीदोषिणां तक्रं पथ्यमिति। एष एव न्यायोऽन्यत्रापि सहेतुकद्रव्यकथने योज्यः। किञ्च यत्तदोर्नित्यसम्बन्धादेवं निर्देशाच्चायमर्थोऽवतिष्ठते। यदेवंविधं तक्रं तत्, ग्रहणीदोषिणां पथ्यम्, नान्यादृशं यदनुद्धृतस्नेहमथवाऽर्धोद्धृतस्नेहं तथातिजातत्वादम्लं तथा असद्यस्कं विदाहि च, तत्सर्वं ग्रहणीदोषिणामपथ्यमेव। तक्रे च रूक्षत्वमधुरपाकादयो गुणाःपरस्परविरुद्धा अपि द्रव्यस्वभावात् कफविजयित्वं वातविजयित्वं च यथायोगं कुर्वन्त्येव। स्वं स्वं कर्म यथा सत्त्वरजस्तमःसंज्ञा गुणाः॥

शशिलेखा

ग्रहणीमाश्रितं दोषमजीर्णवत् कफवातपित्तेष्वामविष्टब्धविदग्धाख्यत्रिविधाः जीर्णवदुपाचरेदुपक्रमेत। तस्याममामातीसारोक्तविधिना विपाचयेच्च। एवमामपाचनं कुर्वतोऽन्नकाले बुभुक्षायां पञ्चकोलाभिसंयुतं पञ्चकोलेनानेककल्पपरिगृहीतं पट्वादिगुणं यवाग्वाद्यन्नं वितरेत्। पुनर्दीपनान्योगांश्च नागरातिविषाभ्यां पेयामामे तक्रडाडिमादिसिद्धत्वादम्लां दद्यात्। सुरादि चेत्यादिशब्देन मस्त्वारनालादिपरिग्रहः। ग्रहणीदोषिणामित्यादि सुबोधम्। दीपनत्वादियोगाद्ध्यायौ पथ्यम्। मधुरपाकित्वादिना दोषाणां विकाषि मेदःप्रभृतीनां कर्शनशीलमिति॥

चतुर्णां प्रस्थमम्लानां त्र्यूषणाच्च पलत्रयम्।
लवणानाञ्च चत्वारि शर्करायाः पलाष्टकम्॥ ६॥

तच्चूर्णं शाकसूपान्नरागादिष्ववचारयेत्।
आमाजीर्णारुचिश्वासहृत्पार्श्वामयशूलनुत्॥ ७॥

सर्वाङ्गसुन्दरी

चतुर्णामित्यादि॥ अम्लानां चतुर्णां कोलडाडिमवृक्षाम्लचुक्रीकाणां प्रस्थम्। केचित्तु वृक्षाम्लाम्लवेतसडाडिमबदराणामित्याहुः। त्रिकटुकात् पलत्रयम्। लवणानां चत्वारि पलानि। शर्करायाः पलान्यष्टौ। तदेतच्चूर्णं शाकादिष्ववचारयेत् मिश्रयेत्। तच्चामादिजित्॥

शशिलेखा

चतुर्णामम्लानां डाडिमकपित्थवृक्षाम्लाम्लीकानां प्रस्थं पृथक् पृथक्कुडुवं लवणानां सैन्धवादीनां पञ्चानाम्॥

नागरातिविषामुस्तं पाक्यमामहरं पिबेत्।
उष्णाम्बुना वा तत्कल्कं नागरं वाऽथवाभयाम्॥ ८॥

ससैन्धवं वचादिं वा तद्वन्मदिरयाऽथवा।

सर्वाङ्गसुन्दरी

नागरमित्यादि॥ नागरादिपाक्यं क्वाथमामघ्नं पिबेत्। अथवा तेषां नागरादीनां कल्कमुष्णाम्बुना पिबेत्। अथवा शुण्ठीमुष्णाम्बुना पिबेत्।

हरीतकीं वा वचादिं वा गणं सैन्धवान्वितं तद्वदुष्णाम्बुना पिबेत्। वचादिमेव मदिरया पिबेद्वा ॥

शशिलेखा

नागरादिक्वाथमामपाचनार्थं पिबेत्। तदित्यनेनानन्तरविधानप्राधान्यान्नागरादिः परामृश्यते। केवलं नागरमभयां वोऽष्णाम्बुना पिबेत्। तद्वत् ससैन्धवं वचादिवर्गम् ॥

वर्चस्यामे सप्रवाहे पिबेद्वा डाडिमाम्बुना ॥ ९ ॥

विडेन लवणं पिष्टं बिल्वचित्रकनागरम्।
सामे कफानिले कोष्ठरुक्करे कोष्णवारिणा ॥ १० ॥

कलिङ्गहिङ्ग्वतिविषावचासौवर्चलाभयाः।
छर्द्यनुग्रन्थिशूलेषु पेयामुष्णेन वारिणा ॥ ११ ॥

पथ्यासौवर्चलाजाजीचूर्णं मरिचसंयुतम्।

सर्वाङ्गसुन्दरी

वर्चसीत्यादि ॥ पुरीषे आमे तथा सप्रवाहे सति विडेनोपलक्षितं लवणं विडलवणं पिष्टं डाडिमाम्बुना वा पिबेत्। सामे वातकफे कोष्ठरुजाकरे बिल्वादीनि कोष्णवारिणा पिबेत्। छर्द्यादिषु कलिङ्गादिषट्कं कोष्णेन वारिणा पेयम्। शूलवानधोजठरवृद्धिरनुग्रन्थिः। पथ्यादिकं चूर्णं समरिचमुष्णजलेन पेयम्। पूर्वगुणम् ॥

शशिलेखा

वर्चसि पुरीषे आमे सप्रवाहे सविडलवणं पिष्टं बिल्वादिकं डाडिमाम्भसा पिबेत्। बिल्वं बिल्वमध्यम्। सामे कफानिले कोष्ठशूलकरे कलिङ्गादिकं कोष्णवारिणा पिबेत्। छर्द्यादिषु समरिचं पथ्यादिकमुष्णजलेन पेयम्। सुबोधम् ॥

पिप्पलीं नागरं पाठां शारिवां बृहतीद्वयम् ॥ १२ ॥

चित्रकं कौटजं बीजं क्षारं लवणपञ्चकम्।
चूर्णीकृतं दधिसुरातन्मण्डोष्णाम्बुकाञ्जिकैः ॥ १३ ॥

पिबेदग्निविवृद्ध्यर्थं कोष्ठवातहरं परम् ।
पटूनि पञ्च द्वौ क्षारौ मरिचं पञ्चकोलकम् ॥ १४ ॥

दीप्यकं हिङ्गु गुलिका बीजपूररसे कृता ।
कोलडाडिमतोये वा परं पाचनदीपनी ॥ १५ ॥

तालीसपत्रचविकामरिचानां पलं पलम् ।
कृष्णातन्मूलयोर्द्वे द्वे पले शुण्ठी पलत्रयम् ॥ १६ ॥

चातुर्जातमुशीरञ्च कर्षांशं श्लक्ष्णचूर्णितम् ।
गुडेन वटकान् कृत्वा त्रिगुणेन सदा भजेत् ॥ १७ ॥

मद्ययूषरसारिष्टमस्तुपेयापयोनुपः ।
वातश्लेष्मात्मनां छर्दिग्रहणीपार्श्वहृद्रुजाम् ॥ १८ ॥

ज्वरश्वयथुपाण्डुत्वगुल्मपानात्ययार्शसाम् ।
प्रसेकपीनसश्वासकासानाञ्च निवृत्तये ॥ १९ ॥

अभयां नागरस्थाने दद्यादत्रैव विड्ग्रहे ।
छर्द्यादिषु च पैत्तेषु चतुर्गुणसितान्विताः ॥ २० ॥

पक्वेन वटकाः कार्या गुडेन सितयाऽपि वा ।
परं हि वह्निसम्पर्काल्लघिमानं भजन्ति ते ॥ २१ ॥

अथैनं परिपक्वामं मारुतग्रहणीगदम् ।
दीपनीयौषधयुतं पाययेदल्पशो घृतम् ॥ २२ ॥

किञ्चित् सन्धुक्षिते त्वग्नौ सक्तविण्मूत्रमारुतम् ।
द्व्यहं त्र्यहं वा संस्नेह्य स्विन्नाभ्यक्तं निरूहयेत् ॥ २३ ॥

तत एरण्डतैलेन सर्पिषा तैल्वकेन वा ।
सक्षारेणानिले शान्ते स्रस्तदोषं विरेचयेत् ॥ २४ ॥

शुद्धरूक्षाशयं बद्धवर्चस्कं चानुवासयेत् ।
दीपनीयाम्लवातघ्नसिद्धतैलेन तं ततः ॥ २५ ॥

निरूढं च विरिक्तञ्च विधिना चानुवासितम् ।
लघ्वन्नप्रतिभुक्तञ्च सर्पिरभ्यासयेत् पुनः ॥ २६ ॥

सर्वाङ्गसुन्दरी

पिप्पलीमित्यादि ॥ पिप्पल्यादिकं सूक्ष्मरजः कृतं दध्यादिभिरग्निदीप्त्यर्थं पिबेत्। तयोर्दधिसुरयोर्मण्डस्तन्मण्डः। दधिमण्डेन सुरामण्डेन चोष्णाम्बुना काञ्जिकेन वा। कोष्ठवातहरञ्चैतत् सुष्ठु स्यात्। लवणपञ्चकादिभिर्गुळिका बीजपूररसे कृता कोलडाडिमतोये वा कृता अतिशयेन पाचनी दीपनी च स्यात्। तालीसपत्रमित्यादि—तालीसपत्रादीनां प्रत्येकं पलम्। पिप्पल्याः पले द्वे। पिप्पलीमूलस्य पले द्वे। शुण्ठी पलत्रयम्। चातुर्जातमुशीरञ्च पृथक् कर्षभागं श्लक्ष्णचूर्णितं गुडेन त्रिगुणेन वटकान् कृत्वा मद्यादीननु पिबेत् सदा भवेत्। किमर्थमित्याह--वातकफात्मकच्छर्द्यादीनां शान्त्यर्थम्। अत्र चैतेष्वेव वटकेषु विड्ग्रहे विड्विबन्धे सत्यभयां नागरस्थाने दद्यात्। छर्द्यादिषु च पूर्वोक्तेषु पित्तोद्भवेषु सत्सु गुडवर्ज्यं चतुर्गुणसितया युक्ता वटकाः कार्याः। वटकानां विधानमाह—पक्वेन गुडेन वटकाः कार्याः। सितया वा पक्वया कार्याः। किमिति पक्वेन क्रियन्त इत्याह—यस्मात् कारणादग्निसम्पर्कात्ते वटकाः परं लघुत्वं भजन्ति। लघोर्भावो लघिमा। पृथ्वादिभ्य इमनिच्। टेरिति टिलोपः। सामचिकित्सामुक्त्वा निरामचिकित्सां विशेषेणाह—अथेत्यादि। मारुतग्रहणीगदो विद्यते यस्येत्यर्श आदित्वादच्। परिपक्वामं एनं मारुतग्रहणीगदवन्तं दीपनीयौषधयुतं पञ्चकोलप्रायद्रव्यान्वितं वह्निसन्धुक्षणार्थमल्पशोऽल्पमात्रया घृतं पाययेत्। किञ्चित् सन्धुक्षिते मनाक् दीपिते त्वग्नौ सति सक्तविण्मूत्रपवनं नरं द्वे दिने त्रीणि वा संस्नेह्य स्नेहयित्वाऽनन्तरं स्विन्नाभ्यक्तं कृत्वा निरूहयेत्। ततो निरूहादनन्तरं मारुते शान्ते सत्येरण्डतैलेनाथवा,तैल्वकेन घृतेन सक्षारेण स्रस्तदोषं प्रच्युतपुरीषं विरेचयेत। शुद्धेत्यादि—शुद्धो रूक्षश्चाशयो यस्य स एवम्। तथा बद्धं वर्चः पुरीषं यस्य तम्। शुद्धरूक्षाशयमिति हेतौ प्रथमा। शुद्धरूक्षाशयत्वेन बद्धवर्चस्कमित्यर्थः। तथाविधं नरमनुवासयेत्। केन—दीपनीयानि नागरादीन्यम्लानि वृक्षाम्लडाडिममातुलुङ्गादीनि वातघ्नानि कुष्ठरास्नैरण्डादीनि तैर्दीपनीयाम्लवातघ्नैः सिद्धतैलेन। ततो निरूढञ्च विरिक्तञ्च विधिना चानुवासितं मात्रयेत्यर्थः। "सम्यक् चाप्यनुवासितम्" इति वा पाठः। लघ्वन्नप्रतिभुक्तञ्च पुनः सर्पिः शीलयेत्॥

शशिलेखा

अथ परिपक्वाममेनं मारुतग्रहणीरोगिणमग्निसन्धुक्षणार्थं दीपनीयैरौषधैर्युतं सर्पिरल्पशः पाययेत्। सन्धुक्षिते उद्दीपिते किञ्चिदनले स्नेहेनेत्यर्थः। तत इति निरूहस्य पश्चात्। सुबोधम्॥

पञ्चमूलाभयाव्योषपिप्पलीमूलसैन्धवैः।
रास्नाक्षारद्वयाजाजीविडङ्गशठिभिर्घृतम् ॥ २७ ॥

शुक्तेन मातुलुङ्गस्य स्वरसेनार्द्रकस्य च।
शुष्कमूलककोलाम्लचुक्रिकाडाडिमस्य च ॥ २८ ॥

तक्रमस्तुसुरामण्डसौवीरकतुषोदकैः।
काञ्जिकेन च तत्पक्वमग्निदीप्तिकरं परम् ॥ २९ ॥

शूलगुल्मोदरश्वासकासानिलकफापहम्।
सबीजपूरकरसं सिद्धं वा पाययेद्घृतम् ॥ ३० ॥

तैलमभ्यञ्जनार्थञ्च सिद्धमेभिश्चलापहम्।
एतेषामौषधानां वा पिबेच्चूर्णं सुखाम्बुना ॥ ३१ ॥

वाते श्लेष्मावृते सामे कफे वा वायुनोऽद्धते।

सर्वाङ्गसुन्दरी

पञ्चमूलेत्यादि ॥ पञ्चमूलादिभिः कल्कद्रव्यैः शुक्तादिभिर्द्रवद्रव्यैः सामान्यपरिभाषयेदं घृतं पचेत्। पञ्चमूलं महत् ग्राह्यं सुतरां वातघ्नत्वात्। एतत् घृतं परमग्निदीप्तिकरं शूलादिहरञ्च। बीजपूरकरसेन सह पञ्चमूलादिभिः सिद्धं वा घृतं पाययेत्। एभिः पञ्चमूलादिभिर्घृतौषधैः सिद्धं तैलञ्चाभ्यञ्जनार्थं हितम्। एतेषामौषधानां पञ्चमूलादीनां चूर्णमुष्णाम्बुना वा पिबेत्। कस्यामवस्थायामित्याह—वाते। किम्भूते—श्लेष्मणाऽवृते तथा सामे। कफे वा वातेनोऽद्धते सामे॥

शशिलेखा

पञ्चमूलादिकं स्नेहाचतुर्थांशम्। शौनकमतेन त्वष्टमांशम्। शुक्तादि द्रवं पृथक् स्नेहसमम्। "पृथक् स्नेहसमं विद्यात् पञ्चप्रभृति तु द्रवमिति"

सङ्ग्रहे। शुष्कमूलकस्य स्वरसः क्वाथः। सतुषवितुषयवकृते सौवीरकतुषोदके भवतः। काञ्चिकमारनालम्। अग्निघृताख्यमेतत्। सबीजपूरकरसमिति—पञ्चमूलादिकल्कशुक्तादिद्रवैः सिद्धं घृतं सबीजपूरकरसं वा पाययेत्। सङ्ग्रहे चोक्तम्—"अग्निघृतञ्च छर्दिविबन्धशूलश्वासकासिनः सबीजपूरकरसम्" इति। व्याख्या—"छर्द्यादिमतः सबीजपूरकरसमग्निघृतमवचारयेत्"इति। एभिरिति घृतपाकनिर्दिष्टैः पञ्चमूलाभयादिभिः सिद्धं तैलमभ्यङ्गेन वातापहम्। वाते श्लेष्मणाऽऽवृते तथा सामेऽथवा कफे वायुना उद्धते। अनेनानिलकफसंसर्ग उक्तः। तत्रैतेषां घृतपाकनिर्दिष्टानां पञ्चमूलाभयादीनां चूर्णमुष्णोदकेन पिबेद्वा इति वाते॥

अधुना पित्तग्रहणीदोषचिकित्सामाह—

अग्नेर्निर्वापकं पित्तं रेकेण वमनेन वा ॥ ३२ ॥
हृत्वा तिक्तलघुग्राहिदीपनैरविदाहिभिः।
अन्नैस्सन्धुक्षयेदग्निं चूर्णैः स्नेहैश्च तिक्तकैः ॥ ३३ ॥

सर्वाङ्गसुन्दरी

अग्नेरित्यादि॥ अग्निपित्तयोर्ग्रहण्याश्रयत्वात् द्रवत्वाच्च पित्तस्य यदग्नेर्निर्वापकं प्लावकं पित्तमूर्ध्वाधःप्रपन्नं तद्यथासन्नदेशं वमनेन विरेकेण च हृत्वाऽनन्तरं तमग्निमन्नैस्तिक्तलघुग्राहिदीपनैस्सन्धुक्षयेत्। किंभूतैः—अविदाहिभिः। न तु सामान्येन दीपनैः। न केवलमेवंविधैरन्नैरग्निं सन्धुक्षयेत्, यावच्चूर्णैः स्नेहैश्च सन्धुक्षयेत्। किंभूतैः—तिक्तकैस्तिक्तद्रव्यभूयिष्ठैः चूर्णैस्तिक्तद्रव्यसाधितैः स्नेहैश्च॥

शशिलेखा

अग्नेर्निर्वापकमित्यादि सुबोधम्। निर्वापकं शमनम्। तिक्तादिगुणैरन्नैरग्निं सन्धुक्षयेत् संसर्जनं कुर्यात्। तिक्तकचूर्णः स्नेहश्च वक्ष्यमाणः॥

चूर्णैरग्निं सन्धुक्षयेदित्युक्तम्। अतश्चूर्णान्याह—

पटोलनिम्बत्रायन्तीतिक्तातिक्तकपर्पटम्।
कुटजत्वक्फलं मूर्वा मधुशिग्रुफलं वचा ॥ ३४ ॥

दार्व्यग्निकृष्णकोशीरयवानीमुस्तचन्दनम् ।
सौराष्ट्रयतिविषाव्योषत्वगेलापत्रदारु च ॥ ३५ ॥
चूर्णितं मधुना लेह्यं पेयं मद्यैर्जलेन वा ।
हृत्पाण्डुग्रहणीरोगगुल्मशूलारुचिज्वरान् ॥ ३६ ॥
कामिलां सन्निपातञ्च मुखरोगांश्च नाशयेत् ।

सर्वाङ्गसुन्दरी

पटोलेत्यादि ॥ मधुशिग्रुः सौभञ्जनकविशेषः । तस्य फलं श्वेतमरिचाख्यम् । एतत् पटोलादिकं चूर्णितं मधुना लेह्यम् । अथवा मद्यैः पेयम्, जलेन वा । तच्च हृद्रोगादीन् नाशयेत् ॥

शशिलेखा

पटोलादीनां चूर्णं मधुना लेह्यमथवा मद्यैर्जलेन वोष्णेन पेयम् । त्रायन्ती त्रायमाणा । तिक्ता कटुकरोहिणी । तिक्तकं किराततिक्तम् । फलं कुटजफलम् । पत्रं गन्धपत्रम् । तच्चूर्णं हृद्रोगादिनुत् ॥

भूनिम्बकटुकामुस्तात्र्यूषणेन्द्रयवान् समान् ॥ ३७ ॥
द्वौ चित्रकाद्वत्सकत्वग्भागान् षोडश चूर्णयेत् ।
गुडशीताम्बुपीतं तद्ग्रहणीरोगगुल्मनुत् ॥ ३८ ॥
कामिलाज्वरपाण्डुत्वमेहारुच्यतिसारजित् ।

सर्वाङ्गसुन्दरी

भूनिम्बेत्यादि ॥ भूनिम्बादीन् सप्त समान्, चित्रकात् द्वौ भागौ कुटजत्वचः षोडशभागांश्चूर्णयेत् । तच्चूर्णं गुडयुक्तेन शीताम्बुना पीतं ग्रहणीरोगादिहरम् ॥

शशिलेखा

भूनिम्बादीनां परस्परसमानामेको भागो, द्वौ भागौ चित्रकस्य, वत्सकस्य त्वचो भागाः षोडशेति सर्वं मिश्रीकृत्यावचूर्णयेत् । ततः स्तोकं गुडमृदितेन शीतोदकेन पिबेत् । तत् ग्रहण्यादिजित् ॥

नागरातिविषामुस्तापाठाबिल्वं रसाञ्जनम् ॥ ३९ ॥
कुटजत्वक्फलं तिक्ता धातकी च कृतं रजः ।
क्षौद्रतण्डुलवारिभ्यां पैत्तिके ग्रहणीगदे ॥ ४० ॥
प्रवाहिकार्शोगुदरुग्रक्तोत्थानेषु चेष्यते ।

सर्वाङ्गसुन्दरी

नागरेत्यादि ॥ नागरादिद्रव्यं चूर्णितं क्षौद्रतण्डुलजलाभ्यां सह पैत्तिके ग्रहणीगद इष्यते । प्रवाहिकादिषु च ॥

शशिलेखा

नागरादिकृतं रजश्चूर्णं क्षौद्रतण्डुलाम्बुपीतं पैत्तिके ग्रहणीरोगे प्रवाहिकादिषु च हितम् ॥

चन्दनं पद्मकोशीरं पाठां मूर्वां कुटन्नटम् ॥ ४१ ॥
षड्ग्रन्थाशारिवाऽऽस्फोतासप्तपर्णाटरूषकान् ।
पटोलोदुम्बराश्वत्थवटप्लक्षकपीतनम् ॥ ४२ ॥
कटुकां रोहिणीं मुस्तां निम्बं च द्विपलांशकान् ।
द्रोणेऽपां साधयेत्तेन पचेत् सर्पिः पिचून्मितैः ॥ ४३ ॥
किराततिक्तेन्द्रयववीरामागधिकोत्पलैः ।
पित्तग्रहण्यां तत् पेयं कुष्ठोक्तं तिक्तकं च यत् ॥ ४४ ॥

सर्वाङ्गसुन्दरी

चन्दनमित्यादि ॥ चन्दनादिद्रव्यं प्रत्येकं द्विपलांशकमपां द्रोणे पचेत् । तेन क्वाथेन पिचुप्रमाणैश्च किराततिक्तादिभिः कल्कैः सर्पिः पचेत् । कुटन्नटः स्योनाकः । आस्फोता उत्पलशारिबा । गिरिकर्णिका वा । कपीतनो वानीरः । अत्र च सर्पिःप्रमाणं क्वाथापेक्षया द्वात्रिंशत् पलानि कल्प्यानि, न तु कल्कापेक्षया पञ्च पलानि । क्वाथादिद्रवद्रव्यस्य स्नेहपाके प्राधान्यात् । यतः क्वाथादिद्रवद्रव्यमन्तरेण स्नेहपाको नोपपद्यते, न तु तथा कल्कं विना । तस्मात् क्वाथस्य प्राधान्यात् क्वाथापेक्षयैव सर्पिः ग्राह्यम् । तदेतत् घृतं पित्तग्रहण्यां पेयम् ।

यच्च कुष्ठचिकित्सिते गदितं तिक्तकं घृतम्, तच्च पेयम्। चशब्दो महातिक्तकस्यापि ग्रहणार्थः। कटुका रोहिणी कटुरोहिणी। मुनिनाप्युक्तम्—"कटुकरोहिणीं मुस्तं निम्बं च द्विपलांशकान् द्रोणेऽपां साधयेत् पादशेषे प्रस्थं घृतात् पचेत्। किराततिक्तेन्द्रयववीरामागधिकोत्पलैः कल्कैरक्षसमैः पेयं तत् पित्तग्रहणीगदे" इति॥

शशिलेखा

चन्दनाद्यं घृतं सुबोधम्। अपां द्रोणं द्वादशपलाधिकानि पञ्चपलशतानि। तेन पादशिष्टेन क्वाथेन पिचूनिमितैः कर्षप्रमाणैः किराततिक्तादिभिः घृतं पचेत्। "कुटन्नटं प्लवं वन्यं वितुन्नं परिपेलव"मिति पित्ते॥

श्लेष्मग्रहणीचिकित्सार्थमाह—

ग्रहण्यां श्लेष्मदुष्टायां तीक्ष्णैः प्रच्छर्दने कृते।
कट्वम्ललवणक्षारैः क्रमादग्निं विवर्धयेत् ॥ ४५ ॥

पञ्चकोलाभयाधान्यपाठागन्धपलाशकैः।
[1]बीजपूरप्रगाढैश्च सिद्धैः पेयादि कल्पयेत् ॥ ४६ ॥

सर्वाङ्गसुन्दरी

ग्रहण्यामित्यादि॥ श्लेष्मदुष्टायां ग्रहण्यां तीक्ष्णैर्द्रव्यैः प्रच्छर्दने वमने कृते सति क्रमशः कट्वम्ललवणक्षारैरग्निं विवर्धयेत्। पञ्चकोलादिभिः सिद्धैः क्वथितैः पेयादिकं कल्पयेत्। गन्धपलाशं गन्धपत्रम्॥

शशिलेखा

कफदुष्टायां ग्रहण्यां तीक्ष्णैः पिप्पलीसिद्धार्थादियुतमदनफलादिभिः वमने कृते संसर्जने च कट्वादिगुणैरन्नपानौषधैः क्रमादग्निमुत्तेजयेत्। सुबोधम्॥

द्रोणं मधूकपुष्पाणां विळङ्गञ्च ततोऽर्धतः।
चित्रकस्य ततोऽर्धश्च तथा भल्लातकाढकम् ॥ ४७ ॥

---

1 बीजपूरप्रवाळैरिति वा पाठः।

गन्धपलाशं = ഘനിക്കുക്കില.

मञ्जिष्ठाऽष्टपलं चैतज्जलद्रोणत्रये पचेत् ।
द्रोणशेषं शृतं शीतं मध्वर्धाढकसंयुतम् ॥ ४८ ॥

एलाऽमृणालागुरुभिश्चन्दनेन च रूषिते ।
कुम्भे मासं स्थितं जातमासवं तं प्रयोजयेत् ॥ ४९ ॥

ग्रहणीं दीपयत्येष बृंहणः पित्तरक्तनुत् ।
शोषकुष्ठकिलासानां प्रमेहाणाञ्च नाशनः ॥ ५० ॥

मधूकपुष्पकुडुवं शृतमर्धक्षयीकृतम् ।
क्षौद्रपादयुतं शीतं पूर्ववत्सन्निधापयेत् ॥ ५१ ॥

तत् पिबन् ग्रहणीदोषान् जयेत्सर्वान् हितशनः ।
तद्वत् द्राक्षेक्षुखर्जूरस्वरसानासुतान् पिबेत् ॥ ५२ ॥

सर्वाङ्गसुन्दरी

द्रोणमित्यादि । मधूकपुष्पाणां द्रोणं ततो मधूकपुष्पेभ्योऽर्धेन विडङ्गं ततो विडङ्गाच्चित्रकस्यार्धं, भल्लातकस्य चाढकं, मञ्जिष्ठायाः पलान्यष्टौ एतत्सर्वं पानीयद्रोणत्रये पचेत् । एतच्च द्रोणशेषं शृतं शीतं मधुनेऽर्धाढकेन संयुक्तमेलादिभिः कुम्भे रूषिते लिप्ते मासं स्थितं तमेवंविधं जातमासवं प्रयोजयेत् । एष आसवो ग्रहणीं दीपयति । बृंहणो रक्तपित्तादिनाशनः । मधूकपुष्पाणां कुडुवं क्वथितमर्धक्षयीकृतमर्धावशेषं शीतं माक्षिकचतुर्भागयुतं पूर्ववत् पूर्वेण तुल्यमेलादिरूषिते भाण्डे मासं यावत्सन्निधापयेत् सम्यक् स्थापयेत् । मधूकपुष्पकुडुवमित्यादि योऽयं परिमाणनिर्देशः, स इह दिङ्मात्रप्रदर्शनपरः । अनया दिशाऽयं सन्धातव्यो बहुत्वेन न त्वेतावानेव । अन्यथा ह्यल्पसंभारसंभृतत्वादयमासवो न शोभनः स्यात् । अभ्यस्ते त्वासवारिष्टलेहादौ परिपूर्णत्वाद्यथानिर्दिष्टैव मात्रा यथोक्तगुणकलापं करोति । नतूनाधिकेति वेद्यम् । तदेतत् पिबन्नातुरो हितभोजी सन् सर्वान् ग्रहणीदोषान् जयति । तद्वदित्यादि—यथैष मधूकपुष्पक्वाथ आसुतस्तथैव द्राक्षादिस्वरसानासुतान् पिबेत् । यथा च मधूकपुष्पाणां क्वाथ आदिष्टो ग्रन्थकृता, तथैव द्राक्षादीनां स्वरसाभावे क्वाथो ग्राह्यस्तस्य दिक्प्रदर्शनपरत्वात् ॥

शशिलेखा

मधूकपुष्पाणां द्रोणं विळङ्गानामर्धद्रोणमाढकद्वयं चित्रकस्य भल्लातकस्य च प्रत्येकमाढकं मञ्जिष्ठाया द्वौ कुडवौ। शुष्कस्य यद्द्रोणादि, तद्विगुणमप्रसिद्धार्द्रप्रयोगस्य द्रव्यस्य। सुतं पूतं मधुद्विप्रस्थयुतमेलादिभी रूषितेऽन्तर्लिप्ते कुम्भे घृतभाविते मासस्थितमासवं जातं तं प्रयोजयेत्। अमृणाळमुशीरम्। मधूकपुष्पाणां कुडवं चत्वारि पलानि सामान्यपरिभाषया जलं दत्वा श्रपणेनार्धक्षयीकृतमर्धावशेषं शीतं सत् क्षौद्रस्य चतुर्थेन भागेन युतं पूर्ववत् सन्निधापयेत्। सुबोधम्। तद्वन्मधूकपुष्पक्काथवत् द्राक्षादिस्वरसैरप्यासवान् कृत्वा पिबेत्॥

हिङ्गुतिक्तावचामाद्रीपाठेन्द्रयवगोक्षुरम्।
पञ्चकोलञ्च कर्षांशं पलांशं पटुपञ्चकम् ॥ ५३ ॥

घृततैलद्विकुडवे दध्नः प्रस्थद्वये च तत्।
आपोथ्य क्वाथयेदग्नौ मृदावनुगते रसे ॥ ५४ ॥

अन्तर्धूमं ततो दग्ध्वा चूर्णीकृत्य घृताप्लुतम्।
पिबेत् पाणितलं तस्मिन् जीर्णे स्यान्मधुराशनः ॥ ५५ ॥

वातश्लेष्मामयान् सर्वान् हन्याद्विषगरांश्च सः।
भूनिम्बं रोहिणीं तिक्तां पटोलं निम्बपर्पटम् ॥ ५६ ॥

दग्ध्वा माहिषमूत्रेण पिबेदग्निविवर्धनम्।
द्वे हरिद्रे वचा कुष्ठं चित्रकः कटुरोहिणी ॥ ५७ ॥

मुस्ता च छागमूत्रेण सिद्धः क्षारोऽग्निवर्धनः[1]।
चतुःपलं सुधाकाण्डात्त्रिपलं लवणत्रयात् ॥ ५८ ॥

वार्ताककुडवं चार्कादष्टौ द्वे चित्रकात् पले।
दग्ध्वा रसेन वार्ताकात् गुळिका भोजनोत्तराः ॥ ५९ ॥

भुक्तमन्नं पचन्त्याशु कासश्वासार्शसां हिताः।
विषूचिकाप्रतिश्यायहृद्रोगशमनाश्च ताः ॥ ६० ॥

1 "दहेन्माहिषमूत्रेण क्षार एषोऽग्निवर्धन." इति चरके।

सर्वाङ्गसुन्दरी

हिङ्गुतिक्तेत्यादि ॥ हिङ्ग्वदि कर्षप्रमाणम्। लवणानि पञ्चपल-प्रमाणानि। तदेतद्घृततैलयोः कुडुबद्वये दधिप्रस्थद्वये चापोत्थ्य संक्षुद्य मन्दे वह्नौ क्वाथयेत्। रसे चानुगते प्रविष्टे सत्यनन्तरमन्तर्धूमं दग्ध्वा ततश्चूर्णीकृत्य कर्षमात्रं घृतालोडितं पिबेत्। तस्मिन् जीर्णे मधुरभोजी स्यात्। स च क्षारा वातकफरोगादीन् हन्ति। भूनिम्बादीनि माहिषमूत्रेण सह दग्ध्वा सर्पिषा पिबेत्। तच्च पीतं वह्निं वर्धयति। रोहिणी कटुरोहिणी। हरिद्राद्वयादेः छाग-मूत्रेण सिद्धः क्षारः अग्निवृद्धिकृत्। सुधास्तम्भाच्चत्वारि पलानि। लवणत्रयात् त्रीणि पलानि। पक्वशुष्कवार्ताककुडुबम्। अर्कादष्टौ पलानि। चित्रकपले द्वे। एतत्सर्वं दग्ध्वा ततो वार्ताकानां रसेन कृता गुळिका भुक्तमुपभुक्तमन्नं भोजनमाशु पचन्ति। कासादिभ्यो हिताः। विषूचिकादिघ्नाश्च स्मृताः ॥

शशिलेखा

हिङ्ग्वादिपञ्चकोलान्तं कार्षिकं लवणपञ्चकं पलांशं तत्सर्वमापोथ्य जर्जरी-कृत्य घृततैलद्विकुडुबे दधिप्रस्थद्वये च क्षिप्त्वा मन्देऽग्नौ क्वाथयेत्। सुबोधम्। तिक्ता कटुरोहिणी। माद्री अतिविषा। सुधाकाण्डाच्चत्वारि पलानि लवण-त्रयान्मिश्रीभूतात्त्रिपलम्। वार्ताकात् पक्ववार्ताकफलात् कुडुबम्। अर्ककाण्डादष्टौ पलानि। चित्रकाच्चित्रकमूलात् पलद्वयं च दग्ध्वा। अन्तर्धूममिति प्रकरणात्। वार्ताकाद्रसेन कृता गुळिका भोजनोत्तरा भोजनानन्तरं भक्षिताः। सुधा महावृक्षः ॥

मातुलुङ्गषडीरास्नाकटुत्रयहरीतकीः।
स्वर्जिकायावशूकाख्यौ क्षारौ पञ्चपटूनि च ॥ ६१ ॥

सुखाम्बुपीतं तच्चूर्णं बलवर्णाग्निवर्धनम्।
श्लैष्मिके ग्रहणीदोषे सवाते तैर्घृतं पचेत् ॥ ६२ ॥

धान्वन्तरं षट्पलं च भल्लातकघृतं तथा।
विडं काळोषलवणस्वर्जिकायावशूकजान् ॥ ६३ ॥

सप्तलां कण्टकारीं च चित्रकञ्चैकतो दहेत्।
सप्तकृत्वः स्रुतस्यास्य क्षारस्यार्धाढके पचेत् ॥ ६४ ॥

आढकं सर्पिषः पेयं तदग्निबलवृद्धये ।
निचये पञ्चकर्माणि युञ्ज्याच्चैतद्यथाबलम् ॥ ६५ ॥

सर्वाङ्गसुन्दरी

मातुलुङ्गषडीत्यादि ॥ मातुलुङ्गादिकं चूर्णमुष्णोदकेन पीतं बलादिवर्धनम् । श्लैष्मिके ग्रहणीदोषे वातान्विते तैर्मातुलुङ्गादिभिर्घृतं पचेत् । अथवा धान्वन्तरं घृतं प्रमेहचिकित्सिते "दशमूलषडी" त्यादिकं, षट्पलं राजयक्ष्मचिकित्सिते "पञ्चकोलयवक्षारे"त्यादिकं, भल्लातकघृतं गुल्मोक्तं "भल्लातकानां द्विपल"मित्यादिकम् । विडं विडलवणं, काळं काळलवणं; ऊषं क्षारलवणं, स्वर्जिकादींश्चैकस्मिन् कृत्वा दहेत् । सप्त वारान् स्रुतस्यास्य क्षारस्य क्षारजलस्यार्धाढके सर्पिष आढकं पचेत् । तत् घृतं अग्निबलवृद्धये पेयम् ॥ निचये सन्निपातजे ग्रहणीदोषे पञ्चकर्माणि वमनविरेचनास्थापनानुवासननस्यानि युञ्ज्यात् । यद्यपि शिरोविरेचनाख्यस्य कर्मणो बाहुल्येन ग्रहणीदोषे प्रयोजनं न तथा दृश्यते, यथा वमनादीनाम्, तथापि भूयस्त्वमुररीकृत्य पञ्चकर्माणीत्युक्तम् । चैतदिति यदेतत् ग्रहणीत्रये प्रतिदोषमाश्रित्योक्तं कर्म, तदपि निचयोत्थे ग्रहणीदोषे यथाबलं युञ्ज्यादित्यर्थः ॥

शशिलेखा

मातुलुङ्गषडीत्यादि सुबोधम् । धान्वन्तरं घृतं "दशमूलषडी"त्यादिना प्रमेहचिकित्सिते वक्ष्यते । षट्पलं राजयक्ष्मचिकित्सित उक्तम् । भल्लातकघृतं कफगुल्मे वक्ष्यते । निचये सन्निपाते पञ्चकर्माणि वमनविरेचनास्थापनानुवासननस्यानि । एतच्च पूर्वोक्तं वातादिग्रहणीदोषचिकित्सितं यथाबलमवस्थादिवशाद्युञ्ज्यात् ॥

इति ग्रहणीदोषस्य चतुर्विधस्य चिकित्सामभिधायेऽदानीं प्रतिपुरुषं प्रतिदोषमल्पाग्नित्वमाश्रित्य यथावस्थं चिकित्सितं निर्दिशन्नाह—

प्रसेके श्लैष्मिकेऽल्पाग्नेर्दीपनं रूक्षतिक्तकम् ।
योज्यं कृशस्य व्यत्यासात् स्निग्धरूक्षं कफोदये ॥ ६६ ॥

क्षीणक्षामशरीरस्य दीपनं स्नेहसंयुतम् ।
दीपनं बहुपित्तस्य तिक्तं मधुरकैर्युतम् ॥ ६७ ॥

स्नेहोऽम्ललवणैर्युक्तो बहुवातस्य शस्यते ।
स्नेहमेव परं विद्याद्दुर्बलानलदीपनम् ॥ ६८ ॥

नाऽलं स्नेहसमिद्धस्य शमायान्नं सुगुर्वपि ।

सर्वाङ्गसुन्दरी

प्रसेक इत्यादि ॥ प्रसेको द्विविधो वातिकः श्लैष्मिकश्च । तत्र मन्दाग्नेः श्लेष्मकोपजे प्रसेके दीपनं रूक्षतिक्तकं यद्द्रव्यं तद्योज्यम् । न घृतम् । नापि मधुराम्ललवणादिकम् । श्लेष्मजप्रसेकस्य च लक्षणम् —"श्लेष्मणोऽतिप्रसेकेन वायुः श्लेष्माणमस्यति" इत्यादिकम् । कृशस्य पुनर्मन्दाग्नेः कफोदये सति व्यत्यासात् पर्यायेण । व्यतिः कर्मव्यतिहारार्थः । व्यत्यासात् स्निग्ध-रूक्षं योज्यम् । स्निग्धं योजयित्वा रूक्षं योज्यम् । रूक्षं योजयित्वा स्निग्धं योज्यमित्यर्थः । यदि हि कृशे बहुकफे च नरे रूक्षमेव युञ्ज्यात्ततो रूक्षे केवले युज्यमाने कार्श्यस्य वृद्धिः स्यात् । अथ स्नेहमेव युञ्जीत । ततः स्नेहे केवले युज्यमाने कफवृद्धिः स्यादिति व्यत्यासेन स्निग्धरूक्षमुपन्यस्तम् । क्षीणक्षामशरीरस्य तु मन्दाग्नेः कफोदये दीपनं द्रव्यं पञ्चकोलादिकं स्नेहसंयुतं युञ्ज्यात् । बहुपित्तस्य मन्दाग्नेस्तिक्तमन्नपानौषधं मधुरकैर्द्रव्यैर्युतं दीपनं योज्यम् । बहुवातस्य मन्दाग्नेर्नरस्य स्नेहोऽम्ललवणैर्युक्तः प्रशस्यते । स्नेहस्य मन्दाग्निविषयेऽन्यद्रव्येभ्यः प्रायेण प्राधान्यं सर्वपुरुषाणां प्रतिपादयितुमिदं ब्रूते स्नेहमेवेत्यादि — एवेत्यव-धारणे । परं प्रधानं स्नेहमेव मन्दाग्नेर्विद्यान्न ततोऽन्यद्द्रव्यम् । तस्मान्म-न्दाग्नेर्दोषप्रतिपक्षैरौषधैर्युक्तः स्नेहो बाहुल्येन पथ्यः । अत एवेदं कारणं निर्दिशन्नाह — नालमित्यादि । यस्मात् स्नेहोद्दीपितस्याग्नेः सुष्ठु गुर्वप्यन्नं शमाय नालं न पर्याप्तं तस्मात् स्नेहमेव दुर्बलानलदीपनाय श्रेष्ठम् ॥

शशिलेखा

प्रसेक इत्यादि सुबोधम् । कृशस्य कफोद्रेके पर्यायेण स्निग्धरूक्षं योज्यम् । तिक्तं यत्किञ्चित् स्नेहेन समिद्धस्याग्नेः शमाय गुर्वप्यन्नं नालं पर्याप्तम् ॥

योऽल्पाग्नित्वात् कफे क्षीणे वर्चः पक्वमपि श्लथम् ॥ ६९ ॥

मुञ्चेत् पट्वौषधयुतं स पिबेदल्पशो घृतम् ।
तेन स्वमार्गमानीतः स्वकर्मणि नियोजितः ॥ ७० ॥

समानो दीपयत्यग्निमग्नेः सन्धुक्षको हि सः ।
पुरीषं यस्तु कृच्छ्रेण कठिनत्वाद्विमुञ्चति ॥ ७१ ॥
स घृतं लवणैर्युक्तं नरोऽन्नावग्रहं पिबेत् ।

सर्वाङ्गसुन्दरी

य इत्यादि ॥ यो नरोऽल्पाग्नित्वात् कफे क्षीणे सति पुरीषं पक्वमपि शिथिलं मुञ्चेत्, स नरोऽल्पमल्पं घृतं पिबेत् । किम्भूतम्—पट्वौषधयुतं सैन्धवशुण्ठीयुक्तम् । तेन सर्पिषा समानः स्वमार्गमानीय स्वकर्मण्यन्नपचनाख्ये नियोजितोऽग्निं दीपयति । यतोऽसौ समानोऽग्नेः सन्धुक्षकः । यस्तु पुरुषः पुरीषं कठिनत्वात् संहतत्वाद्धेतोः कृच्छ्रेण मुञ्चति स नरः लवणैः पञ्चभिर्युक्तं घृतं पिबेत् । किम्भूतम्—अन्नावग्रहमन्नेनावग्रहः सहसोऽर्ध्वकायगमनप्रतिबन्धोऽवष्टम्भो यस्य तदेवं घृतं पीत्वाऽन्नं भोक्तव्यमित्यर्थः ॥

शशिलेखा

योऽल्पाग्नित्वाद्धेतोः कफे क्षीणे वर्चः पुरीषं पक्वमप्यपक्वमिव श्लथं मुञ्चेत् अतिसार्यते स नरोऽल्पशोऽल्पमल्पं पट्वौषधयुतं घृतं पिबेत् । पट्वौषधशब्देन दीपनीयानामौषधानां ग्रहणम् । तेनाज्येन समानो नामानिलः स्वमार्गमानीय स्वकर्मण्यन्नग्रहणादौ नियोजितोऽग्निं दीपयति यस्मात् सोऽग्नेः सन्धुक्षकः । यो नरः कठिनत्वाद्धेतोश्चिरेण पुरीषं मुञ्चति सोऽन्नावग्रहं घृतं पिबेत् । अन्नमवग्रहः प्रतिबन्धो यस्य । अन्नात् पूर्वमित्यर्थः ॥

रौक्ष्यान्मन्देऽनले सर्पिस्तैलं वा दीपनैः पिबेत् ॥ ७२ ॥
क्षारचूर्णासवारिष्टान् मन्दे स्नेहातिपानतः ।
उदावर्तात्तु योक्तव्या निरूहस्नेहवस्तयः ॥ ७३ ॥
दोषाऽतिवृद्ध्या मन्देऽग्नौ संशुद्धोऽन्नविधिं चरेत् ।
व्याधिमुक्तस्य मन्देऽग्नौ सर्पिरेव तु दीपनम् ॥ ७४ ॥
अध्वोपवासक्षामत्वैर्यवाग्वा पाययेद्घृतम् ।
अन्नावपीडितं बल्यं दीपनं बृंहणं च तत् ॥ ७५ ॥

सर्वाङ्गसुन्दरी

रौक्ष्यादित्यादि ॥ रौक्ष्याद्धेतोर्मन्देऽग्नौ सति घृतं तैलं वा दोषसात्म्यादिवशाद्दीपनैस्सह पिबेत् । स्नेहातिपानान्मन्देऽग्नौ सति क्षारादीन्

पिबेत् । उदावर्तात् पुनर्मन्देऽग्नौ सति निरूहस्नेहवस्तयः प्रयोज्याः । दोषातिवृद्ध्या मन्देऽग्नौ सति संशुद्धो वमनविरेचनादिभिर्हृतदोषोऽन्नविधिं चरेत् । पेयादिक्रममाचरेदित्यर्थः । व्याधिमुक्तस्य मन्देऽग्नौ सति सर्पिरेव दीपनं स्यान्नान्यद्द्रव्यम् । अध्वोपवासक्षामत्वैर्मन्देऽग्नौ सति यवाग्वा सह घृतं पाययेत् । वैद्य इति शेषः । किम्भूतमन्नेनावपीडितं मध्येभक्तं घृतमित्यर्थः । एवं पीतं बल्यं दीपनं बृंहणं च तत् भवति ॥

शशिलेखा

रौक्ष्यादित्यादि । सुबोधम् । सर्पिस्तैलं वा दोषादिवशात् । उदावर्तात्तु मन्देऽग्नौ निरूहाः स्नेहा वस्तयश्च योज्याः । अन्नविधिः पेयादिक्रमः । सर्पिरेवेति केवलस्य निरौषधस्य सर्पिषः प्रयोगप्रदर्शनम् । अध्वादिभिर्मन्दे यवाग्वा घृतं पाययेत् । तच्चान्नेन तत्कालोपयुक्तेनावपीडितं सत् बल्यत्वादिगुणं भवति ॥

दीर्घकालप्रसङ्गात्तु क्षामक्षीणकृशान्नरान् ।
प्रसहानां रसैः साम्लैर्भोजयेत् पिशिताशिनाम् ॥ ७६ ॥

लघूष्णकटुशोधित्वात् दीपयन्त्याशु तेऽनलम् ।
मांसोपचितमांसत्वात् परं च बलवर्धनाः ॥ ७७ ॥

स्नेहासवसुरारिष्टचूर्णक्वाथहिताशनैः ।
सम्यक्प्रयुक्तैर्देहस्य बलमग्नेश्च वर्धते ॥ ७८ ॥

दीप्तो यथैव स्थास्नुश्च बाह्योऽग्निः सारदारुभिः ।
सस्नेहैर्जायते तद्वदाहारैः कोष्ठगोऽनलः ॥ ७९ ॥

सर्वाङ्गसुन्दरी

दीर्घकाल इत्यादि ॥ दीर्घकालप्रसङ्गात दीर्घकालव्याधिप्रसङ्गात्तु मन्देऽग्नौ सत्यसम्यगाहाररसपरिणत्या हेतुभूतया क्षामक्षीणकृशान् नरान् पिशिताशिनां प्रसहानां रसैः साम्लैर्भोजयेत् । कस्मात्तेन तान् भोजयेदित्याह— लघूष्णेत्यादि । लघुत्वादुष्णत्वात् कटुपाकत्वाच्छोधित्वाच्च ते रसाः शीघ्रमग्निं दीपयन्ति । भावप्रधाननिर्देशः पूर्ववच्चात्र योज्यः । ननु प्रागभ्यधायि "गुरूष्णस्निग्धमधुरा वर्गाश्चातो यथोत्तरम्" इति । इह च प्रसहानां लघुत्वमुच्यते ।

तदिमे वचसी परस्परं व्याहन्येते। अत्र ब्रूमः। लाघवशब्दोऽत्र क्रियाविशेषार्थः। धावनप्लवनलङ्घनादिका या चेष्टा तस्याः पाटवविशेषो लाघवम्। यथा च प्रागध्यगीष्ट—"लाघवं कर्मसामर्थ्यम्" इति। एवञ्चात्राविरोधः। एवं हेतुनिर्देशादन्येऽप्येवंप्राया ये मांसरसास्तानप्येतान् भोजयेदिति। ते च प्रसहा मांसोपचितमांसत्वाद्धेतोः परं बलं वर्धयन्ति। स्नेहादिभिः सम्यक्प्रयुक्तैः शरीरस्याग्नेश्च बलं वर्धते। तस्मात् स्नेहादयो यथावस्थं प्रयोज्या इति भावः। अधुना स्नेहस्याग्निवृद्धिकरत्वं दृष्टान्तेन दर्शयति—दीप्त इत्यादि। यथा येन प्रकारेण सारदारुभिः शमीखदिरादिभिः सस्नेहैर्बाह्योऽग्निर्दीप्तस्तीव्रः स्थास्नुः स्थिरश्च जायते, तथैव कोष्ठगोऽग्निः सस्नेहैः पथ्यरूपैराहारैः पटुतरः स्थिरश्च जायते सम्पद्यते॥

शशिलेखा

दीर्घकालप्रसङ्गात् बहुकालं व्याध्यन्तरस्य प्रसक्तत्वान्मन्देऽग्नौ तत एव क्षामत्वादियुक्तान् नरान् पिशिताशिनो ये प्रसहास्तेषां रसैर्भोजयेत्। ते पिशिताशिनः प्रसहा लघुत्वादिभिर्गुणैराश्वनलं दीपयन्ति। तेषां प्रसहानां यन्मांसं तदन्येन मांसेन यत उपचितं भवत्यतस्ते परं बलवर्धनाः। स्नेहादयः पथ्या अपि ग्रहणीदोषे मात्रादिविशेषवशात् असम्यक् प्रयुक्ता रोगायैव भवन्तीति प्रदर्शनार्थमाह—यथा बाह्योऽग्निः सारदारुभिर्दीपनशीलः स्थिरश्च जायते,तद्वदान्तरोऽग्निः सस्नेहैराहारैः जायते॥

नाभोजनेन कायाग्निर्दीप्यते नातिभोजनात्।
यथा निरिन्धनो वह्निरल्पो वाऽतीन्धनावृतः ॥ ८० ॥

सर्वाङ्गसुन्दरी

नाभोजनेनेत्यादि॥ नाभोजनेन कायाग्निर्दीप्यते न चातिभोजनात्। अत्रैव दृष्टान्तमाह—यथा बाह्योऽग्निर्निरिन्धनो न दीप्यते नश्यति। अल्पोऽग्निर्बाह्योऽतीन्धनेन बहुभिर्दारुभिरावृतो नश्यति न दीप्यते। एवं कोष्ठाग्निरप्यभोजनातिभोजनाभ्यां नश्यति न दीप्यत इत्यर्थः॥

शशिलेखा

तस्य चाहारयोगस्य समयोग एव साधुरिति प्रदर्शनार्थमाह—नाभोजनेनेत्यादि। यथा बाह्यो वह्निरिन्धनेन विना न दीप्यते, तथा कायाग्निरभोजनेन,

अल्पश्च वह्निर्बहुनेन्धनेनावृतो यथा न दीप्यते, तथा कायाग्निरप्यतिभोजनात् ॥

यदा क्षीणे कफे पित्तं स्वे स्थाने पवनानुगम् ।
प्रवृद्धं वर्धयत्यग्निं तदाऽसौ सानिलोऽनलः ॥ ८१ ॥

पक्त्वान्नमाशु धातूंश्च सर्वानोजश्च संक्षिपन् ।
मारयेत् स्यात् स ना स्वस्थो भुक्ते जीर्णे तु ताम्यति ॥ ८२ ॥

तृड्दाहमोहमूर्छाद्या व्याधयोऽत्यग्निसम्भवाः ।

सर्वाङ्गसुन्दरी

यदेत्यादि ॥ यस्मिन् काले कफे क्षीणे क्षयं याते अत एव स्वे स्थान आमाशयाख्ये पित्तं प्रवृद्धम् । किम्भूतम्—पवनानुगम् । मारुतेन धमनस्वभावेन पश्चाद्युक्तम् अत एव तत्पित्तमग्निं वर्धयति । तदा तस्मिन् कालेऽसावनलो जाठराग्निः सानिलः पवनसहितोऽन्नं पक्त्वाऽनन्तरं पक्तव्याभावात् सर्वान् धातून् पक्त्वाऽशु पुरुषं मारयेत् । किं कुर्वन्—ओजश्च संक्षिपन् संहरन् विनाशयन्नित्यर्थः । ननु पित्तानिलयोर्द्वयोः प्रकृतत्वात्सपित्तानिलोऽनल इति वक्तुं युक्तं स्यात् । मैवम् । "पित्तं वह्निर्वह्निजं वा" इति कृत्वा तदानीं जठराग्निना सहैकतां प्राप्तं पित्तमिति सानिलोऽनल इति निर्दिष्टम् । सोऽत्यग्निपीडितो ना पुरुषोऽन्ने भुक्ते स्वस्थः स्यात् । जीर्णे तु ताम्यत्युपतप्यते । अनेकार्थत्वाद्धातूनामुपतापार्थस्ताम्यतिः । तमकलक्षणेऽपि प्रागध्यगीष्ट । "प्रताम्येत्तस्य वेगेन निष्ठ्यूतान्ते क्षणं सुखी" इति । अथाऽस्योपद्रवान् वक्ति । तृष्णादयो रोगा अत्यग्नेः संभवन्ति ॥

शशिलेखा

"ये चोक्ता विषमाद्यास्त्रयोऽग्नयः तेपि स्युर्ग्रहणीदोषाः" इति निदानस्थान उक्तम् । तत्र विषमस्य मन्दस्य च वातश्लेष्मचिकित्सयैव प्रायेण प्रतीकारः प्रदर्शितः । तीक्ष्णस्य त्वग्नेः प्रस्तुतस्य व्याधिवैलक्षण्यात् महारोगत्वाच्च पृथगेव यदेत्यादिना कारणं चिकित्सितं चोच्यते । स्वकारणात् कफक्षये सति यदा स्वे स्थाने पित्तं वातानुगं वृद्धं भवति तदा तदग्निं वर्धयति । वृद्धे चाऽग्नौ स वायुरग्निरन्नं पक्त्वा रसादींश्च धातून् पक्त्वा क्रमेण चौजः संक्षिपन्

स्तोकत्वं नयन् मारयेदपि। अतः स तीक्ष्णाग्निर्ना पुरुषः भुक्ते भोजने कृते स्वस्थः स्यात्। जीर्णे त्वन्ने ताम्यति। तेन चाग्निना तृडादयः सम्भवन्ति॥

तमत्यग्निं गुरुस्निग्धमन्दसान्द्रहिमस्थिरैः ॥ ८३ ॥

अन्नपानैर्नयेच्छान्तिं दीप्तमग्निमिवाम्बुभिः ।
मुहुर्मुहुरजीर्णेऽपि भोज्यान्यस्योपहारयेत् ॥ ८४ ॥

निरिन्धनोऽन्तरं लब्ध्वा यथैनं न विपादयेत् ।

सर्वाङ्गसुन्दरी

तमित्यादि ॥ तमत्यग्निं भस्मकाख्यं गुरुस्निग्धादिभिरन्नपानैः शान्तिं नयेत्। कमिव—दीप्तमिद्धमग्निं बाह्यं यथा जलैः। मुहुर्मुहुः क्षणे क्षणे अजीर्णेऽपि भोज्यानि कृसरादीनि वक्ष्यमाणान्युपहारयेदाहारार्थं प्रकल्पयेत्। अजीर्णेऽपीत्यपिशब्दात् किमुत जीर्णे भोज्यान्युपहारयेदिति। किमित्येवं क्रियत इत्याह—निरिन्धन इत्यादि। यथा येन प्रकारेणाजीर्णेऽपि पुनः पुनराहारोपयोगेन निरिन्धनोऽग्निरन्तरमवकाशं लब्ध्वा एनं पुरुषं न विपादयेत्॥

शशिलेखा

तञ्चात्यग्निं गुर्वाद्यैरन्नपानैः शान्तिं नयेत्। दीप्तमग्निमिवाम्बुभिः। सुबोधम्। अस्येति। तीक्ष्णाग्नेः अन्यथाऽग्निर्निरिन्धनः सन् अन्तरं हृदयं प्राप्तः कदाचिद्व्यापादयेत्। एनमिति पुरुषम्॥

कानि भोज्यानीत्याह—

कृसरां पायसं स्निग्धं पैष्टिकं गुडवैकृतम् ॥ ८५ ॥

अश्नीयादौदकानूपपिशितानि भृतानि च ।
मत्स्यान् विशेषतः श्लक्ष्णान् स्थिरतोयचरांश्च ये ॥ ८६ ॥

आविकं सुभृतं मांसमद्यादत्यग्निवारणम् ।

सर्वाङ्गसुन्दरी

कृसरामित्यादि॥ कृसरादीनि भुञ्जीत। गुडवैकृतमिति। विकृतमेव वैकृतम्। प्रज्ञादित्वादण्। तथौदकानामप्चरादीनां कच्छपादीनां पिशितानि।

तथाऽनूपानि । वराहादीनाञ्च भृतानि मेदुराणि पिशितानि । विशेषेण मत्स्यान् श्लक्ष्णानपरुषान् । चशब्दार्थे च स्थिरतोयचरा अवहज्जलाश्रितास्तानप्यश्नीयात् । आविकं मांसं सुभृतमतीव मेदुरमत्यग्निवारणमद्यात् ॥

शशिलेखा

कृसरादिकं वाश्नीयात् । सुबोधम् । भृतानि गृहे पुष्टानि । सर्वान् मत्स्यानश्नीयात् । स्थिरे जले ये चरन्ति मत्स्यास्तान् विशेषतोऽश्नीयात् । सुभृतं गृहे पुष्टम् ॥

पयः सहमधूच्छिष्टं घृतं वा तृषितः पिबेत् ॥ ८७ ॥

गोधूमचूर्णं पयसा बहुसर्पिःपरिप्लुतम् ।
आनूपरसयुक्तान्वा स्नेहांस्तैलविवर्जितान् ॥ ८८ ॥

श्यामात्रिवृद्विपक्वं वा पयो दद्याद्विरेचनम् ।
असकृत् पित्तहरणं पायसप्रतिभोजनम् ॥ ८९ ॥

सर्वाङ्गसुन्दरी

पय इत्यादि ॥ तथा तृषितः सन् पयः पिबेत् । किम्भूतम्—सहमधूच्छिष्टं समदनम् । सर्पिर्वा एवम्भूतं पिबेत् । गोधूमचूर्णं बहुघृतं क्षीरेणालोळितं पिबेत् । अथवाऽनूपमांसरसान्वितान् स्नेहान् पिबेत् । किंभूतान्—तैलविवर्जितान् । तैलस्य पित्तकृत्वान्निषेधः । अथवा श्यामात्रिवृद्भ्यां विपक्वं क्षीरं विरेचनं दद्यात् । तथा पुनः पुनः पित्तस्य हरणं पायसस्य प्रतिभोजनं हितम् ॥

शशिलेखा

तृषितश्च सन् मधूच्छिष्टेन सह पयः पिबेत् । अथवा घृतम् । बहुसर्पिर्गोधूमचूर्णं पयसाऽप्लुतं पिबेत् । अथवा तैलवर्जितानां स्नेहानामानूपमांसरससंयुक्तमन्यतमं पिबेत् । श्यामाख्यात्रिवृत्सिद्धं क्षीरं विरेचनं दद्यात् । तच्च विरेचनमसकृत् पित्तहरणार्थम् । कृते च विरेचने पयसा ओदनं प्रतिभोजनं हितम् ॥

अधुना संक्षेपेण चिकित्सामाह—

यत्किञ्चिद्गुरु मेद्यं च श्लेष्मकारि च भोजनम् ।
सर्वं तदत्यग्निहितं भुक्त्वा च स्वपनं दिवा ॥ ९० ॥

आहारमग्निः पचति दोषानाहारवर्जितः ।
धातून् क्षीणेषु दोषेषु जीवितं धातुसंक्षये ॥ ९१ ॥

सर्वाङ्गसुन्दरी

यत्किञ्चिदित्यादि ॥ यद्गुरु भोजनं मेदस्करं श्लेष्मकरञ्च तदत्यग्नये हितम् । भुक्त्वा च यद्दिवा स्वप्नं तच्च हितम् । ननु किमिति गुर्वादिभोजनमत्यग्नये दीयत इत्याह—आहारमित्यादि । अग्निः पूर्वमाहारं पचति । आहाररहितस्त्वग्निर्दोषान् पचति । तदभावे धातून् पचति । धातुसंक्षये सति जीवितं पचति विनाशयतीत्यर्थः ॥

शशिलेखा

यदित्यादि ॥ सुबोधम् । अस्य चात्यग्नेरनन्तरोक्तमतियत्नेन प्रतीकारं कुर्यात् । यतस्तीक्ष्णोऽग्निराहारमित्यादिना क्रमेण धातुदाहाज्जीवितमपि नाशयति । अतो यत्नेन शीघ्रमेव चिकित्सेत् ॥

एतत्प्रकृत्यैव विरुद्धमन्नं संयोगसंस्कारवशेन चेदम् ।
इत्याद्यविज्ञाय यथेष्टचेष्टाश्चरन्ति यत्साऽग्निबलस्य शक्तिः ॥ ९२ ॥

तस्मादग्निं पालयेत्सर्वयत्नै-
स्तस्मिन् नष्टे याति ना नाशमेव ।
दोषैर्ग्रस्ते ग्रस्यते रोगसङ्घै-
र्युक्ते तु स्यान्नीरुजो दीर्घजीवी ॥ ९३ ॥

सर्वाङ्गसुन्दरी

एतदित्यादि ॥ एतदन्नं प्रकृत्या स्वभावेनैव विरुद्धमपथ्यम् । यथा मन्दकदधिसर्षपशाकफाणितशुष्कमांसविरूढकाममूलकलिकुचादिकम् । संयोगविरुद्धं यथा—क्षीरमम्लेन सहाऽनूपमामिषं माषैः सहेत्यादि । संस्कार-

विरुद्धं यथा—हारीतमांसं हारिद्रशूलकप्रोतपाचितं हारिद्रवह्निनेत्यादि। एवमिदं प्रकृत्या विरुद्धं संयोगस्य संस्कारस्य च वशेन सामर्थ्येन चेदं विरुद्धम्। आदि-ग्रहणान्मात्राकालादिपरिग्रहः। तत्र मात्राविरुद्धं यथा—मधुघृतञ्च समांशम्। कालवशेनेदं यथा—रात्रिमुषिता काकमाची। पात्रवशेनेदं यथा—कांस्ये दशाहमुषितं सर्पिः। इत्याद्यविज्ञायाबुध्वा अपर्यालोच्य यथेष्टचेष्टा यथाभिलाष-माहारमासेवमाना यच्चरन्ति, साऽग्निबलस्य शक्तिः सामर्थ्यम्। यत एवं तस्मादग्निं पालयेत्सर्वयत्नैरखिलक्रियानुष्ठानैः। तस्मिन्नग्नौ नष्टे क्षीणे ना पुरुषो नाशं याति। एवकारान्नाशमेव याति, न त्ववस्थान्तरमिति गमयति। दोषैर्ग्रस्ते वह्नौ ना पुरुषो रोगसङ्घैर्ग्रस्यते पीड्यते। युक्ते स्वस्थे पुनरग्नौ नीरुजो दीर्घजीवी च भवेदिति वाक्यशेषः। उपजातिशालिन्यौ वृत्ते॥

शशिलेखा

एतदित्यादि॥ सुबोधम्। प्रकृतिः स्वभावो द्रव्यस्वरूपम्। संयोगः अनेकस्यसाहित्यम्। संस्कारस्तस्यैव च द्रव्यस्य जलाग्निसन्निकर्षशौचमन्थनदेश-कालभावनाभाजनादिभिर्विशेषाप्तिः। आदिशब्देन मात्रादेशकालोपयोग-व्यवस्थापरिग्रहः। अन्नेनाविचारितगुरुलाघवेन कुक्षेर्भागद्वयपूरणं गुरूणां द्रव्याणा-मर्धतृप्तिर्लघूनां नातितृप्तता चेति द्विविधोप्याहारराशिर्मात्राशब्दवाच्यः। देशो द्रव्योत्पत्तिस्थानम्। कालस्त्वन्नपानोपयोग्य ऋतुव्याध्यपेक्षत्वेन जीर्णाजीर्णलक्षणेन च। उपयोगव्यवस्था "स्नातः क्षुद्वान्" इत्यादिना सूत्रोक्ता॥

इति दशमोऽध्यायः॥

एकादशोऽध्यायः ।

ग्रहणीदोषचिकित्सितादनन्तरं मूत्राघातचिकित्सितमारभ्यते । संबन्धश्चात्र एकसंबन्धित्वात् । तथा च प्रागध्यगीष्ट "वस्तिवस्तिशिरोमेढ्रकटीवृषणपायवः । एकसंबन्धनाः प्रोक्ता गुदास्थिविवराश्रयाः ॥" इति । तेनेदमाह ॥

अथाऽतो मूत्राघातचिकित्सितं नामाध्यायं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ॥

कृच्छ्रे वातघ्नतैलाक्तमधोनाभेः समीरजे ।
सुस्निग्धैः स्वेदयेदङ्गं पिण्डसेकावगाहनैः ॥ १ ॥

दशमूलबलैरण्डयवाभीरुपुनर्नवैः ।
कुलत्थकोलपत्तूरवृश्चीवोपलभेदकैः ॥ २ ॥

तैलसर्पिर्वराहर्क्षवसाः क्वथितकल्कितैः ।
सपञ्चलवणाः सिद्धाः पीताः शूलहराः परम् ॥ ३ ॥

द्रव्याण्येतानि पानान्ने तथा पिण्डोपनाहने ।
सहतैलफलैर्युञ्ज्यात्साम्लानि स्नेहवन्ति च ॥ ४ ॥

सौवर्चलाढ्यां मदिरां पिबेन्मूत्ररुजापहाम् ।

सर्वाङ्गसुन्दरी

कृच्छ्र इत्यादि ॥ कृच्छ्रे मूत्रकृच्छ्रे । आदिपदलोपं कृत्वैवं निर्दिष्टम् । यथा मांसरसे रस इति । मूत्रकृच्छ्रे वातोत्थे नाभेरधोऽङ्गं शरीरं वातघ्नतैलेन बलातैलादिनाऽभ्यक्तं स्वेदैः पिण्डादिभिः सुष्ठु स्निग्धैर्न रूक्षैः स्वेदयेत् । दशमूलादिभिः क्वथितकल्कितैः क्वाथं सम्पाद्य तैरेव कल्कं सम्पाद्य तैलसर्पिर्वराहर्क्षवसाः सिद्धाः पक्वाः सहपञ्चलवणैर्वर्तन्त इति सपञ्चलवणाः पीताः परं सुष्ठु शूलहराः । एतानि दशमूलादीनि द्रव्याणि पानान्ने तद्विषये तथा पिण्डोपनाहाख्ये स्वेदद्वये तैलफलैः सह युञ्ज्यात् । तैलार्थानि फलानि नाळिकेरा

क्षोळादीनि तैलफलानि तैः सह। केचित्तु तैलफलानि तिलानाहुः। किंभूतानि—साम्लानि सहाम्लैस्तक्रारनाळादिभिर्वर्तन्त इति साम्लानि। तथा स्नेहवन्ति बहुस्नेहानि। भूम्नि मतुप्। तथा मदिरां बहुसौवर्चलां मूत्ररुजापहां पिबेत्॥

शशिलेखा

वातजे मूत्रकृच्छ्रे वातहरद्रव्यसिद्धेन तैलेनाभ्यक्तगात्रस्य नाभेरधः सर्वमङ्गं शरीरं वातहरद्रव्यकृतैरेव सुस्निग्धैः पिण्डादिभिः स्वेदयेत्। दशमूलादीनां क्वाथेन तैलाच्चतुर्गुणेन सर्पिरादिना च मिश्रीभूतेन तैलसमेन दशमूलादीन्येव च गर्भे कल्कपरिभाषया युक्त्या च लवणपञ्चकं दत्वा साधितं तैलादिकं पीतं परमतिशयेन शूलहरम्। अभीरुः शतावरी। उपलभेदकः पाषाणभेदकः। एतान्येव दशमूलादीन्यौषधानि साम्लानि स्नेहवन्ति च तैलफलैः सह पानादौ युञ्ज्यात्। येभ्यस्तैलमुत्पद्यते तानि तैलफलानि। अम्लादीनि डाडिमादीनि। सौवर्चलेनाढ्यां प्रभूतसौवर्चलां मदिरां प्रसन्नां पिबेत्। सा च मूत्ररुजापहा॥

पैत्ते युञ्जीत शिशिरं सेकलेपावगाहनम् ॥ ५ ॥

पिबेद्वरीं गोक्षुरकं विदारीं सकसेरुकाम्।
तृणाख्यं पञ्चमूलं च पाक्यं समधुशर्करम् ॥ ६ ॥

वृषकं[1] त्रपुसोर्वारुलट्वाबीजानि कुङ्कुमम्।
द्राक्षाम्भोभिः पिबेत्सर्वान्सूत्राघातानपोहति ॥ ७ ॥

उर्वारुबीजयष्ट्याह्वदार्वीर्वा तण्डुलाम्बुना।
तोयेन कल्कं द्राक्षायाः पिबेत्पर्युषितेन वा ॥ ८ ॥

सर्वाङ्गसुन्दरी

पैत्त इत्यादि॥ पैत्ते पित्तजे मूत्रकृच्छ्रे शीतळं सेकलेपावगाहनं युञ्जीत। तथा शतावर्यादिकं पाक्यं कृत्वा समधुशर्करं पिबेत्। वृषकादिकं कल्कीकृत्य द्राक्षाजलेन पिबेत्। सर्वान्मूत्राघातानपाकरोति। अपोहतीत्युपसर्गादस्यत्यू-

---

1 वृषकं=കല്ലൂർവഞ്ചി, त्रपुसं=തവക്ക", उर्वारु=വെള്ളരിക്ക, लट्वा=ചപ്പങ്ങം.

होर्वा वचनमिति परस्मैपदम्। वृषकः पाषाणभेदकः। लट्वाबीजं कुसुम्भबीजम्। उर्वारुबीजादिकं वा तण्डुलाम्भसा पिबेत्। पूर्वगुणम्। पर्युषितेन वा जलेन द्राक्षाकल्कं पिबेत्॥

शशिलेखा

पित्तजे कृच्छ्रे शीतं सेकादिकं युञ्जीत। वर्यादितृणपञ्चमूलान्तं निष्क्वाथ्य पाक्यं समाक्षिकं सशर्करं पिबेत्। कशेरुकं प्रसिद्धं मध्यदेशे। वृषकादिकल्को द्राक्षारसेन सर्वमूत्राघातघ्नः। त्रपुसादीनां त्रयाणां बीजम्। उर्वारुः कर्कटिका। उर्वारुबीजादीनि तण्डुलाम्बुना। द्राक्षाकल्कं पर्युषितोदकेन। पर्युषितं यत् क्वथितं सद्रात्रिस्थितम्॥

कफजे वमनं स्वेदं तीक्ष्णोष्णकटुभोजनम्।
यवानां विकृतीः क्षारं कालशेयं च शीलयेत् ॥ ९ ॥

पिबेन्मद्येन सूक्ष्मैलां धात्रीफलरसेन वा।
सारसास्थिश्वदंष्ट्रैलाव्योषं वा मधुमूत्रवत् ॥ १० ॥

स्वरसं कण्टकार्या वा पाययेन्माक्षिकान्वितम्।
[1]शीतिवारकबीजं वा तक्रेण श्लक्ष्णचूर्णितम् ॥ ११ ॥

धवसप्ताह्वकुटजं गुडूचीचतुरङ्गुलम्।
कटुकैलाकरञ्जं च पाक्यं समधुसाधितम् ॥ १२ ॥

तैर्वा पेयां प्रवालं वा चूर्णितं तण्डुलाम्बुना।
सतैलं पाटलीक्षारं सप्तकृत्वोऽथवा स्रुतम् ॥ १३ ॥

पाटलीयावशूकाभ्यां पारिभद्रात् तिलादपि।
क्षारोदकेन मदिरां त्वगेलोपकसंयुताम् ॥ १४ ॥

पिबेद्गुडोपदंशान्वा लिह्यादेतान् पृथक् पृथक्।

---

1 शीतिवारकं=വേലിപ്പരുത്തി, कालशेयं=മോര്, सप्ताह्वं=ഏഴിലംപാല, चतुरङ्गुलं=കണിക്കൊന്ന, पाटली=പാതിരി. पारिभद्रं=മുരിക്ക്, सारसं=കുളക്കോഴി.

सर्वाङ्गसुन्दरी

कफज इत्यादि ॥ कफजे मूत्रकृच्छ्रे वमनादीन् शीलयेत्। तथा मद्येन सूक्ष्मैलां पिबेत्। आमलकरसेन वा। सारसास्थ्यादीनि मधुयुतानि गोमूत्रेण पिबेत्। अथवा कण्टकार्याः स्वरसं समाक्षिकं पाययेत्। वैद्य इति शेषः। शीतिवारकस्य बीजं सूक्ष्मचूर्णीकृतं तक्रेण सह पाययेत्। धवादिकं पाक्यं समाक्षिकं पाययेत्। तैर्धवादिभिः साधितां पेयां पाययेद्वा। प्रवाळं विद्रुमं रजीकृतं तण्डुलाम्बुना पाययेद्वा। अथवा पाटल्याः क्षारं सप्तवारान् स्रुतं तैलेन पाययेत्। पाटलीयवक्षाराभ्यां क्षारोदकेन तथा पारिभद्रात् क्षारोदकेन तिलादपि क्षारोदकेन मदिरां त्वगेलोषकसंयुतां पिबेत्। ऊषकः कल्लरः। गुडोपदंशान्वेति। अथवा गुडमुपदंश्य एतान् पाटल्यादीन् पृथक् पृथक् लिह्यात्॥

शशिलेखा

कफजे मूत्राघाते वमनस्वेदादिकं शीलयेत्। यवानां विकृतिरन्नादिः। काळशेयं तक्रम्। सूक्ष्मैलां मद्येनामलकरसेन वा। सारसास्थ्यादिकं वा मधुमूत्रयुतं पिबेत्। सारसास्थि सरसिभवप्राणिनामस्थि। कण्टकार्याः स्वरसं वा समाक्षिकम्। श्लक्ष्मचूर्णितं शीतिवारकस्य बीजं तक्रेण पाययेद्वा। शीतिवारकं कुरूटकम्। धवादिसाधितं पाक्यं क्राथः समाक्षिक उपयोज्यः। सप्ताह्वः सप्तच्छदः। चतुरङ्गुलः आरग्वधः। अथवा तैर्धवादिभिः सिद्धां पेयां समाक्षिकां पाययेत्। प्रवाळं विद्रुमम्। पाटल्या भस्मना बहुकृत्वः स्रुतमुदकं नातिघनाच्छं तैलयुक्तं हितम्। पाटल्यादिक्षारोदकेन संस्कृतां त्वगादिचूर्णयुतां सुरां पिबेत्। पाटल्यादिक्षारान् गुडोपदंशान्वा पृथक् पृथक् लिह्यात्। उपदंशो यमुपदंश्यान्नं भुज्यते॥

सन्निपातात्मके सर्वं यथावस्थमिदं हितम् ॥ १५ ॥

अश्मन्यप्यचिरोत्थाने वातबस्त्यादिकेषु च।
अश्मरी दारुणो व्याधिरन्तकप्रतिमो मतः ॥ १६ ॥

तरुणो भेषजैस्साध्यः प्रवृद्धश्छेदमर्हति।
तस्य पूर्वेषु रूपेषु स्नेहादिक्रम इष्यते ॥ १७ ॥

सर्वाङ्गसुन्दरी

सन्निपातेत्यादि ॥ सन्निपातात्मके मूत्रकृच्छ्रे सर्वमिदं पूर्वोक्तं पृथग्दोषात्मकमूत्रकृच्छ्रनिर्दिष्टं यथावस्थमवस्थामपेक्ष्य हितम्। न केवलं सन्निपातात्मके मूत्रकृच्छ्रे, अपि त्वश्मन्यश्मर्यामप्यचिरोत्थाने अचिरकालमुत्थानं जन्म यस्य तस्मिन् हितम्। वातबस्त्यादिकेषु मूत्राघातेषु च हितम्। आदिशब्देन वातकुण्डलिकादयो गृह्यन्ते। अश्मरी दारुणो व्याधिरन्तकप्रतिमः तत्तुल्यो मतः। शीघ्रप्राणहरत्वात्। स चाश्मरी तरुणः अचिरोत्पन्नः औषधैः साध्यः साधयितुं शक्यः। प्रवृद्धः सः पुनः छेदनं, पाटनं शस्त्रेणार्हति। तस्याश्मर्याख्यस्य व्याधेः प्राग्रूपेषु स्नेहादिक्रम इष्यते। आदिशब्दात् स्वेदवमनादीनां ग्रहणम् ॥

शशिलेखा

सन्निपातात्मके मूत्राघाते इदमनन्तरोक्तं सर्वमवस्थानतिक्रमेण हितम्। अश्मन्यप्यचिरोत्थाने अश्मर्यामपि नवोत्थितायां वातबस्त्यादिकेषु च निदानस्थानप्रदर्शितेष्वभिनवोत्थितेष्विदमनन्तरोक्तं चिकित्सितं दोषानतिक्रमेण हितम्। सुबोधम् ॥

अथादौ स्नेहमाह—

[1]पाषाणभेदो वसुको वसिरोऽश्मन्तको वरी।
कपोतवङ्काऽतिबला भल्लूकोऽशीरकच्छुराः ॥ १८ ॥

वृक्षादनी शाकफलं व्याघ्र्यौ गुन्द्रस्त्रिकण्टकम्।
यवाः कुलत्थाः कोलानि वरुणः कतकात् फलम् ॥ १९ ॥

ऊषकादिप्रतीवापमेषां क्वाथे शृतं घृतम्।
भिनत्ति वातसंभूतां तत्पीतं शीघ्रमश्मरीम् ॥ २० ॥

सर्वाङ्गसुन्दरी

पाषाणभेद इत्यादि ॥ पाषाणभेदादीनां क्वाथे घृतं शृतमूषकादिगणोक्तद्रव्यप्रतीवापं तत्कल्कं सत् पीतं द्राग्वातजामश्मरीं भिनत्ति। वसुकः

1 वसुकः=താർതാവൽ, വെള്ളെരിക്കാ എന്നും. अश्मन्तकः=മഴമ്പി ലാവം. भल्लूकः=പലകപ്പയ്യാനി. वृक्षादनी=ഇത്തിക്കണ്ണി.

ईश्वरमल्लिका। वसिरं सामुद्रलवणम्। अश्मन्तकः मालुकपर्णः। कपोतपङ्का सुवर्चला। भल्लूकः स्योनाकः। व्याघ्र्यौ बृहत्यौ॥

शशिलेखा

पाषाणभेदादीनां क्वाथेनोषकादिगणगर्भेण च विपक्वं घृतम्। वसुको बुकः काश्मीरेषु मसूरः। वसिरः पार्वतेयः। अश्मन्तकः इन्द्रकः। स एव मालुकपर्णः। वरी शतावरी। कपोतपङ्का ब्रह्मसुवर्चला। "भल्लूकः सलको फल्गुवृन्ताको जंबुको नतः"। कच्छूरं तुनिकं रङ्गद्रव्यम्। शाकवृक्षस्य फलानि। व्याघ्र्यौ बृहतीद्वयम्। गुन्धुस्तृणविशेषः। त्रिकण्टकं गोक्षुरकम्॥

गन्धर्वहस्तबृहतीव्याघ्रीगोक्षुरकेक्षुरात्।
[1]मूलकल्कं पिबेद्दध्ना मधुरेणाश्मभेदनम् ॥ २१ ॥

सर्वाङ्गसुन्दरी

गन्धर्वहस्तेत्यादि॥ गन्धर्वहस्तादीनां समाहारद्वन्द्वः। अनित्यमागमशासनमिति नुम्नकृतम्। एरण्डूणादीनां द्रव्याणां यन्मूलं तत् कल्कीकृत्य मधुरेण दध्ना पिबेदश्मभेदनम्। अत्र प्रकृतत्वात् वाताश्मरीभेदनं गम्यते॥

शशिलेखा

गन्धर्वहस्तादीनां मूलकल्कं मधुरेण दध्ना पिबेत्। गन्धर्वहस्तः एरण्डः। बृहती सिंही। सैव कण्टकारिका। व्याघ्री निदग्धिका। इक्षुरः इक्षुविशेषः॥

[2]कुशः काशः शरो गुन्धुः इत्कटो मोरटोऽश्मभित्।
दर्भो विदारी वाराही शालीमूलं त्रिकण्डका ॥ २२ ॥

भल्लूकः पाटली पाठा पत्तूरः सकुरूटकः।
पुनर्नवा शिरीषश्च तेषां क्वाथे पचेद्घृतम् ॥ २३ ॥

---

1 "अमधुरेण" इति सङ्ग्रहे। "सिंहीव्याघ्री गोक्षुरकोरुबूकमूलकल्कोऽमधुरेण दध्ना पीतः सप्ताहादश्मरीं भिनत्ति।"

2 गुन्धुः = പോട്ടപ്പുല്ല്. इत्कटः = ഓഴിഞ്ഞാൽ (ഇഞ്ഞ)
पत्तूरः = മീനങ്ങാണി. कुरूटकः = വേലിപ്പരത്തി.
मोरटः = പെരുങ്കുരുമ്പ.

पिष्टेन त्रपुसादीनां बीजेनेन्दीवरस्य च।
मधुकेन शिलाजेन तत् पित्ताश्मरिभेदनम् ॥ २४ ॥

सर्वाङ्गसुन्दरी

कुश इत्यादि ॥ कुशकाशादीनां क्वाथे त्रपुसादीनां पूर्वोक्तानां त्रपुसोर्वारुलट्वानां बीजेन नीलोत्पलबीजेन मधुकेन च पिष्टेन शिलाजतुना च घृतं पचेत्। तत् पित्ताश्मरिभेदनं भवति। शोधनादिगणसंग्रहोक्तास्तु त्रपुसादयोऽत्र न गृह्यन्ते, तदन्तःपातिनां पित्तविरोधिनां सर्षपादीनां द्रव्याणां तत्र पाठात् ॥

शशिलेखा

कुशादीनां क्वाथे पिष्टेन पूर्वोक्तत्रपुसोर्वारुलट्वानामिन्दीवरस्य च बीजेन मधुकशिलाजतुभ्याञ्च घृतं पचेत्। तत् पीतं पित्ताश्मरिभेदनम्। गुन्धुः गुन्द्रा गुन्छपुष्पिका नाम। इत्कटः शरविशेषः प्रसिद्धः। वाराही गृष्टिः। विष्वक्सेना कारा। 'वाराही गृष्टिकावारा' इति च। पत्तूरः मत्स्याक्षकः। 'मत्स्याक्षकस्तु पत्तूरः पत्तुकः प्रिय इत्यपि' इति। कुरूटकः शीतिवारकः।

वरणादिः समीरघ्नो गणावेलाहरेणुकौ।
गुग्गुलुर्मरिचं कुष्ठं चित्रकः सुरसाह्वयः ॥ २५ ॥

तैः कल्कितैः कृतावापमूषकादिगणेन च।
भिनत्ति कफजामाशु साधितं घृतमश्मरीम् ॥ २६ ॥

क्षारक्षीरयवाग्वादिद्रव्यैः स्वैः स्वैश्च कल्पयेत्।

सर्वाङ्गसुन्दरी

वरणादिरित्यादि ॥ वरणसैर्यकेत्यादिर्वरणादिर्गणः। समीरघ्नो गणो भद्रदार्वादिः। तैर्वरणादिभिर्द्रव्यैः कल्कीकृतैस्तथोषकादिगणेन 'ऊषकस्तुत्थकम्' इत्यादिना च कृतावापं कृत्वा घृतं साधितमाशु कफजामश्मरीं हन्ति। क्षारादि च स्वैः स्वैस्तद्योग्यैः पाषाणभेदादिभिर्द्रव्यैः कल्पयेत् ॥ *

---

* कफाश्मरीचिकित्सितेनैव शुक्राश्मरीचिकित्सितमुक्तमिति मन्तव्यम्, तुल्यगुणत्वात् कफशुक्रयोरिति डल्हणाचार्यः।

शशिलेखा

वरणादिभद्रदार्वादिगणयोरेलाहरेण्वादीनां च कल्केन ऊषकादिगणेन च कृतावापं साधितं घृतं कफजामश्मरीमाशु भिनत्ति। सुरसाह्वयो मूर्वा। कदरश्च। स्वैरिति। वाताश्मर्यां पाषाणभेदादिभिः षट् क्षारक्षीरयवागुकषायान्नपानानि कल्पयेत्। पित्ताश्मर्यां कुशादिभिः, कफाश्मर्यां वरणादिगणादिभिः क्षारादीन् कल्पयेदित्यर्थः॥

इदानीं शर्करापातनाय शमनाय वा योगोपदेश इति च।

[1]पिचुकाङ्कोल्लकतकशाकेन्दीवरजैः फलैः ॥ २७ ॥

पीतमुष्णाम्बु सगुडं शर्करापातनं परम्।
क्रौञ्चोष्ट्ररासभास्थीनि श्वदंष्ट्रा तालपत्रिका ॥ २८ ॥

अजमोदा कदम्बस्य मूलं विल्वस्य चौषधम्।
पीतानि शर्करां भिन्द्युः सुरयोष्णोदकेन वा ॥ २९ ॥

नृत्यत्कोरण्डबीजानां चूर्णं माक्षिकसंयुतम्।
अविक्षीरेण सप्ताहं पीतमश्मरिपातनम् ॥ ३० ॥

क्वाथश्च शिग्रुमूलोत्थः कदुष्णोऽश्मरिपातनः।
तिलापामार्गकदलीपलाशयवसम्भवः ॥ ३१ ॥

क्षारः पेयोऽविमूत्रेण शर्करास्वश्मरीषु च।
कपोतवङ्कामूलं वा पिबेदेकं सुरादिभिः ॥ ३२ ॥

तत्सिद्धं वा पिबेत् क्षीरं वेदनाभिरुपद्रुतः।
हरीतक्यस्थिसिद्धं वा साधितं वा पुनर्नवैः ॥ ३३ ॥

क्षीरान्नभुग्बर्हिशिखामूलं वा तण्डुलाम्बुना।
मूत्राघातेषु विभजेदतः शेषेष्वपि क्रियाम् ॥ ३४ ॥

---

1 पिचुकः=വേലിപ്പരത്തി. कतकः=തേററാമ്പരൽ. शाकः=തേക്ക്. इन्दीवरम्=കരിംകൂവളം. तालपत्रिका = നിലപ്പന नृत्यत्कोरण्डः = ചുര, कपोतपङ्का = അടക്കാമണിയൻ.

सर्वाङ्गसुन्दरी

पिचुक इत्यादि ॥ पिचुकादिभिरुष्णाम्बु सगुडं पीतं शर्करायाः परं पातनम्। पिचुकः शीतिवारकः। कौञ्चास्थ्यादीनि पीतानि सुरयोष्णजलेन वा शर्करां हन्युः। तुम्बबीजानां चूर्णं माक्षिकान्वितमविक्षीरेण सप्ताहं पीतमश्मरिपातनम्। अत्राऽश्मरीशब्दस्य "ङ्यापोः संज्ञाछन्दसोः इति ह्रस्वः संज्ञात्वाद्युक्तः। सौभञ्जन-कमूलक्वाथश्च कोष्णः पीतोऽश्मरिपातनः। तिलादिसम्भवः क्षारोऽविमूत्रेण शर्कराम्वश्मरीषु च विषये पेयः। कपोतपङ्काया मूलं केवलं सुरोष्णजलादिभिः पिबेत्। तया कपोतपङ्कया सिद्धं शृतं वा क्षीरं वेदनोपद्रुतः पिबेत्। हरीत-क्यस्थिभिः सिद्धं वा क्षीरमथवा पुनर्नवपक्वं क्षीरं पिबेत्। मयूरशिखामूलं तण्डुलाम्भसा पिबेत्। किंभूतः—क्षीरान्नाशी सन्। अतोऽस्माच्चिकित्सिता-द्यथायथं शेषेष्वपि मूत्राघातेषु मूत्रातीतादिषु क्रियां विभजेन्निरूप्य कुर्यात् ॥

शशिलेखा

पिचुकादिजैः फलैरुष्णाम्बुक्वाथ इत्यर्थः। तत् गुडमिश्रं पीतं शर्करायाः परं पातनम्। पिचुकः श्रीहस्तिनी। कुरूटक इति च। "अङ्कोटोऽङ्को-लको रेची निर्दिष्टो दीर्घकीलकः।" कतकशाकौ वृक्षविशेषौ। सर्वेषां फलानि। कौञ्चास्थ्यादीनि चूर्णितानि सुरयोऽष्णोदकेन वा पीतानि शर्कराम्भिन्द्युः। रासभो गर्दभः। श्वदंष्ट्रा गोक्षुरकः। तालपत्रिका मिश्रेयः। विश्वस्य भेषजं नागरम्। "मधूलिका गुडतृणो नृत्यकुण्डो मलिश्चकः"। तस्य बीजानां चूर्णमविक्षीरेण सप्ताहं पीतमश्मरिपातनम्। नृत्यकुण्डकबीजानामिति वा पाठः। सुबोधम्। अवेर्मेषस्य मूत्रेण तिलादीनां क्षारः शर्करास्वश्मरीषु च पेयः। कपोतपङ्कामूलमेकं सुरादिभिर्वा पिबेत्। तत्सिद्धं कपोतपङ्कामूलसिद्धं क्षीरमश्मरीवेदनार्तः पिबेत्। अभयास्थिभिः सिद्धं वा क्षीरं पुनर्नवैर्वा सिद्धम्। सुबोधम्। अतोऽस्माच्चिकित्सितात शेषेषु मूत्राघातेष्वपि वातवस्त्यादिषु दोषादिसमन्वयेन संयोगविभागैरनन्तरोक्तामेव चिकित्सां विकल्पयेत् ॥

बृहत्यादिगणे सिद्धं द्विगुणीकृतगोक्षुरे।
तोयं पयो वा सर्पिर्वा सर्वमूत्रविकारजित् ॥ ३५ ॥

देवदारुं घनं मूर्वां यष्टीमधु हरीतकीम्।
मूत्राघातेषु सर्वेषु सुराक्षीरजलैः पिबेत् ॥ ३६ ॥

रसं वा धन्वयाषस्य कषायं ककुभस्य वा ।
सुखाम्भसा वा त्रिफलां पिष्टां सैन्धवसंयुताम् ॥ ३७ ॥

व्याघ्रीगोक्षुरकक्काथे यवागूं वा सफाणिताम् ।
क्काथे वीरतरादेर्वा ताम्रचूडरसेऽपि वा ॥ ३८ ॥

अद्याद्वीरतराद्येन भावितं वा शिलाजतु ।
मद्यं वा निगदं पीत्वा रथेनाश्वेन वा व्रजेत् ॥ ३९ ॥

शीघ्रवेगेन संक्षोभात्तथाऽस्य च्यवतेऽश्मरी
सर्वथा चोपयोक्तव्यो वर्गो वीरतरादिकः ॥ ४० ॥

रेकार्थं तैल्वकं सर्पिर्वस्तिकर्म च शीलयेत् ।
विशेषादुत्तरान् वस्तीन् शुक्राश्मर्यां च शोधिते ॥ ४१ ॥

तैर्मूत्रमार्गे बलवान् शुक्राशयविशुद्धये ।
पुमान् सुतृप्तो वृष्याणां मांसानां कुक्कुटस्य च ॥ ४२ ॥

कामं सकामाः सेवेत प्रमदा मददायिनीः ।

सर्वाङ्गसुन्दरी

बृहत्यादिगण इत्यादि ॥ बृहत्यादिगणे द्विगुणीकृतगोक्षुरे पक्वं जलं वा क्षीरं वा सर्पिर्वा सर्वान् मूत्रविकारान् जयति । ह्रस्वं पञ्चमूलं बृहत्यादिगणः । देवदार्वादीन् सुरादीनामन्यतमेन सर्वेषु मूत्राघ तेषु पिबेत् । धन्वयाषस्य रसं वा ककुभस्य क्काथं वा त्रिफलामुष्णोदकेन पिष्टां सैन्धवान्वितां वा पिबेत् । कण्टकारिकागोक्षुरकक्काथसिद्धां यवागूं वा सफाणितां पिबेत् । वीरतरादेः क्काथे वा सिद्धां पेयां पिबेत् । अथवा ताम्रचूडस्य कुक्कुटस्य रसे सिद्धां पेयां पिबेत् । शिलाजतु वा वीरतराद्येन गणेन भावितमद्यात् । अथवा पुराणं मद्यं पीत्वा रथेन अश्वेन वा शीघ्रवेगेन गच्छेत् । तथा तेन प्रकारेण संक्षोभादस्यातुरस्याऽश्मरी च्यवते । सर्वथा सर्वेण च प्रकारेण क्काथपेयाजलादिषु वीरतरादिरुपयोज्यः । विरेचनार्थं तैल्वकं "शम्याकेने"त्यादिना साधितं सर्पिरुपयोक्तव्यम् । तथा वस्तिकर्म "प्राक्स्नेह एक" इत्यादि शीलयेत् । विशेषेणोत्तरवस्तीनभ्यसेत् । शुक्राश्मर्याञ्च तैरुत्तरवस्तिभिर्मूत्रमार्गे शोधिते सति बलवान् पुमान् वृष्याणां द्रव्याणां कुक्कुटस्य मांसानाञ्च सुहितस्सन् यथेच्छं साकामा

मददायिनीः प्रमदाः सेवेत शुक्राशयविशुद्धये। कुक्कुटस्य वृष्यत्वेनैव ग्रहणे लब्धे पृथग्ग्रहणमतिशयेन कुक्कुटस्य पथ्यत्वमिति ज्ञापनार्थम् ॥

शशिलेखा

अस्मिन् ग्रन्थे आचार्येण तोयं पयो घृतमपि ह्रस्वपञ्चमूलेन द्विगुणगोक्षुरकेण साध्यमिति प्रदर्शितम्। सङ्ग्रहे तु तोयपयसोरेव पक्षे घृतमिश्रयोः प्रयोगः प्रदर्शितः ॥ देवदार्वादिकल्कं सुराद्यन्यतमेन पिबेत्। जलमुष्णजलम्। धन्वयासस्य दुरालभायाः स्वरसं वा ककुभस्य कषायं वा पिष्टां सैन्धवसंयुतां त्रिफलामुष्णाम्बुना वा पिबेत्। कण्टकारिकागोक्षुरकक्वाथे सिद्धां सक्षुद्रगुडां यवागूं वीरतरादेः क्वाथे सिद्धामथवा ताम्रचूडस्य रसेन सिद्धां यवागूं पिबेत्। सुबोधम्। निगदं निर्दोषं मद्यं पीत्वा शीघ्रवेगेन रथेन वाजिना वा यायात्। तथा सङ्क्षोभादस्याश्मरी च्यवते। सर्वेषु च मूत्राघातेषु वीरतरादिको वर्गः सर्वथा क्वाथादिनान्नादिषु च प्रयोज्यः। तैल्वकं घृतं वातव्याधौ वक्ष्यते। एवं सर्वास्वश्मरीषु सामान्येनोक्त्वा शुक्राश्मर्यां विशेषेणाह। वृष्याणां मांसानां कुक्कुटस्य कुक्कुटमांसस्य च सुतृप्तः। षष्ठी तृप्त्यपेक्षया। प्रमदाः स्त्रियः सेवेत ॥

सिद्धैरुपक्रमैरेभिर्न चेच्छान्तिस्तदा भिषक् ॥ ४३ ॥

इति राजानमापृच्छ्य शस्त्रं साध्ववचारयेत्।
अक्रियायां ध्रुवो मृत्युः क्रियायां संशयो भवेत् ॥ ४४ ॥

निश्चितस्यापि वैद्यस्य बहुशः सिद्धकर्मणः।

सर्वाङ्गसुन्दरी

सिद्धैरित्यादि ॥ एभिः पूर्वोक्तैरुपक्रमैः सिद्धैरश्मरीहरैर्यदि शमो न स्यात् ततो भिषक् इति वक्ष्यमाणप्रकारेण राजानमापृच्छ्य अश्मर्याहरणार्थं शस्त्रं साध्ववचारयेत्। किमापृच्छ्येत्याह—अक्रियायामित्यादि। हे नृपते जातव्याधावक्रियायां चिकित्सां विना ध्रुवोऽवश्यं मृत्युः स्यात्। अपरं च क्रियायां चिकित्सायां क्रियमाणायां निश्चितस्याऽपि शास्त्रार्थविदोऽपि वैद्यस्य तथा बहुशोऽनेकशः सिद्धकर्मणः निष्पन्नक्रियाक्रमस्याऽपि संशयो भवेत्। कदाचिज्जीवति वा न वा। एवंप्रकारेण राजानमापृच्छ्य ॥

शशिलेखा

एभिरनन्तरोक्तैरुपक्रमैः सिद्धैर्निस्संशयं स्वकार्यसम्पादनैर्न चेच्छान्तिरश्मर्या भवति ततो भिषक् राजानं देशनायकम् इत्यापृच्छ्य श्रावयित्वा साधु कृत्वा शस्त्रमवचारयेत्। अक्रियायां शस्त्रस्यानवचारणे ध्रुवोऽवश्यंभावी मृत्युः। क्रियायां पुनर्निश्चितस्यापि विषयप्रवृत्तस्यापि अनेकशश्चाश्मनि सुसिद्धकर्मणो वैद्यस्यापि संशयो भवेदतो वरं क्रिया। नत्वक्रिया। अथवा अक्रिया दुष्क्रिया॥

अथातुरमुपस्निग्धशुद्धमीषच्च कर्शितम् ॥ ४५ ॥

अभ्यक्तस्विन्नवपुषमभुक्तं कृतमङ्गलम्।
आजानुफलकस्थस्य नरस्याङ्के व्यपाश्रितम् ॥ ४६ ॥

पूर्वेण कायेनोत्तानं निषण्णं वस्त्रचुम्बळे।
ततोऽस्याऽकुञ्चिते जानुकूर्परे वाससा दृढम् ॥ ४७ ॥

सहाश्रयमनुष्येण बद्धस्याऽश्वासितस्य च।
नाभेः समन्तादभ्यज्यादधस्तस्याश्च वामतः ॥ ४८ ॥

मृदित्वा मुष्टिना क्रामेद्यावदश्मर्यधोगता।
तैलाक्ते वर्धितनखे तर्जनीमध्यमे ततः ॥ ४९ ॥

अदक्षिणे गुदेऽङ्गुल्यौ प्रणिधायाऽनुसेवनीम्।
आसाद्य वलयन्द्वाभ्यामश्मरीं गुदमेढ्रयोः ॥ ५० ॥

कृत्वान्तरे तथा बस्तिं निर्वलीकमनायतम्।
उत्पीडयेदङ्गुलिभ्यां यावद्ग्रन्थिरिवोन्नतम् ॥ ५१ ॥

शल्यं स्यात्सेवनीं मुक्त्वा यवमात्रेण पाटयेत्।
अश्ममानेन न यथा भिद्यते सा तथा हरेत् ॥ ५२ ॥

समग्रं सर्पवक्त्रेण; स्त्रीणां बस्तिस्तु पार्श्वगः।
गर्भाशयाश्रयस्तासां शस्त्रमुत्सङ्गवत्ततः ॥ ५३ ॥

न्यसेदतोऽन्यथा ह्यासां मूत्रस्रावी व्रणो भवेत्।
मूत्रप्रसेकक्षरणान्नरस्याप्यपि चैकधा ॥ ५४ ॥

बस्तिभेदोऽश्मरीहेतुः सिद्धिं याति न तु द्विधा।

सर्वाङ्गसुन्दरी

अथेत्यादि ॥ अथ राजप्रश्नानन्तरम् आतुरमुपस्निग्धादिरूपं कृत्वा ततोऽस्य नाभेरधोऽभ्यञ्ज्यात्। पूर्वमुपस्निग्धः पश्चाच्छुद्धस्तमुपस्निग्धशुद्धम्। तथा मनाक् कर्शितम्। तथाऽभ्यक्तस्विन्नशरीरं च। तथा अभुक्तमकृताहारम्। तथा कृतमङ्गलं विहितस्वस्त्ययनम्। तथा नरस्यान्यस्याङ्के व्यपाश्रितम्। किंभूतस्य—आजानुफलकस्थस्य। फलकः आसनविशेषः। आजानुः जानुप्रमाणो यः फलकस्तस्मिन् स्थितस्य। तथा पूर्वेण कायेनोत्तानम्। तथा वस्त्रचुम्बळे निषण्णम्। चुम्बळस्तृणमयो घटादीनां चलनरक्षणार्थमाधारविशेषो यः क्रियते, स उच्यते। तथारूपो वस्त्रमयश्चुम्बळः वस्त्रं वेष्टयित्वा कृत आसनविशेषस्तस्मिन्नुपविष्टम्। ततोऽनन्तरमस्याकुञ्चिते ईषत्कुटिलीकृते जानुकूर्परे सति। जानुनी च कूर्परे च जानुकूर्परं तस्मिन्। तथा आश्रयमनुष्येण सह वाससा दृढं कृत्वा बद्धस्य यन्त्रितस्य। आश्रीयत इत्याश्रयः आश्रयश्चासौ मनुष्यश्च तेन। कस्याश्रयः। प्रकृतत्वादातुरस्य। तमाश्रित्याऽतुरस्य स्थितत्वात्। एवं यन्त्रितस्य तथाऽश्वासितस्य निरामयो भवसीत्येवंप्रायाभिर्वाग्भिः शीतपवनादिभिश्च सान्त्वितस्य ततो नाभेः अधः समन्तात् परितोऽभ्यञ्ज्यात्। तस्याश्च नाभेरधो वामतो वामपार्श्वे मृदित्वा मुष्टिना क्रामेत् पीडयेत् तावद्यावदश्मर्यधोगताऽधःप्रतिपन्ना। ततोऽनन्तरमदक्षिणे वामे तर्जनीमध्यमाङ्गुल्यौ वर्धितनखे कृत्तनखे तथा तैलाभ्यक्ते कृत्वा गुदे प्रणिधायाऽनुसीवनीमनन्तरं बलयत्नाभ्यां द्वाभ्यामप्यश्मरीमासाद्य प्राप्य गुदमेढ्रयोरन्तरे मध्ये कृत्वा तत्र नीत्वा तथा वस्तिं निर्वलीकं त्वक्सङ्कोचरहितं तथाऽनायतमदीर्घं च कृत्वा सन्निवेश्यानन्तरमङ्गुलीभ्यां वामहस्ततर्जनीमध्यमाभ्यामुत्पीडयेत्। प्रकृतत्वादश्मरीमूर्ध्वं पीडयेत्तावद्यावच्छल्यमश्मर्याख्यं ग्रन्थिरिवोन्नतं स्यात्। अनन्तरं सेवन्या वामपार्श्वे सेवनीं यवमात्रेण त्यक्त्वा वर्जयित्वा पाटयेच्छस्त्रेण। कियन्मात्रम्—अश्ममानेनाश्मरीप्रमाणेन। न ततोऽधिकमूनं वा। पाटनं च कृत्वा अश्मरीं समग्रं निरवशेषं यथा भवत्येवं सर्पफणवदग्रवक्रेण यन्त्रेणाहरेत्। तथा चाकर्षेत् यथा सा ह्रियमाणा न भिद्यते। भिन्ना हि पुनर्वृद्धिमियात्। स्त्रीणां वस्तिस्तु पार्श्वगो गर्भाशयाश्रयो यस्मात्तस्मात्तासामुत्सङ्गवच्छस्त्रं न्यसेत् पातयेत्। उत्सङ्गवदिति। ऊर्ध्वं सङ्गः स यस्यास्ति तदुत्सङ्गवत्। उत्तानमित्यर्थः। अतोऽस्माच्छस्त्रपातनविधानादन्यथा अश्मर्याहरणार्थं शस्त्रपातने ह्यासां स्त्रीणां मूत्रप्रसेकक्षणनात् मूत्रस्रोतसि शस्त्रेण स्पर्शनात् मूत्रस्रावी व्रणो दीर्घकालानुबन्धी भवेत्। न केवलं

स्त्रीणां मूत्रप्रसेकक्षणनान्मूत्रस्रावी व्रणो दीर्घकालानुबन्धी भवेद्यावन्नरस्यापि। अपि चान्यच्चैकधैकतो वस्तिभेदोऽश्मरीहेतुस्तन्निमित्तः सिद्ध्यति। न तु सहसा शस्त्राद्यभिघातहेतुज एकतोऽपि भिन्नो वस्तिः सिद्ध्यति। सुश्रुते चोऽक्तम्— "अश्मरीव्रणनिमित्तमेकधा भिन्नवस्तिर्जीवति क्रियाभ्यासाच्छास्त्रविहितच्छेदान्निष्यन्दपरिवृद्धत्वाच्च शल्यस्य" इति। अस्य व्याख्या। अश्मरीनिमित्ताघातेन पुनरेकधा भिन्नवस्तेर्जीविते हेतुं निर्दिशन्नाह— अश्मरीव्रणनिमित्तमित्यादि। क्रियाणामुष्णोदकस्वेदक्षीरवृक्षकषाययोजनादीनामभ्यसनं क्रियाभ्यासस्तस्मात्। अश्मरीप्रमाणमुखमात्रः सेवनीसव्यपार्श्वगः शास्त्रविहितच्छेदस्तस्मात्। निष्यन्दो मूत्रम्। तेन परिवृद्धं शल्यं तस्मादित्यर्थः। एतदुक्तं भवति। येन निष्यन्देन मूत्रेण वृद्धेन सता शल्यं परिवृद्धं तस्य शल्यापहरणेऽपि निश्शेषपरिस्रुतत्वात् भिन्नवस्तिर्जीवतीति। न तु सहसा शस्त्राद्यभिघातहेतुजः एकतोऽपि भिन्नो वस्तिः सिद्ध्यति। मर्मविभागेऽप्यवादीत्— "मूत्राशयो धनुर्वक्रो वस्तिरल्पास्रमांसगः। एकाधोवदनो मध्ये कट्याः सद्यो निहन्त्यसून्॥ ऋतेऽश्मरीव्रणाद्विद्धस्तत्राप्युभयतश्च सः" इति। अश्मरीहेतुरपि यो वस्तिभेदो द्विधोऽभयतः, सोऽपि न सिद्ध्यति व्रणस्वभावात्॥

शशिलेखा

अथेति मङ्गलार्थश्चरकाचार्यशैली। स्निग्धमेवोपस्निग्धम्। तथा शोधनादनन्तरम् ईषत्कर्शितम्। कर्शनेन ह्यश्मरी सुखसञ्चार्या भवति। सुबोधम्। वस्त्रचुम्बळं वस्त्रमयमासनम्। ततोऽस्याकुञ्चिते जानुकूर्परे आश्रयपुरुषेण सह वाससा शाटकेन बद्धस्य। अदक्षिणे वामे तर्जनीमध्यमे अङ्गुल्यौ। तर्जन्यङ्गुष्ठसमीपस्थाङ्गुली। सेवनीमनु सेवनीमनुसरन्। ताभ्यामङ्गुलीभ्यामन्तर्वस्ति तथा कर्तव्यम्, यथा तस्मिन् प्रदेशे वलीरहितत्वादि संभवति। वलयः संकोचाः। शल्यमश्मरी। सेवनीं यवमात्रेण मुक्त्वाऽश्मरीप्रमाणेन पाटयेच्छस्त्रेण। तथा वैद्येन शस्त्रकर्म कार्यम्, यथा साऽश्मरी न भिद्यते। यस्मादल्पमप्यवशिष्टं पुनरश्मरीत्वमेवाप्नोति, तस्मात् समग्राममग्रवक्रेणाहरेत्। अग्रवक्रमश्मर्याहरणं सर्पफणावद्वक्रम् अग्रत इत्युक्तम्। स्त्रीणामुत्सङ्गवच्छस्त्रं न्यसेत्। उत्सङ्गो मुखमूले शस्त्रपीठिका। ययाऽवरुद्धप्रवेशं शस्त्रं मूत्रस्रावव्रणकरणायाऽसमर्थं भवेत्। पुरुषस्यापि मूत्रप्रसेकक्षणनात् मूत्रस्रोतसः शस्त्रेण स्पर्शात् मूत्रस्रावी व्रणो भवेत्। अश्मरीनिमित्तं यो वस्तेर्भेदः स एकस्यां दिशि भिन्नः सिद्ध्यति। भिषजः अकौशलात् द्विधा भिन्नो न सिद्ध्यतीति। मूत्रप्रसेके ना मूत्रं येन वस्तिमुखा-

श्रयेण स्रोतसा क्षरति, तस्य क्षणनात् छेदनादित्यर्थः इति निबन्धसङ्ग्रहकारः ॥

विशल्यमुष्णपानीयद्रोण्यां तमवगाहयेत् ॥ ५५ ॥
तथा न पूर्यतेऽस्रेण वस्तिः पूर्णे तु पीडयेत् ।
मेढ्रतः क्षीरिवृक्षाम्बु मूत्रसंशुद्धये ततः ॥ ५६ ॥
कुर्यात् गुडस्य सौहित्यं मध्वाज्याक्तव्रणः पिबेत् ।
द्वौ कालौ सघृतां कोष्णां यवागूं मूत्रशोधनैः ॥ ५७ ॥
त्र्यहं दशाहं पयसा गुडाढ्येनाल्पमोदनम् ।
भुञ्जीतोऽर्ध्वं फलाम्लैश्च रसैर्जाङ्गलचारिणाम् ॥ ५८ ॥

सर्वाङ्गसुन्दरी

विशल्यमित्यादि ॥ विशल्यं निर्गताश्मरीकं तमातुरमुष्णपानीयद्रोण्यामवगाहयेत् । तथा तेनावगाहेन वस्तिरस्रेण न पूर्यते । एवमपि कृते दैवादस्रेण तु पूर्णे वस्तौ क्षीरिवृक्षाम्बु मेढ्रतो मेढ्रे पीडयेत् । क्षीरिवृक्षकषायेणोत्तरवस्तिं दद्यादित्यर्थः । न्यग्रोधोदुम्बराश्वत्थप्लक्षाः क्षीरिणः । ततोऽनन्तरं मूत्रस्य संशुद्ध्यर्थं गुडस्य सौहित्यं तृप्तिं कुर्यात् । ततो मध्वाज्याक्तव्रणो द्वौ कालौ मूत्रशोधनैः त्रपुसोर्वारुकूश्माण्डगोक्षुरादिभिः कृतां यवागूं सघृतां कोष्णां त्र्यहं पिबेत् । अनन्तरं दशाहं गुडाढ्येन बहुगुडेन क्षीरेणाल्पमन्नमद्यात् । ऊर्ध्वं दशाहादनन्तरं जाङ्गलदेशचारिणां प्राणिनां रसैर्मांसरसैरोदनं च मात्रया भुञ्जीत । फलाम्लैरिति । कोलडाडिमाद्यम्लैः न तु मस्तुकाञ्जिकाद्यैरम्लैरित्यर्थः ॥

शशिलेखा

विशल्यमुद्धृतशल्यं तमातुरमुष्णोदकद्रोण्यामवगाहयेत् स्वेदनाय । तथावगाहस्वेदेनासृजा वस्तिर्नाऽपूर्यते । अथ कदाचित् पूर्णे ततो मेढ्रतः क्षीरिवृक्षकषायं पीडयेत् । अनेनोत्तरवस्तिर्विधेय इत्युक्तो भवति । गुडसौहित्यं गुडस्य तृप्तिः । ततो मधुघृताभ्यक्तव्रणो मूत्रशोधनद्रव्यकृतां सघृतां कोष्णां यवागूमुभयकालं त्रिरात्रं पिबेदिति योगः । त्र्यहादूर्ध्वं दशाहं गुडप्रगाढेन पयसा अल्पमोदनं भुञ्जीत । अत ऊर्ध्वं फलाम्लैर्जाङ्गलमांसरसैश्चाल्पमोदनं भुञ्जीतेति योगः ॥

क्षीरिवृक्षकषायेण व्रणं प्रक्षाल्य लेपयेत् ।
प्रपौण्डरीकमञ्जिष्ठायष्ट्याह्वनयनौषधैः ॥ ५९ ॥

व्रणाभ्यङ्गे पचेत्तैलमेभिरेव निशान्वितैः ।
दशाहं स्वेदयेच्चैनं स्वमार्गं सप्तरात्रतः ॥ ६० ॥

मूत्रे त्वगच्छति दहेदश्मरीव्रणमग्निना ।
स्वमार्गप्रतिपत्तौ तु स्वादुप्रायैरुपाचरेत् ॥ ६१ ॥

तं वस्तिभिर्न चारोहेद्वर्षं रूढव्रणोऽपि सः ।
नगनागाश्ववृक्षस्त्रीरथान्नाप्सु प्लवेत च ॥ ६२ ॥

मूत्रशुक्रवहौ वस्तिवृषणौ सेवनीं गुदम् ।
मूत्रप्रसेकं योनिं च शस्त्रेणाष्टौ विवर्जयेत् ॥ ६३ ॥

सर्वाङ्गसुन्दरी

क्षीरिवृक्ष इत्यादि ॥ क्षीरिवृक्षकषायेण व्रणं प्रक्षाल्य प्रपौण्डरीकादिभिर्लेपयेत् । नयनौषधं पट्टिकालोध्रम् । एभिरेव प्रपौण्डरीकादिभिर्हरिद्रान्वितैर्व्रणाभ्यङ्गविषये तैलं पचेत् । एनञ्च व्रणिनं दशाहं स्वेदयेत् । स्वेदनादनन्तरं तु पुनः सप्तरात्रेण स्वमार्गं मूत्रे अगच्छति सत्यश्मरीव्रणमग्निना दहेत् । वैद्य इति शेषः । मूत्रस्य स्वमार्गप्रतिपत्तौ सत्यां तमातुरं स्वादुप्रायैर्मधुरभूयिष्ठद्रव्यसाधितैर्वस्तिभिरुत्तरवस्त्यादिभेदभिन्नैरुपाचरेत् उपक्रमेत् । रूढव्रणोऽप्यश्मर्यातुरो वर्षं यावन्नगादीन्नारोहेत् । अप्सु च न प्लवेत । अश्मरीहरणावसरे तदर्थमन्यार्थमपि मूत्रवहादीन् देशान् शस्त्रेण वर्जयेत् । तत्र मूत्रवहस्रोतोच्छेदान्मूत्रपूर्णवस्तेर्मरणं स्यात् । शुक्रवहस्रोतसश्छेदान्मरणं षाण्ड्यं वा । वस्तिगुदच्छेदात्सद्यो मरणम् । वृषणस्रोतश्छेदाद्ध्वजभङ्गः । सेवनीयोनिच्छेदाद्रुजाप्रादुर्भावः । मूत्रप्रसेकस्रोतश्छेदान्मूत्रस्रवणमिति ॥

शशिलेखा

क्षीरिवृक्ष इत्यादि सुबोधम् । एभिरिति । प्रपौण्डरीकादिभिर्हरिद्रासंयुक्तैः कल्कपरिभाषया तैलं पचेद्व्रणाभ्यञ्जने । दशाहमेनं स्वेदयेच्च । शस्त्रकर्मणः सप्तरात्रात् स्वमार्गमायाति मूत्रे अत ऊर्ध्वमनागतं चिकित्सेत् । वस्तिभिरुत्तरवस्त्यास्थापनानुवासनैः । सुबोधम् ॥

इति चिकित्सिते एकादशोऽध्यायः ॥

द्वादशोऽध्यायः ।

मूत्राघातचिकित्सितादनन्तरं प्रमेहचिकित्सितं व्याख्यातुं प्रक्रम्यते ॥

अथातः प्रमेहचिकित्सितं नामाध्यायं व्याख्यास्यामः ॥
इति ह स्माहुरात्रेयादयो महर्षयः ॥

सम्बन्धश्चास्य पूर्ववत् बोध्यः--

मेहिनो बलिनः कुर्यादादौ वमनरेचने ।
स्निग्धस्य सर्षपारिष्टनिकुम्भाक्षकरञ्जजैः ॥ १ ॥

तैलैस्त्रिकण्टकाद्येन यथास्वं साधितेन वा ।
स्नेहेन मुस्तदेवाह्वनागरप्रतिवापवत् ॥ २ ॥

सुरसादेः कषायेण दद्यादास्थापनं ततः ।
न्यग्रोधादेस्तु पित्तार्तं रसैः शुद्धं च तर्पयेत् ॥ ३ ॥

मूत्रग्रहरुजागुल्मक्षयाद्यास्त्वपतर्पणात् ।
ततोऽनुबन्धरक्षार्थं शमनानि प्रयोजयेत् ॥ ४ ॥

सर्वाङ्गसुन्दरी

मेहिन इत्यादि ॥ बलवतो मेहिनः पुंसोऽपरेभ्यः उपक्रमेभ्यस्तद्योग्येभ्यः प्रथमं वमनविरेचने कुर्यान्मेदःक्लेदप्रशमनाय । किंभूतस्य—सर्षपादिजैस्तैलैः स्निग्धस्य । त्रिकण्टकाद्येन वा स्नेहेन "त्रिकण्टकनिशालोध्र" इत्यादिना वक्ष्यमाणेन यथास्वं दोषसात्म्यादिवशात् द्रव्यैः साधितेन वा स्नेहेन स्निग्धस्य । ततो वमनविरेचनकरणादनन्तरं जातबलाय मेहिने सुरसयुगेत्यादेः सम्बन्धिना कषायेणास्थापनं दद्यात् । किंभूतम् । मुस्तादिप्रतिवापवत् । मुस्तादिः प्रतिवापो विद्यते यत्र तदेवम् । पित्तार्ते पुनर्न्यग्रोधपिप्पलेत्यादेः कषायेण आस्थापनं दद्यात् । प्रतिवापान्तरानिर्देशादत्र पूर्वोक्त एव प्रतिवापो योज्यः । अनन्तरं शुद्धं प्रमेहिणं रसैस्तर्पयेत् । यद्यपि रसैरिति सामान्यनिर्देशात् त्रिविधदेशसञ्जातप्राणिमांसरसैस्तर्पणं प्राप्तम्, तथापि योग्यतावशाज्जाङ्गलप्राणि-

मांसरसैस्तर्पयेदिति बोध्यम्। न त्वानूपमांसरसैरिति। तेषां मेदोमूत्रकफावहत्वेन व्याधिवर्धनहेतुत्वात्। यतोऽपतर्पणान्मूत्रग्रहादीनि जायन्ते, ततो हेतोरनुबन्धरक्षार्थं शमनानि प्रयोजयेत्। अन्यथा प्रमेह उपशान्तोऽपि निदानलेशमासाद्य पुनः प्रादुर्भवेत्। ननु मूत्रग्रहादीन्येतावदस्तु। शेषा आदिशब्देनैव गृह्यन्ते। किं मूत्रग्रहरुजागुल्मक्षयाद्या इति निर्दिष्टेन। ब्रूमहे। ज्ञापनार्थमेतत्। एते मूत्रग्रहरुजागुल्मक्षया यथावश्यमपतर्पणात् प्रमेहिणो जायन्ते, न तथापरे तज्जातीया इति॥

शशिलेखा

सर्वमेहिणामग्न्यवसादान्मूत्रं मेदश्चाधिकं भवत्यतोऽग्निविवृद्ध्यर्थं क्लेदादिप्रशमनार्थञ्च संशोधनं कार्यमिति प्रदर्शयितुमाह—मेहिन इत्यादि॥ बलिनो बलवतः शोधनार्हस्य वमनविरेचनविध्युक्तप्रकारेण सर्षपादिजैस्तैलैः त्रिकण्टकाद्येनात्रैव वक्ष्यमाणेन यथास्वं दोषाद्यपेक्षया साधितेन वा स्नेहनतैलाद्यन्यतमेन स्निग्धस्य प्रमेहिण आदावेव कल्पविहितेन योगेन वमनरेचने कुर्यात्। ततः शोधनानन्तरं जातबलस्य सुरसादिगणक्वाथेन मुस्तादिप्रतिवापो वस्तिः। वस्तिस्तु न्यग्रोधादिकषायः पित्तप्रमेहेष्वेव। मूत्रग्रह इत्यादि रसैस्तर्पणे हेतुः। रसैर्जाङ्गलरसैः। मूत्रग्रहो मूत्रकृच्छ्रम्। रुजा वस्तिमेढ्रयोः। क्षयोऽतिकार्श्यम्। आदिशब्द एवं जातीयग्रहणार्थः॥

असंशोध्यस्य तान्येव सर्वमेहेषु पाययेत्।
धात्रीरसप्लुतां प्राह्णे हरिद्रां माक्षिकान्विताम्॥ ५॥

दार्वीसुराह्वत्रिफलामुस्ता वा क्वथिता जले।
चित्रकत्रिफलादार्वीकलिङ्गान्वा समाक्षिकान्।
मधुयुक्तं गुडूच्या वा रसमामलकस्य वा॥ ६॥

सर्वाङ्गसुन्दरी

असंशोध्यस्येत्यादि॥ असंशोध्यो वमने गर्भिण्यादिः। विरेके नवज्वरादिः। तस्यासंशोध्यस्य तान्येव शमनानि सर्वेषु मेहेषु पाययेत्। एवेत्यवधारणे। न तु शोधनादिरूपमित्यर्थः। तान्येवाह—धात्रीरसप्लुतामित्यादि। आमलकरसालोडितां हरिद्रां समाक्षिकां प्रभाते पाययेत्। दार्व्यादीर्वा जले

क्वथिताः पाययेत् । चित्रकादीन् वा क्वथितान् समाक्षिकान् पाययेत् । समाक्षिकं गुळूचीरसं धात्रीरसं वा ॥

शशिलेखा

ततोऽनन्तरं प्रमेहानुबन्धरक्षणार्थं शमनान्यौषधानि प्रयोजयेत् । असंशोध्यस्य शमनार्हस्य तानि शमनान्येव सर्वमेहेषु पाययेत् । तानि च धात्रीरसाप्लुतामित्यादिना प्रदर्श्यन्ते । हरिद्रां माक्षिकयुक्तामामलकरसालोळितां प्राह्णे प्रातः सर्वप्रमेहेषु पाययेत् । दार्व्यादिक्वाथं वा । चित्रकादीन् वा जले क्वथितान् सक्षौद्रान् । गुळूच्याः स्वरसमामलकरसं वा मधुयुक्तं पाययेत् ॥

लोध्राभयातोयदकट्फलानां
पाठाविडङ्गार्जुनधान्वनानाम् ।
गायत्रिदार्वीक्रिमिहृद्वचानां
कफे त्रयः क्षौद्रयुताः कषायाः ॥ ७ ॥

उशीरलोध्रार्जुनचन्दनानां
पटोलनिम्बामलकामृतानाम् ।
लोध्राम्बुकालीयकधातकीनां
पित्ते त्रयः क्षौद्रयुताः कषायाः ॥ ८ ॥

यथास्वमेभिः पानान्नं यवगोधूमभावनाम् ।
वातोल्बणेषु स्नेहांश्च प्रमेहेषु प्रकल्पयेत् ॥ ९ ॥

सर्वाङ्गसुन्दरी

लोध्रेत्यादि ॥ लोध्रादीनां श्लोकपादोक्तानां कषायाः क्षौद्रयुतास्त्रयः कफे हिताः । एवमुशीरादीनां माक्षिकान्विताः कषायास्त्रयः पित्ते हिताः । उपजाती वृत्ते । एभिर्लोध्रादिभिर्यथास्वं यथायोगं पानमन्नञ्च कल्पयेत् । यवगोधूमभावनाञ्च कल्पयेत् । वाताधिकेषु प्रमेहेषु स्नेहांश्चैतैरेव प्रकल्पयेत् । न केवलमन्नभावनाम् ॥

शशिलेखा

लोध्रपाठागायत्र्यादीनां त्रयः कषायाः सक्षौद्राः कफे कफमेहे हिताः । सर्वत्र सर्वस्य पथ्यत्वात् कफ इति विशेषग्रहणमेषां कफे पथ्यतरत्वज्ञापनाय ।

तोयदं मुस्ता । गायत्री खदिरः । कृमिजिद्विडङ्गम् । उशीरपटोललोध्रा-दयस्त्रयः कषायाः क्षौद्रयुताः पित्ते हिताः । कालेयकं पीतचन्दनम् । एभिः प्रमेहौषधसाधितैर्यथास्वं कषायैः पानमन्नं यवानां गोधूमानां च भावनां वाताधिकेषु प्रमेहेषु स्नेहांश्च कल्पयेत् ॥

अपूपसक्तुवाट्यादिर्यवानां विकृतिर्हिता ।
गवाश्वगुदमुक्तानामथवा वेणुजन्मनाम् १० ॥

तृणधान्यानि मुद्गाद्याः शालिर्जीर्णः सषष्टिकः ।
श्रीकुक्कुटोऽम्लः खळकस्तिलसर्षपकिट्टजः ॥ ११ ॥

कपित्थं तिन्दुकं जम्बूस्तत्कृता रागषाडवाः ।
तिक्तं शाकं मधु श्रेष्ठा भक्ष्याः शुष्काः ससक्तवः ॥ १२ ॥

धन्वमांसानि शूल्यानि परिशुष्काण्ययस्कृतिः ।
मध्वरिष्टासवा जीर्णाः सीधुः पक्वरसोद्भवः ॥ १३ ॥

तथासनादिसाराम्बु दर्भाम्भो माक्षिकोदकम् ।
वासितेषु वराक्वाथे शर्वरीं शोषितेष्वहः ॥ १४ ॥

यवेषु सुकृतान् सक्तून् सक्षौद्रान् शीधुना पिबेत् ।
सालसप्ताह्वकम्पिल्लवृक्षकाक्षकपित्थजम् ॥ १५ ॥

रोहीतकं च कुसुमं मधुनाऽद्यात्सुचूर्णितम् ।
कफपित्तप्रमेहेषु पिबेद्धात्रीरसेन वा ॥ १६ ॥

सर्वाङ्गसुन्दरी

अपूप इत्यादि ॥ यवानां विकृतिरपूपादिः प्रमेहेषु हिता । अथवा यवानां गवाश्वगुदमुक्तानामपूपादिविकृतिर्हिता । तथा वेणुजन्मनां यवानां वा विकृतिर्हिता । तृणधान्यानि श्यामाकादीनि । तथा मुद्गाद्यास्तथा पुराणशालिः षष्टिकश्चेति हितानि । तथा श्रीकुक्कुटसंज्ञोऽम्ळः खळको हितः । किंभूतः—तिलसर्षपकिट्टजस्तिलसर्षपपिण्याकजन्मा तदुपादानकारणो न मुद्गाद्युपादानकारणः । स च माळवकेषु प्रसिद्धः । आर्द्रकशकलनिस्तुषगोधूमादिना च क्रियते । तथा कपित्थादयो हिताः । तैः कपित्थादिभिः कृता रागाः

षाडवाश्च हिताः। तिक्तशाकादीनि च हितानि। श्रेष्ठा त्रिफला। शूल्यानि शूले पक्वानि। शूलात् पाक इति यत्। तानि च सुपक्वत्वात् परिशुष्काणि। तथाऽयस्कृतिर्वक्ष्यमाणा। तथा मध्वादयः पुराणाः। मधु मार्द्वीकम्। पक्वरसोद्भवः शीधुः। तथाऽसनादिसारवर्गस्याम्भो दर्भजलं माक्षिकोदकं च हितम्। तथा यवेषु सुकृतान् सक्तून् कृत्वा सक्षौद्रान् शीधुना पिबेत्। पक्वरसोद्भवेन तस्य योग्यतमत्वात्। यवेष्विति निमित्तसप्तमी। किंभूतेषु यवेषु—वराक्वाथे त्रिफलाकषाये शर्वरीं सकलां रात्रिं वासितेष्वभिषुतेष्वनन्तरमहःशोषितेषु। अत्यन्तसंयोगे द्वितीया। सालेत्यादि। सालादिजं पुष्पं सूक्ष्मरजीकृतं मधुनाऽद्यात्। कफपित्तप्रमेहेषु धात्रीरसेन वा पिबेत्॥

शशिलेखा

मेहेषु यथास्वौषधक्वाथभावितानां यवानामपूपसक्तुवाट्यादिर्विकृतिर्हिता। अथवा गवाश्वजठरमध्युषितैर्यवैस्तद्विष्ठ तश्च गृहीतैर्वंशयवैर्वा सक्त्वादीन् कल्पयेत्। शूल्यादिकं जाङ्गलमांसविशेषणम्। असनादिसाराम्बु असनखदिरादिसारोषितं जलम्। सुबोधम्। कफपित्तप्रमेहेषु सालादिकुसुमचूर्णं मधुनाऽद्यात्। अथवा मधुयुतमामलकरसेन पिबेत्। कम्पिल्लको रजनकः। वृक्षकः कुटजः॥

त्रिकण्टकनिशालोध्रसोमवल्कवचार्जुनैः।
पद्मकाश्मन्तकारिष्टचन्दनागरुदीप्यकैः ॥ १७ ॥

पटोलमुस्तमञ्जिष्ठामाद्रीभल्लातकैः पचेत्।
तैलं वातकफे पित्ते घृतं मिश्रेषु मिश्रकम् ॥ १८ ॥

दशमूलं शटीं दन्तीं सुराह्वं द्विपुनर्नवम्।
मूलं स्नुगर्कयोः पथ्यां भूकदम्बमरुष्करम् ॥ १९ ॥

करञ्जवरणान्मूलं पिप्पल्याः पौष्करं च यत्।
पृथक् दशपलं प्रस्थान् यवकोलकुलत्थतः ॥ २० ॥

त्रींश्चाष्टगुणिते तोये विपचेत्पादवर्तिना।
तेन द्विपिप्पलीचव्यवचानिचुलरोहिषैः ॥ २१ ॥

त्रिवृद्विडङ्गकम्पिल्लभार्ङ्गीविल्वैश्च साधयेत्।
प्रस्थं घृताज्जयेत्सर्वांस्तन्मेहान् पिटकाविषम् ॥ २२ ॥

पाण्डुविद्रधिगुल्मार्शःशोफशोषगरोदरम् ।
श्वासं कासं वमिं वृद्धिं प्लीहानं वातशोणितम् ॥ २३ ॥
कुष्ठोन्मादावपस्मारं धान्वन्तरमिदं घृतम् ।

सर्वाङ्गसुन्दरी

त्रिकण्टकेत्यादि ॥ त्रिकण्टकादिभिः कल्कीकृतैस्तैलं पचेद्वातकफजे प्रमेहे । पित्तजे एभिरेव घृतं पचेत् । मिश्रेषु दोषेषु मिश्रकं घृततैलं पचेत् । स्नुगर्कमूलम् । करञ्जमूलम् । वरणमूलम् । पिप्पलीमूलम् । पौष्करञ्च यदिति । पुष्करमूलञ्चेत्यर्थः । दशमूलादिकं पृथक् प्रत्येकं दशपलप्रमाणं यवकोलकुलत्थानां त्रीन् प्रस्थांश्चाष्टगुणिते जले विपचेत् । तेन जलेन पादवर्तिना पादशेषेण द्विपिप्पल्यादिभिश्च सामान्यपरिभाषोक्तप्रमाणैर्घृतात् प्रस्थं पचेत् । तत् घृतं सर्वान् प्रमेहान् पिटकादींश्च जयेत् । इदं च धान्वन्तराख्यं घृतम् ॥

शशिलेखा

त्रिकण्टकादिभिः स्नेहाच्चतुर्थांशैः जलेन च स्नेहसमेन स्नेहो विपक्वः सर्वमेहघ्नः । वातकफप्रमेहेषु तैलं पित्तप्रमेहेषु घृतं मिश्रेषु संसर्गजेषु मिश्रकम् । प्रकृतत्वात् तैरुघृतं पचेत् । माद्री अतिविषा । दशमूलेत्यादिना धान्वन्तरं सर्पिः । दशमूलानां संयुक्तानां दशपलं दशमूलस्यैकत्वात् प्रत्येकमित्युक्तम् । सुराह्वयं देवदारु । द्विपुनर्नवं वर्षाभूद्वयम् । स्नुक् स्नुही । भूकदम्बं यवानी । कौण्डिन्यकश्च । करञ्जशब्देन करञ्जद्वयं ग्राह्यम् । पिप्पल्या मूलं पौष्करं पुष्करमूलम् । षड्यादिकं पृथक् प्रत्येकं दशपलोन्मितं यवादीनां मिश्रभूतानां प्रस्थत्रयं प्रत्येकन्तु षोडशपलं शुष्कत्वात् प्रस्थः । सर्वस्मादेकीकृतादष्टगुणिते तोये विपचेत् । पादवर्तिना पादावशिष्टेन तेन क्वाथेन द्विपिप्पल्यादिभिश्च घृतात् प्रस्थः द्वात्रिंशत् पलानि साधयेत् । तत् घृतं सर्वान् प्रमेहान् पिटकादींश्च जयेत् । इदञ्च धान्वन्तराख्यम् । यत्र धान्वन्तरं प्रयोज्यमित्युच्यते, तत्रास्य प्रयोग इति विज्ञेयम् । रोहिषः प्लीहापहः । "कम्पिल्लको रञ्जनको रेवको रक्तचूर्णकः ।" विश्वं विश्वभेषजम् ॥

लोध्रमूर्वाशठीवेल्लभार्ङ्गीनतनखप्लवान् ॥ २४ ॥
कलिङ्गकुष्ठक्रमुकप्रियङ्ग्वतिविषाग्निकान् ।

द्वे विशाले चतुर्जातं भूनिम्बं कटुरोहिणीम् ॥ २५ ॥

यवानीं पौष्करं पाठां ग्रन्थिं चव्यं फलत्रयम् ।
कर्षांशमम्बुकलशे पादशेषे स्रुते हिमे ॥ २६ ॥

द्वौ प्रस्थौ माक्षिकात् क्षिप्त्वा रक्षेत् पक्षमुपेक्षया ।
लोध्रासवोऽयं मेहार्शःश्वित्रकुष्ठारुचिक्रिमीन् ॥ २७ ॥

पाण्डुत्वं ग्रहणीदोषं स्थूलतां च नियच्छति ।
साधयेदसनादीनां पलानां विंशतिं पृथक् ॥ २८ ॥

द्विवहेऽपां क्षिपेत्तत्र पादस्थे द्वे शते गुडात् ।
क्षौद्राढकार्धं पलिकं वत्सकादि च कल्कितम् ॥ २९ ॥

तत् क्षौद्रपिप्पलीचूर्णप्रदिग्धे घृतभाजने ।
स्थितं दृढे जतुसृते यवराशौ निधापयेत् ॥ ३० ॥

खदिराङ्गारतप्तानि बहुशोऽत्र निमज्जयेत् ।
तनूनि तीक्ष्णलोहस्य पत्राण्यालोहसंक्षयात् ॥ ३१ ॥

अयस्कृतिः स्थिता पीता पूर्वस्मादधिका गुणैः ।

सर्वाङ्गसुन्दरी

लोध्र इत्यादि ॥ लोध्रादिकं प्रत्येकं कर्षप्रमाणं जलद्रोणे पक्त्वा पादशेषे स्रुते गाळीते शीते च माक्षिकात् द्वौ प्रस्थौ क्षिप्त्वा पक्षमात्रमचलं कृत्वा रक्षेत् । अयं लोध्रासवो मेहादीन् नाशयेत् । असनादीनाम् "असनतिनिशे"त्यादिगणोक्तानां द्रव्याणां पृथक् प्रत्येकं पलानां विंशतिं विंशतिपलान्यपां द्विवहे जलद्रोणाष्टके साधयेत् । तत्र तस्मिन् पादशेषे स्रुते शीते च सति गुडस्य द्वे शते क्षिपेत् । माक्षिकस्याऽर्धाढकं "वत्सकमुर्वे"त्यादिकं च पृथक् पालिकं कल्कितं कृत्वा क्षिपेत् । अनन्तरं तन्माक्षिकपिप्पलीचूर्णप्रलिप्ते घृतभाजने दृढे जतुलिप्ते स्थितं यवराशौ स्थापयेत् । अनन्तरं खदिराङ्गारतप्तानि तनूनि तीक्ष्णलोहपत्राणि पुनःपुनरत्र निमज्जयेत् । यावत्संक्षयमखिलतया विलीनवृत्तित्वमायान्ति । अयस्कृतिरियं स्थिता सम्पन्ना पीता पूर्वस्माल्लोध्रासवात् गुणैरधिका । अत्र च सङ्ग्रहोक्ताद्दशमूलारिष्टादयसः परिमाणं कल्प्यम् ।

प्रायेण सार्धप्रस्थमात्रम्। एवमन्यत्राऽपि द्रवद्रव्यमपेक्ष्य नारसिंहघृतादावनयैव दिशाऽयसः परिमाणं कल्पनीयम् ॥

शशिलेखा

"लोध्रमूर्वे"त्यादिना लोध्रासवः। सुबोधः। प्लवं परिपेलवम्। क्रमुकः पट्टिकालोध्रः। कलशो द्वादशाधिकानि पञ्चपलशतानि भवन्ति। पादश्चतुर्थभागः। द्वौ प्रस्थौ चतुःषष्टिपलानि भवतः। असनादिगणद्रव्याणां पृथग्विंशतिपलान्येकीकृत्य क्राथयेत्। वत्सकादिगणद्रव्याणि पलांशानि चूर्णितानि तत्र क्षिप्त्वा तद्घटे क्षौद्रपिप्पलीचूर्णेनान्तर्लिप्ते स्थापयेत्। सुबोधम् ॥

रूक्षमुद्वर्तनं गाढं[1] व्यायामो निशि जागरः ॥ ३२ ॥
यच्चाऽन्यच्छ्लेष्ममेदोघ्नं बहिरन्तश्च तद्धितम्।
सुभावितां सारजलैस्तुलां पीत्वा शिलोद्भवात् ॥ ३३ ॥
साराम्बुनैव भुञ्जानः शालीन् जाङ्गलजै रसैः।
सर्वानभिभवेन्मेहान् सुबहूपद्रवानपि ॥ ३४ ॥
गण्डमालार्बुदग्रन्थिस्थौल्यकुष्ठभगन्दरान्।
क्रिमिश्लीपदशोफांश्च परं चैतद्रसायनम् ॥ ३५ ॥

सर्वाङ्गसुन्दरी

रूक्षमित्यादि ॥ उद्वर्तनं रूक्षं तथा गाढं न तु शिथिलं हितम्। तथा व्यायामरात्रिजागरौ च। अपरमपि यदेवंप्रायं श्लेष्ममेदोहरं बहिरन्तश्च तच्च प्रमेहिणो हितम्। सारा असनखदिरादयस्तेषां जलैः क्राथैः शिलाजतुनस्तुलां सुभावितां पीत्वा साराम्बुनैव जाङ्गलप्राणिमांसजै रसैः शालीनश्नन् सर्वान् मेहान् सुबहूपद्रवानपि जयेत्। गण्डमालादींश्च। इदं चोत्कृष्टं रसायनम् ॥

शशिलेखा

रूक्षमित्यादि सुबोधम्। रूक्षाभिश्चौषधीभिरुद्वर्तनम्। प्रगाढो व्यायामो दृढम्। सारजलैरसनखदिरादिक्राथैः सुभावितां शिलाजतुनस्तुलां पलशतं सारजलेनैव पीत्वा जाङ्गलमांसरसैः सह शालीन् भुञ्जानः सुबहूपद्रवानपि सर्वान्

1 "प्रवृद्धमेदाः प्रगाढव्यायामोद्वर्तनस्नान विलेपनानि च रूक्षाभिरौषधीभिः" इति सङ्ग्रहे।

मेहान् गण्डमालादींश्चाभिभवेज्जयेत् । उपद्रवाः पिटकादयः । एतच्च परमुत्कृष्टं रसायनम् ॥

अधनश्छत्रपादत्ररहितो मुनिवर्तनः ।
योजनानां शतं यायात् खनेद्वा सलिलाशयान् ॥ ३६ ॥

गोशकृन्मूत्रवृत्तिर्वा गोभिरेव सह भ्रमेत् ।
बृंहयेदौषधाहारैरमेदोमूत्रलैः कृशम् ॥ ३७ ॥

सर्वाङ्गसुन्दरी

अधन इत्यादि ॥ धनरहितः प्रमेही छत्रपादत्ररहितो मुनिवृतिः सन् योजनानां शतं यायात् । अथवा सलिलाशयान् खनेत् । अथवा गोशकृन्मूत्रवर्तनो गोभिरेव सह भ्रमेत् । कृशं नरमौषधयुक्तैराहारैर्बृंहयेत् । किंभूतैः-अमेदोमूत्रलैः ॥

शशिलेखा

सधनत्वे दानेनाधर्मनाशनं निर्धनत्वे चासौख्यान्मेदःप्रभृतीनां क्षयः । अतोऽधनश्छत्रपादत्ररहितो मुनिवृत्तिश्च फलमूलतृणधान्याशनादिना शतं योजनानां गच्छेत् । तटाकादीन वा खनेत् । गोशकृन्मूत्रवर्तनो वा गोभिरेव सह परिभ्रमेत् । कृशममेदोमूत्रलैः बृंहणा अपि ये मेदोमूत्रवृद्धिं न कुर्वन्ति, तैराहारैर्बृंहयेत् ॥

शराविकाद्याः पिटकाः शोफवत्समुपाचरेत् ।
अपक्का व्रणवत्पक्काः, तासां प्राग्रूप एव च ॥ ३८ ॥

क्षीरिवृक्षाम्बु पानाय बस्तमूत्रं च शस्यते ।
तीक्ष्णं च शोधनं प्रायो दुर्विरेच्या हि मेहिनः ॥ ३९ ॥

तैलमेलादिना कुर्याद्गणेन व्रणरोपणम् ।
उद्वर्तने कषायं तु वर्गेणारग्वधादिना ॥ ४० ॥

परिषेकोऽसनाद्येन पानान्ने वत्सकादिना ।
पाठा चित्रकशार्ङ्गेष्टा शारिवा कण्टकारिका ॥ ४१ ॥

सप्ताह्वं कौटजं मूलं सोमवल्कं नृपद्रुमम् ।
सञ्चूर्ण्य मधुना लिह्यात्तद्वच्चूर्णं नवायसम् ॥ ४२ ॥

सर्वाङ्गसुन्दरी

शराविकाद्या इत्यादि ॥ शराविकाकच्छपिकेत्याद्याः पिटका अपक्काः सतीः शोफवदुपक्रमेत् । पक्काः पुनर्व्रणवदुपाचरेत् । तासाञ्च पूर्वरूपावस्थायामेव क्षीरिवृक्षाम्बु पानाय शस्यते । छागमूत्रञ्च । तथा शोधनं विरेचनं तीक्ष्णं शस्यते । कुत इत्याह—यस्मात् प्रायेण मेहिनो दुःखेन विरेचयितुं शक्यन्ते । एलायुग्मेत्यादिना गणेन तैलं व्रणरोपणं कुर्यात् । उद्वर्तने "आरग्वधेन्द्रयवे"त्यादिना गणेन कषायं निबिडं कुर्यात् । "असनतिनिशे"त्यादिना संस्कृतः परिषेकः स्यात् । पानमन्नञ्च "वत्सकमूर्वे"त्यादिना संस्कृतं कुर्यात् । पाठादीन् सञ्चूर्ण्य मधुना लेहयेत् । नवायसं चूर्णं तद्वन्माक्षिकेण लिह्यात् ॥

शशिलेखा

शराविकाद्याः पिटकाः अपक्काः एकदेशशोफवदुपाचरेत् । पक्कास्तु व्रणप्रतिषेधचिकित्सया । तासां च पिटकानां प्राग्रूपदर्शनकाल एव क्षीरिवृक्षकषायो बस्तमूत्रञ्च पानाय शस्यते । सङ्ग्रहे तु पूर्वरूपेष्वेव तु तासां पाने वनस्पतिकषायं बस्तमूत्रञ्चोपदिशन्तीति पाठः । अस्य व्याख्या— पुष्पं विना फलिनो वनस्पतयः । उपदिशन्तीत्यनेनाचार्योऽनादरेणागमं प्रदर्शयति । अनादरकारणञ्च मूत्राणां तीक्ष्णत्वात् पाकहेतुत्वमिति । तीक्ष्णञ्च शोधनं यन्निश्शेषं दोषाञ्छोधयति तीक्ष्णशोधनहेतुर्मेहिनां दुर्विरेच्यत्वं मेदसातिव्याप्तदेहत्वाद्दुर्विरेच्यतेति भावः । विरेकशब्दो वमनविरेचनयोर्वर्तते । सुबोधम् । एलादिर्गणः । उद्वर्तने कषायं घनं कुर्यात् । पाठादिचूर्णं मधुना लिह्यात् । सप्ताहं सप्तचूर्णम् । नृपद्रुम आरग्वधः । नवायसं पाण्डुरोगे वक्ष्यमाणं तद्वन्मधुना लिह्यात् ।

मधुमेहित्वमापन्नो भिषग्भिः परिवर्जितः ।
शिलाजतुतुलामद्यात् प्रमेहार्तः पुनर्नवः ॥ ४३ ॥

सर्वाङ्गसुन्दरी

मधुमेहित्वमित्यादि ॥ मधुमेहित्वमपि प्राप्तो भिषग्भिश्च परिवर्जितो मेही शिलाजतुपलसेवनं कुर्यात् । अशितशिलाजतुतुलश्चासौ पुनर्नवो भवति । खरणादे च विशेषोपक्रमा उक्ताः । यथा—अश्वत्थचन्दनागरुपाठाक्काथो

जलाभमेहे तु। इक्षुरसाभे पाठाकृमिहन्तृसमुत्थितः क्वाथः। सान्द्राकारे मेहे हिताढकी कर्णिकारो वा। क्वाथस्तथाऽर्जुनस्य पातव्यो वारुणीमेहे। पिष्टे ससिता रजनी पातव्या शिशिरतोयेन। निम्बस्तु शुक्रमेहे तप्तजलेनाऽथवा सुरया। सिकतामेहे चित्रकबाल्हीककुष्ठनिष्क्वाथः। शीतळमेहे क्वाथः पिचुमन्दकृतश्च पातव्यः। पाषाणभित्तु सुरया क्वथितः शस्तःशनैर्मेहे। गोक्षुरकस्य कषायो लालामेहे फलत्रिकेन सह। सलक्युशीरसैन्धववचा हिताः क्षारमेहिनः पिष्टाः। क्वथिताश्च नीलमेहे लोध्रसमङ्गाकदम्बाः स्युः। क्वाथो विभीतकस्य तु कल्को वा काळमेहिनां शस्तः। धातकिपद्मकविकसाक्वाथः कल्कोऽपि वा निशामेहे। माञ्जिष्ठे स्युस्त्रिफला जलदं जलपद्मकं लोध्रम्। लोहितमेहे युञ्ज्यात् त्रिफलाक्वाथेन संयुतं गिरिजम्। त्रिवृता वाळकं धात्री मुस्तं च सरसाञ्जनम्। कटुकातिविषालोध्रं खादिरेणाम्भसा पिबेत्। प्रायः शोधनमेतद्धि प्रधानं समुदाहृतमिति॥

शशिलेखा

शिलाजस्य तुलां स्वैः स्वैः प्रमेहौषधक्वाथैर्भावितां यः प्रमेहरोगी असाध्यतां गतोऽपि अद्यात्, सः पुनर्नवः भवति॥

इति द्वादशोऽध्यायः॥

त्रयोदशोऽध्यायः

अस्मादनन्तरं विद्रधिवृद्धिचिकित्सितमारभ्यते प्रमेहोपद्रवभूतत्वाद्विद्रधेरित्याह—

अथातो विद्रधिवृद्धिचिकित्सितं नामाध्यायं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ॥

विद्रधिं सर्वमेवामं शोफवत्समुपाचरेत् ।
प्रततं च हरेद्रक्तं पक्वे तु व्रणवत् क्रिया ॥ १ ॥

पञ्चमूलजलैर्धौतं वातिकं लवणोत्तरैः ।
भद्रादिवर्गयष्ट्याह्वतिलैरालेपयेद्व्रणम् ॥ २ ॥

वैरेचनिकयुक्तेन त्रैवृतेन विशोध्य च ।
विदारीवर्गसिद्धेन त्रैवृतेनैव रोपयेत् ॥ ३ ॥

क्षालितं क्षीरितोयेन लिम्पेद्यष्ट्यमृतातिलैः ।
पैत्तं घृतेन सिद्धेन मञ्जिष्ठोशीरपद्मकैः ॥ ४ ॥

पयस्याद्विनिशाश्रेष्ठायष्टीदुग्धैश्च रोपयेत् ।
न्यग्रोधादिप्रवाळत्वक्फलैर्वा कफजं पुनः ॥ ५ ॥

आरग्वधादिना धौतं सक्तुकुम्भनिशातिलैः ।
[1]लिम्पेत्कुलत्थिकादन्तीत्रिवृच्छ्यामाग्नितिल्वकैः ॥ ६ ॥

ससैन्धवैः सगोमूत्रैस्तैलं कुर्वीत रोपणम् ।
रक्तागन्तूद्भवे कार्या पित्तविद्रधिवत् क्रिया ॥ ७ ॥

सर्वाङ्गसुन्दरी

विद्रधिमित्यादि ॥ आमं सर्वमेव विद्रधिं शोफवदुपक्रमेत् । अनवरतं च रक्तमाहरेत् । अनन्तरं पक्वे सति व्रणवत् क्रिया कार्या । विशेषेण चिकित्सितमाह—

---

1 कुलत्थिका कुलत्थभेदः । कुलत्थिकादन्तीत्रिवृच्छ्यामार्कतिल्वकैरिति सुश्रुते ।

वातिकं व्रणं वातविद्रधावर्थाज्जातं पञ्चमूलजलैः प्रक्षालितं "भद्रदारुनते"त्यादि— वर्गेण मधुयष्टिकया तिलैश्च लवणाढ्यैर्लेपयेत्। वैरेचनिकयुक्तेन "निकुम्भकुम्भे"-त्यादिवर्गयुक्तेन त्रिवृतेन त्रिवृताख्येन स्नेहेन विशोधयित्वा ततो "विदारिपञ्चा-ङ्गुले"त्यादिवर्गसिद्धेन त्रिवृतेन स्नेहेनैव रोपयेत्। पैत्तं व्रणं क्षीरितोयेन धौतम्। क्षीरिणो न्यग्रोधादयः। मधुयष्टिकागुळूचीतिलैर्लिम्पेत्। मञ्जि-ष्ठादिभिः सिद्धेन घृतेन रोपयेत्। सामान्यपरिभाषोक्तप्रमाणेन द्रव्यं जलं घृतञ्च। क्षीरमत्र स्नेहसमम्। न्यग्रोधेत्यादि। प्रवाळश्च त्वक् च फलं च प्रवाळ-त्वक्फलानि न्यग्रोधादीनां प्रवाळत्वक्फलानि। तैः सिद्धेन वा घृतेन रोपयेत्। कफजं तु व्रणमारग्वधादिना धौतं सक्त्वादिभिर्लिम्पेत्। कुलत्थिकादिभि-र्द्रव्यैस्तैलं रोपणं कुर्वीत। रक्तोद्भवे तथाऽगन्तुजे क्षतोद्भवे च विद्रधौ पित्तविद्रधितुल्या चिकित्सा कार्या॥

शशिलेखा

सर्वमेव विद्रधिं बाह्यमाभ्यन्तरञ्चाममपक्वं शोफवदेकाङ्गशोफवत् यथा-दोषमुपाचरेत्। प्रततञ्चास्रमपाहरेत्। पक्वे सति पाटयित्वा व्रणवद्वक्ष्यमाण-व्रणप्रतिषेधवत् क्रिया चिकित्सा कार्येति शेषः। सुबोधम्॥

वरणादिगणक्वाथमपक्वेऽभ्यन्तरोत्थिते।
ऊषकादिप्रतीवापं पूर्वाह्णे विद्रधौ पिबेत् ॥ ८ ॥

घृतं विरेचनैर्द्रव्यैः सिद्धं ताभ्याञ्च पाययेत्।
निरूहं स्नेहवस्तिं च ताभ्यामेव प्रकल्पयेत् ॥ ९ ॥

पानभोजनलेपेषु मधुशिग्रुः प्रयोजितः।
दत्तावापो यथादोषमपक्वं हन्ति विद्रधिम् ॥ १० ॥

त्रायन्तीत्रिफलानिम्बकटुकामधुकं समम्।
त्रिवृत्पटोलमूलाभ्यां चत्वारोंऽशाः पृथक् पृथक् ॥ ११ ॥

मसूरान्निस्तुषादष्टौ तत्क्वाथः सघृतो जयेत्।
विद्रधीगुल्मवीसर्पदाहमोहमदज्वरान् ॥ १२ ॥

तृण्मूर्छाच्छर्दिहृद्रोगपित्तासृक्कुष्ठकामिलाः।

सर्वाङ्गसुन्दरी

वरणादीत्यादि ॥ अभ्यन्तरोत्थिते आन्तरे विद्रधावपक्वे वरणादिगणक्वाथमूषकादिप्रतीवापं पूर्वाह्णे पिबेत्। विरेचनद्रव्यैः सिद्धं घृतं तथा ताभ्यां वरणादिगणोषकादिगणाभ्याञ्च सिद्धं घृतमपक्काभ्यन्तरोत्थिते विद्रधौ पाययेत्। ताभ्यामेव गणाभ्यां निरूहान्वासने कल्पयेत्। पानादिषु मधुशिग्रुः प्रयोजितो यथादोषं दत्तावापो वितीर्णकल्कः सामर्थ्यात्तत्क्वाथोऽपक्वं विद्रधिं हन्ति। त्रायन्त्यादिकं समं समांशं त्रिवृतायाश्चत्वारोंऽशाः पटोलमूलाच्च निस्तुषमसूराद्दष्टावंशाः इत्येतैः क्वाथो घृतसहितो विद्रध्यादीन् पराकुर्यात्॥

शशिलेखा

वरणादीत्यादिना विशेषः। अभ्यन्तरोत्थिते विद्रधावपक्वे वरणादिगणक्वाथमूषकादिगणप्रतीवापं पूर्वाह्णे प्रातः पिबेत्। विरेचनद्रव्याणि निकुम्भकुम्भादीनि शोधनादिगणसंग्रहाध्यायनिर्दिष्टानि। तैः सिद्धं सर्पिः पाययेत्। ताभ्यां वरणादिगणोषकादिगणाभ्याञ्च पक्वं घृतम्। ताभ्यामेव गणाभ्यामास्थापनमनुवासनञ्च प्रकल्पयेत्। पानादिषु मधुशिग्रुर्यथादोषं दोषानुगुण्येन दत्तावापः। त्रायन्तीत्यादि। त्रायन्त्यादीनि शाणांशानि। त्रिफला पृथक्भूता गृह्यते। शाणं कर्षचतुर्थांशः। त्रिवृतः कर्षं पटोलमूलाच्च कर्षम्। मसूरस्यार्धपलमिति चरकसंवादेन पठितम्। सङ्ग्रहे त्वन्यथा पठ्यते। त्रिफलापिचुमन्दमधुककटुकापटोलानि शाणांशानि। त्रिवृत्त्रायमाणयोः कर्षम्। मसूरपलञ्चैकध्यमष्टगुणेऽम्भसि साधयित्वा पूतं रसं घृतमूर्छितं पिबेदित्येतच्च प्रयोगान्तरत्वेन नेयम्॥

कुडवं त्रायमाणायाः साध्यमष्टगुणेऽम्भसि ॥ १३ ॥
कुडवं तद्रसाद्धात्रीस्वरसात् क्षीरतो घृतात्।
कर्षांशं कल्कितं तिक्तात्रायन्तीधन्वयासकम् ॥ १४ ॥
मुस्तातामलकी वीराजीवन्तीचन्दनोत्पलम्।
पचेदेकत्र संयोज्य तद्घृतं पूर्ववद्गुणैः ॥ १५ ॥

सर्वाङ्गसुन्दरी

कुडवमित्यादि ॥ त्रायमाणायाः कुडवमष्टगुणे जले साध्यम्। तद्रसात् त्रायमाणाक्वाथात् कुडवं धात्रीस्वरसात् क्षीरतो घृताच्च प्रत्येकं कुडवं

तिक्तादि प्रत्येकं कर्षांशं कर्षप्रमाणं कल्कीकृतमेकत्र संयोज्य मिश्रयित्वा पचेत्। तदेतत् घृतं पूर्वगुणम् ॥

शशिलेखा

कुडवं त्रायमाणाया इत्यादि ॥ त्रायमाणायाः शुष्कद्रव्यत्वात् कुडवं चत्वारि पलानि ततोऽष्टगुणमुदकं द्वात्रिंशत्पलानि भवन्ति। तानि क्वथितानि चतुर्भागावशेषं कषायमवतारयेत् इति। द्रवत्वात् कुडवमष्टपलं क्वथितशेषं भवति। तावदेव च घृतादिकं द्रव्यात् षोडशगुणं क्वथनजलं देयमित्येषा परिभाषा अष्टगुणेऽम्भसीत्यनेन बाधिता। पादशेषितमवतारयेदित्येषा त्वबाधितैव। अस्य पक्षस्य चरकेण सादृश्यं केवलम्। तत्र त्रायमाणाया दशगुणं जलं दत्वा पञ्चभागावशेषितेनाष्टौ पलानि गृह्यन्ते। अत्र त्वष्टगुणात् पादशेषितत्वेन। अथैवमुच्यते—त्रायमाणाकुडवस्याष्टगुणमम्भोऽष्टौ कुडावनि भवन्ति। तानि च द्रवत्वात् पलमानेन षोडशगुणमेवापद्यन्त इति। तन्न यतो विनाप्यष्टगुणवचः सामान्यपरिभाषयैव द्रव्यात् द्रवस्य षोडशगुणत्वसिद्धेः क्वथितशेषस्य चशब्देन नियतत्वादष्टगुणवचनप्रयोजनमापद्यते। तस्माद्यथोक्तमेव साधु। सङ्ग्रहे विरुद्धमुक्तम्। तथा च तत्र पठितं "त्रायमाणाप्रस्थक्वाथे मुस्तकटुकातामलकीत्रायमाणाचन्दनदुरालभाजीवन्तीवीरोत्पलैः पालिकैर्घृतप्रस्थं क्षीरामलकरसप्रस्थद्वयोपेतं विपक्वं समानं पूर्वेणे"ति। एतच्चैवं व्याख्यायते—त्रायमाणायाः षोडशपलस्य क्वाथपरिभाषया द्वौ क्वाथप्रस्थौ भवतः। यस्मादौषधात् षोडशपलात् क्वाथश्चतुर्गुणश्चतुःषष्टी पलानि भवन्ति। मुस्तादीनि पालिकानि। क्षीरप्रस्थं घृतप्रस्थमामलकरसप्रस्थमित्येवमत्र क्वाथस्य द्वौ प्रस्थौ भवतः। औषधात् षोडशगुणं जलम्। घृतार्धेन च त्रायमाणा। एवञ्च क्वाथस्य घृताद्द्विगुणत्वमौषधाच्च जलस्य षोडशगुणत्वमिति। एतत्सङ्ग्रहोक्तम्। यदानेनैकरूपतया व्याख्यायते, तदा प्रस्थश्चासौ क्वाथः प्रस्थक्वाथः। स च त्रायमाणाया इति ज्ञायते। किन्तु, तद्विरुद्धं घृताच्चतुर्थांशत्वं त्रायमाणाया आपतति। यस्मादत्र घृतसमस्त्रायमाणाक्वाथो हितः घृतार्धेन च त्रायमाणा ॥

द्राक्षा मधूकं खर्जूरं विदारी सशतावरी।
परूषकाणि त्रिफला तत्क्वाथे पाचयेद्घृतम् ॥ १६ ॥

क्षीरेक्षुधात्रीनिर्यासे प्राणदाकल्कसंयुतम्।

तच्छीतं शर्कराक्षौद्रपादिकं पूर्ववद्गुणैः ॥ १७ ॥

हरेच्छृङ्गादिभिरसृक् सिरया वा यथान्तिकम् ।

सर्वाङ्गसुन्दरी

द्राक्षेत्यादि ॥ द्राक्षादिक्काथे क्षीरेक्षुरसधात्रीरसहरीतकीकल्कयुक्तं घृतं सामान्यपरिभाषया पचेत् । तद्घृतं शीतं सच्छर्कर क्षौद्रपादयुतं पूर्वगुणम् । शर्कराक्षौद्रपादिकमित्यतः "इनिठनौ" इति ठन् । शृङ्गादिभी रक्तं हरेत् । सिरया वा यथासमीपमस्रं हरेत् ॥

शशिलेखा

द्राक्षादिके सर्पिषि क्वाथः स्नेहाच्चतुर्गुणः क्षीरमिक्षुरसो धात्रीरसश्चैकीभूतो घृतसमः "कल्पयेत्सदृशान् भागान् प्रमाणं यत्रनोदितम्' इति वचनात् । अन्ये तु क्षीरादिकं पृथक् स्नेहसममि'त वर्णयन्ति । सङ्ग्रहे "पृथक् स्नेहसमं विद्यात् पञ्चप्रभृति तु द्रवम्" इत्युक्तत्वात् । अभयाकल्कः स्नेहाच्चतुर्थांशेन । शर्करा घृतस्य चतुर्थेन भागेन समा । सुबोधम् ॥

विद्रधिं पच्यमानञ्च कोष्ठस्थं बहिरुन्नतम् ॥ १८ ॥

ज्ञात्वोपनाहयेच्छूले स्थिते तत्रैव पिण्डिते ।

तत्पार्श्वपीडनात्सुप्तौ दाहादिष्वल्पकेषु च ॥ १९ ॥

पक्वः स्याद्विद्रधिं भित्वा व्रणवत्तमुपाचरेत् ।

अन्तर्भागस्य चाप्येतच्चिह्नं पक्वस्य विद्रधेः ॥ २० ॥

पक्वः स्रोतांसि संक्लेद्य स यात्यूर्ध्वमधोऽथवा ।

स्वयं प्रवृत्तं तं दोषमुपेक्षेत हिताशनः ॥ २१ ॥

दशाहं द्वादशाहं वा रक्षन् भिषगुपद्रवान् ।

असम्यग्वहति क्लेदे वरणादिं सुखाम्भसा ॥ २२ ॥

पाययेन्मधुशिग्रुं वा यवागूं तेन वा कृताम् ।

यवकोलकुलत्थोत्थयूषैरन्नं च शस्यते ॥ २३ ॥

सर्वाङ्गसुन्दरी

विद्रधिमित्यादि ॥ विद्रधिं कोष्ठस्थं कोष्ठगतं बहिरुन्नतं पच्यमानं बुध्वा उपनाहयेदुपनद्धं कुर्यात्। तत्रैव शूले पक्वस्य पिण्डिते स्थिते तथा यं देशमाश्रित्योन्नद्धस्तिष्ठति, तत्पार्श्वे पीडनेन सुप्तौ स्वपने तथा दाहादिष्वल्पकेषु च। आदिशब्देनोषादयो गृह्यन्ते। एतेषु सत्सु पक्वो विद्रधिः स्यात्। तं भित्वा सञ्छिद्य व्रणवदुपक्रमेत्। अन्तर्भागस्य च विद्रधेरेतदेव चिह्नं लक्ष्म। यदा सः पक्वः सन् स्रोतांसि क्लेदयित्वोऽर्ध्वं प्रयात्यधो वा, तं दोषं स्वयं प्रवृत्तं पतन्तं हिताशन उपेक्षेत। न किञ्चिदुपक्रमान्तरं कुर्वीत। दशाहं द्वादशाहं वा वैद्य उपद्रवान् रक्षन्। दशाहमिति दशानामह्नां समाहार इति समासे "राजाहःसखिभ्यष्टच्" इति टच्। "न संख्यादेः समाहारः" इत्यह्नादेशनिषेधः। 'नस्तद्धितः" इति टिलोपः। "स नपुंसकम्" इति नपुंसकत्वम्। "कालाध्वनोः" इति द्वितीया। असम्यगिति। क्लेदे च यथावदवहति सति वरणादिमुष्णाम्बुना पाययेत्। वैद्य इति शेषः। अथवा मधुशिग्रुं पाययेत्। तेन वा मधुशिग्रुणा कृतां पेयां पाययेत्। यवादिर्जयूषैः सहान्नं भोजनं च शस्यते ॥

शशिलेखा

पच्यमानमित्यादि विद्रधिविशेषणम्। तथाविधं विद्रधिमुपनाहयेत् पिण्डैर्बध्नीयात्। तत्रैवेति। कोष्ठ एव विद्रधौ पिण्डितशूलादिकेन लिङ्गेन पक्वमिति विद्रधिमुपलक्ष्य शस्त्रेण भित्वा व्रणविधानेन साधयेत्। पिण्डितं शूलं विद्रधिनियतत्वाच्छेषाङ्गाव्यापनशीलम्। तथाविधे शूले सति। तथा तस्य विद्रधेः पार्श्वपीडनेन पुरुषस्य स्वप्ने लब्धे सुखेन निद्रायां प्राप्तायाम्। सुबोधम्। अन्तरेव पक्वं स्वयमूर्ध्वमार्गेणाधोमार्गेण वा प्रवृत्तं तं दोषं पूयमुपद्रवान् रक्षन् भिषग्दशरात्रं द्वादशरात्रं वोपेक्षेत। न केनचित्प्रकारेणोपक्रमेतेत्यर्थः। केवलमन्नपानं तथा विधेयं यथोपद्रवेभ्यो रक्षा भवति। यदा तु पूयं प्रवृत्तं न तु सम्यक् तदा तस्य सम्यक् प्रवृत्तये वरणादिकं गणं मधुशिग्रुं वा उष्णोदकेनातुरं पाययेत्। तेनेति वरणादेर्मधुशिग्रोश्च प्रत्यवमर्शः। यवादियूषैरन्नञ्च शस्यते। अश्नीयादित्यर्थः ॥

ऊर्ध्वं दशाहात्त्रायन्तीसर्पिषा तैल्वकेन वा।
शोधयेद्बलतः शुद्धः सक्षौद्रं तिक्तकं पिबेत् ॥ २४ ॥

सर्वशो गुल्मवच्चैनं यथादोषमुपाचरेत्।

सर्वावस्थासु सर्वासु गुल्गुलुं विद्रधीषु च ॥ २५ ॥

कषायैर्यौगिकैर्युञ्ज्यात्स्वैः स्वैस्तद्वच्छिलाजतु ।
पाकं च पालयेद्यत्नात्सिद्धिः पक्वे हि दैविकी ॥ २६ ॥

अपि चाऽऽशु विदाहित्वाद्विद्रधिः सोऽभिधीयते ।
सति चालोचयेन्मेहे प्रमेहाणां चिकित्सितम् ॥ २७ ॥

सर्वाङ्गसुन्दरी

ऊर्ध्वमित्यादि ॥ दशाहादूर्ध्वमनन्तरं त्रायन्तीघृतेन "कुडवं त्राय-माणायाः" इत्यादिना अथवा तैल्वकेन "शम्याकेन त्रिवृतये"त्यादिना शोधयेद्यथाबलम् । शुद्धः सन् क्षौद्रेण सह तिक्तकं घृतं पिबेत् । सर्वेण प्रकारेण गुल्मवच्चैनं विद्रधिं यथादोषमुपक्रमेत् । विद्रधीषु सर्वासु सर्वावस्थासु आमपच्यमानपक्वासु गुल्गुलुं यौगिकैः स्वैः स्वैर्योग्यैः कषायैर्युञ्ज्यात् । तद्वत्तथैव कषायैः सह शिलाजतु युञ्ज्यात् । पाकञ्च यत्नेन पालयेत् यस्मात् पक्वे सति दैविकी सिद्धिर्न तु भिषग्वशानुगेत्यर्थः । आशु च विदाहित्वात्स रोगो विद्रधिरित्युच्यते । तस्मात्तस्य पाकरक्षायां यतितव्यमित्यर्थः । मेहे च सति प्रमेहाणां चिकित्सितमालोचयेत् । चशब्दाद्विद्रधिचिकित्सितोक्तमपि कुर्यात् ॥

शशिलेखा

ऊर्ध्वमित्यादि । सुबोधम् । शुद्धः सन् तिक्तकं सर्पिर्मधुयुतं पिबेत् । पाक-रक्षणाय यत्ने हेतुः शीघ्रविदाहित्वम् । दैविकी सिद्धिः पुरुषयत्नासाध्यत्वात् । विद्रधिमतः प्रमेहे सति प्रमेहचिकित्सितमालोचयेत् । तत्रोक्तेन प्रकारेणापि चिकित्सेदित्यर्थः ॥

स्तनजे व्रणवत्सर्वं न त्वेनमुपनाहयेत् ।
पाटयेत्पालयन् स्तन्यवाहिनीः कृष्णचूचुकौ ॥ २८ ॥

सर्वास्वामाद्यवस्थासु निर्दुहीत च तत्स्तनम् ।

सर्वाङ्गसुन्दरी

स्तनज इत्यादि ॥ स्तनजे विद्रधावुपनाहं वर्जयित्वा सर्वमेव व्रणक्रियाक्रमं कुर्यात् । विद्रधिशब्दः पुंस्त्रीलिङ्गः । स्तनविद्रधिं च पाटयेत् ।

वैद्य इति शेषः। स्तन्यवाहिनीः सिराः कृष्णचूचुकौ च पालयन्। सर्वासु त्वामाद्यवस्थासु तस्य विद्रधेः सम्बन्धिनं स्तनौ निर्दुहीत। आदिशब्दः पच्यमानपक्वावस्थयोर्ग्रहणार्थः॥

शशिलेखा

स्तनज इत्यादि सुबोधम्। उपनाहबन्धेन स्तनः पक्वः क्लेदमवाप्यावदीर्येतेति भावः। पक्वं च स्तनविद्रधिं स्तन्यवाहिनीः सिराः कृष्णमण्डलं चूचुकञ्च पालयन् परिहरन् शस्त्रेण पाटयेत्। सर्वास्वामविदग्धपक्वव्रणावस्थासु तत् स्तनं निर्दुहीत अपनीतक्षीरं कुर्यात्॥

इति विद्रधिचिकित्सा॥

वृद्धिचिकित्सा

विद्रधिचिकित्सितमुक्त्वा वृद्धिचिकित्सितमाह—

शोधयेत्त्रिवृता स्निग्धं वृद्धौ स्नेहैश्चलात्मके ॥ २९ ॥
कौशाम्रतिल्वकैरण्डसुकुमारकमिश्रकैः।
ततोऽनिलघ्ननिर्यूहकल्कस्नेहैर्निरूहयेत् ॥ ३० ॥
रसेन भोजितं यष्टीतैलेनान्वासयेदनु।
स्वेदप्रलेपा वातघ्नाः पक्वे भित्वा व्रणक्रियाः ॥ ३१ ॥

सर्वाङ्गसुन्दरी

शोधयेदित्यादि॥ चलात्मके वृद्धौ सति वृद्धयामयिनं त्रिवृताख्येन स्नेहेन आसमन्तात् स्निग्धं सन्तं शोधयेत्। अत्र च त्रिवृतस्य सामान्योक्तावप्यपक्वस्य न तथा प्रयोगः प्रशस्यत इति पूर्वोक्तया रीत्या विदारीवर्गसिद्धस्योपयोगः कार्य इति केचिन्मन्यन्ते। कैः शोधयेत्—स्नेहैः कौशाम्रादिभिः। सुकुमारकमत्रैव वक्ष्यमाणम्। मिश्रकञ्च गुल्मचिकित्सिते। ततः शोधनादनन्तरं वातघ्नकषायकल्कस्नेहैर्निरूहयेत्। अनु निरूहस्य पश्चान्मांसरसेन भोजितं मधुयष्टिकातैलेनानुवासयेत्। स्वेदाः प्रलेपाश्च वातघ्ना हिताः। पक्वे वृद्धौ भित्वा पाटयित्वा व्रणक्रिया कार्या॥

शशिलेखा

शोधयेदित्यादिना वृद्धिचिकित्सा।. वातजे वृद्धौ त्रिवृतेन स्नेहत्रयेण स्निग्धं स्विन्नञ्चेत्यर्थात् आतुरं वक्ष्यमाणानां कोशाम्रादीनां स्नेहानामन्यतमेन विरेचयेत्। कोशाम्रतिल्वकैरण्डानां फलस्नेहाः। ततो विरेचनादूर्ध्वमनिलघ्नानामौषधानां क्वाथेन तेषामेव च कल्केन स्नेहेन च निरूहयेत्। निरूढञ्च मांसरसेनाशितं मधुयष्ट्या पक्वेन तैलेनान्वासयेत्। वातघ्नः स्वेदादयश्च हिताः। एवमपि वृद्धौ पक्वे सति शस्त्रेण भित्वा व्रणवच्चिकित्सेत्। इति वातवृद्धिः॥

पित्तरक्तोद्भवे वृद्धावामपक्वे यथायथम्।
शोफव्रणक्रियां कुर्यात् प्रततं च हरेदसृक् ॥ ३२ ॥

सर्वाङ्गसुन्दरी

पित्त इत्यादि॥ पित्तरक्तोत्थे वृद्धावामे पक्वे च यथास्वं शोफव्रणक्रियां कुर्यात्। तत्रामे शोफक्रियां पक्वे व्रणक्रियामिति। सततञ्च रक्तमपहरेत्॥

शशिलेखा

पित्तजे रक्तजे च वृद्धावामपक्वे यथायथमिति आमे वक्ष्यमाणपित्तश्वयथुचिकित्सां कुर्यात्। तथापि पक्वे पित्तव्रणचिकित्सां कुर्यादित्यर्थः। लाघवार्थं क्रमभङ्गः। अत्र प्रततञ्चासृं हरेदिति पित्तरक्तवृद्धिः॥

गोमूत्रेण पिबेत् कल्कं श्लैष्मीके पीतदारुजम्।
विम्लापनादृते चाऽत्र श्लेष्मग्रन्थिक्रमो हितः ॥ ३३ ॥

पक्वे च पाटिते तैलमिष्यते व्रणशोधनम्।
सुमनोरुष्कराङ्कोल्लसप्तपर्णेषु साधितम् ॥ ३४ ॥

पटोलनिम्बरजनीविडङ्गकुटजेषु च।

सर्वाङ्गसुन्दरी

गोमूत्रेणेत्यादि॥ श्लैष्मिके वृद्धौ दार्वीकल्कं गोमूत्रेण पिबेत्। अत्र च श्लैष्मिकवृद्धौ विम्लापनमन्तरेण श्लेष्मग्रन्थिचिकित्सितं हितम्। विम्लापनं तैस्तैर्मर्दनोपायैर्मर्दनम्। पक्वे पाटिते च सति सुमनोरुष्करादिभिः कुटजान्तैस्साधितं तैलं व्रणशोधनमिष्यते॥

शशिलेखा

कफवृद्धौ कफशोफवच्चिकित्सेति प्रकरणात् सिद्धम्। तथा च सङ्ग्रहे, "कफवृद्धिमपि कफशोफवत्" इति। पीतदारुजं कल्कं गोमूत्रेण पिबेत्। पीतदारुर्दारुहरिद्रा। देवदारुरित्यन्ये। अत्र च कफवृद्धौ विम्लापनं विलायनं वर्जयित्वाऽन्यः सर्वः श्लेष्मग्रन्थिविहितः क्रमो हितः। पक्वे पाटिते च वृद्धौ सुमनोरुष्करादिसाधितं तैलं व्रणशोधनमिष्यते। "पक्वञ्च पाटितं श्लेष्मव्रणवत्" इति सङ्ग्रहे॥

मेदोजं मूत्रपिष्टेन सुस्विन्नं सुरसादिना ॥ ३५ ॥
शिरोविरेकद्रव्यैर्वा वर्जयन् फलसेवनीम्।
दारयेद्वृद्धिपत्रेण सम्यङ्मेदसि चोद्धृते ॥ ३६ ॥
व्रणं माक्षिककासीससैन्धवप्रतिसारितम्।
सीव्येदभ्यञ्जनं चास्य योज्यं मेदोविशुद्धये ॥ ३७ ॥
मनःशिलैलासुमनोग्रन्थिभल्लातकैः शृतम्।
तैलमाव्रणसन्धानात्स्नेहस्वेदौ च शीलयेत् ॥ ३८ ॥

सर्वाङ्गसुन्दरी

मेदोजमित्यादि ॥ मेदोजं वृद्धिरोगं गोमूत्रपिष्टेन सुरसादिना गणेन सुस्विन्नं शिरोविरेकद्रव्यैर्वा सुस्विन्नं वृद्धिपत्रेण सम्यक् दारयेत्। किं कुर्वन्— फलसेवनीं वर्जयन् परिहरन्। अनन्तरं मेदसि चोद्धृते सति व्रणं माक्षिकादिभिः प्रतिसारितं सीव्येत्। अनन्तरमस्याभ्यञ्जनं तैलं मनःशिलादिभिः कृतं सिद्धं मेदोविशुद्धये योज्यम्। व्रणसन्धानं यावत् स्नेहं स्वेदञ्च शीलयेत्॥

शशिलेखा

मेदोवृद्धिं गोमूत्रपिष्टेन सुरसादिगणेन, अथवा मूत्रपिष्टैः शोधनादिगणोक्तशिरोविरेचनद्रव्यैः सुस्विन्नं कृत्वाऽनन्तरं फलं वृषणं सेवनीञ्च वर्जयन् रक्षन् वृद्धिपत्रेण शस्त्रेण दारयेत्। मेदसि च सम्यगुद्धृते अपनीते व्रणं माक्षिकादिभिः प्रतिसारितं सीव्येत्। अनन्तरमस्य मेदोविशुद्धये मनश्शिलादिभिः सिद्धं तैलमभ्यञ्जनं योज्यम्। सुमनःकाष्ठस्य ग्रन्थिः सुमनोग्रन्थिः। व्रणसन्धानं यावत्तावत् स्नेहस्वेदौ च शीलयेदिति मेदोवृद्धिः॥

मूत्रजं स्वेदितं स्निग्धैर्वस्त्रपट्टेन वेष्टितम् ।
विध्येदधस्तात्सीवन्याः स्रावयेच्च यथोदरम् ॥ ३९ ॥
व्रणश्च स्थगिकाबद्धं रोपयेत् ....

सर्वाङ्गसुन्दरी

मूत्रजमित्यादि ॥ मूत्रजं वृद्धिं सीवन्या अधस्तात् स्निग्धैः स्वेदितं तथा वस्त्रपट्टेन वेष्टितं विध्येत् । जलोदरवच्च स्रावयेत् । द्विद्वारनळिकया पिच्छनळिकया वा क्रमेण । व्रणश्च स्थगिकाख्येन बन्धविशेषेण बद्धं रोपयेत् ।

शशिलेखा

मूत्रजं वृद्धिं स्निग्धैः स्वेदितं वस्त्रपट्टेन वेष्टितं सीवन्या अधस्ताद्यथोदरं विध्येत् स्रावयेच्च । जलोदरव्यधो वक्ष्यमाणः । स्थगिकाबन्धः सूत्रस्थाने प्रदर्शितः ॥

.... आन्त्रहेतुके ।
फलकोशमसम्प्राप्ते चिकित्सा वातवृद्धिवत् ॥ ४० ॥
पचेत् पुनर्नवतुलां तथा दशपलाः पृथक् ।
दशमूलपयस्याश्वगन्धैरण्डशतावरीः ॥ ४१ ॥
द्विदर्भशरकाशेक्षुमूलपोटगळान्विताः ।
वहेऽपामष्टभागस्थे तत्र त्रिंशत्पलं गुडात् ॥ ४२ ॥
प्रस्थमेरण्डतैलस्य द्वौ घृतात् पयसस्तथा ।
आवपेद्द्विपलांशं च कृष्णातन्मूलसैन्धवम् ॥ ४३ ॥
यष्टीमधूकमृद्वीकायवानीनागराणि च ।
तत्सिद्धं सुकुमाराख्यं सुकुमारं रसायनम् ॥ ४४ ॥
वातातपाध्वयानादिपरिहारेष्वयन्त्रणम् ।
प्रयोज्यं सुकुमाराणामीश्वराणां सुखात्मनाम् ॥ ४५ ॥
नृणां स्त्रीवृन्दभर्तॄणामलक्ष्मीकलिनाशनम् ।
सर्वकालोपयोगेन कान्तिलावण्यपुष्टिदम् ॥ ४६ ॥
वर्ध्मविद्रधिगुल्मार्शोयोनिमेढ्रानिलार्तिषु ।
शोफोदरखुडप्लीहाविड्विबन्धेषु चोत्तमम् ॥ ४७ ॥

सर्वाङ्गसुन्दरी

आन्त्रहेतुक इत्यादि ॥ आन्त्रजे वृद्धौ फलकोशमसम्प्राप्ते सति वातवृद्धिसदृशी चिकित्सा कार्या । पुनर्नवस्य तुलां जलस्य वहे पचेत् । द्रोणचतुष्टयं वहः । तथा दशमूलादीनि पृथग्दशपलप्रमाणानि । पोटगलो नळः । अष्टभागशेषे च तस्मिन् गुडात्त्रिंशत्पलान्येरण्डतैलात् प्रस्थं घृतस्य प्रस्थौ द्वौ क्षीरस्य प्रस्थौ क्षिपेत् । द्विपलप्रमाणं पिप्पल्यादिकम् । तदेतत् पक्वं सुकुमारसंज्ञं घृतं रसायनं सुकुमारम् । अत एव वातातपादिष्वयन्त्रणम् । सुकुमाराणामीश्वरादीनां प्रयोज्यम् । अलक्ष्मीकलिघ्नं सर्वकालोपयोगात् । कान्त्यादिदं वध्मार्यादिषु श्रेष्ठम् ॥

शशिलेखा

आन्त्रवृद्धौ पुनः फलकोशौ वृषणावसंप्राप्ते सति वातवृद्धिवच्चिकित्सा कार्येति शेषः । तत्र ह्यान्त्रक्रमेण फलकोशौ यावद्वृद्धिः प्रसरति । पचेदित्यादिना सुकुमाराख्यम् । सुबोधम् । पुनर्नवस्य तुला पलशतम् । दशमूलद्रव्याणि पृथक् दशपलानि । सर्वाभिर्यन्त्रणाभिर्यतो न परिक्लेशयत्यतः सुकुमारं रसायनं वयःस्थापनादिगुणकरत्वात् अयन्त्रणं यथेच्छं सेव्यम् । सुकुमारोत्यर्थमृदुशरीरावयवस्सर्वक्लेशासमर्थः । बाल इत्येके । स्त्रीवृन्दभर्तॄणामिति । क्षीणरेतसामिति वृष्यमित्यर्थः । एषां योज्यम् । सर्वकालोपयोगेनेत्यनेन सदा सेव्यमिति सूचितम् । वर्ध्म वृद्धिः । अनिलार्तयः महान्तो वातव्याधयः । उत्तमं परमौषधम् ॥

यायाद्वर्ध्म न चेच्छान्तिं स्नेहरेकानुवासनैः ।
[1]वस्तिकर्म पुरः कृत्वा वंक्षणस्थं ततो दहेत् ॥ ४८ ॥
अग्निना मार्गरोधार्थं मरुतोऽर्धेन्दुवक्रया ।

सर्वाङ्गसुन्दरी

यायादित्यादि ॥ यदि स्नेहादिभिर्वर्ध्म शान्तिं न गच्छेत्, ततो वस्तिकर्म पुरः पूर्वं कृत्वा वंक्षणस्थितं वर्ध्म मरुतो मार्गरोधार्थमग्निनाऽर्धेन्दुवक्रया शलाकया दहेत् । तत्र या वंक्षणस्था, तां दहेदर्धेन्दुवक्रया ॥

1 "सम्यङ्मार्गविरोधार्थं कोशप्राप्तान्तु वर्जयेदि"ति सुश्रुतः ।

शशिलेखा

स्नेहादिभिः प्रयुक्तैर्यदि वर्ध्म शान्ति न यायात्, ततो वस्तिकर्मपूर्वकं वंक्षणस्थमग्निना दहेत्। दीर्घमपि वंक्षणाभ्यन्तरस्थं दहेदित्यर्थः। केन दहेदित्याह—अर्धचन्द्रवक्रया शलाकया। सा च यन्त्रविधौ प्रदर्शिता "शलाकामान्त्रवर्ध्मनी"त्यादिना। अग्निरपि शलाकास्थो दाहकारणं भवति। शलाकापि। किमर्थं दहेदित्याह—मरुतो वायोर्मार्गरोधार्थम्। अग्निना संकुचितत्वाद्रुद्धमार्गो वायुरान्त्रं न वर्धयति॥

अङ्गुष्ठस्योपरि स्नावपीतं तन्तुनिभं च यत् ॥ ४९ ॥

उत्क्षिप्य सूच्या तत्तिर्यग्दहेच्छित्वा यतो गदः।
ततोऽन्यपार्श्वेऽन्ये त्वाहुर्दहेद्वाऽनामिकाङ्गुलेः ॥ ५० ॥

गुल्मेऽन्यैर्वातकफजे प्लीह्नि चायं विधिः स्मृतः।
कनिष्ठिकानामिकयोर्विश्वभ्यां च यतो गदः ॥ ५१ ॥

सर्वाङ्गसुन्दरी

अङ्गुष्ठेत्यादि॥ यतो यस्मिन् पार्श्वे गदो विद्यते तत्पार्श्वस्थस्याङ्गुष्ठस्योपरि पृष्ठे स्नावपीतं यत्तन्तुतुल्यञ्च, तदुत्क्षिप्य सूच्या तिर्यक् छित्वा अनन्तरं दहेदित्येके वदन्ति। तत इत्यादि—अन्य आचार्या एवमाहुः—गदस्तिष्ठति यतस्ततोऽन्यपार्श्वे अङ्गुष्ठस्योपरि यत् स्नाव तथाविधं तत् पूर्ववद्दहेदिति। अन्ये त्वेवं वदन्ति। अनामिकाजूलेरुपरि यत् स्नाव तथाविधं तत् पूर्ववद्दहेदिति। अङ्गुष्ठविधानेनानामिकाङ्गुलौ स्नाव दहेत्। दक्षिणवामभेदः उभयमते पूर्ववद्व्याख्येयः। अनामिका कनिष्ठिकाया द्वितीया इति। गुल्म इत्यादि। अन्यैराचार्यैर्वातकफजे गुल्मे प्लीह्नि च यमेवानन्तरोक्तो विधिः स्मृतः। तथा विश्वभ्यां वातव्याधिविशेषे यतो यस्मिन् पार्श्वे असौ गदस्तस्मिन् पार्श्वे कनिष्ठिकानामिकयोरुपरि यत् स्नाव पीतं तन्तुसमं तदुत्क्षिप्य तिर्यक् छित्वा दहेदिति॥

शशिलेखा

तथेदमपि कुर्यात्। गदो वर्ध्म यतो यस्मिन् पार्श्वे वामे वा फलकोशे दक्षिणे वा तस्मिन्नेव पार्श्वे पाणावङ्गुष्ठस्योपरि नखमूलमनुप्रवृत्तं वर्णेन पीतं

तन्तुसमञ्च यत् स्नाव तत् सूच्या उत्क्षिप्तं तिर्यक् छित्वा तिर्यगेव दहेत्। अन्ये त्वाचार्या एवमाहुः। यथा यतो गदो वर्ध्म ततोऽन्यपार्श्वे स्नाव छित्वा दहेत्। तेषां मते वामफलकोशजे वर्ध्मनि दक्षिणपाणावङ्गुष्ठस्नाव दहेत्। दक्षिणजे च वामपाण्यङ्गुष्ठजम्। अन्यैराचार्यैः स्नावछेददाहविधिर्वातकफजे गुल्मे प्लीह्नि च स्मृतः। विश्वभ्याञ्च कनिष्ठिकाया अनामिकायाश्च स्नावच्छेदन मिच्छन्ति। यतो गद इति यस्मिन्नेव पार्श्वे गदो विश्वभी तस्मिन्नेव पाणावित्यर्थः। विश्वभीप्रयोगात् सर्वत्र पाणिमनुमीमहे। विश्वभी वातव्याधौ बाहुकण्डराविकार उक्तः॥

इति चिकित्सिते त्रयोदशोऽध्यायः॥

चतुर्दशोऽध्यायः

वृद्धिचिकित्सितादनन्तरं गुल्मचिकित्सितमारभ्यते । संबन्धश्चास्य प्रायेणैकयोगक्षेमत्वं वातकफजत्वात् ॥

अथातो गुल्मचिकित्सितं नामाध्यायं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ॥

गुल्मं बद्धशकृद्वातं वातिकं तीव्रवेदनम् ।
रूक्षशीतोद्भवं तैलैः साधयेद्वातरोगिकैः ॥ १ ॥

पानानुवासनाभ्यङ्गैः स्निग्धस्य स्वेदमाचरेत् ।
आनाहवेदनास्तम्भविबन्धेषु विशेषतः ॥ २ ॥

स्रोतसां मार्दवं कृत्वा जित्वा मारुतमुल्बणम् ।
भित्वा विबन्धं स्निग्धस्य स्वेदो गुल्ममपोहति ॥ ३ ॥

स्नेहपानं हितं गुल्मे विशेषेणोऽर्ध्वनाभिजे ।
पक्वाशयगते वस्तिरुभयं जठराश्रये ॥ ४ ॥

दीप्तेऽग्नौ वातिके गुल्मे विबन्धेऽनिलवर्चसोः ।
बृंहणान्यन्नपानानि स्निग्धोष्णानि प्रदापयेत् ॥ ५ ॥

पुनः पुनः स्नेहपानं निरूहाः सानुवासनाः ।
प्रयोज्या वातजे गुल्मे कफपित्तानुरक्षिणा ॥ ६ ॥

वस्तिकर्म परं विद्याद्गुल्मघ्नं तद्धि मारुतम् ।
स्वस्थाने प्रथमं जित्वा सद्यो गुल्ममपोहति ॥ ७ ॥

तस्मादभीक्ष्णशो गुल्मा निरूहैः सानुवासनैः ।
प्रयुज्यमानैश्शाम्यन्ति वातपित्तकफात्मकाः ॥ ८ ॥

सर्वाङ्गसुन्दरी

गुल्मेत्यादि ॥ वातिकं गुल्मं रूक्षशीतोत्थं बद्धशकृद्वातं तीव्रवेदनं तैलैर्वातामयविहितैरुपक्रमेत् । तथा पानानुवासनाभ्यङ्गैः स्निग्धस्य सतः स्वेदमाचरेत् । पानशब्देनेह स्नेहपानं वेद्यम् । स्निग्धस्येति वचनात् । आनाहादिषु विशेषेण स्वेदमाचरेत् । यस्मात् स्वेदः स्निग्धस्य पुंसः स्रोतोमृदुत्वं विधाय मारुतमुल्बणञ्च जित्वा तथा विबन्धं भित्वा गुल्ममपोहति । गुल्मे स्नेहपानं हितम् । ऊर्ध्वनाभिजे गुल्मे विशेषेण स्नेहपानं हितम् । पक्वाशयगते वस्तिर्हितः । जठराश्रये गुल्म उभयं स्नेहपानवस्त्याख्यं हितम् । वातिके गुल्मेऽग्नौ विवृद्धे सति वातशकृतोश्च विबन्धे सति बृंहणान्यन्नपानानि स्निग्धोष्णानि च प्रयोजयेत् । तथा पुनः पुनः स्नेहपानं प्रदापयेत् । निरूहाश्च सहानुवासना वातिके गुल्मे कफपित्तानुरक्षिणा भिषजा प्रयोज्याः । वस्तिकर्म परमतिशयेन गुल्मघ्नं विद्यात् । यस्मात्तद्वस्तिकर्म स्वे स्थाने पक्वाशयाख्ये प्रथमं पवनं जित्वा सद्यः शीघ्रं गुल्मं जयति । यत एवं तस्मात् कारणात् नित्यं गुल्मा निरूहैः सानुवासनैः प्रयुज्यमानैः शाम्यन्ति वातपित्तकफोत्थाः ॥

शशिलेखा

बद्धशकृद्वातादिकं वातिकं गुल्मं वातव्याधिविहितैस्तैलैः साधयेत् । पानानुवासनाभ्यामन्तरभ्यङ्गेन बहिश्च स्निग्धस्य स्वेदमाचरेत् कुर्यात् । आनाहादिषु विशेषतः विशेषेण । अत्रैव हेतुः । स्रोतसामित्यादि सुबोधम् । स्नेहपानमित्यादिना वातगुल्म एव विशेषमाह । वातगुल्मेऽग्नौ दीप्तेऽनलवर्चसोर्विबन्धे सति बृंहणानि स्निग्धोष्णानि चान्नपानानि प्रदापयेत् । तथा वातगुल्मे कफपित्तानुरक्षिणा सता भिषजा पुनः पुनः स्नेहपानादयः प्रयोज्याः । सुबोधम् ॥

हिङ्गुसौवर्चलव्योषबिडदाडिमदीप्यकैः ।
पुष्कराजाजिधान्याम्लवेतसक्षारचित्रकैः ॥ ९ ॥

शठीचव्याजगन्धैलासुरसैर्दधिसंयुतैः ।
शूलानाहहरं सर्पिः साधयेद्वातगुल्मिनाम् ॥ १० ॥

हपुषोषणपृथ्वीकापञ्चकोलकदीप्यकैः ।
साजाजीसैन्धवैर्दध्ना दुग्धेन च रसेन च ॥ ११ ॥

डाडिमान्मूलकात् कोलात् पचेत्सर्पिर्निहन्ति तत् ।
वातगुल्मोदरानाहपार्श्वहृत्कोष्ठवेदनाः ॥ १२ ॥

योन्यर्शोग्रहणीदोषकासश्वासारुचिज्वरान् ।

सर्वाङ्गसुन्दरी

हिङ्गुसौवर्चलेत्यादि ॥ हिङ्ग्वादिभिर्दधियुक्तं घृतं साधयेत् । तच्च वातगुल्मवतां शूलादिजित् । द्रव्येभ्यश्चतुर्गुणं घृतम् । घृतसमं दधि । घृताच्चतुर्गुणं जलमित्यत्र पाकक्रमः । हपुषादिभिर्घृताच्चतुर्थांशैर्द्रव्यैर्दधिदुग्धाभ्यां डाडिममूलकबदररसैः सर्पिः पचेत् । तत् घृतं वातगुल्मादीन् पराकुर्यात् ॥

शशिलेखा

हिङ्ग्वादिभिर्दधिसमं सर्पिर्विपक्वं वातगुल्मिनां शूलादिहरम् । हपुषादिभिश्चूर्णीकृतैर्दधिदुग्धाभ्यां कोलादित्रयरसैश्चेति पञ्चभिर्द्रवैः पृथक् स्नेहसमैः पक्वं सर्पिर्वातगुल्मादीन्निहन्ति । पृथ्वीका हिङ्गुपत्रिका । दीप्यकोऽजमोदः । कोलं बदरम् । अत्र योनिशब्देन योनिरोगः ॥

दशमूलं बलां कालां सुषवीं द्वौ पुनर्नवौ ॥ १३ ॥

पौष्करैरण्डरास्नाश्वगन्धभार्ङ्ग्यमृताशठीः ।
पचेद्गन्धपलाशं च द्रोणेऽपां द्विपलोन्मितम् ॥ १४ ॥

यवैः कोलैः कुलत्थैश्च माषैश्च प्रास्थिकैस्सह ।
क्वाथेऽस्मिन् दधिपात्रे च घृतप्रस्थं विपाचयेत् ॥ १५ ॥

स्वरसैर्डाडिमाम्रातमातुलुङ्गोद्भवैर्युतम् ।
तथा तुषाम्बुधान्याम्लशुक्तैः श्लक्ष्णैश्च कल्कितैः ॥ १६ ॥

भार्ङ्गीतुम्बुरुपड्ग्रन्थाग्रन्थिरास्नाग्निधान्यकैः ।
यवानकयवान्यम्लवेतसासितजीरकैः ॥ १७ ॥

अजाजीहिङ्गुहपुषाकारवीवृषकोषकैः ।
निकुम्भकुम्भमूर्वेभपिप्पलीवेल्लडाडिमैः ॥ १८ ॥

श्वदंष्ट्रात्रपुसैर्वारुबीजहिंस्राश्मभेदकैः ।
मिसिद्विक्षारसुरसशारिवानीलिनीफलैः ॥ १९ ॥

त्रिकटुत्रिपटूपेतैर्दाधिकं तद्व्यपोहति ॥
रोगानाशुतरान् पूर्वान् कष्टानपि च शीलितम् ॥ २० ॥

अपस्मारगरोन्मादमूत्राघातानिलामयान् ।
त्र्यूषणत्रिफलाधान्यचविकावेल्लचित्रकैः ॥ २१ ॥

कल्कीकृतैर्घृतं पक्वं सक्षीरं वातगुल्मनुत् ।

सर्वाङ्गसुन्दरी

दशमूलमित्यादि ॥ दशमूलादीन् पृथग्द्विपलप्रमाणान् यवादिभिः प्रस्थप्रमाणैः सह जलद्रोणे पचेत् । काळा नीलिनी । सुषवी स्थूलजीरकः । गन्धपलाशो गन्धपलम् । अस्मिन् क्वाथे सामान्यपरिभाषया कृते दधिपात्रे च घृतप्रस्थं विपाचयेत् । किंभूतम्—डाडिमादिजैः स्वरसैस्तुषाम्ब्वादिभिश्च सर्पिःसमैर्युतम् । तथा भाङ्गर्यादिभिः कल्कीकृतैरुपेतम् । यवानको यवानीभेदः । कारवी अजमोदः । वृषको वाशा । ऊषक ऊषरः । इभपिप्पली हस्तिपिप्पली । अश्मभेदः पाषाणभेदः । तदेतद्दाधिकं नाम घृतं पूर्वोक्तानामयान् द्राक्तरां हन्ति । अपस्मारादींश्च कष्टान् कृच्छ्रानप्यभ्यस्तं हन्ति । यदि चात्र स्वरसालाभस्तदा तन्त्रान्तरोक्ता कल्पना कार्या । तन्त्रान्तरे चोऽक्तम्—"प्रस्थं गृहीत्वा चूर्णस्य तोयस्य प्रस्थमावपेत् । अहोरात्रं स्थितं पूतं तद्धि स्वरसवद् गुणैः" इति । मुनिरप्यूचे-"स्वरसानामलाभे त्वयं विधिः । चूर्णानामाढकमाढकमुदकस्याहोरात्रस्थितं मृदितं पूतमावपेत् । तत्स्वरसवद् भवेत्" इति । त्र्यूषणादिभिः कल्कीकृतैर्घृतं समानक्षीरं चतुर्गुणजलं पक्वं वातगुल्मं नुदति ॥

शशिलेखा

दशमूलादिना दाधिकाख्यं सर्पिः । दशमूलादीनि द्विपलांशानि । दशमूलद्रव्याणि पृथक् यवादीनां प्रत्येकं प्रस्थं डाडिमादिफलरसाः तुषाम्ब्वादित्रयञ्च पृथक् पृथक् घृतसमम् । भाङ्गर्यादिकल्कः स्नेहाचतुर्थांशेन । सुषवी उपकुञ्चिका । गन्धपलाशः गन्धपलम् । आम्रातं कपीतनकम् । तुषाम्बु सतुषैर्यवैः कृतमुदकम् । धान्याम्लं काञ्चिकम् । तुम्बुरु धाना । षड्ग्रन्था वचा । यवानकः यवानीभेदः । वृषकः अटरूषकः । ऊषको वातसाह्वयः । तदेव सिंहमूत्रम् । निकुम्भः दन्ती । कुम्भः द्रवन्ती । इभपिप्पली गजपिप्पली । श्वदंष्ट्रा गोक्षुरकः ।

त्रपुसस्योर्वारोश्च बीजम् । हिंस्रा मांसी । अश्ममेदकोऽश्मन्तकः । मिसिः शतपुष्पा । क्षुरसं प्रसिद्धं हरितकद्रव्यम् । नीलिन्याः फलानि । तत् घृतं पूर्वान् हपुषाद्युक्तान् वातगुल्मादीन् कुष्ठान् कुष्ठानपस्मारादींश्च हन्ति । त्र्यूषणादिभिः कल्कीकृतैः समक्षीरं पक्वं सर्पिर्वातगुल्मनुत् । चविका पिप्पलीमूलं चव्यं चेति मन्तव्यम् । सङ्ग्रहे पञ्चकोलोपादानात् । त्र्यूषणस्य पृथगन्यसमत्वम् । पानीयेन विना द्रव्याणि रसं न स्यन्दन्तीति सर्वत्र स्मर्तव्यम् ॥

तुलां लशुनकन्दानां पृथक् पञ्चपलांशकम् ॥ २२ ॥
पञ्चमूलं महच्चाम्बुभारार्धे तद्विपाचयेत् ।
पादशेषं तदर्धेन डाडिमस्वरसं सुराम् ॥ २३ ॥
धान्याम्लं दधि चादाय पिष्टांश्चार्धपलांशकान् ।
त्र्यूषणत्रिफलाहिङ्गुयवानीचव्यदीप्यकान् ॥ २४ ॥
साम्लवेतससिन्धूत्थदेवदारून् पचेद् घृतात् ।
तैः प्रस्थं तत् परं सर्ववातगुल्मविकारजित् ॥ २५ ॥
षट्पलं वा पिबेत् सर्पिर्यदुक्तं राजयक्ष्मणि ।
प्रसन्नया वा क्षीरार्थः सुरया डाडिमेन वा ॥ २६ ॥
घृते मारुतगुल्मघ्ने कार्यो दध्नः सरेण वा ।

सर्वाङ्गसुन्दरी

तुलामित्यादि ॥ लशुनकन्दानां तुला=पलशतम् । महत् पञ्चमूलं च प्रत्येकं पञ्चपलद्यम् । तदेतत्तोयाढ्शशतपले पादशेषं विपाचयेत् । पादशेषादर्धेन डाडिमस्वरसं सुरां धान्याम्लं दधि चादाय गृहीत्वा त्र्यूषणादींश्च द्विकार्षिकानादाय तैर्घृतात् प्रस्थं पचेत् । तत् घृतं परं सर्ववातगुल्मविकारजित् । राजयक्ष्मचिकित्सिते यदुक्तं षट्पलं घृतं तद्वा पिबेत् । राजयक्ष्मणीति विशेषणं स्पष्टार्थम् । मारुतगुल्मघ्ने घृते क्षीरार्थः प्रसन्नया वा कार्यः । अथवा सुरया डाडिमेन वा । दधिसरेण वा । डाडिमो डाडिमस्वरसः । एवं क्षीरं हित्वा प्रसन्नाद्यन्यतमेन साधितं घृतं वातगुल्मजित् ॥

शशिलेखा

लशुनकन्दानां पलशतम् । महत् पञ्चमूलं पृथक् प्रत्येकं पञ्चपलिकं च तदेतदम्बुभारार्धे जलपलसहस्रके पादशेषं सार्धपलशतद्वयं विपाचयेत् । सुरादि-

चतुष्टयञ्च प्रत्येकं क्वाथादर्धांशं सपादं पलशतम् । त्र्यूषणादीन्यर्धपलिकानि । घृतात् प्रस्थं द्वात्रिंशत् पलानि । राजयक्ष्मणि राजयक्ष्मचिकित्सिते । मारुतगुल्मघ्ने घृते यत्र त्वातुराद्यपेक्षया क्षीराधिक्यता शङ्क्यते, तत्र तदेव घृतं क्षीरस्थाने दोषाद्यपेक्षयैव प्रसन्नादीनामन्यतमं क्षीरप्रमाणेन दत्वा तेन सह पचेत् ॥

वातगुल्मे कफो वृद्धो हत्वाग्निमरुचिं यदि ॥ २७ ॥
हृल्लासं गौरवं तन्द्रां जनयेदुल्लिखेत्तु तम् ।
शूलानाहविबन्धेषु ज्ञात्वा सस्नेहमाशयम् ॥ २८ ॥
निर्यूहचूर्णवटकाः प्रयोज्या घृतभेषजैः ।
कोलदाडिमघर्माम्बुतक्रमद्याम्लकाञ्जिकैः ॥ २९ ॥
मण्डेन वा पिबेत् प्रातश्चूर्णान्यन्नस्य वा पुरः ।
चूर्णानि मातुलुङ्गस्य भावितान्यसकृद्रसे ॥ ३० ॥
कुर्वीत कार्मुकतरान् वटकान् कफवातयोः ।

सर्वाङ्गसुन्दरी

वातगुल्म इत्यादि ॥ वातगुल्मे श्लेष्मा वृद्धः सन्नग्निं हत्वा यद्यरुच्यादीन् जनयेत्तदा तु तं कफमुल्लिखेदुद्वमेत् । शूलादिषु सत्सु सस्नेहमाशयं ज्ञात्वा घृतभेषजैरनन्तरोक्तानां घृतानामौषधैः क्वाथचूर्णगुलिकाः प्रयोज्याः कोलाद्यम्बुभिस्तक्रादिभिर्वा प्रातश्चूर्णानि घृतौषधीनां सम्बन्धीनि मण्डेन वा सह पिबेत् । अथवाऽन्नस्याहारस्य पुरः पूर्वं पिबेत् । चूर्णानि मातुलुङ्गरसेन मुहुर्मुहुर्भावितानि वटकान् कर्मकरणसमर्थान् कुर्वीत । कफवातयोः कफवातिके गुल्म इत्यर्थः ॥

शशिलेखा

पूर्वं कफपित्तानुरक्षिणेत्युक्तम् । वातगुल्मे तु यदि भिषक् कफं न रक्षति, ततः स्नेहादिभिर्वृद्धः श्लेष्माऽग्निं हत्वा गुल्मिनोऽरुच्यादीन् जनयेत्तं कफमुल्लिखेत् । उल्लेखनं वमनम् । शूलादिष्वर्थात्तत्कृतेष्वाशयं सस्नेहं ज्ञात्वाऽनन्तरोक्तैर्घृतौषधैर्निर्यूहादयः प्रयोज्याः । निर्यूहः क्वाथः । चूर्णानि प्रातरथवाऽऽहारस्य पूर्वं कोलाम्ब्वादीनामन्यतमेन पिबेत् । कोलं बदरम् । तत्सिद्धमम्बु । घर्माम्बु उष्णोदकम् । सुबोधम् ॥

हिङ्गुवचाविजयापशुगन्धा-
डाडिमदीप्यकधान्यकपाठाः ।
पुष्करमूलशठीहपुषाग्नि-
क्षारयुगत्रिपटुत्रिकटूनि ॥ ३१ ॥

साजाजिचव्यं सहतिन्त्रिणीकं
सवेतसाम्लं विनिहन्ति चूर्णम् ।
हृत्पार्श्वबस्तित्रिकयोनिपायु-
शूलानि वाय्वामकफोद्भवानि ॥ ३२ ॥

कृच्छ्रान् गुल्मान् वातविण्मूत्रसङ्गं
कण्ठे बन्धं हृद्ग्रहं पाण्डुरोगम् ।
अन्नाश्रद्धाप्लीहदुर्नामहिध्मा-
वर्ध्माध्मानश्वासकासाग्निसादान् ॥ ३३ ॥

लवणयवानीदीप्यक-
कणनागरमुत्तरोत्तरं वृद्धम् ।
सर्वसमांशहरीतकि
चूर्णं वैश्वानरः साक्षात् ॥ ३४ ॥

त्रिकटुकमजमोदं सैन्धवं जीरके द्वे
समधरणधृतानामष्टमो हिङ्गुभागः ।
प्रथमकवळभोज्यः सर्पिषा चूर्णकोऽयं
जनयति जठराग्निं वातगुल्मं निहन्ति ॥ ३५ ॥

हिङ्गूग्राविडशुण्ठ्यजाजिविजया-
वाट्याभिधानामयै-
श्चूर्णः कुम्भनिकुम्भमूलसहितै-
र्भागोत्तरं वर्धितैः ।
पीतः कोष्णजलेन कोष्ठजरुजा-
गुल्मोदरादीनयं
शार्दूलः प्रसभं प्रमथ्य हरति
व्याधीन् मृगौघानिव ॥ ३६ ॥

सिन्धूत्थपथ्याकणदीप्यकानां
चूर्णानि तोयैः पिबतां कवोष्णैः ।
प्रयाति नाशं कफवातजन्मा
नाराचनिर्भिन्न इवामयौघः ॥ ३७ ॥

पूतीकपत्रगजचिर्भिटचव्यवह्नि-
व्योषश्च संस्तरचितं लवणोपधानम् ।
दग्ध्वा विचूर्ण्य दधिमस्तुयुतं प्रयोज्यं
गुल्मोदरश्वयथुपाण्डुगदोद्भवेषु ॥ ३८ ॥

सर्वाङ्गसुन्दरी

हिङ्गुवचेत्यादि ॥ हिङ्ग्वादिकमेतच्चूर्णं हृच्छूलादीन्निहन्ति । तथा कृच्छ्रगुल्मादींश्च । दोषकोपजातिशालिन्यः । लवणादिकं क्रमेणोत्तरोत्तरं वृद्धं सर्वसमभागा हरीतकीति चूर्णमेतत् साक्षाद्वैश्वानरो दीपनगुणसामान्यात् । वृत्तमार्या । त्रिकटुकादीनां सप्तानां समधरणधृतानां समप्रमाणस्थापितानां हिङ्गुभागोऽष्टमो देय इत्यध्याहार्यम् । केचित्त्वेवं व्याख्यानयन्ति । धरण-शब्देन पलस्य दशमो भाग उच्यते । धरणेन धृताः धरणधृताः । समाश्च ते धरणधृताश्च तेषां समधरणधृतानां त्रिकटुकादीनामष्टमो हिङ्गुभागो देय इति । स च प्रथमकबळेन भोज्यो भक्षणीयः । सर्पिषा मिश्रितः अयञ्च जठराग्निं जनयति । वातगुल्मञ्च हन्ति । हिङ्गूग्रेत्यादिभिर्भागोत्तरमंशाधिकं वर्धितैश्चूर्णः कोष्णजलेन पीतो जठररुजादीनपाकरोति । अयं शार्दूलाख्यश्चूर्णो हठात् प्रमथ्य व्याधीन् मृगौघानिव । शार्दूलः व्याघ्रः । श्लेषोपमालङ्कारः । तथा शार्दूलशब्देन शार्दूलविक्रीडितं वृत्तमप्युपलक्ष्यते । यथा भीमशब्देन भीम-सेन इति । शार्दूलविक्रीडितं वृत्तम् । सिन्धूत्थादीनां चूर्णानि कोष्णैस्तोयैः पिबतां कफवातजो रोगसङ्घः नाशं प्रयाति । क इव । नाराचेन निर्भिन्न इवेत्युपमा । उपजातिर्वृत्तम् । पूतिकादिद्रव्यं संस्तरचितं यथाक्रमनिर्दिष्ट-मुपर्युपरिभावेन संस्तीर्णं तथा लवणोपधानं लवणं सर्वोपर्युपधानवद्दत्वाऽनन्तरं दग्ध्वा संचूर्ण्य ततो दधिमस्तुना युतं गुल्मादिषु प्रयोज्यम् । वसन्ततिलकं वृत्तम् ॥

शशिलेखा

हिङ्ग्वादीनां चूर्णं यथोक्तेन प्रकारेण दोषादीनपेक्ष्य यः पिबेत्, तस्य हृदयाद्याश्रितं शूलं प्रणश्येत्। कृच्छ्रगुल्मादयश्च प्रणश्येरन्। वेतसाम्लः अम्लवेतसः। मिसिः शतपुष्पा। लवणादिकैश्चूर्णं वैश्वानरः वैश्वानरसंज्ञः। अग्निसन्धुक्षणं करोतीति नाममात्रेणद्योतयति। त्रिकटुकाद्यमष्टचूर्णम्। सुबोधम्। सर्पिषा मिश्रीकृत्य प्रथमकबळेन भोज्यः। हिङ्गूग्रादिभिः शार्दूलचूर्णः उष्णाम्बुना पीतः कोष्ठरुजादीन् हरति। सिन्धूत्थादिभिर्नाराचकश्चूर्णः कफवातजेषु कोष्ठरोगेषूष्णाम्बुभिः पातव्यः। पूतीकादीनां क्षारः दधिमस्तुना युतः गुल्मादिघ्नः। इति वातगुल्मे चिकित्स्यमाने भिषगादिदोषाद्या श्लेष्मणो वृद्धिस्तत्र चिकित्सोक्ता॥

हिङ्गुत्रिगुण सैन्धवमस्मात्त्रिगुणं तु तैलमैरण्डम्।
तत्त्रिगुणरसोनरसं गुल्मोदरवर्ध्मशूलघ्नम् ॥ ३९ ॥

मातुलुङ्गरसो हिङ्गु डाडिमं बिडसैन्धवम्।
सुरामण्डेन पातव्यं वातगुल्मरुजापहम् ॥ ४० ॥

सर्वाङ्गसुन्दरी

हिङ्गुत्रिगुणमित्यादि॥ सैन्धवं हिङ्गुतस्त्रिगुणम्। अस्माच्च सैन्धवादेरण्डतैलं त्रिगुणम्। तस्माच्चैरण्डतैलात्त्रिगुणं रसोनस्य रसम्। तदेतत् गुल्मादिघ्नम्। आर्यावृत्तम्। मातुलुङ्गरसादिकं सुरामण्डेन पातव्यं वातगुल्मरुजापहम्॥

शशिलेखा

हिङ्गुत्रिगुणादिकमेरण्डतैलं गुल्मादिघ्नम्। वर्ध्म वृद्धिः। मातुलुङ्गरसादिकं सुरामण्डेन पीतं वातगुल्मादिघ्नम्। सुबोधम्॥

शुण्ठ्याः कर्षं गुडस्य द्वौ धौतात् कृष्णतिलात् पलम्।
खादन्नेकत्र संचूर्ण्य कोष्णक्षीरानुपो जयेत्। ॥ ४१ ॥

वातहृद्रोगगुल्मार्शोयोनिशूलशकृद्ग्रहान्।
पिबेदेरण्डतैलं वा वातगुल्मी प्रसन्नया ॥ ४२ ॥

श्लेष्मण्यनुगते वायौ पित्ते तु पयसा सह।

सर्वाङ्गसुन्दरी

शुण्ठ्या इत्यादि ॥ शुण्ठ्याः कर्षो गुडस्य द्वौ कर्षौ लुञ्चितकृष्णतिलात् पलमित्येकत्र मिश्रयित्वा खादन् कोष्णक्षीरानुपः सन् वातहृद्रोगादीन् जयेत् । वाते वातकफानुगे सत्येरण्डतैलं प्रसन्नया सह वातगुल्मवान् पिबेत् । पित्तानुगते पयसा सह पिबेत् ॥

शशिलेखा

शुण्ठ्याः कर्षमित्यादि सुबोधम् । धौतं त्याजितत्वक् । वायौ श्लेष्मण्यनुबले सति वातगुल्मी प्रसन्नया सुरामण्डेन मिश्रमेरण्डतैलं पिबेत् । पित्ते त्वनुबले पयसा क्षीरेण सहैरण्डतैलं पिबेत् ॥

विवृद्धं यदि वा पित्तं सन्तापं वातगुल्मिनः ॥ ४३ ॥
कुर्याद्विरेचनीयोऽसौ सस्नेहैरानुलोमिकैः ।
तापानुवृत्तावेवञ्च रक्तं तस्याऽवसेचयेत् ॥ ४४ ॥

सर्वाङ्गसुन्दरी

विवृद्धमित्यादि ॥ वातगुल्मिनः पित्तं विवृद्धं यदि सन्तापं कुर्यात्तदा असौ वातगुल्मी विरेचनीयो विरेचनार्हः । कैः—आनुलोमिकैर्द्रव्यैः स्नेहयुतैः । एवं विरिक्तस्यापि तापानुवर्तने सति तस्य रक्तमवसेचयेत् रक्तस्रावं कुर्यात् ॥

शशिलेखा

विवृद्धं यदि वा पित्तमित्यादिना वातगुल्म एव चिकित्स्यमाने अरक्षया विवृद्धस्य पित्तस्य चिकित्सोच्यते । यदि वा वातगुल्मिनः पित्तं विवृद्धमत्युद्धतं सन्तापं जनयेत्तदाऽसौ वातगुल्मी स्नेहयुतैरानुलोमिकैर्द्रव्यैर्विरेचनीयः । एवं विरिक्तस्यापि तापस्यानुवृत्तौ सत्यां तस्य गुल्मिनो रक्तमवसेचयेत् गुल्मस्थानाद्रक्तस्रावं कुर्यात् ॥

साधयेच्छुद्धशुष्कस्य लशुनस्य चतुष्पलम् ।
क्षीरोदकेऽष्टगुणिते क्षीरशेषञ्च पाचयेत् ॥ ४५ ॥

वातगुल्ममुदावर्तं गृध्रसीं विषमज्वरम् ।
हृद्रोगं विद्रधिं शोषं साधयत्याशु तत् पयः ॥ ४६ ॥

तैलं प्रसन्नागोमूत्रमारनालं यवाग्रजः ।
गुल्मं जठरमानाहं पीतमेकत्र साधयेत् ॥ ४७ ॥

चित्रकग्रन्थिकैरण्डशुण्ठीक्वाथः परं हितः ।
शूलानाहविबन्धेषु सहिङ्गुविडसैन्धवः ॥ ४८ ॥

पुष्करैरण्डयोर्मूलं यवधन्वयवासकम् ।
जलेन कथितं पीतं कोष्ठदाहरुजापहम् ॥ ४९ ॥

वाट्याह्वैरण्डदर्भाणां मूलं दारु सहौषधम् ।
पीतं निष्क्वाथ्य तोयेन कोष्ठपृष्ठांसशूलजित् ॥ ५० ॥

शिलाजं पयसाऽनल्पपञ्चमूलशृतेन वा ।
वातगुल्मी पिबेद्वाट्यमुदावर्ते तु भोजयेत् ॥ ५१ ॥

स्निग्धं पैप्पलिकैर्यूषैर्मूलकानां रसेन वा ।
बद्धविण्मारुतोऽश्नीयात् क्षीरेणोष्णेन यावकम् ॥ ५२ ॥

कुल्माषान्वा बहुस्नेहान् भक्षयेल्लवणोत्तरान् ।

सर्वाङ्गसुन्दरी

साधयेदित्यादि ॥ क्षीरञ्चोदकञ्च क्षीरोदकं तस्मिन् लशुनादष्टगुणिते शुद्धशुष्कस्य लशुनस्य चतुष्पलं साधयेत् । ततः क्षीरशेषं विपाचयेत् । तत् क्षीरं वातगुल्मादीनभीभवति । तैलादिकं मिळितं पीतं गुल्मादीन् हन्ति । चित्रकादिक्वाथो हिङ्ग्वादियुतः परं शूलादिषु हितः । पुष्करैरण्डमूलादिकं जलेन क्वथितं पीतं कोष्ठदाहादिहृत् । वाट्याह्वादीनां बलादीनां मूलं देवदार्वादि च तोयेन क्वथितं पीतं कोष्ठादिशूलजित् । वाट्याह्वो बला । शिलाजतु वा महत्पञ्चमूलक्वथितेन क्षीरेण सह वातगुल्मी पिबेत् । उदावर्ते तु सति वाट्यं यवोदनं स्निग्धं सस्नेहं पिप्पलीसंस्कृतैर्यूषैः सह भोजयेत् । अथवा मूलकरसेन।श्नियात । बद्धविण्मारुतः उष्णेन क्षीरेण यावकं यवोदनमश्नीयात् । अथवा कुल्माषान् बहुस्नेहान् लवणप्रधानान् भक्षयेत् ।

शशिलेखा

साधयेदित्यादि सुबोधम् । तत् लशुनसिद्धं पयः क्षीरं घनीभूतं पीतमाशु गुल्मादीन् साधयत्यभिभवति । तैलादिकं यवाक्षारान्तं सर्वञ्च समांशं

पीतं गुल्मादिहरम्। सुबोधम्। महत्पञ्चमूलसंस्कृतेन क्षीरेण सह शिलाजतु वा पिबेत्। सुबोधम्॥

नीलिनीत्रिवृतादन्तीपथ्याकम्पिल्लकैः सह ॥ ५३ ॥
समलाय घृतं देयं सबिडक्षारनागरम्।
नीलिनीं त्रिफलां रास्नां बलां कटुकरोहिणीम् ॥ ५४ ॥
पचेद्विडङ्गं व्याघ्रीं च पालिकानि जलाढके।
रसेऽष्टभागशेषे तु घृतप्रस्थं विपाचयेत् ॥ ५५ ॥
दध्नः प्रस्थेन संयोज्य सुधाक्षीरपलेन च।
ततो घृतपलं दद्याद्यवागूमण्डमिश्रितम् ॥ ५६ ॥
जीर्णे सम्यग्विरिक्तश्च भोजयेद्रसभोजनम्।
गुल्मकुष्ठोदरव्यङ्गशोफपाण्ड्वामयज्वरान् ॥ ५७ ॥
श्वित्रं प्लीहानमुन्मादं हन्त्येतन्नीलिनीघृतम्।
कुक्कुटाश्च मयूराश्च तित्तिरिक्रौञ्चवर्तकाः ॥ ५८ ॥
शालयो मदिराः सर्पिर्वातगुल्मचिकित्सितम्।
मितमुष्णं द्रवं स्निग्धं भोजनं वातगुल्मिनाम् ॥ ५९ ॥
समण्डा वारुणी पानं तप्तं वा धान्यकैर्जलम्।

सर्वाङ्गसुन्दरी

नीलिनीत्यादि॥ नीलिन्यादिभिः सह सदोषाय नराय विडादियुतं घृतं देयम्। नीलिन्यादीन् पालिकान् जलाढके पचेत्। अष्टभागशेषे च रसे दधिप्रस्थेन सुधाक्षीरपलेन च मिश्रयित्वा घृतप्रस्थं विपाचयेत्। ततो घृतपलं यवागूमण्डमिश्रितं दद्यात्। जीर्णे च घृते सम्यग्विरिक्तं नरं रसयुतं भोजनं भोजयेत्। एतन्नीलिनीघृतं गुल्मादीन् हन्ति। कुक्कुटादयो वातगुल्मचिकित्सितमुपक्रमः। वातगुल्मिनाञ्च भोजनं मितमुष्णं द्रवं स्निग्धञ्च स्यात्। वारुणी समण्डा धान्यकशृतं जलं वा पानं स्यात्॥

शशिलेखा

पुनरपि विरेचनप्राप्ते दोषाद्यपेक्षया नीलिनीफलचूर्णादिभिः सह विडक्षारनागरयुतानि घृतानि पूर्वोक्तानि देयानि। समलायेत्यनेन विरेचनविधानं स्मार-

यति कालादिनियमनाय। नीलिनीघृतं सुबोधम्। सलिलस्याढकोऽष्टाविंश-त्यधिकं पलशतम्। घृतस्य प्रस्थं द्वात्रिंशत् पलानि। तद्वद्दधिप्रस्थम्। सुधा स्नुही। रसभोजनमित्यन्यभोजननिषेधः। सुबोधम्॥

स्निग्धोष्णेनोत्थिते गुल्मे पैत्तिके स्रंसनं हितम् ॥ ६० ॥
द्राक्षाऽभयारसगुडं कम्पिल्लं वा मधुद्रुतम्।
कल्पोक्तं रक्तपित्तोक्तं

सर्वाङ्गसुन्दरी

स्निग्धोष्णेनेत्यादि॥ पैत्तिके गुल्मे स्निग्धोष्णेनोत्थिते सति स्रंसनं हितम्। तदेव विरेचनमाह। द्राक्षाभयारसगुडं स्रंसनं हितम्। अथवा मधुद्रुतं कम्पिल्लं स्रंसनम्। कल्पोक्तं विरेचनकल्पविहितम्। रक्तपित्तोक्तं त्रिवृता त्रिफलेत्यादिकं हितम्॥

शशिलेखा

इति वातगुल्मे चिकित्स्यमाने अरक्षया पित्तश्लेष्मणोर्वृद्धयोश्चिकित्सोक्ता। स्निग्धोष्णेनेत्यादिना पित्तगुल्मचिकित्सोच्यते। स्निग्धोष्णद्रव्यजात एव पित्त-गुल्मे। द्राक्षाया हरीतक्याश्च रसं गुडश्चैकीकृतं स्रंसनं विरेचनं हितम्। अथवा कम्पिल्लकं माक्षिकद्रुतम्। "कम्पिल्लको रजनको रेवतो रक्तवर्णकः"। कल्पोक्तं विरेचनकल्पविहितं विशिष्टपित्तयोग्यम्। रक्तपित्तोक्तं रक्तपित्तचिकि-त्सितविहितम्। इति स्निग्धोष्णजे पित्तगुल्मे॥

गुल्मे रूक्षोष्णजे पुनः ॥ ६१ ॥
परं संशमनं सर्पिस्तिक्तं वाशाघृतं शृतम्।
तृणाख्यपञ्चकक्काथे जीवनीयगणेन वा ॥ ६२ ॥
शृतं तेनैव वा क्षीरं न्यग्रोधादिगणेन वा।

सर्वाङ्गसुन्दरी

गुल्म इत्यादि॥ रूक्षोष्णजे पैत्तिके गुल्मे तु सर्पिस्तिक्तं कुष्ठचिकित्सि-तोक्तं तथा वाशया शृतं घृतं संशमनं श्रेष्ठम्। तृणाख्यं पञ्चकं दर्भकाशेक्ष्वीत्या-

दिकम् । तस्य क्वाथे श्रुतं वा घृतं हितम् । अथवा जीवनीयगणेन श्रुत घृतं हितम् । तेनैव जीवनीयगणेनैव श्रुतं क्षीरं वा हितम् । न्यग्रोधादिगणेन वा श्रुतं क्षीरं हितम् ॥

शशिलेखा

रूक्षोष्णजे तु तिक्तघृतादिभिः शमनमेव योज्यम् । न तु स्रंसनम् । तिक्तकं कुष्ठोक्तम् । वाशाघृतं रक्तपित्तोक्तम् । तृणपञ्चमूलक्वाथो घृताच्चतुर्गुणः । तत्रैव जीवनीयानां कल्कः स्नेहाच्चतुर्थांशेन तेनैव तृणपञ्चमूलेन श्रुतं क्षीरम् । अथवा न्यग्रोधादिगणेन श्रुतं क्षीरम् ॥

तत्रापि स्रंसनंयुञ्ज्याच्छीघ्रमात्ययिके भिषक् ॥ ६३ ॥
वैरेचनिकसिद्धेन सर्पिषा पयसापि वा ।

सर्वाङ्गसुन्दरी

तत्रापीत्यादि ॥ तत्रापि न केवलं स्निग्धोष्णजे पित्तगुल्मे रूक्षोष्णजेऽपि पैत्तिके गुल्मे आत्ययिके सति शीघ्रं स्रंसनं कुर्यात् । केनेत्याह—विरेचनविहितद्रव्यसिद्धेन सर्पिषा क्षीरेण वा ॥

शशिलेखा

रूक्षोष्णजे शमनस्योक्तत्वाद्विरेचनं न प्राप्नोति । तदर्थमुच्यते । आत्ययिके बाधावहे । तत्रापि रूक्षोष्णजेऽपि । सुबोधम् ॥

रसेनामलकेक्षूणां घृतप्रस्थं विपाचयेत् ॥ ६४ ॥
पथ्यापादं पिबेत्सर्पिस्तत्सिद्धं पित्तगुल्मनुत् ।
पिबेद्वा तैल्वकं सर्पिर्यच्चोक्तं पित्तविद्रधौ ॥ ६५ ॥
द्राक्षां पयस्यां मधुकं चन्दनं पद्मकं मधु ।
पिबेत्तण्डुलतोयेन पित्तगुल्मोपशान्तये ॥ ६६ ॥
द्विपलं त्रायमाणाया जलद्विप्रस्थसाधितम् ।
अष्टभागस्थितं पूतं कोष्णं क्षीरसमं पिबेत् ॥ ६७ ॥
पिबेदुपरि तस्योष्णं क्षीरमेव यथाबलम् ।

तेन निर्हृतदोषस्य गुल्मः शाम्यति पत्तिकः ॥ ६८ ॥
दाहेऽभ्यङ्गो घृतैश्शीतैः साज्यैर्लेपो हिमौषधैः ।
स्पर्शः सरोरुहां पत्रैः पात्रैश्च प्रचलज्जलैः ॥ ६९ ॥
विदाहपूर्वरूपेषु शूले वह्नेश्च मार्दवे ।
बहुशोऽपहरेद्रक्तं पित्तगुल्मे विशेषतः ॥ ७० ॥
छिन्नमूला विदह्यन्ते न गुल्मा यान्ति च क्षयम् ।
रक्तं हि व्यम्लतां याति तच्च नास्ति न चातिरुक् ॥ ७१ ।

सर्वाङ्गसुन्दरी

रसेनेत्यादि ॥ आमलकस्येक्षोश्च रसेन घृताच्चतुर्गुणेन पथ्यापादं घृतप्रस्थं विपाचयेत् । तच्च सिद्धं सर्पिः पित्तगुल्मं हन्ति । तैल्वकमथवा सर्पिः पिबेत् । यच्च पित्तविद्रधावुक्तं घृतम्, तच्च पिबेत् । द्राक्षादितण्डुलजलेन सह पित्त-गुल्मोपशान्तये पिबेत् । त्रायन्त्या द्विपलं जलद्विप्रस्थसाधितं अष्टभागावशेषं पूतं कोष्णं क्षीरसमं पिबेत् । तस्योपरि कोष्णं क्षीरमेव यथाशक्ति पिबेत् । नान्यत् किञ्चित् । तेन क्षीरेणापहृतदोषस्य नरस्य पैत्तिको गुल्मः शाम्यति । पैत्तिके गुल्मे दाहे सति घृतैः शीतैः शीतवीर्यद्रव्यसाधितैः स्पर्शतश्च शीतैरभ्यङ्गस्तथा लेपः शीतवीर्यौषधैः सघृतैः स्यात् । पद्मपत्रैः पात्रैश्च प्रचलज्जलैः स्पर्शः । विदाहपूर्वरूपेषु गुल्मेषु तथा शूले वह्निमान्द्ये च सति बहून् वारान् रक्तमपहरेत् । पित्तगुल्मे विशेषतः प्रकर्षेणास्रं हरेत् । रक्ताहरणाच्छिन्नमूला गुल्मा न विदह्यन्ते न पाकं यान्ति । च पुनः क्षयं यान्ति । हि यस्माद्रक्तमन्तः स्थितं व्यम्लीभावं यान्ति । तच्च रक्तं नास्ति । ततस्तदुत्था रुगपि नास्ति ॥

शशिलेखा

शीतानि द्रव्याणि चन्दनादीनि पात्रैश्च प्रचलज्जलैर्गुल्मस्योपरि स्पर्शः । पित्तगुल्मे विदाहपूर्वरूपेषूत्पत्स्यमानायां पाकाभिमुखावस्थायां विदाहावस्थायाञ्च वह्नेर्मान्द्ये च विशेषतो रक्तं बहुशो बहून् वारानपि हरेत् । सुबोधम् ॥

हृतदोषं परिम्लानं जाङ्गलैस्तर्पितं रसैः ।
समाश्वस्तं सशेषार्तिं सर्पिरभ्यासयेत् पुनः ॥ ७२ ॥
रक्तपित्तातिवृद्धत्वात् क्रियामनुपलभ्य वा ।

गुल्मे पाकोन्मुखे सर्वा पित्तविद्रधिवत् क्रिया ॥ ७३ ॥
शालिर्गव्याजपयसी पटोली जाङ्गलं घृतम् ।
धात्री परूषकं द्राक्षा खर्जूरं डाडिमं सिता ॥ ७४ ॥
भोज्यं पानेऽम्बु बलया बृहत्याद्यैश्च साधितम् ।

सर्वाङ्गसुन्दरी

हृतदोषमित्यादि ॥ हृतदोषं परिम्लानं नरं जाङ्गलमांसरसैस्तर्पितं समाश्वस्तं सन्तं पुनः सशेषार्तिं सर्पिरभ्यासयेत् । रक्तपित्तातिवृद्धत्वाद्धेतोः क्रियां वाऽनुपलभ्य अनासाद्य गुल्मे पाकोन्मुखे सति सर्वा पित्तविद्रधितुल्या क्रिया स्यात् । शाल्यादि भोज्यम् । पाने बलया साधितं जलं बृहत्यादिना लघुपञ्च-मूलेन वा ॥

शशिलेखा

हृतदोषं विरेकरक्तस्रावाभ्यां जाङ्गलमांसरसैस्तर्पितं लब्धबलश्चार्तिशेष-नाशाय पुनः सर्पिरभ्यासयेत् । पाकोन्मुखे पच्यमाने गुल्मे पित्तविद्रधिवत् सर्वा क्रिया उपनाहादिका । सुबोधम् । इति पित्तगुल्मचिकित्सा ॥

श्लेष्मजे वामयेत् पूर्वमवम्यमुपवासयेत् ॥ ७५ ॥
तिक्तोष्णकटुसंसर्ग्या वह्निं सन्धुक्षयेत्ततः ।
हिङ्ग्वादिभिश्च द्विगुणक्षारहिङ्ग्वम्लवेतसैः ॥ ७६ ॥

सर्वाङ्गसुन्दरी

श्लेष्मज इत्यादि ॥ श्लेष्मजे गुल्मे पूर्वं वामयेत् । अवमनार्हं तु लङ्घयेत् । कृतलङ्घनस्य तिक्तोष्णकटुद्रव्ययुतया संसर्ग्या वह्निं सन्धुक्षयेद्दीपयेत् । तथा हिङ्ग्वादिभिश्चाग्निं सन्धुक्षयेत् । किंभूतैः—द्विगुणानि क्षारहिङ्ग्वम्लवेत-सानि येषु तैः ॥

शशिलेखा

श्लेष्मगुल्मे प्राग्वामयेत् । अवाम्यं गर्भिण्यादिकमुपवासयेदालङ्घितलिङ्गला-भात् । तदनु लङ्घितस्य तिक्तत्वादिगुणयुक्तया संसर्ग्या पेयादिक्रमेणाग्निं सन्धुक्षयेत्,

द्विगुणक्षारहिङ्ग्वम्लवेतसैः हिङ्ग्वादिभिश्च। वातगुल्मे हिङ्ग्वादीनि यानि घृतादीन्युक्तानि तानि प्राप्तमानात् क्षारादीनि द्विगुणीकृत्य दत्वा योज्यानीति।

निगूढं यदि वोन्नद्धं स्तिमितं कठिनं स्थिरम्।
आनाहादियुतं गुल्मं संस्वेद्य विलयेदनु ॥ ७७ ॥
घृतं सक्षारकटुकं पातव्यं कफगुल्मिना।
सव्योषक्षारलवणं सहिङ्गुविडदाडिमम् ॥ ७८ ॥
कफगुल्मं जयत्याशु दशमूलशृतं घृतम्।

सर्वाङ्गसुन्दरी

निगूढमित्यादि ॥ निगूढत्वादिधर्मसंयुक्तं गुल्मं संस्वेद्य विलयेदुपशमयेत्। पश्चात् कफगुल्मिना घृतं क्षारत्रिकटुकयुतं पातव्यम्। व्योषादियुतं दशमूलपक्वं घृतं कफगुल्मं शीघ्रमेव हन्ति ॥

शशिलेखा

निगूढं मांसेन दुर्लक्ष्यं यदि वा समुन्नद्धमुन्नतम्। निगूढादिरूपं गुल्मं संस्वेद्य बहुभिः स्वेदप्रकारैरनेकवारं स्वेदयित्वा विलयेत्। स्तिमितमपटु। सुबोधम्। व्योषादिकं स्नेहाच्चतुर्थांशेन दत्वा दशमूलक्वाथे स्नेहाच्चतुर्गुणे शृतं घृतमाशु कफगुल्मं जयतीति योगः। लवणं सैन्धवम् ॥

भल्लातकानां द्विपलं पञ्चमूलं पलोन्मितम् ॥ ७९ ॥
अल्पं तोयाढके साध्यं पादशेषेण तेन च।
तुल्यं घृतं तुल्यपयो विपचेदक्षसंमितैः ॥ ८० ॥
विडङ्गहिङ्गुसिन्धूत्थयावशूकशठीविडैः।
सद्वीपिरास्नायष्ट्याह्वपड्ग्रन्थाकणनागरैः ॥ ८१ ॥
एतत् भल्लातकघृतं कफगुल्महरं परम्।
प्लीहपाण्ड्वामयश्वासग्रहणीरोगकासनुत् ॥ ८२ ॥
ततोऽस्य गुल्मे देहे च समस्ते स्वेदमाचरेत्।
सर्वत्र गुल्मे प्रथमं स्नेहस्वेदोपपादिते ॥ ८३ ॥

या क्रिया क्रियते याति सा सिद्धिं न विरूक्षिते ।
स्निग्धस्विन्नशरीरस्य गुल्मे शैथिल्यमागते ॥ ८४ ॥
यथोक्तां घटिकां न्यस्येद्गृहीतेऽपनयेच्चताम् ।
वस्त्रान्तरं ततः कृत्वा भिन्द्याद्गुल्मं प्रमाणवित् ॥ ८५ ॥
विमार्गाजपदादर्शैर्यथालाभं प्रपीडयेत् ।
प्रमृद्याद्गुल्ममेवैकं न त्वान्त्रहृदयं स्पृशेत् ॥ ८६ ॥
तिलैरण्डातसीबीजसर्षपैः परिलिप्य च ।
श्लेष्मगुल्ममयस्पत्रैः सुखोष्णैः स्वेदयेत्ततः ॥ ८७ ॥
एवञ्च विसृतं स्थानात् कफगुल्मं विरेचनैः ।
सस्नेहैर्वस्तिभिश्चैनं शोधयेद्दाशमूलिकैः ॥ ८८ ॥

सर्वाङ्गसुन्दरी

भल्लातकानामित्यादि ॥ भल्लातकानामरुष्कराणां द्विपलम् । अल्पं ह्रस्वं पञ्चमूलं पृथक् पलप्रमाणं तोयाढके साधनीयम् । पादशेषेण च तेन क्वाथेन समं सर्पिस्तुल्यक्षीरं कार्षिकैर्विडङ्गादिभिः कल्कितैर्युक्तं विपाचयेत् । एतच्च भल्लातकघृतं परं सुष्टु कफगुल्महरं प्लीहादिजिच्च । ततो घृतपानादनन्तरं गुल्मे देहे चास्य समस्ते स्वेदमाचरेत् । सर्वस्मिन्नष्टविधे च गुल्मे प्रथममादौ स्नेहस्वेदाभ्यामुपपादिते सति या क्रिया क्रियते सा सिद्धिं याति । विरूक्षिते तु सति या क्रिया सा सिद्धिं न याति । स्निग्धस्विन्नशरीरस्य गुल्मे शैथिल्यं याते सति यन्त्रविध्युक्तां घटिकां योजयेत् । गृहीते च तां घटिकामपसारयेत् । अनन्तरं गुल्मं वस्त्रव्यवहितं कृत्वा प्रमाणवित् भिषग्विमार्गादिभिर्यथालाभं भिन्द्यात् । न सूचिकादिना विदारयेत् । विमार्गो दारुमयशस्त्राकृतिर्वस्तुविशेषश्चर्मकारसंबन्धी । तथा गुल्ममेव केवलं प्रपीडयेत् प्रमृद्याच्च । न पुनरान्त्रं हृदयं स्पृशेत् । अथ कफगुल्मं तिलादिभिः परिलिप्य सुखोष्णैरयस्पत्रैः स्वेदयेत् । अयस्पत्रैरिति "अतः कृक" मीत्यादिना सादेशः । एवं कृते सति स्थानाच्चलितं कफगुल्मं स्नेहयुक्तैर्विरेचनैर्वस्तिभिश्च दाशमूलिकैः शोधयेत् ॥

शशिलेखा

भल्लातकानामित्यादि सुबोधम् । जलस्याढकोऽष्टाविंशत्यधिकं पलशतम् । पादशेषो द्वात्रिंशत्पलानि । द्वीपिश्चित्रकः । ततोऽनन्तरमस्य गुल्मिनः गुल्मे

सर्वस्मिन् देहे शरीरे च स्वेदं कुर्यात्। सर्वस्मिन् गुल्मे प्रथमं स्नेहस्वेदाभ्यामुपपादिते संस्कृते सति या क्रिया वमनविरेचनादिका क्रियते सा सिद्धिं सफलतां याति। विरूक्षिते तु न। सर्वगुल्मानां वातप्रधानत्वादिति भावः। सुबोधम्। घटिका यन्त्रविशेषावुक्ता। न्यस्येत् लागयेत्। घटिकया गुल्मे तुम्बवद् गृहीते गुल्मामपि घटिकां बलादपनयेत्। ततः प्रमाणविच्छास्त्रज्ञो वैद्यः गुल्मं वस्त्रव्यवहितं कृत्वा विमार्गादिभिः सर्वतोदिक्कं यथालाभं भिन्द्यात्। केवलं गुल्ममेव प्रपीडयेत् * प्रमृज्यान्म्रक्षयेत्। आन्त्रहृदयन्तु न स्पृशेत्। विमार्गो मोचिकानां चर्मणि रेखाकरणे काष्ठमयम्। चीलाङ्गु इति प्रसिद्धं देशान्तरे। आजपदस्य प्रान्तं क्रियायोगि। आदर्शस्य दर्पणस्य वर्तुळा धारा क्रियायोगिनी। एतेषामन्यतमं यथालाभम्। ततः कफगुल्मं सुखोष्णैः तिलादिभिः परिलिप्य सुखोष्णैरयःपत्रैर्लोहदळैः स्वेदयेत्। एवममुना क्रमेण स्थानाद्विसृतमपसृतमेनं कफगुल्मं स्नेहवद्भिर्विरेचनैर्दाशमूलिभिर्वस्तिभिश्च। दशमूलेन संस्कृताः दाशमूलिकाः। ते च वस्तिकल्पे वक्ष्यन्ते॥

पिप्पल्यामलकद्राक्षाश्यामाद्यैः पालिकैः पचेत्।
एरण्डतैलहविषोः प्रस्थौ पयसि षड्गुणे ॥ ८९ ॥
सिद्धोऽयं मिश्रकः स्नेहो गुल्मिनां स्रंसनं हितम्।
वृद्धिविद्रधिशूलेषु वातव्याधिषु चामृतम् ॥ ९० ॥
पिबेद्वा नीलिनीसर्पिर्मात्रया द्विपलीकया।
तथैव सुकुमाराख्यं घृतान्यौदरिकाणि वा ॥ ९१ ॥

सर्वाङ्गसुन्दरी

पिप्पलीत्यादि॥ श्यामादिः "श्यामा दन्ती"त्यादि। पिप्पल्यादिभिः पलोन्मितैरेरण्डतैलसर्पिषोः प्रस्थौ द्वौ षड्गुणे क्षीरे पचेत्। अयं मिश्रकाख्यः स्नेहः सिद्धो गुल्मिनां परं स्रंसनं वृद्ध्यादिषु चामृततुल्यम्। अथवा नीलिनीघृतं प्रागुक्तं द्विपलमात्रया पिबेत्। तथैव द्विपलमात्रया सुकुमाराख्यं घृतं पिबेत्। उदरचिकित्सितोक्तानि वा घृतानि पिबेत्।

विमार्गः = കൊരട്ടാടി। आजपदम् = അവിടമുക്കി। आदर्शः = വട്ടക്കണ്ണാടി इति पाठ्यकारः

* प्रमृज्यादिति पाठः इन्दुनाङ्गीकृतः।

शशिलेखा

पिप्पल्याद्यैः पञ्चोन्मितैरेरण्डतैलहविषोर्मिश्रीभूतयोः द्वौ प्रस्थौ घृततैलान्मिश्रीभूतात् षड्गुणे क्षीरे द्वादशप्रस्थे पचेत्। अयं स्नेहो नाम्ना मिश्रकः। सिद्धो विरेकेण दृष्टफलः। स्रंसनं विरेचनम्। सुबोधम्॥

द्रोणेऽम्भसः पचेद्दन्त्याः पलानां पञ्चविंशतिम्।
चित्रकस्य तथा पथ्यास्तावतीस्तद्रसे स्रुते ॥ ९२ ॥

द्विप्रस्थे साभये पूते क्षिपेद्दन्तीसमं गुडम्।
तैलात्पलानि चत्वारि त्रिवृतायाश्च चूर्णतः ॥ ९३ ॥

कणाकर्षौ तथा शुण्ठ्याः सिद्धे लेहे तु शीतळे।
मधु तैलसमं दद्याच्चतुर्जाताच्चतुर्थिकाम् ॥ ९४ ॥

अतो हरीतकीमेकां सावलेहपलामदन्।
सुखं विरिच्यते स्निग्धो दोषप्रस्थमनामयः ॥ ९५ ॥

गुल्महृद्रोगदुर्नामशोफानाहगरोदरान्।
कुष्ठोत्क्लेशारुचिप्लीहग्रहणीविषमज्वरान् ॥ ९६ ॥

घ्नन्ति दन्तीहरीतक्यः पाण्डुतां च सकामिलाम्।
सुधाक्षीरद्रवं चूर्णं त्रिवृतायाः सुभावितम् ॥ ९७ ॥

कार्षिकं मधुसर्पिर्भ्यां लीढ्वा साधु विरिच्यते।
कुष्ठश्यामात्रिवृद्दन्तीविजयाक्षारगुग्गुलुम् ॥ ९८ ॥

गोमूत्रेण पिबेदेकं तेन गुग्गुलुमेव वा।
निरूहान् कल्पसिद्ध्युक्तान् योजयेद्गुल्मनाशनान् ॥ ९९ ॥

सर्वाङ्गसुन्दरी

द्रोणेऽम्भस इत्यादि ॥ जलद्रोणे दन्तीपलानां पञ्चविंशतिं चित्रकस्य पलानां पञ्चविंशतिं हरीतकीस्तावतीः पञ्चविंशतिं पचेत्। तद्रसे स्रुते द्विप्रस्थे पथ्यासहिते दन्तीतुल्यं पूतं गुडं क्षिपेत्। तैलात्पलानि चत्वारि। त्रिवृतायाश्चूर्णतश्च पलानि चत्वारि। कणायाः कर्षौ द्वौ शुण्ठ्याश्च। सिद्धे चास्मिन् लेहे तु सुशीते तैलतुल्यं माक्षिकं दद्यात्। चतुर्जातात् समुदितात् चतुर्थिकां

पलापरसंज्ञां दद्यात्। अतो लेहात् पथ्यामेकां अवलेहपलयुतां भक्षयन् स्निग्धो नरः सुखं दोषप्रस्थं विरिच्यते निरामयः सन्। एता दन्तीहरीतक्यः गुल्मादीन् घ्नन्ति। सुधाक्षीरेण द्रवं त्रिवृतायाश्चूर्णं प्रकृतत्वात् सुधाक्षीरेणैव सुभावितं कर्षप्रमाणं मधुसर्पिर्भ्यां लीढ्वा सम्यग्विरिच्यते। कुष्ठादीन् गोमूत्रेण पिबेत्। अथवा तेन गोमूत्रेण गुग्गुलुमेकमेव पिबेत्। कल्पसिद्ध्युक्तान् निरूहान् गुल्मनाशनान् योजयेत्॥

शशिलेखा

द्रोणेऽम्भस इत्यादिना दन्तीहरीतक्यः। सुबोधम्। पथ्यास्तावतीः। पञ्चविंशतिपलसंख्यया। सलिलस्य द्रोणः पञ्चपलशतानि सद्वादशपलानि। सुते गालिते द्विप्रस्थे चतुष्षष्टिपलपरिमिते साभये क्वाथद्रव्येभ्य उद्धृतहरीतकी-सहिते तद्रसे दन्त्यादीनां रसे कषाये दन्तीसमं पञ्चविंशतिपलोन्मितं पूतं शुद्धं गुडं क्षिपेत्। तैलाच्चत्वारि पलानि। त्रिवृतायाश्चूर्णतश्च चत्वारि पलानि कणायाः द्वौ कर्षौ शुण्ठ्याश्च तथा क्षिपेत्। तैलसमं मधु चत्वारि पलानि। चतुर्जातौ-षधानां चतुर्थिकाम्। प्रत्येकं कर्षः। अतोऽस्माल्लेहात्सावलेहामवलेहपलसहिता-मेकां हरीतकीमदन् भक्षयन्निति। कार्षिकं कर्षप्रमाणं त्रिवृतायाश्चूर्णं मधु-सर्पिर्भ्यां लीढ्वा साधु सम्यग्विरिच्यते। किंभूतम्—सुधायाः स्नुह्याः क्षीरेण द्रवमार्द्रं सुभावितम्। कुष्ठादीन् गोमूत्रेण पिबेत्। विजया हरीतकी। एकं केवलमेव गुग्गुलुम्। तेनेति गोमूत्रेण पिबेद्वा। सुबोधम्॥

कृतमूलं महावस्तुं कठिनं स्तिमितं गुरुम्।
गूढमांसं जयेद्गुल्मं क्षारारिष्टाग्निकर्मभिः ॥ १०० ॥

एकान्तरं द्व्यन्तरं वा विश्रमय्याऽथवा त्र्यहम्।
शरीरदोषबलयोर्वर्धनक्षपणोद्यतः ॥ १०१ ॥

अर्शोऽश्मरीग्रहण्युक्तान् क्षारान् युञ्ज्यात् कफोल्बणे।

सर्वाङ्गसुन्दरी

कृतमूलमित्यादि॥ कृतमूलादिरूपयुक्तं गुल्मं क्षारादिभिर्जयेत्। तत्र क्षारस्य शरीरबलक्षपणकृत्वात्तद्योजनमधिकृत्याह—एकान्तरमित्यादि। एका-न्तरं द्व्यन्तरं वाथवा त्र्यहं विश्रमय्य शरीरदोषबलयोर्यथाक्रमं वर्धनक्षपणोद्यतस्सन्। कफाधिके गुल्मे अर्शोऽश्मरीग्रहणीषूक्ता ये क्षारास्तान् युञ्ज्यात्॥

शशिलेखा

कृतमूलत्वादियुक्तं गुल्मं क्षारादिभिर्जयेत्। कृतमूलं लब्धमूलं महावस्तु बहाभोगं गूढमांसं मांसेन दुर्लक्ष्यम्। क्षारोपयोगे विशेषमाह— शरीरबलाद्य-पेक्षयैकाहं विश्रमय्य द्व्यहं वा त्र्यहमेव वा विश्रमय्य कफोद्भवे गुल्मे अर्शोश्मरी-ग्रहणीषूक्तान् क्षारान् प्रयुञ्जीत ॥

देवदारुत्रिवृद्दन्तीकटुकापञ्चकोलकम् ॥ १०२ ॥

[1]स्वर्जिकायावशूकाख्यौ श्रेष्ठापाठोपकुञ्चिकाः।
कुष्ठं सर्पसुगन्धां च द्व्यक्षांशं पटुपञ्चकम् ॥ १०३ ॥

पालिकं चूर्णितं तैलवसादधिघृताप्लुतम्।
घटस्यान्तः पचेत्पक्वमग्निवर्णे घटे च तम् ॥ १०४ ॥

क्षारं गृहीत्वा क्षीराज्यतक्रमद्यादिभिः पिबेत्।
गुल्मोदावर्तवर्ध्माशोजठरग्रहणीकृमीन् ॥ १०५ ॥

अपस्मारगरोन्मादयोनिशुक्रामयाश्मरीः।
क्षारागदोऽयं शमयेद्विषं चाखुभुजङ्गजम् ॥ १०६ ॥

श्लेष्माणं मधुरं स्निग्धं रसक्षीरघृताशिनः।
छित्वा छित्वाशयात् क्षारः क्षारत्वात् क्षरयत्यधः ॥ १०७ ॥

मन्देऽग्नावरुचौ सात्म्यैर्मद्यैः सस्नेहमश्नताम्।
योजयेदासवारिष्टान्निगदान्मार्गशुद्धये ॥ १०८ ॥

सर्वाङ्गसुन्दरी

देवदार्वीत्यादि॥ देवदार्वादिसर्पसुगन्धान्तं द्विकार्षिकं लवणपञ्चकं पालिकमेतत्समस्तं चूर्णीकृतं तैलवसादधिघृतैराप्लुतमालोडितं घटस्य मध्येऽन्तर्धूमं पचेत्। सर्पसुगन्धा नाकुली। अग्निवर्णे च घटे सति पक्वं तं क्षारं गृहीत्वा यथादोषं क्षीरादिभिः पिबेत्। गुल्मादीन् जयेदयं क्षारागदः आखुजं भुजङ्ग-जञ्च विषं नाशयेत्। श्लेष्माणं मधुरं स्निग्धं मांसरसाद्याशिनः क्षारः क्षारत्वा-

1 ഉപകുഞ്ചികാ=ജീരകം, സർപ്പസുഗന്ധാ=അരത്ത.

दाशयात् छित्वा छित्वाऽधस्तात् क्षरयति स्रावयति। मन्देऽग्नावरुचौ च सत्यां सात्म्यैर्मद्यैस्सह सस्नेहमाहारमश्नतामासवादीन् मार्गशुद्धये योजयेत् ॥

शशिलेखा

देवदार्वादिकं द्विकार्षिकमर्धपलोन्मितं लवणपञ्चकं सैन्धवादिक्रमेण प्रत्येकं पालिकं चूर्णितं तैलादिनाऽप्लुतमालोडितं घटस्यान्तरन्तर्धूमं पचेत्। घटेऽग्निवर्णे सति पक्वं तं क्षारं गृहीत्वादाय क्षीरादिभिर्यथादोषं पिबेत्। अय क्षारागदः गुल्मादीनाखुभुजङ्गजं विषञ्च शमयेत्। विषहितत्वादगद इति नामविशेषः। सर्पसुगन्धा गन्धनाकुली। क्षारस्य प्राधान्याद्धेतुरुच्यते। क्षारो हि क्षारत्वान्मांसरसाद्याशिनः मधुरं स्निग्धञ्च श्लेष्माणमाशयात् स्थानात् छित्वा छित्वाऽधस्तात् क्षरयति शोधयति। कफस्य मधुरत्वादिवचनं क्षारस्य विपरीत-गुणप्रदर्शनाय। मन्देऽग्नावित्यादि। निगदान् पुराणानासवारिष्टान् मार्ग-शुद्धये कफेन रुद्धस्य मार्गस्य शुद्ध्यर्थं योजयेत्।

अधुनान्नपानमाह—

शालयः षष्टिका जीर्णा कुलत्था जाङ्गलं पलम् ।
चिरिविल्वाग्नितर्कारीयवानीवरणाङ्कुराः ॥ १०९ ॥

शिग्रुस्तरुणविल्वानि बालं शुष्कञ्च मूलकं
बीजपूरकहिङ्ग्वम्लवेतसक्षारडाडिमम् ॥ ११० ॥

व्योषं तक्रं घृतं तैलं भक्तं पानन्तु वारुणी ।
धान्याम्लं मस्तु तक्रं च यवानीबिडचूर्णितम् ॥ १११ ॥

पञ्चमूलशृतं वारि जीर्णं मार्द्वीकमेव वा ।
पिप्पलीपिप्पलीमूलचित्रकाजाजिसैन्धवैः ॥ ११२ ॥

सुरा गुल्मं जयत्याशु जाङ्गलश्च विमिश्रितः ।

सर्वाङ्गसुन्दरी

शालय इत्यादि ॥ तैलान्तं भक्तम्। पानन्तु वारुण्यादि मार्द्वीकान्तम्। पिप्पल्यादिभिर्विमिश्रिता सुरा शीघ्रमेव गुल्मं जयति। जाङ्गलश्च पिप्पल्या-दिभिर्विमिश्रितो गुल्मं जयति ॥

शशिलेखा

शालय इत्यादि सुबोधम्। पिप्पल्यादिचूर्णयुता सुरा जाङ्गलश्च पिप्पल्यादिचूर्णमिश्रितः शीघ्रं गुल्मं जयति॥

वमनैर्लङ्घनैः स्वेदैः सर्पिःपानैर्विरेचनैः ॥ ११३ ॥

वस्तिक्षारासवारिष्टगुलिकापथ्यभोजनैः।
श्लैष्मिको बद्धमूलत्वाद्यदि गुल्मो न शाम्यति ॥ ११४ ॥

तस्य दाहं हृते रक्ते कुर्यादन्ते शरादिभिः।

सर्वाङ्गसुन्दरी

वमनैरित्यादि॥ वमनादिभिः प्रयुक्तैः श्लैष्मिको गुल्मो बद्धमूलत्वाद्यदि न शाम्यति, तस्य गुल्मस्य हृते रक्तेऽन्ते दाहं शरादिभिः कुर्यात्॥

शशिलेखा

श्लैष्मिको गुल्मः कृतमूलत्वाल्लब्धमूलत्वाद्धेतोर्यदि वमनादिभिर्न शाम्यति ततस्तस्य गुल्मस्यान्तेऽवसाने यथोक्तानां क्रियाणां निष्फलत्वाद्विच्छेदाय रक्तं विस्राव्य शरादिभिर्दाहं कुर्यात्॥

अथ दाहविधानं प्रस्तूयते—

अथ गुल्मं सपर्यन्तं वाससान्तरितं भिषक् ॥ ११५ ॥

नाभिवस्त्यान्त्रहृदयं रोमराजिं च वर्जयन्।
नातिगाढं परिमृशेच्छरेण ज्वलताऽथवा ॥ ११६ ॥

[1]लोहेनारणिकोत्थेन दारुणा तैन्दुकेन वा।
ततोऽग्निवेगे शमिते शं तैर्व्रण इव क्रिया ॥ ११७ ॥

आमान्वये तु पेयाद्यैः सन्धुक्ष्याग्निं विलङ्घिते।
स्वं स्वं कुर्यात् क्रमं मिश्रं मिश्रदोषे च कालवित् ॥ ११८ ॥

---

1 തൈന്ദുകം=പനിച്ചി, ആരണികം=മുഞ്ഞ.

सर्वाङ्गसुन्दरी

अथेत्यादि ॥ गुल्मं सपर्यन्तं पर्यन्तैः सह वाससा वस्त्रेणान्तरितमाच्छादितं नाभ्यादि वर्जयन् नातिशयेन परामृशेद्वैद्यः । शरेण शरकाष्ठेन । किंभूतेन—ज्वलता । अथवा लोहेन शस्त्रेण अथवा अरणिकोत्थेन काष्ठेन । अरणिकोऽग्निमन्थः । अथवा तैन्दुकेन काष्ठेन । अनन्तरं अग्निवेगे शीतैः प्रदेहादिभिः शमिते सति व्रण इव क्रिया स्यात् । आमान्वये तु विलङ्घिते सति वह्निं पेयाद्यैस्सन्धुक्ष्य स्वं स्वं क्रमं यथादोषं कुर्यात् । मिश्रदोषे मिश्रं क्रमं च कुर्यात् । कालविद्वैद्यः ॥

शशिलेखा

अथेत्यादिना तस्यैव दाहस्य विधानम् । अथ गुल्मं सपर्यन्तं भिषक् वस्त्रान्तरितं कृत्वा ज्वलता अग्निप्रदीप्तेन शरकाण्डेन वा लोहेन शस्त्रेण वा अरणिकोत्थेन दारुणा अग्निमन्थकाष्ठेन वा तैन्दुकेन तिन्दुककाष्ठेन वा दहेत् । तथा च गुल्मं दहेद्यथा नाभ्यादिकस्य पीडा न संभवति । नातिगाढं गुल्मे परिमृशेत् प्रवेशयेत् । ततो दाहानन्तरं शीतैः कषायस्वादुप्रायैरग्निवेगे शमिते व्रण इव क्रिया अग्निदग्धव्रणोपक्रमं कुर्वीतेत्यर्थः । सुबोधम् । इति श्लेष्मगुल्मचिकित्सा । सुबोधम् । मिश्रदोषे संसर्गसन्निपातजे गुल्मे स्वं स्वं यथादोषनिर्दिष्टं क्रममुपक्रमं मिश्रं व्यामिश्रं कुर्यात् । कालविद्वैद्यः ॥

रक्तगुल्मचिकित्सामाह—

गतप्रसवकालायै नार्यै गुल्मेऽस्रसम्भवे ।
स्निग्धस्विन्नशरीरायै दद्यात्स्नेहविरेचनम् ॥ ११९ ॥

तिलक्वाथो घृतगुडव्योषभार्ङ्गीरजोन्वितः ।
पानं रक्तभवे गुल्मे नष्टे पुष्पे च योषितः ॥ १२० ॥

भार्ङ्गीकृष्णाकरञ्जत्वग्ग्रन्थिकामरदारुजम् ।
चूर्णं तिलानां क्वाथेन पीतं गुल्मरुजापहम् ॥ १२१ ॥

पलाशक्षारपात्रे द्वे द्वे पात्रे तैलसर्पिषोः ।
गुल्मशैथिल्यजननीं पक्त्वा मात्रां प्रयोजयेत् ॥ १२२ ॥

सर्वाङ्गसुन्दरी

गत इत्यादि ॥ नार्यै अस्रसम्भवे गुल्मे सति स्नेहविरेचनं दद्यात् । किंभूतायै—गतः प्रसवकालो यस्यास्तस्यै इति । एवं हि पुराणत्वे सुखसाध्यता रक्तगुल्मस्य स्यात् । सुनिश्चितत्वं च । तथा स्निग्धं स्विन्नं शरीरं यस्यास्तस्यै । रक्तोत्थे गुल्मे तिलक्वाथो घृतादियुतः पानम् योषितः पुष्पे नष्टे च पानमेतद् भवेत् । भार्ङ्ग्यादिजं चूर्णं तिलक्वाथेन पीतं गुल्मरुजाहृत् । पलाशक्षारपात्रे द्वे तैलसर्पिषोर्द्वे पात्रे पक्त्वा गुल्मशैथिल्यजननीं मात्रां प्रयोजयेत् ॥

शशिलेखा

अस्रसम्भवे रक्तजे गुल्मे गतप्रसवकालायै गतः प्रसवकालो दशमासाख्यो यस्यास्तस्यै । तदा हि निर्भ्रान्तित्वं रक्तगुल्मे भवति । तथा स्निग्धस्विन्नशरीरायै स्निग्धं स्विन्नं शरीरं यस्यास्तस्यै नार्यै स्नेहविरेचनं दद्यात् । सुबोधम् । पलाशक्षारपात्रे पलाशवृक्षक्षारस्रुतोदकपात्रे ॥

न प्रभिद्येत यद्येवं दद्याद्योनिविरेचनम् ।
क्षारेण युक्तं पललं सुधाक्षीरेण वा ततः ॥ १२३ ॥
ताभ्यां वा भावितान्दद्याद्योनौ कटुकमत्स्यकान् ।
वराहमत्स्यपित्ताभ्यां नक्तकान् वा सुभावितान् ॥ १२४ ॥
किण्वं वा सगुडक्षारं दद्याद्योनौ विशुद्धये ।
रक्तपित्तहरं क्षारं लेहयेन्मधुसर्पिषा ॥ १२५ ॥
लशुनं मदिरां तीक्ष्णां मत्स्यांश्चास्यै प्रयोजयेत् ।
बस्तिं सक्षीरगोमूत्रं सक्षारं दाशमूलिकम् ॥ १२६ ॥
अवर्तमाने रुधिरे हितं गुल्मप्रभेदनम् ।

सर्वाङ्गसुन्दरी

न प्रभिद्येत इत्यादि ॥ एवं कृते सति यदि न प्रभिद्येत रक्तगुल्मस्तदा योनिविरेचनं दद्यात् । तदाह—क्षारेण युक्तं पललं भृष्टतिलचूर्णं ततस्तस्यां योनौ दद्यात् । सुधाक्षीरेण वाऽन्वितं पललं दद्यात् । ताभ्यां क्षारसुधाक्षीराभ्यां भावितान् कटुकमत्स्यकान् वा योनौ दद्यात् । वराहमत्स्ययोः पित्ताभ्यां नक्तकान् वा सुभावितान् योनौ दद्यात् । नक्तकश्चैलखण्डः । अथवा किण्वं गुडक्षारान्वितं योनिविशुद्ध्यर्थं योनौ दद्यात् । रक्तपित्तहरं क्षारं मधुसर्पिषा

तां स्निग्धं लेहयेत्। लशुनादींश्चास्यै प्रयोजयेत्। दाशमूलिकं वा वस्तिं कल्पोक्तं क्षीराद्यन्वितमस्यै दद्यात्। रक्ते अप्रवर्तमाने सति गुल्मप्रभेदन हितम्॥

शशिलेखा

एवमनन्तरोक्तेन हितेन गुल्मो यदि न प्रभिद्येत, ततो योनिविरेचनं योनेर्विरेचनार्थमित्यर्थः। पललं तिलकल्कं यवक्षारेण वा सुधाक्षीरेण वा युक्तं योनौ दद्यात्। सुधा महावृक्षः। ताभ्याञ्च यवक्षारसुधाक्षीराभ्यां भावितान् कटुकमत्स्यकान् वा योनौ दद्याद्धितरेत्। अथवा वराहपित्तन कटुकमत्स्यपित्तेन वा सुभावितान् नक्तकान् पिचून् योनौ दद्यात्। किण्वं वा गुडक्षारयुक्तं योनौ विशुद्धये दद्यात्। सुबोधम्। सक्षीरादिकं दाशमूलिकं वस्तिं च प्रयोजयेत्। सुबोधम्॥

यमकाभ्यक्तदेहायाः प्रवृत्ते समुपेक्षणम् ॥ १२७ ॥
रसौदनस्तथाहारः पानं च तरुणी सुरा।
रुधिरेऽतिप्रवृत्ते तु रक्तपित्तहराः क्रियाः ॥ १२८ ॥
कार्या वातरुगार्तायाः सर्वा वातहराः पुनः।
आनाहादावुदावर्तबलामध्न्यो यथायथम् ॥ १२९ ॥

सर्वाङ्गसुन्दरी

यमक इत्यादि ॥ प्रवृत्ते रक्ते सति यमकाभ्यक्तगात्रायाः सम्यगुपेक्षणं हितम्। तथाहारो रसौदनो हितः। तरुणी सुरा च पानम्। रुधिरेऽतिप्रवृत्ते पुनः रक्तपित्तहराः क्रियाः कार्याः। वातरुगार्तायाः पुनः सर्वा वातहराः क्रियाः कार्याः। आनाहादौ सत्युदावर्तबलामजितः क्रियाः कार्याः इति॥

शशिलेखा

एवमौषधैः प्रवृत्ते रक्ते सति यमकेन स्नेहद्वयेनाभ्यक्तशरीरायाः समुपेक्षणं हितम्। नान्यदौषधं कुर्यादित्यर्थः। सुबोधम्। औषधतैक्ष्ण्याच्च यदि रक्तमतियोगेन प्रवर्तते ततस्तद्रक्ते रक्तपित्तहराः क्रियाः कार्याः। रक्तपित्तचिकित्सया साधयेदित्यर्थः। इति रक्तगुल्मचिकित्सा।

केवले चानाहादावुदावर्तादिघ्न्यः क्रिया यथायथं यथायोग्यं कार्याः। आदिशब्देनाष्ठीलादयो गृह्यन्ते॥

इति चतुर्दशोऽध्यायः।

पञ्चदशोऽध्यायः ।

उदरचिकित्सितम्

गुल्मचिकित्सितादनन्तरमुदरचिकित्सितं प्रक्रम्यते। सम्बन्धश्चास्य गुल्मोत्पत्तौ किल यथा वायुः प्रधानं कारणं प्रायस्तथोदराणामपीति ॥

अथात उदरचिकित्सितं नामाध्यायं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ॥

दोषातिमात्रोपचयात्स्रोतोमार्गनिरोधनात् ।
सम्भवत्युदरं तस्मान्नित्यमेनं विरेचयेत् ॥ १ ॥

सर्वाङ्गसुन्दरी

दोषातिमात्रोपचयादित्यादि ॥ दोषाणामतिमात्रमुपचयो वृद्धिः । तस्मात् स्रोतसां मार्गा द्वाराणि, तेषां निरोधात् सम्भवत्युदरं यतस्तस्मादेनमुदरिणमभीक्ष्णं विरेचयेत् ॥

शशिलेखा

दोषातिमात्रोपचयादित्यादिनोदरिणोऽभीक्ष्णं विरेचनोपयोगे हेतुः । दोषाणामतिमात्रो य उपचयः सञ्चयस्तस्मात् स्रोतोमार्गनिरोधनम्, तस्मात् सर्वमुदरं सम्भवति ॥

प्रायेण वातप्रधानत्वादस्य व्याधेः स्निग्धविरेचनमाह —

पाययेत्तैलमैरण्डं समूत्रं सपयोऽपि वा
मासं द्वौ वाऽथवा गव्यं मूत्रं माहिषमेव वा ॥ २ ॥

पिबेद् गोक्षीरभुक् स्याद्वा करभीक्षीरवर्तनः
दाहानाहातितृण्मूर्छापरीतस्तु विशेषतः ॥ ३ ॥

सर्वाङ्गसुन्दरी

पाययेदित्यादि ॥ तैलमैरण्डं गोमूत्रान्वितं क्षीरयुतं वा मासमेकमथवा द्वौ मासौ पाययेत् । दोषादिवशात् गव्यं मूत्रं माहिषं वा मूत्रं पिबेत्। गोक्षीरभुक् करभीक्षीरवर्तनो वा स्यात् । दाहादियुतस्तु विशेषेणैववृत्तिः स्यात् ॥

शशिलेखा

पाययेदित्यादिना विरेचनप्रयोगः। मूत्रक्षीरान्यतरयुतमेरण्डतैलं प्रतिदिनं मासमेकं द्वौ वा मासौ पाययेत्। मव्यं माहिषं वा मूत्रं गोक्षीराहारः पिबेत्। वा अथवा सर्वाहारपरित्यागोष्ट्रीक्षीरवृत्तिः स्यात्। दाहादिपरीत उदरी त्वनन्तरोक्तं विशेषेण कुर्यात्। आर्तिः शूलम्॥

रूक्षाणां बहुवातानां दोषसंशुद्धिकांक्षिणाम्।
स्नेहनीयानि सर्पींषि जठरघ्नानि योजयेत् ॥ ४ ॥

षट्पलं दशमूलाम्बु मस्तुद्व्याढकसाधितम्।
नागरात् त्रिपलं प्रस्थं घृततैलात्तथाऽढकम् ॥ ५ ॥

मस्तुनः साधयित्वैतत्पिबेत्सर्वोदरापहम्।
कफमारुतसम्भूते गुल्मे च परमं हितम् ॥ ६ ॥

चतुर्गुणे जले मूत्रे द्विगुणे चित्रकात् पले।
कल्के सिद्धं घृतप्रस्थं सक्षारं जठरी पिबेत् ॥ ७ ॥

यवकोलकुलत्थानां पञ्चमूलस्य चाम्भसा।
सुरासौवीरकाभ्याञ्च सिद्धं वा पाययेद् घृतम् ॥ ८ ॥

सर्वाङ्गसुन्दरी

रूक्षाणामित्यादि॥ रूक्षादीनां स्नेहनीयान्युदरहन्तॄणि सर्पींषि योजयेत्। पञ्चकोलयवक्षारमिति षट्पलं दशमूलाम्बु मस्तुनोद्व्याढकेन साधितं घृतप्रस्थं षट्पलोपलक्षणलक्षितं योजयेत्। तथा शुण्ठ्याः पलत्रयं प्रस्थं घृततैलात् मस्तुन आढकमेतत् साधयित्वा सर्वोदरापहं पिबेत्। कफमारुतोत्थे च गुल्मे सुष्ठु हितमेतत्। सर्पिषः प्रस्थं चतुर्गुणे जले गोमूत्रे द्विगुणे चित्रकात् पले कल्के सिद्धं सयवक्षारमुदरी पिबेत्। यवादीनां कषायेण सुराकाञ्जिकाभ्याञ्च सिद्धं वा घृतं पाययेत्॥

शशिलेखा

रूक्षाणामित्यादि॥ सुबोधम्। पञ्चकोलानां पलपञ्चकं यवक्षारस्य पलमिति षट्पलं दशमूलक्काथस्याढकं मस्तुन आढकं घृतस्य प्रस्थ इति सिद्धं

घृतं योजयेत्। यवादीनां क्वाथो घृतसमः सुरा सौवीरकं मिश्रीभूतं घृतसममिति सिद्धं घृतं वा पिबेत्। इत्युदरिणो घृतानि॥

एभिः स्निग्धाय सञ्जाते बले शान्ते च मारुते।
स्रस्ते दोषाचये दद्यात् कल्पदृष्टं विरेचनम् ॥ ९ ॥

सर्वाङ्गसुन्दरी

एभिरित्यादि ॥ एभिः स्नेहैः स्निग्धाय नराय बले सञ्जाते पवने च शान्ते स्रस्ते दोषाचये सति कल्पोक्तं विरेचनं दद्यात्॥

शशिलेखा

एभिः स्नेहैः स्निग्धायोदरिणे बले सञ्जातेऽनिले च शान्ते दोषाचये स्रस्ते प्रासशैथिल्ये कल्पविहितं विरेचनं दद्यात्॥

पटोलमूलं त्रिफलां निशां वेल्लं च कार्षिकम्।
कम्पिल्लनीलिनीकुम्भभागान् द्वित्रिचतुर्गुणान् ॥ १० ॥

पिबेत्सञ्चूर्ण्य मूत्रेण पेयापूर्वं ततो रसैः।
विरिक्तो जाङ्गलैरद्यात्ततः षड्दिवसं पयः ॥ ११ ॥

शृतं पिबेद्व्योषयुतं पीतमेवं पुनः पुनः।
हन्ति सर्वोदराण्येतच्चूर्णं जातोदकान्यपि ॥ १२ ॥

गवाक्षीं शंखिनीं दन्तीं तिल्वकस्य त्वचं वचाम्।
पिबेत् कर्कन्धुमृद्वीकाकोलाम्भोमूत्रशीधुभिः ॥ १३ ॥

सर्वाङ्गसुन्दरी

पटोलमूलमित्यादि ॥ पटोलमूलादि कार्षिकं कम्पिल्लादीनां भागान् क्रमेण द्वित्रिचतुर्गुणान् सञ्चूर्ण्य गोमूत्रेण पिबेत्। अनन्तरं विरिक्तः सन् पेयां भुक्त्वा जाङ्गलमांसरसैः शाल्यादिकमद्यात्। ततोऽनन्तरं षट् दिवसानि क्वथितं क्षीरं त्रिकटुकयुतं पिबेत्। एवं पुनः पुनरेतत् पीतं सर्वोदराणि जातसलिलान्यपि हन्ति। गवाक्ष्यादिकं चूर्णं कर्कन्ध्वादि जलमूत्रशीध्वन्यतमेन पिबेत्॥

शशिलेखा

यवानीहपुषानीलिन्याद्यास्त्रयः सुबोधाः। शुद्धः कृतविरेचनोऽत एव क्षामः क्षामदेहोऽन्तरान्तरा क्षामत्वनाशनाय पूर्ववत् पटोलादिचूर्णे यथा, तथैव कारभादिक्षीरं व्योषयुतं पिबेत्। करभः उष्ट्रः। आत्ययिकः साबाधः॥

स्नेहमेव विरेकार्थमित्युक्तमतस्तानेव स्नेहानाह—

हरीतकीसूक्ष्मरजः प्रस्थयुक्तं घृताढकम् ॥ २८ ॥

अग्नौ विलाप्य मथितं खजेन यवपल्लके।
निधापयेत्ततो मासादुद्धृतं गाळितं पचेत् ॥ २९ ॥

हरीतकीनां क्काथेन दध्ना चाम्लेन संयुतम्।
उदरं गरमष्ठीलामानाहं गुल्मविद्रधिम् ॥ ३० ॥

हन्त्येतत् कुष्ठमुन्मादमपस्मारं च पानतः।
स्नुक्क्षीरयुक्ताद्गोक्षीराच्छृतशीतात् खजाहतात् ॥ ३१ ॥

यज्जातमाज्यं स्नुक्क्षीरसिद्धं तच्च तथागुणम्।

सर्वाङ्गसुन्दरी

हरीतकीत्यादि॥ हरीतकीसूक्ष्मरजःप्रस्थयुक्तं घृतस्याढकमग्नौ विलाप्य खजेनालोडितं यवपल्लके यवराशिमध्ये निधापयेत्। ततो मासादनन्तरमुद्धृतं गाळितं हरीतकीनां क्काथेन सामान्यपरिभाषोक्तप्रमाणेनाम्लेन दध्ना संयुतं च पचेत्। एतच्च पानेनोदरादीन् हन्ति॥ स्नुहीक्षीरमिश्रितात् गोक्षीराच्छृतशीतात् खजेनाहतायज्जातं सर्पिस्तत् स्नुहीक्षीरसिद्धं पूर्वगुणं निर्दिष्टम्॥

शशिलेखा

हरीतकीसूक्ष्मचूर्णप्रस्थेन युक्तं घृतस्याढकमग्नौ विलाप्य खजेन मथितं सदनुगुप्तं यवपल्लके यवराशौ निधापयेत्। ततश्च यवपल्लान्मासादूर्ध्वमुद्धृतं वस्त्रेण गाळितं परिस्रावितं स्नेहसमेन हरीतकीनां क्काथेन तावतैव चाम्लेन दध्ना संयुतं पचेत्। एतत् घृतं पानतः पानेनोदरादीन् हन्ति। स्नुक्क्षीरयुक्तादित्यादि।

गव्ये पयसि स्नुहीक्षीरं दत्वा विपचेत् । क्षीरस्य घनत्वं यावत् ततः शीतीभूतं क्षीरं दण्डेनाभिमथ्य नवनीतं गृह्णीयात् । तच्च नवनीतं समेन सुधाक्षीरेण सह विपाचयेत् ॥

क्षीरद्रोणं सुधाक्षीरप्रस्थार्धेन युत दधि ॥ ३२ ॥

जातं मथित्वा तत्सर्पिस्त्रिवृत्सिद्धं च तद्गुणम् ।
तथा सिद्धं घृतप्रस्थं पयस्यष्टगुणे पचेत् ॥ ३३ ॥

स्नुक्क्षीरपलकल्केन त्रिवृतापट्पलेन च ।
एषाश्चानु पिबेत् पेयां रसं स्वादु पयोऽथवा ॥ ३४ ॥

घृते जीर्णे विरिक्तश्च कोष्णं नागरसाधितम् ।
पिबेदम्बु ततः पेयां ततो यूपं कुलत्थजम् ॥ ३५ ॥

पिबेद्रूक्षस्त्र्यहं त्वेवं भूयो वा प्रतिभोजितः ।
पुनःपुनः पिबेत्सर्पिरानुपूर्व्याऽनयैव च ॥ ३६ ॥

घृतान्येतानि सिद्धानि विदध्यात् कुशलो भिषक् ।
गुल्मानां गरदोषाणामुदराणाञ्च शान्तये ॥ ३७ ॥

पीलुकल्कोपसिद्धं वा घृतमानाहभेदनम् ।
तैल्वकं नीलिनीसर्पिः स्नेहं वा मिश्रकं पिबेत् ॥ ३८ ॥

हृतदोषः क्रमादश्नन् लघुशाल्योदनप्रति ।
उपयुञ्जीत जठरी दोषशेषनिवृत्तये ॥ ३९ ॥

हरीतकीसहस्रं वा गोमूत्रेण पयोऽनुपः ।
सहस्रं पिप्पलीनां वा स्नुक्क्षीरेण सुभावितम् ॥ ४० ॥

पिप्पलीं वर्धमानां वा क्षीराशी वा शिलाजतु ।
तद्वद्वा गुल्गुलुं क्षीरं तुल्यार्द्रकरसं तथा ॥ ४१ ॥

चित्रकामरदारुभ्यां कल्कं क्षीरेण वा पिबेत् ।
मासं युक्तस्तथा हस्तिपिप्पलीविश्वभेषजम् ॥ ४२ ॥

विळङ्गं चित्रको दन्ती चव्यं व्योषञ्च तैः पयः ।
कल्कैः कोलसमैः पीत्वा प्रवृद्धमुदरं जयेत् ॥ ४३ ॥

भोज्यं भुञ्जीत वा मासं स्नुहीक्षीरघृतान्वितम् ।
उत्कारिकां वा स्नुक्क्षीरपीतपथ्याकणाकृताम् ॥ ४४ ॥

सर्वाङ्गसुन्दरी

क्षीरद्रोणमित्यादि ॥ स्नुहीक्षीरप्रस्थार्धयुतं क्षीरद्रोणं दधि जातं मथित्वा तत्सर्पिस्त्रिवृता पक्वं पूर्वगुणम् । तथा सिद्धं पूर्ववत् कृतं सुधाक्षीरसहित-दुग्धजातं घृतप्रस्थं क्षीरेऽष्टगुणे स्नुहीक्षीरपलकल्केन त्रिवृतापलषट्केन च पचेत् । एतच्च पूर्वगुणम् । एषाञ्च घृतानां पश्चात् पेयादीन् पिबेत् । घृते जीर्णे विरिक्तश्च सन् कोष्णं शुण्ठीसाधितं जलं पिबेत् । अनन्तरं पेयां ततः कुलत्थज यूषं पिबेत् । एवं त्र्यहं रूक्षः सन् पुनरपि प्रतिभोजितः पिबेत् । पुनः पुनरनयैवानुपूर्व्या अनेनैव क्रमेण सर्पिः पिबेत् । एतानि प्रागुक्तानि घृतानि सिद्धानि कुशलो वैद्यः कुर्वीत गुल्मादीनां शान्तये । पीलुकल्केन पक्वं घृतमानाहभेदनं पिबेत् । तैल्वकं वा नीलिनं घृतं वा मिश्रकं वा स्नेहं पिबेत् । क्रमेण हृतदोषः लघुशाल्योदनप्रति लघुगुणयुक्तमल्पं शाल्योदनं भुञ्जानः एवं संसर्जनक्रममाचरेत् । जठरी दोषशेषस्य निवृत्तये हरीतकीसहस्रं गोमूत्रेणासकृ-द्भावितं पयोनुपस्सन्नुपयुञ्जीत । अथवा स्नुहीक्षीरेणासकृद्भावितं पिप्पलीनां सहस्रमुपयुञ्जीत । पिप्पलीं वर्धमानां वा रसायनविधानेनोपयुञ्जीत । अथवा दुग्धाशी सन् शिलाजतुमुपयुञ्जीत । तद्वत्तथैव गुल्गुलुम् । तथा तुत्थ्यार्द्रकरसं क्षीरमुपयुञ्जीत । अथवा चित्रकामरदारुणोः कल्कं क्षीरेण पिबेत् । तथा मासं हस्तिपिप्पलीविश्वभेषजकल्कं युक्तो नियतः सन् क्षीरेण पिबेत् । विळङ्गादिभिः कल्कैः कोलप्रमाणैरालोडितं क्षीरं पीत्वा प्रवृद्धमुदरं जयेत् । स्नुहीक्षीरघृतान्वितं भोज्यमाहारं मासं भुञ्जीत । स्नुहीक्षीरसिद्धं घृतं स्नुही-क्षीरयुतं वा घृतं स्नुहीक्षीरघृतम् । उत्कारिकां वा स्नुक्क्षीरभावितपथ्याकणाकृतां भुञ्जीत ।

शशिलेखा

हृतदोष उदरी अरं लघुशाल्योदनमश्नन् भुञ्जानः विरेचनाद्दोषशेषस्य निवृत्तये हरीतक्यादिकमुपयुञ्जीत । हरीतकीसहस्रं क्रमेण गोमूत्रेण सहोप-

युज्यानन्तरं क्षीरं पिबेत् । स्नुहीक्षीरेण सुभावितं पिप्पलीसहस्रं वा क्रमेण प्रयुञ्जीत। पूर्वापेक्षया विकल्पः। पिप्पलीवर्धमानं वा रसायनविधानेनोपयुञ्जीत। शिलाजतु वा क्षीराशी सन्नुपयुञ्जीत। गुल्गुलुं वा तद्वत् शिलाजतुवत्। तथा तुल्यार्द्रकरसं क्षीरमुपयुञ्जीत। अथवा युक्तो नियतः सन् चित्रकसुरदारु-कल्कं क्षीरेण मासं पिबेत्। तथा हस्तिपिप्पलीनागरं पिबेत्। कोलसमैर्द्विशाणप्रमाणैर्विडङ्गादिभिः कल्कैः क्षीरं पीत्वा प्रवृद्धमप्युदरं जयेत्। सुबोधम्॥

पार्श्वशूलमुपस्तम्भं हृद्ग्रहं च समीरणः।
यदि कुर्यात् ततस्तैलं बिल्वक्षारान्वितं पिबेत् ॥ ४५ ॥

पक्वं वा टिंटुकबलापलाशतिलनालजैः।
क्षारैः कदल्यपामार्गतर्कारीजैः पृथक् स्रुतैः ॥ ४६ ॥

कफे वातेन पित्ते वा ताभ्यां वाऽप्यावृतेऽनिले।
बलिनः स्वौषधयुतं तैलमेरण्डजं हितम् ॥ ४७ ॥

सर्वाङ्गसुन्दरी

पार्श्वशूलमित्यादि॥ समीरणः पार्श्वशूलादिकं यदि कुर्यात्ततस्तैलं बिल्वक्षारान्वितं बिल्ववृक्षक्षारस्रुतजलयुतं पक्वं पिबेत्। अथवा मयूरजङ्घादिजैः क्षारैः कदल्यपामार्गतर्कारीजैश्च पृथक् स्रुतैः पक्वं तैलं पिबेत्। कफे वातेनावृते पित्ते वा वातेनावृते ताभ्यां कफपित्ताभ्यां वाऽवृतेऽनिले सति बलिनो नरस्य स्वौषधयुतमेरण्डजं तैलं हितम्॥

शशिलेखा

वातकृतेषूदरिणः पार्श्वशूलादिषु बिल्ववृक्षक्षारस्रुतेनाम्भसा युतं पक्वं तैलं पाने युञ्ज्यात्। स्योनाकादीनामन्यतमस्य वा क्षारेण क्षारजलेन पक्वं तैलमिति। कफ इत्यादि। एरण्डतैलञ्च वातगुल्मोक्तविधानेन पिबेत। कस्मिन् विषय इत्याह — कफे पित्ते वा वातेनावृते। ताभ्यामिति कफपित्ताभ्यां वात आवृते। बलिन इत्य-बलस्यैरण्डतैलप्रतिषेध इति। वातगुल्मोक्तविधानन्तु पिबेदेरण्डतैलमित्यादिनोक्तम्।

देवदारुपलाशार्कहस्तिपिप्पलिशिग्रुकैः ।
साश्वकर्णैः सगोमूत्रैः प्रदिह्यादुदरं बहिः ॥ ४८ ॥

वृश्चिकालीवचाशुण्ठीपञ्चमूलपुनर्नवात् ।
वर्षाभूधान्यकुष्ठाच्च क्वाथैर्मूत्रैश्च सेचयेत् ॥ ४९ ॥

सर्वाङ्गसुन्दरी

देवदार्वित्यादि ॥ देवदार्वादिभिर्गोमूत्रसहितैरुदरं बहिर्बाह्यतो लिम्पेत् । वृश्चिकाल्यादीनां क्वाथैर्मूत्रैश्च जठरं सेचयेत् ॥

शशिलेखा

देवदार्वादिभिश्च मूत्रपिष्टैः सुखोष्णैरुदरिणो जठरं बहिर्लिम्पेत् । वृश्चिकाल्यादिक्वाथैर्मूत्रैश्च सेचयेत् ॥

विरिक्तं म्लानमुदरं स्वेदितं साल्वलादिभिः ।
वाससा वेष्टयेदेवं वायुर्नाध्मापयेत्पुनः ॥ ५० ॥

सुविरिक्तस्य यस्य स्यादाध्मानं पुनरेव तम् ।
सुस्निग्धैरम्ललवणैर्निरूहैः समुपाचरेत ॥ ५१ ॥

सोपस्तम्भोऽपि वा वायुराध्मापयति यं नरम् ।
तीक्ष्णाः सक्षारगोमूत्राः शस्यन्ते तस्य बस्तयः ॥ ५२ ॥

इति सामान्यतः प्रोक्ताः सिद्धा जठरिणां क्रियाः ।

सर्वाङ्गसुन्दरी

विरिक्तमित्यादि ॥ उदरं विरिक्तं म्लानं साल्वलादिभिः स्वेदितं वाससा वस्त्रेण वेष्टयेत् । एवं कृते सति वायुर्न पुनराध्मापयेत् । सुविरिक्तस्य यस्य नरस्य पुनराध्मानं स्यात्तं नरं पुनरतिस्निग्धैरम्ललवणैश्च निरूहैः समुपाचरेत् । उपस्तम्भेन कफाद्यावारकेण सह वर्तते सोपस्तम्भो वायुर्यं नरमाध्मापयति, तस्य तीक्ष्णा बस्तयः क्षारगोमूत्राभ्यां सह शस्यन्ते । इत्येवं सामान्येनोदरिणां क्रियाः सिद्धाः प्रोक्ताः ॥

शशिलेखा

विरिक्तमित्यादि । सुबोधम् । म्लानं विरेकात् त्यक्तकाठिन्यम् । साम्बल इति पञ्चकादिस्वेदनाम । एवमिति वेष्टनेन । सुविरिक्तस्येत्यादि च सुबोधम् । तमित्युदरिणम् । स्तम्भ एवोपस्तम्भः । इति सामान्येनोदरिणां चिकित्सा ॥

वातोदरेऽथ बलिनं विदार्यादिशृतं घृतम् ॥ ५३ ॥

पाययेत ततः स्निग्धं स्वेदिताङ्गं विरेचयेत् ।
बहुशस्तैल्वकेनैनं सर्पिषा मिश्रकेण वा ॥ ५४ ॥

कृते संसर्जने क्षीरं बलार्थमवचारयेत् ।
प्रागुत्क्लेशान्निवर्तेत बले लब्धे क्रमात्पयः ॥ ५५ ॥

यूषै रसैर्वा मन्दाम्ललवणैरेधितानलम् ।
सोदावर्तं पुनः स्निग्धं स्विन्नमास्थापयेत्ततः ॥ ५६ ॥

तीक्ष्णाधोभागयुक्तेन दाशमूलिकवस्तिना ।
तिलोरुबूकतैलेन वातघ्नाम्लशृतेन च ॥ ५७ ॥

स्फुरणाक्षेपसन्ध्यस्थिपार्श्वपृष्ठत्रिकार्तिषु ।
रूक्षं बद्धशकृद्वातं दीप्ताग्निमनुवासयेत् ॥ ५८ ॥

अविरेच्यस्य शमना वस्तिक्षीरघृतादयः ।

सर्वाङ्गसुन्दरी

वातोदर इत्यादि ॥ वातोदरे सति बलवन्तं पुरुषं विदार्यादिगणेन पक्वं घृतं पाययेत् । अनन्तरं स्निग्धं स्वेदितशरीरमेनं बहुशस्तैल्वकेन मिश्रकेण वा घृतेन विरेचयेत् । कृते संसर्जने सति क्षीरं बललाभाय दद्यात् । उत्क्लेशात् प्राक् प्रायेण कफोपचितेरुत्क्लेशं दृष्ट्वाऽनन्तरं बले लब्धे सति क्रमेण क्षीरं निवर्तयेत् । न सहसैव । ततो यूषादिभिः समिद्धाग्निमुदावर्तवन्तं पुनरपि स्निग्धं स्विन्नं दाशमूलिकवस्तिना निरूहयेत् । दाशमूलिको वस्तिः "द्विपञ्चमूलत्रिफलाफल-बिल्वानि पाचयेत्"इत्यादिः कल्पोक्तस्तेन । किंभूतेन— तीक्ष्णाधोभागयुक्तेन । अधोभागेऽधस्ताच्छरीरे युक्तो योग्यः तीक्ष्णश्चासावधोभागयुक्तश्च तेन । रूक्षं

बद्धशकृद्वातं दीप्तानळं तिलैरण्डतैलेन वातघ्नैर्द्रव्यैरम्लैश्च शृतेनानुवासयेत् । स्फुरणादिसद्भावेषु अविरेच्यस्यास्य शमना वस्त्यादयः प्रयोज्याः । अविरेच्याः "न तु रेच्यो नवज्वरी" इत्यादयो वमनविरेचनविधावुक्ताः ॥

शशिलेखा

वातोदर इत्यादि । सुबोधम् । संसर्जनं पेयादिक्रमः । क्षीरेण बले लब्धे दोषोत्क्लेशात् पूर्वं क्षीरं निवर्तयेत् । न तु झटिति, अपि तु क्रमेण । मन्दं स्तोकमम्लं डाडिमादिलवणञ्च येषाम् । अधोभागिकद्रव्याणि विरेचनद्रव्याणि । तानि तीक्ष्णानि दाशमूलिके वस्तौ सम्मिश्रय्यास्थापयेत् । स्फुरणादिषु सत्सु रूक्षत्वादियुक्तमनुवासयेत् । केनेत्याह—वातहराम्लद्रव्यसिद्धेन तिलोरुबूकतैलेन । तिलोरुबूकयोस्तैलं तिलोरुबूकतैलम् । ऊरुबूकः एरण्डः । अविरेच्यस्य नवज्वर्यादेरुदरिणः दोषस्य शमना वस्त्यादयो योज्याः । आदिशब्देन यूषरसाभ्यङ्गादिपरिग्रहः ॥

मुनिनाप्युक्तम्— "अविरेच्यन्तु यं विद्याद्दुर्बलं स्थविरं शिशुम् । सुकुमारं प्रकृत्याल्पदोषं वातोल्बणानलम् ॥ तं भिषक् शमनैः सर्पिर्यूषमांसरसौदनैः । वस्त्यभ्यङ्गानुवासैश्च क्षीरैश्चोपाचरेद् बुधः ॥" इति । इति वातोदरम् ॥

बलिनं स्वादुसिद्धेन पैत्ते संस्नेह्य सर्पिषा ॥ ५९ ॥

श्यामात्रिभण्डीत्रिफलाविपक्केन विरेचयेत् ।
सितामधुघृताढ्येन निरूहोऽस्य ततो हितः ॥ ६० ॥

न्यग्रोधादिकषायेण स्नेहवस्तिश्च तच्छृतः ।
दुर्बलन्त्वनुवास्यादौ शोधयेत् क्षीरवस्तिभिः ॥ ६१ ॥

जाते त्वग्निबले स्निग्धं भूयो भूयो विरेचयेत् ।
क्षीरेण सत्रिवृत्कल्केनोरुबूकश्रृतेन वा ॥ ६२ ॥

सातलात्रायमाणाभ्यां शृतेनारग्वधेन वा ।
सकफे वा समूत्रेण सतिक्ताज्येन सानिले ॥ ६३ ॥

पयसान्यतमेनैषां विदार्यादिशृतेन वा ।
भुञ्जीत जठरं चास्य पायसेनोपनाहयेत् ॥ ६४ ॥

पुनः क्षीरं पुनर्बस्ति पुनरेव विरेचनम् ।
क्रमेण ध्रुवमातिष्ठन्यतः पित्तोदरं जयेत्   ॥ ६५ ॥

सर्वाङ्गसुन्दरी

बलिनमित्यादि ॥ बलवन्तं पुरुषं पैत्ते जठरे सति मधुरवर्गसिद्धेन घृतेन संस्नेह्य श्यामादिभिर्विपक्केन सर्पिषा विरेचयेत् । श्यामा मालविका । त्रिभण्डी त्रिवृत् । अनन्तरं शर्करामाक्षिकघृतबहुलेन न्यग्रोधादिकषायेणास्यातुरस्य निरूहो हितः । तेनैव न्यग्रोधादिना विपक्कः स्नेहबस्तिरनुवासनो हितः । ननु बलिनमित्ययुक्तम् । यतः प्रागभ्यधायि । "नष्टचेष्टाबलाहारा" इति । अत्रोच्यते— भेषजवेगसहिष्णुतामात्रं बलित्वमत्र विकल्प्य बलिनमित्युक्तम् । न तु प्रकृष्टबलवन्तमित्यदोषः । दुर्बलन्तु नरं प्रागनुवास्य क्षीरबस्तिभिः शोधयेत् । अग्निबले तु जाते स्निग्धं सन्तं पुनः पुनर्विरेचयेत् । केन—क्षीरेण त्रिवृच्चूर्णयुतेन । एरण्डमूलश्रृतेन वा क्षीरेण । सातलात्रायमाणाभ्यां श्रृतेन क्षीरेण वा । पित्तोदरिणः सुतरां बलापेक्षित्वात् दुर्बलमित्युक्तम् । आरग्वधेन कर्णिकारेण वा श्रृतेन क्षीरेण । कफयुक्ते पित्ते समूत्रेण क्षीरेणैषामन्यतमेन श्रृतेन । सानिले पित्ते तिक्ताज्येन सह पयसा पूर्वोक्तद्रव्याणामन्यतमेन श्रृतेन विरेचयेत् । तिक्तद्रव्ययुतमाज्यं तिक्ताज्यम् । कुष्ठोक्तं तिक्तं घृतं वा । विदार्यादिश्रृतेन वा पयसा भुञ्जीत भोजनं कुर्वीत । अस्य जठरमुदरं पायसेनोपनाहयेच्च । क्षीरादिकं क्रमेण पुनःपुनर्ध्रुवमातिष्ठन्नाचरन्यतो बलवान् सन् पित्तोदरं जयेत् । पुनः क्षीरमित्यादिषु पुनश्शब्दो वीप्सार्थः । एतच्च क्रमेण ध्रुवमातिष्ठन्नित्यतो लब्धम् ॥

शशिलेखा

पित्तोदरे प्रथमं मधुरद्रव्यसिद्धेन घृतेन स्नेहनं, तदन्ते श्यामादिविपक्वेन सर्पिषा विरेचनम् । त्रिभण्डी त्रिवृत् । अनन्तरमस्येति पित्तोदरिणः न्यग्रोधादिगणक्वाथेन प्रभूतसितादिना निरूहस्तच्छृतस्तेन न्यग्रोधादिना श्रृतः स्नेहबस्तिश्च हितः । दुर्बलन्तु पित्तोदरिणं स्नेहविरेचनास्थापनाद्विनैव प्रागेवान्वास्य क्षीरबस्तिभिः कल्पे वक्ष्यमाणैः शोधयेत् । स्नेहादिविधाने च सूत्रस्थानस्य स्मर्तव्यम् । जाते त्वग्निबल इत्यादि सुबोधम् । भूयो भूय इत्यस्य विरेचयेदित्यनेन सम्बन्धः । सश्लेष्मणि पित्ते समूत्रेण पयसा पुनः पुनर्विरचयेत् । सवाते पित्ते तिक्तघृतसंयुक्तेन पयसा विरेचयेत् । एवमेरण्डश्रृतं सत्रिवृत्कल्कमेकं

क्षीरम्। द्वितीयं सातलात्रायमाणाभ्यां शृतम्। तृतीयमारग्वधशृतम्। मूत्रेण सह चतुर्थम्। तिक्तघृतेन सह पञ्चममिति। एषां क्षीराणामन्यतमेन विदार्यादिगणसिद्धेन वा क्षीरेणान्नं भोजयेत्। अस्य च पित्तोदरिणः पायसेन क्षीरसिद्धेनान्नेनोदरमुपनाहयेत्। बध्नीयाद्वातादिहरणायेति पित्तोदरम्॥

वत्सकादिविपक्वेन कफे संस्नेह्य सर्पिषा।
स्विन्नं स्नुक्क्षीरसिद्धेन बलवन्तं विरेचितम् ॥ ६६ ॥

संसर्जयेत् कटुक्षारयुक्तैरन्नैः कफापहैः।
मूत्रत्र्यूषणतैलाढ्यो निरूहोऽस्य ततो हितः ॥ ६७ ॥

मुष्ककादिकषायेण स्नेहवस्तिश्च तच्छृतः।
भोजनं व्योषदुग्धेन कौलत्थेन रसेन वा ॥ ६८ ॥

स्तैमित्यारुचिहृल्लासे मन्देऽग्नौ मद्यपाय च।
दद्यादरिष्टान् क्षारांश्च कफस्त्यानस्थिरोदरे ॥ ६९ ॥

हिङ्ग्वपकुल्ये त्रिफलां देवदारु निशाद्वयम्।
भल्लातकं शिग्रुफलं कटुकां तिक्तकं वचाम् ॥ ७० ॥

शुण्ठीं माद्रीं घनं कुष्ठं सरलं पटुपञ्चकम्।
दाहयेज्जर्जरीकृत्य दधिस्नेहचतुष्कवत् ॥ ७१ ॥

अन्तर्धूमं ततः क्षाराद्बिडालपदकं पिबेत्।
मदिरादधिमण्डोष्णजलारिष्टसुरासवैः ॥ ७२ ॥

उदरं गुल्ममष्ठीलां तून्यौ शोफं विषूचिकाम्।
प्लीहहृद्रोगगुदजानुदावर्तं च नाशयेत् ॥ ७३ ॥

जयेदरिष्टगोमूत्रचूर्णायस्कृतिपानतः।
सक्षारतैलपानैश्च दुर्बलस्य कफोदरम् ॥ ७४ ॥

उपनाह्यं ससिद्धार्थकिण्वैर्बीजैश्च मूलकात्।
कल्कितैरुदरं स्वेदमभीक्ष्णश्चात्र योजयेत् ॥ ७५ ॥

सर्वाङ्गसुन्दरी

वत्सकादीत्यादि ॥ कफे कफोदरे बलवन्तमुदरिणं वत्सकादिविपक्केन सर्पिषा संस्नेह्य स्विन्नं सन्तं स्नुक्क्षीरसिद्धेन घृतेन बलिनं विरेचितं संसर्जयेत्। पेयाद्यैरन्नैरुपक्रमेत्। किंभूतैरन्नैः — कटुक्षारयुक्तैः कफापहैश्च। कटुक्षारयुतानां कफघ्नत्वेऽपि कफापहैरित्युक्तमतिशयार्थम्। ततः संसर्जनादनन्तरं निरूहो गोमूत्रत्रिकटुतैलबहुलो मुष्ककादिवर्गक्वाथेनाऽस्य कफोदरिणो हितः। स्नेहबस्तिरनुवासनम्। तेनैव शृतो हितः। भोजनं व्योषयुक्तेन दुग्धेन सहितं हितम्। कुलत्थरसेन वा। मद्याय नराय मन्देऽग्नौ स्तैमित्यादौ च सत्यरिष्टान् क्षारांश्च दद्यात्। कफेन स्त्यानं स्थिरं जठरं यस्य तस्मिन्निदं कार्यम्। हिङ्ग्वादिकं जर्जरीकृत्य दधिस्नेहचतुष्कयुतमन्तर्धूमं दाहयेत्। तस्मात् क्षाराद्बिडालपदकं कर्षं मदिरादिभिः पिबेत्। एष क्षार उदरादीन् नाशयेत्। दुर्बलस्य नरस्य कफोदरमरिष्टादिपानेन क्षारयुततैलपानैश्च जयेत्। अवस्कृतिः प्रमेहचिकित्सिते प्रोक्ता। तथोदरं जठरमुपनाह्यमुपनाहार्हं स्वेदयेत्। कैः— मूलकबीजैः कल्कितैः ससर्षपकिण्वैः। तथाऽत्र नित्यं स्वेदश्च योजयेत् ॥

शशिलेखा

कफोदरे वत्सकादिगणशृतेनाज्येन स्नेहः। ततः स्वेदः। तदनन्तरं सुधाक्षीरसिद्धेनाज्येन विरेचनम्। ततः कट्वादिभिः संसर्जयेत्। पेयादिक्रमं कुर्यात्। ततो-ऽनन्तरं मूत्रादिभूयिष्ठेन मुष्ककादिक्वाथेनास्थापयेत्। तत्सिद्धेन तैलेन पश्चादन्वासयेच्च। व्योषयुतेन क्षीरेण कुलत्थयूषेण वा भोजनं हितम्। कफस्त्यानस्थिरोदरे श्लेष्मघनस्थिरजठरेऽरिष्टान् क्षारांश्च दद्यात्। सुबोधम्। सिद्धार्थादिभिः कल्कितैर्जठरमुपनाह्यं बन्धनीयम्। किण्वं सुराघनम्। अत्र कफोदरेऽभीक्ष्णं सततं स्वेदश्च योजयेत्। इति श्लेष्मोदरम्।

सन्निपातोदरे कुर्यान्नातिक्षीणबलानले।
दोषोद्रेकानुरोधेन प्रत्याख्याय क्रियामिमाम् ॥ ७६ ॥

दन्तीद्रवन्तीफलजं तैलं पाने च शस्यते।
क्रियानिवृत्ते जठरे त्रिदोषे तु विशेषतः ॥ ७७ ॥

दद्यादापृच्छ्य तज्ज्ञातीन् पातुं मद्येन कल्कितम्।
मूलं काकादनीगुञ्जाकरवीरकसम्भवम् ॥ ७८ ॥

पानभोजनसंयुक्तं दद्याद्वा स्थावरं विषम् ।
यस्मिन्वा कुपितः सर्पो विमुञ्चति फले विषम् ॥ ७९ ॥

तेनास्य दोषसंघातः स्थिरो लीनो विमार्गगः ।
बहिः प्रवर्तते भिन्नो विषेणाशु प्रमाथिना ॥ ८० ॥

तथा व्रजत्यगदतां शरीरान्तरमेव वा ।

सर्वाङ्गसुन्दरी

सन्निपातोदर इत्यादि ॥ सन्निपातोदरे अर्थात्सन्निपातोदरवति नरे नातिक्षीणबलानले अधिकदोषानुरोधेन तद्वशेनैव क्रियामिमामनन्तरोक्तां कुर्यात्। किं कृत्वा। प्रत्याख्याय — प्रायेणैतदुदरमशक्यप्रतीकारमित्युक्त्वा। अथोपक्रममाह—दन्त्यादितैलं पाने च शस्यते। क्रियामतिक्रान्ते जठरे विशेषेण त्रिदोषजे तस्योदरिणो बन्धून् पृष्ट्वा यथैतद्विषं विषमं किं जीवयत्युत मारयतीति सन्देह इत्युक्त्वा प्रयोज्यम् वक्ष्यमाणमेतत्। पातुमित्यादि । काकादन्यादिजं मूलं कल्कितं मद्येन पातुं दद्यात्। काकादनी काकाण्डिका। अथवा पानभोजनसंयुक्तं स्थावरं विषमश्वमारादिकं दद्यात् । यस्मिन् फले सर्पः कुपितो विषं मुञ्चति तद्वा दद्यात् । तेन विषेण प्रमाथिनाऽस्य दोषसंघातो भिन्नो शीघ्रं बहिः प्रवर्तते । किं भूतः- स्थिरः तथा लीनो धात्वादिषु । तथोन्मार्गगामी । तथा तेन प्रकारेणानुष्ठितेनोदरी अगदतां निर्व्याधितां व्रजति । शरीरान्तरं वा याति । म्रियत इत्यर्थः ॥

शशिलेखा

संसर्गजन्तु यावत्संभाव्यते तावदुक्तमेव । सन्निपातोदरे एतदसाध्यमिति चिकित्सायाः प्रत्याख्यानं कृत्वा उद्रिक्तदोषानुरोधेन इमां क्रियां कुर्यात् । येन प्रत्याख्यानेनासिद्धावयशसा योगो न भवति । चिकित्सा च प्राणेषु कण्ठगतेष्वप्यवश्यं कर्तव्या । द्रवन्ती मूषिकपर्णी । क्रियातिवृत्त इति । सर्वस्मिन्नुदरे क्रियातिवृत्तेरनन्तरोक्तेन चिकित्सितेनाशाम्यति । विशेषेण तु त्रिदोषे सन्निपातोदरे तस्यातुरस्य ज्ञातीनापृच्छ्य श्रावयित्वा कल्कितं काकादन्यादिजं मूलं पातुं दद्यात् । सर्वत्र जठरे अशाम्यतीदं कुर्यादित्यर्थः । अथवा स्थावरं विषमातुरस्य पानभोजनेषु संयुक्तं दद्यात् अथवा कुपितः कृष्णसर्पो

यस्मिन् फले कूश्माण्डादौ दंशनेन विषं विमुञ्चति तद्वा दद्यात्। स्वभावेन प्रमाथिना तेन विषेणास्यातुरस्य स्थिरत्वादियुक्तो दोषसंघातो भिन्नः शीघ्रं बहिः प्रवर्तते। तथा तेन प्रवृत्तेन कदाचिदगदतां निर्व्याधितां व्रजति। क्षीणत्वाच्छरीरान्तरमेव वा व्रजति। पञ्चतां यातीत्यर्थः ॥

हृतदोषञ्च शीताम्बुस्नातं तं पाययेत् पयः ॥ ८१ ॥

पेयां वा त्रिवृतः शाकं मण्डूक्या वास्तुकस्य वा ।
काळशाकं यवाख्यं वा खादेत्स्वरससाधितम् ॥ ८२ ॥

निरम्ळलवणस्नेहं स्विन्नास्विन्नमनन्नभुक् ।
मासमेकं ततश्चैत्रं तृषितः स्वरसं पिबेत् ॥ ८३ ॥

एवं विनिर्हृते शाकैर्दोषे मासात् परं ततः ।
दुर्बलाय प्रयुञ्जीत प्राणभृत् कारभं पयः ॥ ८४ ॥

सर्वाङ्गसुन्दरी

हृतदोषमित्यादि ॥ हृतदोषञ्च तं शीतजलस्नातं सन्तं पयः पाययेत्। पेयामथवा। त्रिवृच्छाकं मण्डूकीशाकं वास्तुकशाकं काळशाकं यवशाकं वा खादेत्। किंभूतम्— स्वरसेन साधितम्। तथाऽम्ळलवणस्नेहवर्जितम्। तथा स्विन्नास्विन्नमिति "क्तेन नञ्विशिष्टेन इति समासः। मासमेकं यावदेतदश्नीयात्। तृषितः सन् स्वरसं प्रकृतत्वात्तच्छाकस्य पिबेत्। एवं शाकैर्विशेषेण निर्हृते दोषे प्रायेण जलाख्ये ततोऽनन्तरं मासात् परं दुर्बलाय नराय कारभं क्षीरं प्राणकरं प्रयुञ्जीत ॥

शशिलेखा

हृतदोषमिति विषेण। शीतजलपरिषेचितं पयः पाययेत् अथवा पेयाम्। ततस्त्रिवृतादिशाकानामन्यतमं स्वरसेन साधितं मासं खादेत्। स्वरसेन साधितमिति त्रिवृच्छाकं त्रिवृच्छाकस्य स्वरसेनैव साधितं मण्डूकीशाकं मण्डूकीशाकस्य स्वरसेनैव साधितमिति सर्वत्र योज्यम्। अम्ळादिवर्जितं स्विन्नास्विन्नं किञ्चिदेव स्विन्नमद्यात्। किञ्चिदस्विन्नमेव हरितकप्रकारेण। अनन्नभुगिति। शाकवृत्तिरेव मास-

मेकं स्यात्। तृषितस्तु भुज्यमानस्यैव शाकस्य स्वरसं पिबेत्। सुनोघम्। मण्डूकी मण्डूकपर्णी। कारभमौष्ट्रम्। इति वाताद्युदराणि॥

प्लीहोदरे यथादोषं स्निग्धस्य स्वेदितस्य च।
सिरां भुक्तवतो दध्ना वामबाहौ विमोक्षयेत् ॥ ८५ ॥

लब्धे बले च भूयोऽपि स्नेहपीतं विशोधितम्।
समुद्रशुक्तिजं क्षारं पयसा पाययेत्तथा ॥ ८६ ॥

अम्लस्रुतं विडकणाचूर्णाढ्यं नक्तमालजम्।
सौभञ्जनस्य वा क्वाथं सैन्धवाग्निकणान्वितम् ॥ ८७ ॥

हिङ्ग्वादिचूर्णं क्षाराज्यं युञ्जीत च यथाबलम्।
षट्पलञ्च पिबेत्सर्पिः पिप्पलीर्वा प्रयोजयेत् ॥ ८८ ॥

पिप्पलीनागरं दन्तीसमांशं द्विगुणाभयम्।
विडार्धांशयुतं चूर्णमिदमुष्णाम्बुना पिबेत् ॥ ८९ ॥

विडङ्गं चित्रकं सक्तून् सघृतान् सैन्धवं वचाम्।
दग्ध्वा कपाले पयसा गुल्मप्लीहापहं पिबेत् ॥ ९० ॥

तैलोन्मिश्रैर्बदरकपत्रैः सम्मर्दितैः समुपनद्धः।
मुसलेन पीडितोऽनु च याति प्लीहा पयोभुजो नाशम् ॥ ९१ ॥

सर्वाङ्गसुन्दरी

प्लीहोदर इत्यादि॥ प्लीहोदरे दोषानुसारेण स्निग्धस्य स्वेदितस्य च दध्ना भुक्तवतः सिरां वामे बाहौ विमोक्षयेत्। बले चोपजाते पुनरपि स्नेहपीतं विशोधितं सन्तं क्षारं समुद्रशुक्त्युत्थं पयसा पाययेत्। तथा करञ्जजं क्षारमम्लैः काञ्जिकादिभिः स्रुतं विडकणाचूर्णभूयिष्ठं पाययेत्। अथवा सौभञ्जनस्य क्वाथं सैन्धवादियुतं पिबेत्। हिङ्ग्वदिचूर्णं क्षारं तथा घृतं षट्पलादि च यथाबलं प्रयुञ्जीत। ननु यथाबलमितीहोच्यते। प्राक् चाभ्यधायि—"नष्टचेष्टाबलाहारा" इति। तदिमे वाक्ये परस्परं व्याहाते। ब्रूमः। बलशब्देनेह भेषजबलं सोढुं शक्तं यत् बलमात्तं तदिह परिकल्पितम्। पूर्वञ्च प्रकृष्टं यत् बलं

तद्विवक्षितमिति नात्र पूर्वापरव्याहतत्वम्। पिप्पलीनागरयोर्द्वावंशौ। दन्त्याश्च द्वौ भागौ। हरीतक्याश्चत्वारो भागाः। विडलवणस्यार्धभाग इत्येवं चूर्णमुष्णाम्बुना पिबेत्। विडङ्गादिकं कपाले कर्परे दग्ध्वा क्षीरेण गुल्मप्लीहघ्नं पिबेत्। बदरकस्य पत्रैः तैलमिश्रितैः सुष्ठु मर्दितैः समुपनद्धः अऽनु पश्चाच्च मुसलेन पीडितः- प्लीहा क्षीराशिनो नाशं व्रजति। उपगीतिर्वृत्तम्॥

शशिलेखा

प्लीहोदरे स्नेहस्वेदावनुबन्धकदोषानुगुण्येनैव। सिराव्यधे सूत्रोक्तः प्रकारः सिरायाश्चावगमः। नद्यादिशुक्तिप्रतिषेधाय समुद्रग्रहणम्। तथा नक्तमालजं क्षारमम्लेन काञ्चिकमद्यादिना स्रुतं गाळितं विडपिप्पलीचूर्णाभ्यामालोड्य पिबेत्। नक्तमालः पूतीकरञ्जः। अथवा सौभञ्जनस्य कषायं सैन्धवादियुतं पाययेत्। सुबोधम्॥

रोहीतकलताः कल्माः खण्डशः साभया जले।
मूत्रे वाऽसुनुयात्तत्तु सप्तरात्रस्थितं पिबेत् ॥ ९२ ॥

कामिलाप्लीहगुल्मार्शःकृमिमेहोदरापहम्।
रोहीतकत्वचः कृत्वा पलानां पञ्चविंशतिम् ॥ ९३ ॥

कोलद्विप्रस्थसंयुक्तं कषायमुपकल्पयेत्।
पालिकैः पञ्चकोलैश्च तैः समस्तैश्च तुल्यया ॥ ९४ ॥

रोहीतकत्वचा पिष्टैर्घृतप्रस्थं विपाचयेत्।
प्लीहाभिवृद्धिं शमयत्येतदाशु प्रयोजितम् ॥ ९५ ॥

कदळ्यास्तिलनाळानां क्षारेणेक्षुरकस्य च।
तैलं पक्वं जयेत् पानात् प्लीहानं कफवातजम् ॥ ९६ ॥

अशान्तौ गुल्मविधिना योजयेदग्निकर्म च।
अप्राप्तपिच्छासलिले प्लीह्नि वातकफोल्बणे ॥ ९७ ॥

पैत्तिके जीवनीयानि सर्पींषि क्षीरवस्तयः।
रक्तावसेकः संशुद्धिः क्षीरपानं च शस्यते ॥ ९८ ॥

यकृति प्लीहवत् कर्म दक्षिणे तु भुजे सिराम्।

सर्वाङ्गसुन्दरी

रोहीतक इत्यादि ॥ रोहीतकस्य लताः खण्डं खण्डं कल्पताः सहरीतकीर्जले मूत्रे वाऽभिषुनुयात्। तच्च सप्तरात्रं स्थितं जलं मूत्रं वा पिबेत्। हरीतकीश्च लेहवत् भुञ्जीत। तत् पीतं कामिलादिघ्नम्। रोहीतकत्वचः पलानां पञ्चविंशतिं कृत्वा बदरप्रस्थद्वयसंयुक्तं कषायमुपकल्पयेत्। पञ्चकोलैः पालिकैः समस्तैस्तैः पञ्चकोलैस्तुल्यया रोहीतकत्वचा सह पिष्टैर्घृतप्रस्थं विपाचयेत्। एतद्घृतं प्रयोजितं प्लीहाभिवृद्धिं द्रागेव शमयति। कदल्यादीनां क्षारेण तैलं पक्वं पानेन कफवातोत्थं प्लीहानं पराकरोति। एवमप्यनुपशान्तौ कफवातोल्बणे प्लीह्न्यसञ्जातपिच्छोदके गुल्मविधानेनाग्निकर्म च योजयेत्। पैत्तिके पित्तोल्बणे प्लीह्नि जीवनीयगणसाधितानि सर्पींषि तथा क्षीरवस्तिरक्तावसेकादि च शस्यते। "सिरां भुक्तवतो दध्ना वामबाहौ विमोक्षयेत्" इत्यनेनैव रक्तावसेकस्योक्तत्वात् पुनर्वचनं प्रकर्षार्थम्। पित्ताधिक्ये हि रक्तातिवृद्धिः। तस्मादतिरक्तस्रावो योज्य इत्येतत्प्रतिपादनार्थमेतदुक्तम्। यकृति यकृदुदरे प्लीहवत् कर्म कार्यम्। सिरां पुनर्दक्षिणे बाहौ मोक्षयेत्।

शशिलेखा

द्व्यङ्गुलमात्रकल्पितानां रोहीतकलतानां हरीतकीनाञ्च रोहीतकलतासमानानां सप्तरात्रं दोषाद्यपेक्षया तोये वा मूत्रे वा आसुतानां यो रसः सः पानात् प्लीहोदरादिजित्। "रोहीतः पारिजातश्च प्लीहघ्नो रक्तपुष्पकः॥ रोहीतकत्वगित्यादिना पठितं रोहीतकषट्पलाख्यं घृतं सुबोधम्। कोलं बदरम्। पञ्चकोलतुल्यत्वाद्रोहीतकत्वग्भ्यो गर्भे पञ्चपलानि भवन्ति। सुबोधम्। अशान्ताविति ादिना प्लीहोदरेऽग्निकर्मप्रदर्शनम्। पिच्छा मण्डप्रायं पूर्वं प्रदर्शितमुदरे। सलिलमस्वच्छम्। वातकफोल्बण एवाग्निकर्म। न वाताद्युल्बणे। इति वातकफप्लीहोदरम्। पैत्तिके पित्तोल्बणे प्लीह्नि जीवनीयानि सर्पींषि जीवनीयैः सिद्धानि घृतानि क्षीरवस्तयो रक्तावसेकादि च शस्यते। यकृति यकृदाख्योदरे प्लीहवत् कर्म प्लीहोक्तक्रियाविभागो विधेय इत्यर्थः॥

स्विन्नाय बद्धोदरिणे मूत्रतीक्ष्णौषधान्वितम् ॥ ९९ ॥
सतैललवणं दद्यान्निरूहं सानुवासनम्।
परिस्रंसीनि चान्नानि तीक्ष्णं चास्मै विरेचनम् ॥ १०० ॥
उदावर्तहरं कर्म कार्यं यच्चानिलापहम्।

सर्वाङ्गसुन्दरी

स्विन्नायेत्यादि ॥ बद्धोदरिणे पुरुषाय स्विन्नाय मूत्रतीक्ष्णौषधयुतं तैलसैन्धवाभ्यां सह निरूहं दद्यात् सानुवासनम् । पूर्वमनुवासनं पश्चाच्चेत्यर्थः । उदरिणः स्वेदनिषेधात् बद्धोदरिणः स्वेदानुज्ञानमपवाद इति नैतत् पूर्वापरव्याहतम् । परिस्रंसीन्यनुलोमकराण्यन्नान्यस्मै जठरिणे तीक्ष्णं च विरेचनं दद्यात् । उदावर्तहरं कर्म कार्यम् । यच्च वातघ्नं कर्म तच्च कार्यम् ।

शशिलेखा

बद्धोदरिणे स्विन्नाय कृतस्वेदायातुराय मूत्रादियुतं निरूहं दद्यात् सानुवासनम् । अनुवासनं तथाविधमेव । परिस्रंसीन्यनुलोमनानि । सुबोधम् ॥

छिद्रोदरमृते स्वेदाच्छ्लेष्मोदरवदाचरेत् ॥ १०१ ॥

जातं जातं जलं स्राव्यमेवं तद्यापयेद् भिषक् ।
अपां दोषहराण्यादौ योजयेदुदकोदरे ॥ १०२ ॥

मूत्रयुक्तानि तीक्ष्णानि विविधक्षारवन्ति च ।
दीपनीयैः कफघ्नैश्च तमाहारैरुपाचरेत् ॥ १०३ ॥

क्षारं छागकरीषाणां स्रुतं मूत्रेऽग्निना पचेत् ।
घनीभवति तस्मिंश्च कर्षांशं चूर्णितं क्षिपेत् ॥ १०४ ॥

पिप्पलीपिप्पलीमूलं शुण्ठी लवणपञ्चकम् ।
निकुम्भकुम्भत्रिफलास्वर्णक्षीरीविषाणिकाः ॥ १०५ ॥

स्वर्जिकाक्षारषड्ग्रन्थासातलायवशूकजम् ।
कोलाभा गुळिकाः कृत्वा ततः सौवीरकाप्लुताः ॥ १०६ ॥

पिबेदजरके शोफे प्रवृद्धे चोदकोदरे ।

सर्वाङ्गसुन्दरी

छिद्रोदरमित्यादि ॥ छिद्रोदरं स्वेदमन्तरेण श्लेष्मोदरवदुपक्रमेत् । यदा तु कथञ्चिद्रसश्छिद्रेभ्यः परिस्रवन् जठरमापूरयित्वा जलं भवेत्तदा तज्जातं

सलिलं स्राव्यम्। न च सकृदेव स्राव्यमिति प्रतिपादनार्थं वीप्सा। जातं जातं जलं स्राव्यमिति। कियन्तं कालं स्राव्यमित्याह — एवमित्यादि। एवमनेन प्रकारेण तत् छिद्रोदरं यापयेत् स्वास्थ्यमिति योग्यतयाऽत्र संबध्यते। तेनैव स्वास्थ्यं प्रापयेदिति बोध्यम्। न तु यप्यं विदध्यादिति व्याख्येयम्। न हि याप्यमुदरमस्ति। उदकोदरे पूर्वमपां दोषहराणि योजयेत्। तानि सर्वाणि गोमूत्रयुक्तानि तथा तीक्ष्णानि तथा विविधाः क्षारा विद्यन्ते येषु तानि विविधक्षारवन्ति अनेकक्षारयुक्तानीत्यर्थः। नन्वपामित्यनर्थकम् योजयेदुदकोदर इत्यनेनैव उदकोदरत्वस्य सिद्धत्वात्। अत्रोच्यते— अपाञ्च हरणानि यश्च तत्र संसृष्टो दोषोऽद्भिस्तस्य च हरणानि जलसंसृष्टदोषहरणानीति प्रतिपादयितुमुक्तम्। आदाविति निर्देशात् पश्चाद्वाताादिदोषानुसारेणैवोपक्रमः कार्य इति द्योतयति। तथा भोजनैर्दीपनीयैः कफापहैश्चोपाचरेत्। छागकरीषाणां क्षारं मूत्रे स्रुतमग्निना पचेत्। तस्मिंश्च क्षारजले घनीभवति सति कर्षांशं रजीकृतं पिप्पल्यादिकं क्षिपेत्। ततस्तस्मात् गुळिकाः कोलाभाः अर्धकर्षप्रमाणाः कृत्वा सौवीरकालोडिता अजरकादौ पिबेत्॥

शशिलेखा

छिद्रोदरे स्वेदं विना सर्वं कफोदरचिकित्सितं विधेयम्। उदकोदरे पूर्वमेवापां दोषहराण्युदककृतानां दोषाणां विकाराणामपहरणानि सगोमूत्राणि विविधक्षारवन्ति च तीक्ष्णानि तीक्ष्णादिगुणद्रव्यनिर्यूहादीनि योजयेत्। तमुदरिणं दीपनादिगुणैराहारैश्चोपाचरेत्। सुबोधम्॥

इत्यौषधैरप्रशमे त्रिषु बद्धोदरादिषु ॥ १०७ ॥

प्रयुञ्जीत भिषक् शस्त्रमार्तबन्धुनृपार्थितः।
स्निग्धस्विन्नतनोर्नाभेरधो बद्धक्षतान्त्रयोः ॥ १०८ ॥

पाटयेदुदरं मुक्त्वा वामतश्चतुरङ्गुलात्।
चतुरङ्गुलमानन्तु निष्कास्यान्त्राणि तेन च ॥ १०९ ॥

निरीक्ष्याऽपनयेद्बालमललेपोपलादिकम्।
छिद्रे तु शल्यमुद्धृत्य विशोध्यान्त्रं परिस्रवम् ॥ ११० ॥

मर्कोटैर्दंशयेच्छिद्रं तेषु लग्नेषु चाहरेत् ।
कायं मूर्ध्नोऽनु चान्त्राणि यथास्थानं निवेशयेत् ॥ १११ ॥

अक्तानि मधुसर्पिर्भ्यामथ सीव्येद्बहिर्व्रणम् ।
ततः कृष्णमृदाऽलिप्य बध्नीयाद्यष्टिमिश्रया ॥ ११२ ॥

निवातस्थः पयोवृत्तिः स्नेहद्रोण्यां वसेत्ततः ।

सर्वाङ्गसुन्दरी

इतीत्यादि ॥ इत्येवमौषधैरशान्तौ सत्यां त्रिषु बद्धछिद्रोदकोदरेषु वैद्य आर्तज्ञातिभिर्नृपेण चाभ्यर्थितः सन् शस्त्रं प्रयुञ्जीत । बद्धक्षतान्त्रयोर्बद्धोदरे क्षतोदरे च स्निग्धस्विन्नशरीरस्य नाभेरधोऽधस्तादुदरं चतुरङ्गुलं मुक्त्वा वामेन चतुरङ्गुलप्रमाणं पाटयेत् । वामतो वामभागे नाभेरधस्ताच्चतुरङ्गुलमपहाय रोमराज्याश्चतुरङ्गुलप्रमाणस्तिर्यगङ्गच्छेद इति सुश्रुतव्याख्याकारः । तेन छिद्रेणान्त्राणि तु बहिर्निष्कास्य निरीक्ष्य च बालादिकमपनयेदिति बद्धोदरोपक्रमः । छिद्रोदरोपक्रममाह — छिद्रे तु परिस्राविणि शल्यमुद्धृत्य परिस्रवमान्त्रं विशोध्याऽनन्तरं मर्कोटैश्छिद्रं दंशयेत् । तेषु च मर्कोटेषु भक्षयितुं लग्नेषु मूर्ध्नः शिरसोऽपरं कायं मर्कोटानामाकर्षेत् । अनु पश्चाच्चान्त्राणि मधुसर्पिर्भ्यामक्तानि यथास्थानं स्थापयेत् । अनन्तरं बहिर्व्रणं सीव्येत् । बहिःशब्दनिर्देशेनाभ्यन्तरगतं व्रणं न सीव्येदिति गम्यते । ततोऽनन्तरं कृष्णमृदा मधुयष्टीमिश्रयाऽलिप्य बध्नीयात् । अनन्तरं निवातस्थः क्षीरवृत्तिः सन् स्नेहद्रोण्यां वसेत् ॥

शशिलेखा

इत्यनन्तरोक्तैरौषधैरप्रशमेऽसिद्धौ त्रिषु बद्धाद्युदरेष्वातुरसुहृद्भिर्नृपेण चार्थितो भिषक् पृथग्विधक्रियोपयोगाय शस्त्रं प्रयुञ्जीत । अवचारयेत् । नाभेरधोऽधरभागे नाभितश्चत्वार्यङ्गुलानि परित्यज्य रोमराज्या वामभागे चतुरङ्गुलमात्रमुदरं पाटयेत् । तेन च छिद्रेणान्त्राणि निष्कास्य यथासन्निवेशं न त्यजन्ति तथा निरीक्ष्य गुदबन्धहेतुमान्त्रस्य प्रतिरोधकं बालादिकमपनयेदपहरेत् । छिद्रे छिद्रोदरे तु छिद्रं मर्कोटैर्वैद्यो दंशयेत् । सुबोधम् । पयसा क्षीरेणैव वृत्तिर्वर्तनं यस्य सः ॥

अथ जलोदरस्यान्येषामपि जातजलानामुदराणां चिकित्सितमाह—

सजले जठरे तैलैरभ्यक्तस्यानिलापहैः ॥ ११३ ॥

स्विन्नस्योष्णाम्बुनाऽऽकक्षमुदरे पट्टवेष्टिते ।
बद्धच्छिद्रोदिते स्थाने विध्येदङ्गुलमात्रकम् ॥ ११४ ॥

निधाय तस्मिन् नाडीं च स्रावयेदर्धमम्भसः ।
अथास्य नाडीमाकृष्य तैलेन लवणेन च ॥ ११५ ॥

व्रणमभ्यज्य बध्वा च वेष्टयेद्वाससोदरम् ।
तृतीयेऽह्नि चतुर्थे वा यावदाषोडशं दिनम् ॥ ११६ ॥

तस्य विश्रम्य विश्रम्य स्रावयेदल्पशो जलम् ।
विवेष्टयेद्गाढतरं जठरं च श्लथाश्लथम् ॥ ११७ ॥

निःस्रुते लङ्घितः पेयामस्नेहलवणां पिबेत् ।
स्यात् क्षीरवृत्तिः षण्मासांस्त्रीन् पेयां पयसा पिबेत् ॥ ११८ ॥

त्रींश्चाऽन्यान् पयसैवाद्यात् फलाम्लेन रसेन वा ।
अल्पशः स्नेहलवणं जीर्णं श्यामाककोद्रवम् ॥ ११९ ॥

प्रयतो वत्सरेणैवं विजयेत जलोदरम् ।
वर्ज्येषु यन्त्रितो दिष्टे नात्यदिष्टे जितेन्द्रियः ॥ १२० ॥

सजलेत्यादि । सजले जठरिणो जठरे तैलैस्तिलतैलसर्षपतैलैरण्डतैलादिभिरनिलघ्नैरभ्यक्तस्य तथोष्णाम्बुना स्विन्नस्याकक्षं कक्षान्तं यावदुदरे पट्टेन वेष्टिते उदरं वस्त्रेण वेष्टयित्वा बद्धच्छिद्रयोर्यत् कथितं स्थानं तस्मिंस्थानेऽङ्गुलप्रमाणमवगाढं विध्येत् । तस्मिंश्च छिद्रे नाडीं निधाय जलस्यार्धं स्रावयेत् । अथ जलस्रावादनन्तरमस्योदरिणो नाडिमाकृष्य सलवणेन तैलेन व्रणमभ्यज्य बध्वा च वाससा जठरं वेष्टयेत् । तृतीये दिवसेऽथवा चतुर्थे यावदाषोडशं दिनं तस्योदरिणो विश्रम्याल्पशोऽल्पमल्पं कृत्वा जलं स्रावयेत् । सहसा हि प्रचुरजलस्रवणादपायः स्यात् । तस्मात् स्रुतिदिवसादनन्तरं तृतीये चतुर्थे पञ्चमादौ वा दिने शरीरबलमपेक्ष्य षोडशदिनं मर्यादीकृत्य जलस्रावणं कार्यम् । जठरं च श्लथं

शिथिलं वाससा गाढतरं विवेष्टयेत्। निःस्रुते च जले जठरी लङ्घितः सन् पेयामस्नेहलवणां पिबेत्। नञत्र ईषदर्थे। ईषत्स्नेहलवणं क्लेदरक्षार्थं वातकोपरक्षार्थं च। अन्यथा हि रूक्षां निर्लवणां पेयां पिबेदित्येवं निर्देशमाचार्यः कुर्यात्। षण्मासान् क्षीरवृत्तिः स्यात्। त्रीन् मासान् क्षीरपेयां पिबेत्। त्रींश्चान्यान् मासान् पयसैव जीर्णं श्यामाककोद्रवमद्यात्। फलाम्लेन वा मांसरसेन। कथम्—अल्पमल्पं तथैव स्नेहलवणम्। अनेन प्रकारेण प्रयतः सलिलोदरं वत्सरेण विजयेत। वर्ज्येष्वाहारादिष्वत्यर्थोष्णाम्ललवणादिषु यन्त्रित उदरी स्यात्। दिष्टे कथितेऽन्नपानादौ नातियन्त्रितः स्यात्। दिष्टमप्याहारादिकं हीनमात्रया सेवनीयमित्यर्थः। अदिष्टे अकथिते पुनरन्नपानादौ जितेन्द्रियः स्यात्। अलोलुपेन तत्र भवितव्यमित्यर्थः॥

शशिलेखा

सजले जठरे उदकोदरनाम्न्युदरे। सर्वेषु चोदरेषु चिरकालप्ररूढत्वाज्जातोदकेषु तैलैरित्यादिनोदकस्रावणविधिः सुबोधः। तच्चोदकं सर्वं न स्रावयेत् सकृत्। अपि त्वर्धमात्रम्। नाडी यन्त्रविधावुक्ता। दोषाद्यपेक्षया त्रिरात्रान्तरितं वा चतुरन्तरितं वा एवं पञ्चादिकमपि। लङ्घयित्वा प्राप्तलङ्घनेन तु सर्वत्र। गतानुगतिका—प्रयतोऽतिप्रयत्नवान् संवत्सरेणोक्तप्रकारेण जलोदरं विजयेत। किंभूत इत्याह—वर्ज्येष्वत्यर्थोष्णाम्लादिषु यन्त्रितस्तदप्राप्तिलक्षणयत्नपरः सन्। दिष्टे पथ्यत्वेनोद्दिष्टे क्षीरादौ नातियन्त्रितः। अर्थान्नाप्ययन्त्रितः। अदिष्टेऽपीष्टप्रतिषिद्धे जितेन्द्रियः न त्विन्द्रियवश्यः॥

जलोदरचिकित्साप्रसङ्गेन सर्वोदरचिकित्सामाह—

सर्वमेवोदरं प्रायो दोषसङ्घातजं यतः।
अतो वातादिशमनी क्रिया सर्वा प्रशस्यते ॥ १२१ ॥

वह्निर्मन्दत्वमायाति दोषैः कुक्षौ प्रपूरिते।
तस्माद् भोज्यानि भोज्यानि दीपनानि लघूनि च ॥ १२२ ॥

सपञ्चमूलान्यल्पाम्लपटुस्नेहकटूनि च।
भावितानां गवां मूत्रे षष्टिकानाञ्च तण्डुलैः ॥ १२३ ॥

यवागूं पयसा सिद्धां प्रकामं भोजयेन्नरम्।
पिबेदिक्षुरसं चानु जठराणां निवृत्तये ॥ १२४ ॥

स्वं स्वं स्थानं व्रजन्त्येषां वातपित्तकफास्तथा ।
अत्यर्थोष्णाम्ललवणं रूक्षं ग्राहि हिमं गुरु ॥ १२५ ॥

गुडं तैलकृतं शाकं वारि पानावगाहयोः ।
आयासाध्वदिवास्वप्नयानयानानि च त्यजेत् ॥ १२६ ॥

नात्यच्छसान्द्रं मधुरं तक्रं पाने प्रशस्यते ।
सकणालवणं वाते पित्ते सोषणशर्करम् ॥ १२७ ॥

यवानीसैन्धवाजाजीमधुव्योपैः कफोदरे ।
त्र्यूषणक्षारलवणैः संयुतं निचयोदरे ॥ १२८ ॥

मधुतैलवचाशुण्ठीशताह्वाकुष्ठसैन्धवैः ।
प्लीह्नि बद्धे तु हपुषा यवानीपट्वजाजिभिः ॥ १२९ ॥

सकृष्णामाक्षिकं छिद्रे व्योषवत्सलिलोदरे ।
गौरवारोचकानाहमन्दवह्न्यतिसारिणाम् ॥ १३० ॥

तक्रं वातकफार्तानाममृतत्वाय कल्पते ।
प्रयोगाणाश्च सर्वेषामनु क्षीरं प्रयोजयेत् ॥ १३१ ॥

स्थैर्यकृत्सर्वधातूनां बल्यं दोषानुबन्धहृत् ।
भेषजापचिताङ्गानां क्षीरमेवामृतायते ॥ १३२ ॥

सर्वाङ्गसुन्दरी

सर्वमित्यादि ॥ सर्वमेवोदरं प्रायो बाहुल्येन दोषसङ्घातोत्थं यस्मादस्मात् सर्वोदरे वातादिशमनी क्रिया शस्यते । प्रायोग्रहणं किञ्चित् प्राक्तनमनिमित्तमुदरं नावश्यं दोषसङ्घातजमेवेति ज्ञापनार्थम् । वह्निमन्दत्वं यत आयांत्यागच्छति दोषैरुदरे प्रपूरिते सति तस्मात् कारणात् भोज्यान्याहारादीनि भोज्यानि भक्षितव्यानि जठरिभिर्दीपनानि लघूनि च । तथा सहपञ्चमूलेन तथाऽल्पाम्ललवणादयो येषु तानि । तथा गवां मूत्रे भावितानां षष्टिकानां तण्डुलैर्यवागू क्षीरेण सिद्धां प्रकाममिच्छया नरं भोजयेत् । अनु पश्चादिक्षुरसञ्च पिबेदुदराणां शान्त्यर्थम् । तथा कृते सति वातपित्तकफाश्चैषामुदरिणः स्वं स्वं स्थानं व्रजन्ति । अत्यर्थोष्णाम्ललवणादिकं जठरी त्यजेत् । वारि पानावगाहयोर्यदि त्यजेत्, तर्हि किं पेयमित्याह — नात्यच्छेत्यादि ।

तक्रमीषत् सान्द्रमधुरं पाने प्रशस्यते । तच्च पवने सपिप्पलीसैन्धवं श्रेष्ठम् । पित्ते समरिचशर्करम् । यवान्यादिभिः सह कफोदरे हितम् । त्रिकटुकादिभिः संयुक्तं सन्निपातोदरे । मधुतैलादिभिः प्लीहोदरे । पिप्पलीमधुयुतं छिद्रोदरे । जलोदरे व्योषयुतं श्रेष्ठम् । वातकफार्तानां गौरवारोचकादियुतानां तक्रममृतत्वाय कल्पते सम्पद्यते । एतच्च ब्रुवन् वातकफयोः शुद्धमपि देयमिति द्योतयति । सर्वेषां च प्रयोगाणामनु पश्चात् क्षीरं प्रयोजयेत् । तच्च क्षीरं सर्वधातूनां स्थिरत्वं करोति । तथा बल्यं स्याद्दोषानुबन्धं हरति । दोषजैरपचितमङ्गं शरीरं येषां तेषां क्षीरमेवामृतायते अमृतमिवाचरति ॥

शशिलेखा

सर्वस्मिंश्चोदरे वातादिशमनी क्रियेष्यते । यतः सर्वमेवोदरं प्रायेण सन्निपातजमेव । सुबोधम् । एषामित्युदरिणाम् । तथेत्युक्तप्रकारेण । सर्वश्चोदर्यत्यर्थोष्णादिगुणं च त्यजेत् । नात्यच्छादिगुणश्च तक्रं पाने प्रशस्यते । तच्च तक्रं पिप्पलीलवणयुक्तं वाते । मरिचशर्कराभ्यां पित्ते । यवान्यादिभिर्युक्तं तक्रं कफोदरे । सन्निपातोदरे त्र्यूषणादिभिर्युतं तक्रम् । मध्वादिभिः प्लीहोदरे । हपुषादिभिर्बद्धोदरे । छिद्रोदरे पिप्पलीमाक्षिकयुक्तं तक्रम् । सलिलोदरे व्योषयुक्तम् । गौरवादियुक्तानां वातश्लेष्मार्तानां तक्रममृतत्वाय कल्पते सम्पद्यत इत्यर्थः । सर्वेषाञ्च प्रयोगाणामनु पश्चात् क्षीरं प्रयोगे निष्पन्ने शस्यते । यतस्तत् क्षीरं स्थैर्यकृत्वादियुक्तम् । तथा तेन प्रयोगभेषजेन येषामपचितमङ्गं शरीरं तेषां क्षीरमेवामृतायते अमृतमिवाचरति जीवितदानेन ॥

इति पञ्चदशोऽध्यायः

षोडशोऽध्यायः

पाण्डुरोगचिकित्सितम्

उदरचिकित्सितादनन्तरं पाण्डुरोगचिकित्सितं व्याख्यातुमुपक्रमते। सम्बन्धश्चास्य निदान एवोक्तः।

अथातः पाण्डुरोगचिकित्सितं नामाध्यायं व्याख्यास्यामः॥
इति ह स्माहुरात्रेयादयो महर्षयः।

पाण्ड्वामयी पिबेत्सर्पिरादौ कल्याणकाह्वयम्।
पञ्चगव्यं महातिक्तं भृतं वाऽरग्वधादिना ॥ १ ॥

सर्वाङ्गसुन्दरी

पाण्ड्वामयीत्यादि॥ आद्विरित्यनेनैतत् गमयति। अस्मिन् व्याधौ प्राधान्येन पित्तचिकित्सा कार्या। तदनु वातकफयोः। तथा च पित्तस्यैवेतद्व्याधिकर्तृत्वे प्राधान्यम्। अत एव च निदानेऽध्यगीष्ट— "पित्तप्रधानाः कुपिताः" इत्यादि। तस्मात् पित्तस्योपशान्त्यै सर्पिःपानं युक्तम्। पञ्चगव्यं घृतमपस्मारप्रतिषेधोक्तम्। महातिक्तं कुष्ठचिकित्सितोक्तम्। आरग्वधादिगणेन वा पक्वं घृतं पिबेत्॥

शशिलेखा

पाण्ड्वामयी प्रथममेव कल्याणकादीनां घृतानामन्यतमं पिबेत्।

डाडिमात् कुडबो धान्यात् कुडवार्धं पलं पलम्।
चित्रकाच्छृङ्गिवेराच्च पिप्पल्यर्धपलं च तैः ॥ २ ॥
कल्कितैर्विंशतिपलं घृतस्य सलिलाढके।
सिद्धं हृत्पाण्डुगुल्मार्शःप्लीहवातकफार्तिनुत् ॥ ३ ॥
दीपनं श्वासकासघ्नं मूढवातानुलोमनम्।
दुःखप्रसविनीनां च वन्ध्यानां च प्रशस्यते ॥ ४ ॥

सर्वाङ्गसुन्दरी

डाडिमादित्यादि ॥ डाडिमात् डाडिमसारात् कुडुबं धान्यात् कुडुबार्धं चित्रकशुण्ठ्योः प्रत्येकं पलं पिप्पल्याः द्वौ कर्षौ। तैः पिष्टैः घृतस्य पलानि विंशतिं तोयाढके पचेत्। तच्च सिद्धं हृदयाद्यार्तिजित्। दीपनादिगुणयुक्तञ्च। दुःखेन प्रसविनीनां स्त्रीणां वन्ध्यानामप्रसविनीनाञ्च शस्यते गर्भदत्वात् ॥

शशिलेखा

डाडिमाद्यं सुबोधम्। डाडिमः डाडिमसारः। डाडिमबीजानीत्यर्थः। प्रसवकाले या दुःखेन प्रसूयन्ते, तासां वन्ध्यानामप्रवृत्तप्रजानां च प्रशस्यते॥

स्नेहितं वामयेत्तीक्ष्णैः पुनः स्निग्धं च शोधयेत्।
पयसा मूत्रयुक्तेन बहुशः केवलेन वा ॥ ५ ॥

दन्तीपलरसे कोष्णे काश्मर्याञ्जलिमासुतम्।
द्राक्षाञ्जलिं वा मृदितं तत् पिबेत् पाण्डुरोगजित् ॥ ६ ॥

मूत्रेण पिष्टां पथ्यां वा तत्सिद्धं वा फलत्रयम्।
स्वर्णक्षीरीत्रिवृच्छ्यामाभद्रदारुमहौषधम् ॥ ७ ॥

गोमूत्राञ्जलिना पिष्टं शृतं तेनैव वा पिबेत्।
साधितं क्षीरमेभिर्वा पिबेद्दोषानुलोमनम् ॥ ८ ॥

मूत्रे स्थितं वा सप्ताहं पयसाऽयोरजः पिबेत्।
जीर्णे क्षीरेण भुञ्जीत रसेन मधुरेण वा ॥ ९ ॥

शुद्धश्चोभयतो लिह्यात् पथ्यां मधुघृतद्रुताम्।

सर्वाङ्गसुन्दरी

• स्नेहितमित्यादि ॥ स्नेहितं पाण्डुरोगिणं तीक्ष्णैर्वामयेत्। पुनरपि स्निग्धं च बहुशः क्षीरेण मूत्रयुतेन शोधयेत्। केवलेन वा पयसा शोधयेत्। दन्तीपलरसे कोष्णे काश्मर्याञ्जलिमासुतम् अथवा द्राक्षाञ्जलिं मर्दितं पिबेत्। गो-

मूत्रेण पिष्टां हरीतकीं वा पिबेत्। तेन गोमूत्रेण सिद्धं क्वथितं फलत्रयं वा पिबेत्। तदेतदुभयमपि पाण्डुरोगघ्नम्। स्वर्णक्षीर्यादिकं गोमूत्राञ्जलिना पिष्टमथवा तेन गोमूत्रेणैव शृतं पिबेत्। एभिर्वा स्वर्णक्षीर्यादिभिर्द्रव्यैः क्षीरं साधितं दोषानुलोमकरं पिबेत्। गोमूत्रे सप्ताहं स्थितं लोहचूर्णं क्षीरेण पिबेत्। जीर्णे तस्मिन् क्षीरेण सह भुञ्जीत। मांसरसेन वा मधुरेण, न त्वम्लेन। शुद्धश्चोभयतः पायुतो मुखतश्च हरीतकीं मधुघृतद्रुतां लिह्यात्॥

शशिलेखा

एतैर्घृतैः स्नेहितं पाण्डुरोगिणं तीक्ष्णैरौषधैर्वामयेत्। पुनश्च वमने कृते स्निग्धं समूत्रेण पयसा केवलेन पयसा वा बहुशः शोधयेत्। सुबोधम्। गोमूत्रेण कल्कितां हरीतकीं वा तत्सिद्धं तेन गोमूत्रेण सिद्धमामूत्रक्षयं क्वथितं फलत्रयं त्रिफलां वा पिबेत्। स्वर्णक्षीर्यादिकं पिष्टं कल्कितं गोमूत्राञ्जलिना पिबेदथवा तेन मूत्रेणैव क्वथितं स्वर्णक्षीर्यादिकं पिबेत्। एभिरिति प्रयोगौषधैः साधितं शृतं क्षीरं वा दोषानुलोमनं पिबेत्। सुबोधम्॥

विशाला कटुका मुस्ताकुष्ठदारुकलिङ्गकाः ॥ १० ॥

कर्षांशा द्विपिचुर्मूर्वा कर्षार्धांशा घुणप्रिया।
पीत्वा तच्चूर्णमम्भोभिः सुखैर्लिह्यात्ततो मधु ॥ ११ ॥

पाण्डुरोगं ज्वरं दाहं कासं श्वासमरोचकम्।
गुल्मानाहामवातांश्च रक्तपित्तं च तज्जयेत् ॥ १२ ॥

वाशागुडूचीत्रिफलाकट्वीभूनिम्बनिम्बजः।
क्वाथः क्षौद्रयुतो हन्ति पाण्डुपित्तास्रकामिलाः ॥ १३ ॥

व्योषाग्निवेल्लत्रिफलामुस्तैस्तुल्यमयोरजः।
चूर्णितं तक्रमध्वाज्यकोष्णाम्भोभिः प्रयोजितम् ॥ १४ ॥

कामिलापाण्डुहृद्रोगकुष्ठार्शोमेहनाशनम्।
गुडनागरमण्डूरतिलांशान्मानतः समान् ॥ १५ ॥

पिप्पलीद्विगुणान्दद्यात् गुळिकां पाण्डुरोगिणे।
ताप्यं दार्व्यास्त्वचं चव्यं ग्रन्थिकं देवदारु च ॥ १६ ॥

व्योषादिनवकं चैतच्चूर्णयेत् द्विगुणं ततः ।
मण्डूरं चाञ्जननिभं सर्वतोऽष्टगुणेऽथ तत् ॥ १७ ॥

पृथग्विपक्के गोमूत्रे वटकीकरणक्षमे ।
प्रक्षिप्य वटकान् कुर्यात्तान् खादेत्तक्रभोजनः ॥ १८ ॥

एते मण्डूरवटकाः प्राणदाः पाण्डुरोगिणाम् ।
कुष्ठान्यजरकं शोफमूरुस्तम्भमरोचकम् ॥ १९ ॥

अर्शांसि कामिलां मेहं प्लीहानं शमयन्ति च ।

सर्वाङ्गसुन्दरी

विशालेत्यादि ॥ विशालादयः षट् कर्षमात्राः । मूर्वा द्विकर्षप्रमाणा अर्धकर्षमात्रा अतिविषा । तदेतच्चूर्णं कोष्णाम्बुना पीत्वाऽनन्तरं माक्षिकं लिह्यात् । एतच्च पाण्डुरोगादीन् हन्ति । वाशादिक्वाथो मधुयुतः पीतः पाण्डवादीन् हन्ति । कट्वी कटुकरोहिणी । व्योषादिभिस्तुल्यमयोरजश्चूर्णितं तक्रादिभिरुपयोजितं कामिलादिनाशनम् । गुडादिकान् समांशान् पिप्पलीद्विगुणान् । इमां गुळिकां पाण्डुरोगिणे दद्यात् । ताप्यो माक्षिकधातुः । ताप्यादिकं व्योषादिनवकं च चूर्वोक्तं चूर्णयेत् । ततस्तेभ्यो द्विगुणं मण्डूरमञ्जनसदृशं सर्वेभ्योऽष्टगुणे गोमूत्रे पृथग्विपक्वे वटकीकरणक्षमे घने सति प्रक्षिप्य वटकान् कुर्यात् । तांश्च तक्रप्रधानः सन्नश्नीयात् । एते मण्डूरवटकाः पाण्डवामयिनां प्राणदाः । तथा कुष्ठादीन् घ्नन्ति ॥

शशिलेखा

विशालादयः कर्षांशाः कर्षप्रमाणाः । मूर्वा द्विपिचुः कर्षद्वयप्रमाणः । घुणप्रिया अतिविषा कर्षार्धांशा अर्धकर्षप्रमाणा । तदेतच्चूर्णमुष्णाम्बुना पीत्वा अनन्तरं माक्षिकं केवलं लिह्यात् । तच्चूर्णं पाण्डवादीन् जयेद्विनाशयेत् । कटुका कटुकरोहिणी । सुबोधम् । व्योषादीनां नवानां नव भागाः । स्तावन्त एवायश्चूर्णस्य । तक्रादिभिरुपयोगः । एतस्य नवायसस्य कामिलादिहरत्वम् । अग्निश्चित्रकः । वेल्लं विळङ्गम् । ताप्यो माक्षिकधातुः । ग्रन्थिकं पिप्पलीमूलम् । व्योषादिनवकं नवायसोक्तम् । ततश्चूर्णात् द्विगुणमञ्जननिभं मण्डूरं लोहमलम् ।

सर्वत इति। मण्डूरसहितात् चूर्णादष्टगुणं गोमूत्रं विपक्तव्यम्। अस्मिंश्च वटकसम्पादनयोग्ये चूर्णं मण्डूरञ्च प्रक्षेप्तव्यम्। मेदसा आवृतो वायुरूरुस्तम्भः॥

ताप्याद्रिजतुरौप्यायोमलाः पञ्चपलाः पृथक् ॥ २० ॥

चित्रकत्रिफलाव्योषविडङ्गैः पालिकैः सह।
शर्कराष्टपलोन्मिश्राश्चूर्णिता मधुना द्रुताः ॥ २१ ॥

पाण्डुरोगं विषं कासं यक्ष्माणं विषमं ज्वरम्।
कुष्ठान्यजरकं मेहं शोफं श्वासमरोचकम् ॥ २२ ॥

विशेषाद्धन्त्यपस्मारं कामिलां गुदजानि च।

सर्वाङ्गसुन्दरी

ताप्याद्रिजत्वित्यादि ॥ ताप्यादयः पृथक् पञ्चपलाश्चित्रकादिभिः पालिकैः सह चूर्णीकृताः शर्कराष्टपलोन्मिश्रा मधुना द्रवीकृताः पाण्डुरोगादीन् घ्नन्ति। विशेषेणापस्मारादींश्च॥

शशिलेखा

ताप्यादयः पृथक् पञ्चपलिकाः चित्रकादिभिः पृथक् पालिकैः प्रत्येकं पलांशैः सह चूर्णिताः क्षौद्रेण द्रुताः पाण्डुरोगादीन् विशेषादपस्मारादींश्च घ्नन्ति॥

कौटजत्रिफलानिम्बपटोलघननागरैः ॥ २३ ॥

भावितानि दशाहानि रसैर्द्वित्रिगुणानि वा।
शिलाजतुपलान्यष्टौ तावती सितशर्करा ॥ २४ ॥

त्वक्क्षीरीपिप्पलीधात्रीकर्कटाख्याः पलोन्मिताः।
निदिग्ध्याः फलमूलाभ्यां पलं युक्त्या त्रिजातकम् ॥ २५ ॥

मधुत्रिपलसंयुक्तान् कुर्यादक्षसमान् गुडान्।
डाडिमाम्बुपयःपक्षिरसतोयसुरासवान् ॥ २६ ॥

तान् भक्षयित्वानुपिबेन्निरन्नो भुक्त एव वा।
पाण्डुकुष्ठज्वरप्लीहतमकार्शोभगन्दरम् ॥ २७ ॥

हृन्मूत्रपूतिशुक्राग्निदोषशोषगरोदरम् ।
कासासृग्दरपित्तासृक्शोफगुल्मगळामयान् ॥ २८ ॥

मेहवर्ध्मभ्रमान् हन्युः सर्वदोषहराः शिवाः ।

सर्वाङ्गसुन्दरी

कौटज इत्यादि ॥ कौटजादिभिर्द्रव्यैः रसै रसतां गतैः क्वाथीकृतैरित्यर्थः । शिलाजतुपलान्यष्टौ दशाहानि द्विगुणानि त्रिगुणानि वा भावितानि । अहश्शब्दो वारोपलक्षणार्थः । तदयमत्रार्थोऽवतिष्ठते । शिलाजतुपलाष्टकं केवलजलधौतं कौटजादिकं तत्तुल्यम् अष्टगुणिते जले क्वथितं ततोऽष्टभागावशेषं रसं गृहीत्वा तेन रसेन दश वारान् द्विगुणान् त्रिगुणान् वा भावयेदिति । तावत्यष्टपलप्रमाणा सितशर्करा । त्वक्क्षीर्यादिकं पलोन्मितम् । कण्टकार्याः फलमूलयोः पलम् । त्रिजातं युक्त्या । यावता त्रिजातकेनातिसौगन्ध्यं हीनसौगन्ध्यं वा न स्यात् । एवं न हीनमात्रमलैतद्देयमव्यापकत्वान्न चातिमात्रमतिव्यापकत्वेनायोगार्हत्वात् । मधुनस्त्रिभिः पलैः संयुक्तानक्षसम्मितान् कार्षिकान् गुडान् विदध्यात् । तान् गुडान् भक्षयित्वा अनु पश्चात् डाडिमजलादीनि यथायोगं पिबेन्निरन्नः कृताहारो वा । ते च वटकाः पाण्ड्वादीन् हन्युः । सर्वदोषहराः शिवाश्च स्युः ॥

शशिलेखा

कौटजत्रिफलेत्यादिना गुळिका सुबोधा । कौटजादिभी रसैः कौटजादीनां पृथक् पृथक् क्वाथैः शिलाजतुनो भावना । दशाहेन द्विगुणेन विंशतिदिनेन त्रिगुणेन मासेन वा भावना निष्पत्तिः । भावितशिलाजतुसमा शर्करा । कौटजं कुटजफलमिन्द्रयवः । घनो मुस्ता । हृद्दोषो हृद्रोगः । मूत्रदोषाः पूतिशुक्रदोषाश्च सर्वे मूत्रशुक्राश्रया रोगाः । अग्निदोषोऽग्निमान्द्यम् असृग्दरं नारीषु रजोदोषः । तच्चोत्तरे वक्ष्यते ॥

द्राक्षाप्रस्थं कणाप्रस्थं शर्करार्धतुलां तथा ॥ २९ ॥

द्विपलं मधुकं शुण्ठीत्वक्क्षीरीं च विचूर्णितम् ।
धात्रीफलरसद्रोणे तत् क्षिप्त्वा लेहवत्पचेत् ॥ ३० ॥

शीतान्मधुप्रस्थयुताल्लिह्यात्पाणितलं ततः ।
हलीमकं पाण्डुरोगं कामिलां च नियच्छति ॥ ३१ ॥

कनीयः पञ्चमूलाम्बु शस्यते पानभोजने ।
पाण्डूनां कामिलार्तानां मृद्वीकामलकाद्रसः ॥ ३२ ॥

सर्वाङ्गसुन्दरी

द्राक्षेत्यादि ॥ द्राक्षायाः प्रस्थं षोडशपलानि कणायाः पिप्पल्याश्च प्रस्थं शर्करायाः पलानि पञ्चाशत् । यष्ट्यादिकं रजीकृतं द्विपलप्रमाणम् । धात्रीफलरसस्य द्रोणे सर्वमेतत् क्षिप्त्वा लेहमिव पचेत् । तस्माल्लेहाच्छीतान्मधुनः प्रस्थयुतात् पाणितलं कर्षमात्रं लिह्यात् । स च लेहो हलीमकादीन् नियच्छति पराकरोति । पानभोजने च शस्यते ह्रस्वपञ्चमूलजलम् । मृद्वीकारसः आमलकरसश्च पाण्डुरोगिणां कामिलार्तानाञ्च शस्यते ॥

शशिलेखा

द्राक्षाप्रस्थमित्यादि सुबोधम् । ततो द्राक्षादिलेहात् पाणितलं कर्षं हलीमकादिषु लिह्यात् । सर्वेषां पाण्डुरोगिणां कामिलार्तानाञ्च । कनीयःपञ्चमूलाम्बु ह्रस्वपञ्चमूलजलम् । मृद्वीकामलकाद्रसश्च पाने भोजने च शस्यते ॥

इति सामान्यतः प्रोक्तं पाण्डुरोगभिषग्जितम् ।
विकल्प्य योज्यं विदुषा पृथग्दोषबलं प्रति ॥ ३३ ॥

स्नेहप्रायं पवनजे तिक्तशीतं तु पैत्तिके ।
श्लैष्मिके कटुरूक्षोष्णं विमिश्रं सान्निपातिके ॥ ३४ ॥

सर्वाङ्गसुन्दरी

इतीत्यादि ॥ इत्येवं पाण्डुरोगे सामान्येन भिषग्जितमौषधं प्रोक्तम् । तदभिज्ञेन वैद्येन विकल्प्य निरूप्य पृथग्दोषबलं लक्षणीकृत्य योज्यम् पवनजे पाण्डौ स्नेहप्रायं स्नेहभूयिष्ठं भेषजम् । पैत्तिके तु तिक्तशीतप्रायम् । श्लैष्मिके कटुरूक्षोष्णभूयिष्ठम् । सान्निपातिके विमिश्रं चिकित्सितम् ॥

शशिलेखा

इत्यस्मिन्नध्याये सामान्येन पाण्डुरोगस्य यच्चिकित्सितमुक्तं तद्विदुषा पण्डितेन पृथग्दोषबलं प्रति विकल्प्य वातादिकेषु विभागेन कल्पयित्वा योज्यम्। यद्यत्र पथ्यं तत्तत्र प्रयोज्यमित्यर्थः। एतदेव स्नेहप्रायमित्यादिना स्फुटीक्रियते॥

मृदं निर्वापयेत् कायात्तीक्ष्णैः संशोधनैः पुरः
बलाधानानि सर्पींषि शुद्धे कोष्ठे तु योजयेत् ॥ ३५ ॥

व्योषबिल्वद्विरजनीत्रिफलाद्विपुनर्नवम् ।
मुस्तान्ययोरजः पाठा विडङ्गं देवदारु च ॥ ३६ ॥

वृश्चिकाली च भार्ङ्गी च सक्षीरैस्तैः शृतं घृतम् ।
सर्वान् प्रशमयत्याशु विकारान् मृत्तिकाकृतान् ॥ ३७ ॥

तद्वत् केसरयष्ट्याह्वपिप्पलीक्षीरशाड्वलैः ।

सर्वाङ्गसुन्दरी

मृदमित्यादि ॥ कायाच्छरीरान्मृदं शल्यभूतां तीक्ष्णैः संशोधनैः सुधाक्षीरादिभिर्हरेत् पुरः पूर्वम्। शुद्धे तु कोष्ठे बलाधानानि घृतानि योजयेत्। तान्येवाह—व्योषादिभिर्घृतैश्चतुर्थांशैः घृतसमेन क्षीरेण तच्चतुर्गुणेन जलेन शृतं घृतं सर्वान् विकारान् मृत्तिकाकृतान् शमयति। केसरादिभिः पक्वं सर्पिस्तद्वत् पूर्वगुणम्। केसरं नागकेसरम्॥

शशिलेखा

मृदमित्यादिना मृद्भक्षणपाण्डुरोगचिकित्सा। तत्रापि मृद्यावदपक्वा कोष्ठे व्यवतिष्ठते तावत् कुतस्तद्विकाराणामुपशमः। तस्मात् प्रथममेव मृदः कायान्निर्यातनं पश्चात् पाण्डुरोगचिकित्सा। तां च मृदं तीक्ष्णैः संशोधनैः कायान्निर्घातयेत्। तु पश्चात् कोष्ठ शुद्धे सर्पींषि योजयेत्। तानि बलाधानानि बलस्योत्पादकानि भवन्ति। व्योषादिभिः कल्कीभूतैः क्षीरेण च स्नेहसमेन सर्पिर्विपक्वं मृत्तिकाकृतान् सर्वान् विकारानाशु प्रशमयति। केसरादिभिः शृतं घृतं तद्वत् गुणैर्व्योषादिवदित्यर्थः। पिप्पली पिप्पलीमूलम्। क्षीरशाड्वला शुक्लदूर्वा॥

मृद्द्वेषणाय तल्लौल्ये वितरेद् भावितां मृदम् ॥ ३८ ॥

वेल्लाग्निनिम्बप्रसवैः पाठया मूर्वयाऽथवा ।
मृद्भेदभिन्नदोषानुगमाद्योज्यं च भेषजम् ॥ ३९ ॥

सर्वाङ्गसुन्दरी

मृद्द्वेषणायेत्यादि ॥ मृद्द्वेषणार्थं तस्यां मृदि लौल्ये लोलुपत्वे सति वेल्लादिभिर्भावितां मृदं दद्यात्। वेल्लं विळङ्गम्। मृदो भेदो विशेषः। तेन भिन्नो विशेषितो यो दोषस्तस्य वातादेरनुगमात् ज्ञानात्। "मृत् कषायानिलं पित्तमूषरा मधुरा कफम्। दूषयित्वे"त्येवं लक्षणाद्दोषानुगमात् भेषजं योज्यम्। नैवं मृद्भक्षणविकारमात्रविज्ञानेन। मृन्निर्हरणौषधं च तत् हेतुविपरीतमेवेत्यवेहि। यतो मृदा हेतुभूतया यः पाण्डुरोग उद्भूतस्य मृन्निर्हरणं विपरीतमेव ॥

शशिलेखा

यदा तु मृद्विषयं लौल्यं श्रद्धा भवति तदा तस्या मृदो द्वेषणार्थं वेल्लादिभिर्भावितां मृदमस्मै दद्यात्। वेल्लं विळङ्गम्। निम्बप्रसवं निम्बपल्लवम्। न केवलमेतत् कुर्यात् यावन्मृद्भेदेन यो दोषभेदस्तदनुगमाच्च भेषजं योज्यम्। तेनैतदुक्तं भवति। कषायरसमृद्भक्षणजेषु विकारेषु वातहरं भेषजं योज्यम्। ऊषरायां मृदि भुक्तायां पित्तहरम्। मधुरायां कफहरमिति ॥

कामिलायां तु पित्तघ्नं पाण्डुरोगाविरोधि यत् ।
पथ्याशतरसे पथ्यावृन्तार्धशतकल्कितः ॥ ४० ॥

प्रस्थस्सिद्धो घृताद्गुल्मकामिलापाण्डुरोगनुत् ।
आरग्वधं रसेनेक्षोर्विदार्यामलकस्य वा ॥ ४१ ॥

सव्यूषणं बिल्वमात्रं पाययेत्कामिलापहम् ।
चित्रेन्द्रिकुम्भकल्कं वा द्विगुडं शीतवारिणा ॥ ४२ ॥

कुम्भस्य चूर्णं सक्षौद्रं त्रैफलेन रसेन वा ।
त्रिफलाया गुडूच्या वा दार्व्या निम्बस्य वा रसम् ॥ ४३ ॥

प्रातः प्रातर्मधुयुतं कामिलार्ताय योजयेत् ।
निशागैरिकधात्रीभिः कामिलापहमञ्जनम् ॥ ४४ ॥

तिलपिष्टनिभं यस्तु कामिलावान् सृजेन्मलम् ।
कफरुद्धपथं तस्य पित्तं कफहरैर्जयेत् ॥ ४५ ॥

सर्वाङ्गसुन्दरी

कामिलायामित्यादि ॥ कामिलायान्तु पित्तहरमौषधं यत् पाण्डुरोगाविरोधि तद्देयम् । पथ्याशतक्वाथे पथ्यावृन्तपञ्चाशत्कल्कीकृतो घृतप्रस्थः पक्वः कामिलादिघ्नः । कर्णिकारमिक्ष्वाद्यन्यतमरसेन सह त्रिकटुकं पलप्रमाणं कामिलापहं पाययेत् । निकुम्भकल्कं वा द्विगुडं द्विगुणप्रमाणगुडं शिशिरजलेन पिबेत् । निकुम्भो दन्ती । कुम्भस्य त्रिवृतश्चूर्णं क्षौद्रसहितं त्रैफलेन रसेन त्रिफलाक्वाथेन पिबेद्वा । त्रिफलाद्यन्यतमरसं मधुयुतं प्रातः प्रातः कामलिने योजयेत् । निशादिभिरञ्जनं कामिलाहृत् । यः पुनः कामिलावान्मलं तिलपिष्टसदृशं मुञ्चेत्तस्यातुरस्य कफरुद्धमार्गं पित्तं कफघ्नैर्द्रव्यैर्जयेत् ॥

शशिलेखा

कामिलायान्तु पित्तघ्न उपक्रमो योज्यो यः पाण्डुरोगे न विरुद्ध्यते । एतत् पाण्डुरोगकामिलामधिकृत्योक्तम् । तथा पथ्यानां शतस्य क्वाथे पथ्यावृन्तानामेव शतं कल्कीकृतं दत्वा घृतं पचेत् । पथ्याया हरीतक्या वृन्तानि पत्राणि । इक्ष्वादीनामन्यतमस्य रसेनारग्वधं समेन त्र्यूषणेन युक्तं कामिलापहं भिषगातुरं पाययेत् । विल्वमात्रं मरिचादियुक्तं सत् । मात्रशब्देनाचार्यः पलस्य दोषाद्यपेक्षया ऊनस्याधिकस्य वा प्रयोगमुपदिशति । निकुम्भस्य दन्त्याः कल्कं वा द्विगुडं द्विगुणगुळं शीतवारिणा पिबेत् । कुम्भस्त्रिवृत्तस्याश्चूर्णं त्रिफलायाः कषायेण पिबेद्वा । त्रिफलादीनामन्यतमस्य रसं क्वथितगृहीतं कषायं माक्षिकेण युक्तं कामिलार्ताय योजयेदिति सामान्येन कामिलायाश्चिकित्सा । तिलपिष्टनिभमित्यादिना विशेषेण । सुबोधम् । रूक्षशीतेत्यादिना कामिलायाः शाखाश्रयकारणं लिङ्गं चिकित्सा च क्रमेणोच्यते । इति च ॥

रूक्षशीतगुरुस्वादुव्यायामचलनिग्रहैः ।
कफसम्मूर्छितो वायुर्यदा पित्तं बहिः क्षिपेत् ॥ ४६ ॥

हारिद्रनेत्रमूत्रत्वक्श्वेतवर्चास्तदा नरः ।
भवेत्साटोपविष्टम्भो गुरुणा हृदयेन च ॥ ४७ ॥

दौर्बल्याल्पाग्निपार्श्वार्तिहिध्माश्वासारुचिज्वरैः ।
क्रमेणाल्पेऽनुषज्येत पित्ते शाखासमाश्रिते ॥ ४८ ॥

रसैस्तं रूक्षकट्वम्लैः शिखितित्तिरिदक्षजैः ।
शुष्कमूलकजैर्यूषैः कुलत्थोत्थैश्च भोजयेत् ॥ ४९ ॥

भृशाम्लतीक्ष्णकटुकलवणोष्णं च शस्यते ।
सबीजपूरकरसं लिह्याद्व्योषं तथाशयम् ॥ ५० ॥

स्वं पित्तमेति तेनास्य शकृदप्यनुरज्यते ।
वायुश्च याति प्रशमं सहाटोपाद्युपद्रवैः ॥ ५१ ॥

निवृत्तोपद्रवस्यास्य कार्यः कामिलिको विधिः ।

सर्वाङ्गसुन्दरी

रूक्षशीतेत्यादि ॥ रूक्षशीतेत्यादिना कामिलायाः शाखाश्रयकारणं लिङ्गं चिकित्सा च क्रमेणोच्यते । रूक्षादिभिः पवनः कुपितः कफेन मिश्रितो यदा पित्तं बहिः क्षिपेत्, तदा पुरुषः हारिद्रनेत्रादिभिर्भवेदाटोपादिमांश्च । हृदयेन च गुरुणा युक्तः । अन्तरल्पे पित्ते शाखासमाश्रिते दौर्बल्यादिभिः क्रमेणानुषज्येत । अनुषज्येतेति कर्मकर्तरि । तं तादृशं नरं रसै रूक्षकट्वम्लैर्मयूरादिमांसजैस्तथा शुष्कमूलकोद्भवैर्यूषैस्तथा कुलत्थोत्थैर्भोजयेत् । भृशाम्लादिकं च भोजनं शस्यते । तथा बीजपूरकरससहितं व्योषं लिह्यात् । तथैवंकृते सति अस्य पित्तं स्वमाशयमेति । शकृच्चानुरज्यते । वायुश्च प्रशमं यात्याटोपादिभिरुपद्रवैः सह । अस्यातुरस्यापगतोपद्रवस्य सतः कामिलाविहितो विधिः कार्यः ॥

शशिलेखा

रूक्षादिभिः सर्वैः श्लेष्मणा सम्मूर्छित एकत्वमापन्नो वायुः कुपितो यदा पित्तं कोष्ठाद्बहिः क्षिपेत्तदा हारिद्रनेत्रत्वादिमानातुरः साटोपविष्टम्भो गुरुणा हृदयेन चोपलक्षितो भवेत् । शाखासमाश्रिते च पित्तेऽन्तरल्पे सति दौर्बल्यादिभिरातुरः क्रमेणानुषज्येत । तं तथाविधं शाखाकामिलिनं रूक्षत्वादियुक्तैः शिख्यादीनां

मांसरसैः शुष्कमूलकादिजैश्च यूषैरन्नं भोजयेत्। तस्य चाहारौषधादिकं सर्वं भृशमतिशयेनाम्लत्वादियुक्तं शस्यते। व्योषञ्च बीजपूरकस्य रसेन सह लिह्यात्। तथेत्युक्तेनोपक्रमेणान्तर्वातश्लेष्मणि जिते पित्तं शाखाभ्यः स्वमाशयं स्थानमेति। तेनेति पित्तेन। अस्येति रोगिणः। कामिलिक इति सामान्यकामिलामधिकृत्योक्तः कार्यो विधेय इति॥

गोमूत्रेण पिबेत् कुम्भकामिलायां शिलाजतु ॥ ५२ ॥
मासं माक्षिकधातुं वा किट्टं वाऽथ हिरण्यजम्।

सर्वाङ्गसुन्दरी

गोमूत्रेणेत्यादि॥ कुम्भकामिलायां गोमूत्रेणालोळितं शिलाजतु पिबेत्। माक्षिकधातुं वा गोमूत्रेण मासं यावत् पिबेत्। हिरण्यजं स्वर्णोत्थं मलं वा गोमूत्रेण पिबेत्। हिरण्यं रूप्यमिति केचित्॥

शशिलेखा

गोमूत्रेणेत्यादिना कुम्भकामिलायाम्। सुबोधम्। माक्षिकधातुर्वर्ट्टमाक्षिकम्। हिरण्यजं किट्टं सुवर्णमलम्॥

गुळूचीस्वरसक्षीरसाधितेन हलीमकी ॥ ५३ ॥
महिषीहविषा स्निग्धः पिबेद्धात्रीरसेन तु।
त्रिवृतां तद्विरिक्तोऽद्यात्स्वादु पित्तानिलापहम् ॥ ५४ ॥
द्राक्षालेहं च पूर्वोक्तं सर्पींषि मधुराणि च।
यापनान् क्षीरबस्तींश्च शीलयेत्सानुवासनान् ॥ ५५ ॥
मार्द्वीकारिष्टयोगांश्च पिबेद्युक्त्याग्निवृद्धये।
कासिकं चाभयालेहं पिप्पलीं मधुकं बलाम् ॥ ५६ ॥
पयसा च प्रयुञ्जीत यथादोषं यथानलम्।
पाण्डुरोगेषु कुशलः शोफोक्तं च क्रियाक्रमम् ॥ ५७ ॥

सर्वाङ्गसुन्दरी

गुळूचीत्यादि॥ हलीमकवान् गुळुचीस्वरसक्षीराभ्यां पक्वेन महिषीघृतेन स्निग्धः सन् त्रिवृतां धात्रीरसेन पिबेत्। गुळूचीस्वरसोऽत्र घृताच्चतुर्गुणः।

क्षीरं घृतसममिति पाककमः। तया त्रिवृतया विरिक्ते सति मधुरं वातपित्तघ्नं चाद्यात्। प्रागुक्तं च द्राक्षालेहं भक्षयेत्। मधुरद्रव्यसाधितानि घृतानि चाद्यात्। यापनान् प्राणकारिणः क्षीरवस्तींश्च शीलयेदनुवासनसहितान्। मार्द्वीकारिष्टयोगांश्च युक्त्या वह्निवृध्यर्थं पिबेत्। अभयालेहं च कासचिकित्सितोक्तं "प्रस्थोन्मिते यवक्वाथे विंशतिं विजया" इत्यादिकं शीलयेत्। क्षीरेण च पिप्पलीं मधुयष्टिकां बलां च प्रयुञ्जीत, दोषवशादग्निवशाच्च। पाण्डुरोगेषु शोफचिकित्सितोक्तं च क्रियाक्रमं सुधीः प्रयुञ्जीत॥

शशिलेखा

यस्तु हलीमकी स गुळूचीस्वरसक्षीराभ्यां साधितेन सिद्धेन महिषीहविषा स्निग्धदेहः सत्वामलकरसेन त्रिवृतां पिबेत्। तया च विरिक्तो यत्किञ्चित् पित्तानिलहरं मधुरं च तदद्यात्। नान्यत् किञ्चित्। द्राक्षालेहः पूर्वमस्मिन्नेवाध्याय उक्तः। यः पानादयः कल्पे वक्ष्यन्ते पिप्पल्याद्यन्यतमं पयसा प्रयुञ्जीत सर्वं दोषबलानतिक्रमेण च। यश्च कुशलो भिषक् स शोफोक्तमपि क्रियाक्रमं सम्यग्विकल्प्य पाण्डुरोगेषु प्रयुञ्जीत॥

इति चिकित्सिते षोडशोऽध्यायः॥

सप्तदशोऽध्यायः

श्वयथुचिकित्सितम्

पाण्डुरोगचिकित्सितादनन्तरं शोफचिकित्सितं व्याख्यातुं प्रक्रम्यते। संबन्धश्चास्य निदान एवोक्त इत्याह—

अथातः श्वयथुचिकित्सितं नामाध्यायं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः॥

सर्वत्र सर्वाङ्गसरे दोषजे श्वयथौ पुरा।
सामे विशोषितो भुक्त्वा लघु कोष्णाम्भसा पिबेत् ॥ १ ॥

नागरातिविषादारुविडङ्गेन्द्रयवोषणम्।
अथवा विजयाशुण्ठीदेवदारुपुनर्नवम् ॥ २ ॥

नवायसं वा दोषाढ्यः शुद्ध्यै मूत्रहरीतकीः।
वराक्काथेन कटुकां कुम्भायस्त्र्यूषणानि वा ॥ ३ ॥

अथवा गुल्गुलुं तद्वज्जतु वा शैलसम्भवम्।
मन्दाग्निः शीलयेदामगुरुभिन्नविबन्धविट् ॥ ४ ॥

तक्रं सौवर्चलव्योपक्षौद्रयुक्तं गुडाभयाम्।
तक्रानुपानमथवा तद्वद्वा गुडनागरम् ॥ ५ ॥

सर्वाङ्गसुन्दरी

सर्वत्रेत्यादि॥ सर्वत्र दोषजे श्वयथौ सर्वाङ्गसरे सर्वाङ्गप्रसारिणि तथा सामे पुरः पूर्वं विशोषितो लङ्घितः सन् लघ्वन्नं भुक्त्वा कोष्णजलेन नागरादि पिबेत्। विशोषणमत्रोपवासः। अथवा विजयादीन् कोष्णाम्भसा पिबेत्। दोषबहुलो नवायसं पाण्डुरोगोक्तं पिबेत्। शुद्ध्यर्थं गोमूत्रेण हरीतकीः शीलयेत्। त्रिफलाक्वाथेन सह कटुकां कटुकरोहिणीं शीलयेत्। वराक्काथेनैव कुम्भादीन् कटुकाकुम्भायस्त्र्यूषणानि वा शीलयेत्। अथवा तद्वद्वरा क्वाथेन गुल्गुलुं शिलाजतु

वा शीलयेत्। मन्दाग्निरामगुरुभिन्नविबन्धविट् तक्रं सौवर्चलादियुतं शीलयेत्। चिरकालमभ्यसेत्। गुडयुतामभयां तक्रानुपानां वा तथैव गुडनागरं तक्रानुपानं शीलयेत्॥

शशिलेखा

सर्वाङ्गसरे देहव्याप्ते। निज इति दोषजे। साम इत्यामसहिते। सुबोधम्। नागरादीन्युष्णाम्बुना। तेनैव विजयादीनि वा। नवायसचूर्णो व्योषादिः पाण्डुरोगोक्तः। दोषाढ्यो दोषबहुलः। शुद्ध्यर्थं गोमूत्रेण हरीतकीर्वा त्रिफलाक्वाथेन कटुकादीनि वा गुग्गुलुं वा शिलाजतु वा शीलयेत् चिरकालमभ्यसेत्। मन्दाग्निरामगुरुभिन्नविबद्धपुरीषस्तु तक्रं सौवर्चलादियुक्तं गुडहरीतकीं वा तक्रानुपानां गुडनागरं वा तक्रानुपानं शीलयेत्॥

आर्द्रकं वा समगुडं प्रकुञ्चार्धविवर्धितम्।
परं पञ्चपलं मासं यूषक्षीररसाशनः ॥ ६ ॥

गुल्मोदरार्शःश्वयथुप्रमेहान्
श्वासप्रतिश्यालसकाविपाकान्।
सकामिलाशोषमनोविकारान्
कासं कफं चैव जयेत्प्रयोगः ॥ ७ ॥

घृतमार्द्रकनागरस्य कल्क-
स्वरसाभ्यां पयसा च साधयित्वा।
श्वयथुक्षवथूदराग्निसादै-
रभिभूतोऽपि पिबन् भवत्यरोगः ॥ ८ ॥

सर्वाङ्गसुन्दरी

आर्द्रकमित्यादि॥ आर्द्रकं वा तुल्यगुडं पलार्धेन प्रतिदिनं वर्धितं परं पञ्चपलं यावदेकस्मिन्नेव दिने पञ्चपलप्रमाणं स्यात्। पुनरपि ह्रासयेदर्धपलहान्यार्धपलं यावत्। एवं मासं यावदेषः प्रयोगो यथोचितं कफपित्तवाताधिको यूषादिभोजी स्यात्। एष च प्रयोगः। गुल्मादींश्चतुर्दश कफान्तान् जयेत्। आर्द्रकनागरस्य कल्कस्वरसाभ्यां पयसा च घृतं पक्त्वा च पिबेत्। शोफादिभिरभिभूतोऽपि निरामयः स्यात्। उपजात्यौपच्छन्दसिके वृत्ते॥

शशिलेखा

आर्द्रकमित्यादि ॥ एषः। प्रयोग इति। मिश्रयोरार्द्रकगुळयोरर्धपलाभिवृद्ध्या पञ्चपलप्रकर्षो मासं प्रयोगः। पञ्चपलान्यार्द्रकस्य सगुळस्य सतः। मनोविकारा ये केचन सन्तर्पणात्तथा मनोवहस्रोतोदुष्टिप्रभवा इति। घृतमित्यादि। आर्द्रकनागरस्य कल्कस्वरसाभ्यां पयसा च घृतं पक्त्वा पिबन् शोफादिभिरभिभूतोऽपि निरामयः स्यात्। उपजात्यौपच्छन्दसिके वृत्ते ॥

निरामो बद्धशमलः पिबेच्छ्वयथुपीडितः।
त्रिकटुत्रिवृतादन्तीचित्रकैः साधितं पयः ॥ ९ ॥

मूत्रं गोर्वा महिष्या वा सक्षीरं क्षीरभोजनः।
सप्ताहं मासमथवा स्यादुष्ट्रीक्षीरवर्तनः ॥ १० ॥

सर्वाङ्गसुन्दरी

निराम इत्यादि ॥ निरामो बद्धपुरीषः शोफार्तः सन् त्रिकट्वादिभिः साधितं पयः पिबेत्। गोर्महिष्या वा सम्बन्धि मूत्रं सक्षीरं क्षीरभोजनः सन् पिबेत्। तथोष्ट्रक्षीरवर्तनः पानाहाराभ्यां विना सप्ताहमथवा मासं स्यात्। उष्ट्रक्षीरवर्तन इत्यत्र "कुक्कुट्यादीनामण्डादिषु पुंवद्भावो वक्तव्यः" इत्युष्ट्रीशब्दस्य पुंवद्भावः। केचिदुष्ट्रीक्षीरमिति जगुः ॥

शशिलेखा

निराम इति ॥ एभिस्तीक्ष्णैरौषधर्निवृत्तामदोषः। त्रिकट्वादिभिः शृतं पयः पिबेत्। सुबोधम् ॥

यवानकं यवक्षारं यवानीं पञ्चकोलकम्।
मरिचं दाडिमं पाठां धानकामम्लवेतसम् ॥ ११ ॥

बालबिल्वं च कर्षांशं साधयेत्सलिलाढके।
तेन पक्वो घृतप्रस्थः शोफार्शोगुल्ममेहहा ॥ १२ ॥

दध्नश्चित्रकगर्भाद्वा घृतं तत्तक्रसंयुतम्।
पक्वं सचित्रकं तद्वद्गुणैः, युञ्ज्याच्च कालवित् ॥ १३ ॥

धान्वन्तरं महातिक्तं कल्याणमभयाघृतम्।

सर्वाङ्गसुन्दरी

यवानकमित्यादि ॥ यवानकादीनां कर्षांशं जलाढके पचेत्। तेन क्वाथेन घृतप्रस्थः पक्वः शोफादिहा स्यात्। ब्रह्मादिशब्दस्य प्रायिकत्वाच्छोफशब्दोत्तरमपि हन्तेः क्विप्। यवानको यवानीभेदः। चित्रकगर्भाद्दध्नः चित्रकचूर्णमिश्रितात् क्षीराद्यज्जातं दधि तस्मान्मथ्यमानाज्जातं घृतं तत्तक्रेण चित्रकतक्रेण संयुतम्। सचित्रकं चित्रककल्केन सहितं पक्वं तद्वद्यवानकादिघृतसदृशं गुणैः। कालविदवस्थाविशेषविद्धान्वन्तरं महातिक्तं कल्याणकमभयाघृतञ्च युञ्ज्यात् ॥

शशिलेखा

यवानकादिघृतं सुबोधम्। चित्रकचूर्णेन सह जाताद्दध्नो मथिताद्यन्नवनीतं तत्तक्रेण चित्रककल्कैः सहोषितेन तक्रेण संयुतं सचित्रकं चित्रकमूलचूर्णगर्भं सिद्धं गुणैस्तद्वद्यवानकादिना समानम्। कालविद्वैद्यो धान्वन्तरादिनामन्यतमं घृतञ्च युञ्ज्यात्। धान्वन्तरं प्रमेहोक्तम्। महातिक्तं कुष्ठोक्तम्। कल्याणकमुन्मादोक्तम् ॥ अभयाघृतमुदरोक्तम् ॥

दशमूलकषायस्य कंसे पथ्याशतं पचेत् ॥ १४ ॥

दत्वा गुडतुलां तस्मिन् लेहे दद्याद्विचूर्णितम्।
त्रिजातकं त्रिकटुकं किञ्चिच्च यवशूकजम् ॥ १५ ॥

प्रस्थार्धं च हिमे क्षौद्रात्तन्निहन्त्युपयोजितम्।
प्रवृद्धशोफज्वरमेहगुल्म-
कार्श्यामवाताम्लकरक्तपित्तम्।
वैवर्ण्यमूत्रानिलशुक्रदोष-
श्वासारुचिप्लीहगरोदरं च ॥ १६ ॥

सर्वाङ्गसुन्दरी

दशमूलकषायस्येत्यादि ॥ दशमूलकषायस्याढके पथ्याशतं पचेत्। अत्र च सामान्यपरिभाषया क्वाथ्यद्रव्यस्य दशमूलस्य द्वात्रिंशत् पलानि भवन्ति। एवञ्च तन्त्रान्तरे विरोधः। तन्त्रैवं कथ्यते। "द्विपञ्चमूलस्य तुलाकषाये कंसेऽभया-

नाञ्च शतं गुडाचेति। तदेवं विरोधं पश्यन्तो व्याख्यामेवंविधां विद्वांसो विदधति। दशमूलस्य तुला। तस्याः कषायो दशमूलकषाय इति। शाकपार्थिवादित्वात् समासः। एवं दशमूलस्य पलशतं तत्कषायस्याढके पथ्याशतं पचेत्। गुडतुलां दत्वा तस्मिन् लेहे विचूर्णितं त्रिजातकादिकं दद्यात्। एतेषां च प्रमाणं वसिष्ठलेहवत् कल्प्यम्। यवक्षारस्य कर्षमात्रं देयम्। तन्त्रान्तरेऽप्युक्तम्—"व्योषाच्चतुष्पलं दद्यात्त्रिपलं त्रिसुगन्धतः। कर्षमात्रं यवक्षारादि"ति। शीते च सति माक्षिकात् प्रस्थार्धं देयम्। तदेतदुपयोजितं प्रवृद्धशोफादीन् हन्ति। खरणादस्तु जगाद—दशमूलाढकमभयासहितं पाचयेदपां द्रोणे। अवशेषितचतुरंशे पूते तस्मिन् पुनः क्षिपेत् पथ्या इति। उपजातिर्वृत्तम्॥

शशिलेखा

दाशमूलिके दशमूलपलानि द्वात्रिंशत्। ततः षोडशगुणं जलम्। सद्वादशानि पञ्चपलशतानि चत्वारि कंसानि भवन्ति। कथितशेषः कंसमष्टाविंशदधिकं पलशतम्। दशमूलेन सह हरीतकीनां क्वथनमनस्थीनाञ्च पुनर्गुडेन सह कषाये प्रक्षेपः। आगस्त्यवदविच्छिन्नपारम्पर्येण लेहीभूते त्रिजातकादि चूर्णं तथा क्षिपेद्यथा लेहता न नश्यति॥

पुराणयवशाल्यन्नं दशमूलाम्बुसाधितम्।
अल्पमल्पपटुस्नेहं भोजनं श्वयथोर्हितम्॥ १७॥

क्षारव्योषान्वितैर्मौद्गैः कौलत्थैः सकणै रसैः।
तथा जाङ्गलजैः कूर्मगोधाशल्यकजैरपि॥ १८॥

अनम्लं मथितं पाने मद्यान्यौषधवन्ति च।
अजाजीशठिजीवन्तीकारवीपौष्कराग्निकैः॥ १९॥

विल्वमध्ययवक्षारवृक्षाम्लैर्बदरोन्मितैः।
कृता पेयाऽज्यतैलाभ्यां युक्तिभृष्टा परं हिता॥ २०॥

शोफातिसारहृद्रोगगुल्मार्शोऽल्पाग्निमेहिनाम्।
गुणैस्तद्वच्च तद्वच्च पञ्चकोलेन पाठया॥ २१॥

सर्वाङ्गसुन्दरी

पुराणेत्यादि ।। श्वयथोः पुराणयवादि दशमूलक्वाथसाधितमल्पमल्प-लवणस्नेहं भोजनं हितम् । कैः सह । मौद्गै रसैः । किंभूतैः । क्षारत्र्यूषणयुतैः । तथा कौलत्थै रसैः । किंभूतैः । सपिप्पलीकैः । तथा च मुनिः । "कुलत्थयूषस्तु सपिप्पलीको मौद्गस्तु सत्र्यूषणयावशूकः । रसैस्तथा जाङ्गल-विष्किराणां सकूर्मगोधाशिखिशल्यकानाम् ।।" इति । अत्र शिखिनो जाङ्गल-विष्किरत्वेन गृहीता अपि पथ्यतरत्वप्रतिपादनार्थं पुनरुपात्ताः । तथायमेव तन्त्र-कृदष्टाङ्गावतारेऽध्यगीष्ट । "दशमूलाम्भसा सिद्धैर्व्योषक्षाररजोऽन्वितैः रसैर्जाङ्ग-लजैर्मौद्गैः कौलत्थैर्मौलकैरपी"ति । तथेत्यादि । तथा जाङ्गलमांसजैस्तथा कच्छपादिजैश्च रसैः । पाने मथितमनम्लं मद्यानि च सौषधानि हितानि । अजाजीप्रभृतिभिर्बदरप्रमाणैः कृता पेया घृततैलाभ्यां युक्त्या भृष्टाऽतिशयेन शोफादिमतां हिता । पञ्चकोलेन तद्वत् बदरोन्मितेन साधिता पेया च गुणैस्तद्वत् पूर्वोक्तगुणा । तथैव पाठया साधिता पेया स्यात् ।।

शशिलेखा

पुराणयवशाल्यन्नमित्यादि । सुबोधम् । बदरोन्मितैर्द्विशाणमात्रैरजाज्या-दिभिः क्वाथादिप्रयुक्तैः कृता घृतेन तैलेन वा युक्त्या भृष्टा पेया परमतिशयेन शोफादिमतां पथ्या । सुबोधम् ।।

शैलेयकुष्ठस्थौणेयरेणुकागरुपद्मकैः ।
श्रीवेष्टकनखस्पृक्कादेवदारुप्रियङ्गुभिः ।। २२ ।।

मांसीमागधिकावन्यधान्यध्यामकवालकैः ।
चतुर्जातकतालीसमुस्तागन्धपलाशकैः ।। २३ ।।

कुर्यादभ्यञ्जनं तैलं लेपं स्नानाय तूदकम् ।
स्नानं वा निम्बवर्षाभूनक्तमालार्कवारिणा ।। २४ ।।

एकाङ्गशोफे वर्षाभूकरवीरककिंशुकैः ।
विशालात्रिफलालोध्रनलिकादेवदारुभिः ।। २५ ।।

हिंस्राकोशातकीमाद्रीतालपर्णीजयन्तिभिः ।
स्थूलकाकादनीसालनाकुलीवृषकर्णिभिः ॥ २६ ॥

वृध्यर्द्धिहस्तिकर्णैश्च सुखोष्णैर्लेपनं हितम् ।

सर्वाङ्गसुन्दरी

शैलेयेत्यादि ॥ शैलेयादिरभ्यञ्जनं तैलं तथा लेपं तथा स्नानार्थमुदकं च कुर्यात् । निम्बवारिणा वा स्नानं कुर्यात् । एकाङ्गशोफे पुनर्नवादिभिर्जलपिष्टैः सुखोष्णैर्लेपनं हितम् । इति सामान्येन श्वयथोरुपक्रमः ॥

शशिलेखा

शैलेयादिभिस्तैलमभ्यञ्जनमभ्यञ्जनार्थं कुर्यात् । तैरेव जलपिष्टैर्लेपं स्नानायोदकं च कुर्यात् । शैलेयं शिलापुष्पम् । स्थौणेयं शुकबर्हाख्यम् । रेणुका कौन्ती । श्रीवेष्टको वायसिकः । स्पृक्का ब्राह्मणी । ध्यामकं रोमिकम् । निम्बादिक्वथितवारिणा वा स्नानम् । नक्तमालश्चिरिबिल्वः । एकाङ्गजे शोफे पुनर्नवादिभिः पिष्टैः सुखोष्णैर्लेपनं हितम् । किंशुकः पलाशवृक्षः । विशाला दशपत्रिका । नळिका विद्रुमलता । हिंस्रा मांसी । कोशातकी कृतवेधनी । तालपर्णी ताली । जयन्ती जयनामा । स्थूलकाकादनी गुञ्जा । नाकुली सर्पसुगन्धा । वृषकर्णी मूषिकपर्णी । वृद्धिर्लक्ष्मीः । ऋद्धिः पीतपुष्पा । हस्तिकर्णो रक्तैरण्डः । इति सामान्येन श्वयथौ ॥

अथानिलोत्थे श्वयथौ मासार्धं त्रिवृतं पिबेत् ॥ २७ ॥

तैलं वैरण्डजं वातविड्विबन्धे तदेव तु ।
प्राग्भक्तं पयसा युक्तं रसैर्वा कारयेत च ॥ २८ ॥

स्वेदाभ्यङ्गान् समीरघ्नान् लेपमेकाङ्गगे पुनः ।
मातुलुङ्गाग्निमन्थेन शुण्ठीहिंस्रामराह्वयैः ॥ २९ ॥

सर्वाङ्गसुन्दरी

अथेत्यादि ॥ अनिलजे शोफे पक्षं यावत् त्रिवृतं तथैरण्डतैलं वा पिबेत् । वातविड्विबन्धे सति तदेरण्डतैलमेव प्राग्भक्तं क्षीरेण युक्तं मांस-

रसैर्वा पिबेत्। तथा वातहरान् स्वेदाभ्यङ्गान् कारयेत्। वैद्य इति शेषः। एकाङ्गगे पुनः शोफे मातुलुङ्गादिभिर्लेपं कारयेत्। हिंस्रा मांसी। सिंहीत्यन्ये॥

शशिलेखा

अथेत्यादिना वातादिषु विशेषेण त्रिवृत इति स्नेहत्रयस्य नामोक्तम्। मासार्धमर्धमासम्। तदित्येरण्डतैलं प्राग्भक्तं पयसा रसैर्वा सहितम्। एवशब्दोऽन्यस्नेहनिषेधाय। तथा वातहरैर्द्रव्यैः स्वेदादि कुर्यात्। अभ्यङ्गः स्नेहलेपः। एकाङ्गगे शोफेऽनिलज इति बोद्धव्यम्। मातुलुङ्गादिभिर्लेपः। हिंस्रा मांसी। इति वातज उक्तम्॥

पैत्ते तिक्तं पिबेत्सर्पिन्र्यग्रोधाद्येन वा शृतम्।
क्षीरं तृड्दाहमोहेषु लेपाभ्यङ्गाश्च शीतळाः ॥ ३० ॥

पटोलमूलत्रायन्तीयष्ट्याह्वकटुकाभयाः।
दारुदार्वी हिमं दन्ती विशाला निचुळं कणा ॥ ३१ ॥

तैः क्वाथः सघृतः पीतो हन्त्यन्तस्तापतृड्भ्रमान्।
ससन्निपातवीसर्पशोफदाहविषज्वरान् ॥ ३२ ॥

सर्वाङ्गसुन्दरी

पैत्त इत्यादि॥ पैत्ते शोफे तिक्तकाख्यं घृतं न्यग्रोधादिगणेन शृतं वा पिबेत्। तथा तृडादिषु क्षीरं पिबेत्। तथा लेपाभ्यङ्गाश्च शीतळा हिताः। पटोलादीनां क्वाथो घृतेन सहितः पीतोऽन्तस्तापतृष्णादीन् हन्ति॥

शशिलेखा

पित्तजे श्वयथौ तिक्तकं घृतं न्यग्रोधादिसिद्धं वा घृतं पिबेत्। तृडादिषु केवलमेव क्षीरं पिबेत्। शीतळा लेपाभ्यङ्गाश्च हिताः। संग्रहोक्तैर्घृतक्षीरादिभिरन्यैश्च शीतवीर्यैर्द्रव्यैः। पटोलमूलादिभिः क्वाथो घृतसहितः पीतोऽन्तर्दाहादीन् हन्ति। यष्ट्याह्वं मधुयष्टी। विशाला गवाक्षी। निचुळं जलवेतसम्। कणा पिप्पली। इति पित्तजे उक्तम्॥

आरग्वधादिना सिद्धं तैलं श्लेष्मोद्भवे पिबेत् ।
स्रोतोविबन्धे मन्देऽग्नावरुचौ स्तिमिताशयः ॥ ३३ ॥

क्षारचूर्णासवारिष्टमूत्रतक्राणि शीलयेत् ।
कृष्णापुराणपिण्याकशिग्रुत्वक्सिकतातसीः ॥ ३४ ॥

प्रलेपोन्मर्दने युञ्ज्यात्सुखोष्णा मूत्रकल्किताः ।
स्नाने मूत्राम्भसी सिद्धे कुष्ठतर्कारिचित्रकैः ॥ ३५ ॥

कुलत्थनागराभ्यां वा चण्डागरुविलेपने ।
कालाजश्रृङ्गीसरळबस्तगन्धामराह्वयाः ॥ ३६ ॥

एकैषिका च लेपः स्याच्छ्वयथावेकगात्रजे ।
यथादोषं यथासन्नं शुद्धिं रक्तावसेचनम् ॥ ३७ ॥

कुर्वीत मिश्रदोषे तु दोषोद्रेकबलात्क्रियाम् ।

सर्वाङ्गसुन्दरी

आरग्वधादिनेत्यादि ॥ कफोद्भवे शोफे आरग्वधादिना सिद्धं तैलं पिबेत्। स्रोतोविबन्धे सति वह्नौ च मन्दे अरोचके च सति स्तिमिताशयः क्षारादीनि शीलयेत्। क्षारो यवक्षारः। कृष्णादीन् कोष्णान् प्रलेप उन्मर्दने च मूत्रकल्कितान् युञ्जीत। मूत्रजले कुष्ठादिभिः सिद्धे स्नानाय हिते। कुलत्थशुण्ठीभ्यां वा क्वथिते गोमूत्रजले हिते। विलेपने चण्डागरुणी हिते। काळाजश्रृङ्ग्यादयः एकाङ्गजे शोफे लेपः स्यात्। काळा नीलिनी। बस्तगन्धा अजगन्धा। कारवीति नामान्तरमस्याः। एकैषिका त्रिवृता। यथादोषं दोषानुसारेण शुद्धिं यथासन्नं रक्तावसेचनं च कुर्वीत। संसर्गजे तु अभ्यधिकदोषानुसारेण क्रियां चिकित्सां कुर्यात्॥

शशिलेखा

कफजे शोफे आरग्वधादिना सिद्धं तैलं पिबेत्। सुबोधम्। अतसी-क्षुमाकुष्ठादिभिः सिद्धे मूत्रजले स्नानाय हिते। विलेपने चण्डागरुणी। चण्डा

जारकः। एकाङ्गे-एकगात्रगे यस्तु श्वयथुरेकदेशोऽङ्गस्याश्रितस्तस्मिन् शोफे काळादयो लेपः स्यात्। काळा मञ्जिष्ठा। अजशृङ्गी विषाणी। बस्तगन्धा अजगन्धा। हयाह्वयः अश्वगन्धा। एकैषिका मांसी। यथादोषमिति। वातेऽधिके वस्तिः। पित्तेऽधिके विरेकः। कफेऽधिके वमनमुत्कृष्टे उत्कृष्टं मध्ये मध्यमल्पेऽल्पमिति यथादोषं शुद्धिः। यथासन्नमिति। ऊर्ध्वनाभिजे वमनमधोनाभिजे विरेचनं वस्तिश्च। शिरोगते नस्यम्। कफस्थानस्थे वाते पित्ते वा वमनम्। वातस्थानस्थेपित्ते कफे वा वस्तिः। पित्तस्थ नगतयोर्वातकफयोर्विरेक इति यथासन्नं शुद्धिः। औषधिना कृते शोफे रक्तावसेको दोषापेक्षमनेकधा। मिश्रदोषे संसर्गे सन्निपाते च दोषोद्रेकानुसारेण क्रियां पूर्वोक्तां मिश्रीकृत्य कुर्वीत।

अजाजिपाठाघनपञ्चकोल-
व्याघ्रीरजन्यः सुखतोयपीताः।
शोफं त्रिदोषं चिरजं प्रवृद्धं
निघ्नन्ति भूनिम्बमहौषधे च ॥ ३८ ॥

अमृताद्वितयं सिनाटिका
सुरकाष्ठं सपुरं सगोजलम्।
श्वयथूदरकुष्ठपाण्डुता-
कृमिमेहोर्ध्वकफानिलापहम् ॥ ३९ ॥

इति निजमधिकृत्य पथ्यमुक्तं
क्षतजनिते क्षतजं विशोधनीयम्।
स्तुतिहिमघृतलेपसेककैर्-
विषजनिते विषजिच्च शोफ इष्टम् ॥ ४० ॥

ग्राम्यानूपं पिशितमबलं शुष्कशाकं तिलान्नं
गौडं पिष्टान्नं दधि सलवणं पिच्छिलं मद्यमम्लम्।
धानावल्लूरं समशनमथो गुर्वसात्म्यं विदाहि
स्वप्नं चारात्रौ श्वयथुगदवान्वर्जयेन्मैथुनं च ॥ ४१ ॥

अजाजीत्यादि । अजाज्यादयः कोष्णजलपीताः शोफं त्रिदोषोत्थं चिरकालोत्पन्नं वृद्धिं गतं निघ्नन्ति । भूनिम्बनागरे च निहत इति वचनविपरिणामेन सम्बन्धः । उपजातिर्वृत्तम् । अमृतायुगळादिकं गुग्गुलुसहितं गोमूत्रयुक्तं पीतं शोफादीन् हन्ति । वैताळीयं वृत्तम् । 'षड्विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नो निरन्तराः । न समात्र पराश्रिता कला वैताळीयेऽन्ते रलौ गुरुः ॥' इति । पूर्वोक्तेन प्रकारेण निजं दोषजं शोफमधिकृत्य पथ्यं चिकित्सितमुक्तम् । क्षतोत्थे शोफे क्षतजमसृग्विशोध्यम् । कैः -- रक्तस्रावादिभिः । विषजनिते शोफे विषहरञ्चेष्टम् । पुष्पिताग्रा । ग्राम्यादिमांसादि शोफी वर्जयेत् । 'म्गौल् न्यौ यौ ज्ञेया कुसुमितलता वेल्लिता क्षुत्तुलोकैः ॥"

शशिलेखा

अजाजीत्यादि सुबोधम् । क्षतजनितेऽभिघातजे शोफे विषघ्नं कर्म कार्यम् । सर्वश्च श्वयथुमान् ग्राम्यादिपिशितं शुष्कशाकादिकञ्च वर्जयेत् । ग्राम्यं पिशितं जनपदमध्यचारिप्राणिजम् । अब्जस्यानूपत्वे विवर्जनीयप्राधान्यात् पृथग्ग्रहणम् । अबलं मांसं दुर्बलप्राणिजम् । गौडं पानकम् । पिष्टान्नं पिष्टकृतं यत्किञ्चित् । सलवणमिति । केवलमपि लवणं वर्जयेत् । वर्जने सहभावः । पिच्छिलं क्लिन्नरूपम् । मद्यञ्चाम्लम् । धाना भृष्टयवम् । वल्लूरं शुष्कमांसम् । समशनं मिश्रं पथ्यमपथ्यञ्च भुक्तम् । गुरु यत्किञ्चित् गुरुत्वयुक्तम् । दिवास्वप्नं मैथुनञ्च सर्वदा इति । अन्ये त्वेवं पठन्ति —"ग्राम्याब्जानूपं पिशितलवणं शुष्कशाकं नवान्नं गौडं पिष्टान्नं दधि सकृसर"मिति । अत्र पिशितं लवणञ्चेति समाहारद्वन्द्वः । तत् ग्राम्याब्जानूपपिशितवत् । लवणमपि त्रिविधम् । ग्राम्यं पाकेनाभिनिर्वृत्तं कृत्रिमम् । अब्जं सामुद्रम् । आनूपमनूपलवणमिति ॥

इति चिकित्सिते सप्तदशोऽध्यायः ।

अष्टादशोऽध्यायः ।

अस्मादनन्तरं विसर्पचिकित्सितं हेतुसामान्याच्चिकित्सासादृश्याच्च व्याख्यायते ॥

अथाऽतो विसर्पचिकित्सितं नामाध्यायं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ।

आदावेव विसर्पेषु हितं लङ्घनरूक्षणम् ।
रक्तावसेको वमनं विरेकः स्नेहनं तु न ॥ १ ॥

प्रच्छर्दनं विसर्पघ्नं सयष्टीन्द्रयवं फलम् ।
पाटोलपिप्पलीनिम्बपल्लवैर्वा समन्वितम् ॥ २ ॥

रसेन युक्तं त्रायन्त्या द्राक्षायास्त्रैफलेन वा ।
विरेचनं त्रिवृच्चूर्णं पयसा सर्पिषाऽपि वा ॥ ३ ॥

योज्यं कोष्ठगते दोषे विशेषेण विशोधनम् ॥

सर्वाङ्गसुन्दरी

आदावित्यादि ॥ विसर्पेषु पूर्वमेव लङ्घनादि हितम् । स्नेहनं तु न हितम् । वमनं विसर्पघ्नं मदनफलं मधुयष्टिकेन्द्रयवान्वितं हितम् । पटोलादिभिर्युतं वा मदनफलं हितम् । त्रिवृच्चूर्णं त्रायन्त्या रसेन युक्तं द्राक्षारसेन वा त्रिफलारसेन वा विरेचनं योज्यम् । क्षीरेण घृतेन वा त्रिवृच्चूर्णं योज्यम् । कोष्ठगते दोषे विशेषेण विशोधनं योज्यम् ॥

शशिलेखा

विसर्पेष्वादौ पूर्वरूपदर्शन एव लङ्घनादिकं हितम् । विसर्पाणामाशु बाधावहत्वात् । लङ्घनमुपवासः । रूक्षणं यत्किञ्चित् । रक्तावसेको रक्तमोक्षः । स्नेहनं तु कदाचिदपि न हितम् । विसर्पे यदा वमनं तदा

मदनफलं यष्ट्याद्यन्वितमेव हितम् । विरेचनं त्रिवृच्चूर्णं त्रायन्त्याद्यन्यतमरसेन युक्तम् ।।

अविशोध्यस्य दोषेऽल्पे शमनं चन्दनोत्पलम् ।। ४ ।।

मुस्तानिम्बपटोलं वा पटोलादिकमेव वा ।
शारिवामलकोशीरमुस्तं वा क्वथितं जले ।। ५ ।।

दुरालभां पर्पटकं गुडूचीं विश्वभेषजम् ।
पाक्यं शीतकषायं वा तृष्णार्तोसर्पवान् पिबेत् ।। ६ ।।

दार्वीपटोलकटुकामसूरत्रिफलास्तथा ।
सनिम्बयष्टीत्रायन्तीः क्वथिताः घृतमूर्छिताः ।। ७ ।।

शाखादुष्टे तु रुधिरे रक्तमेवादितो हरेत् ।
त्वङ्मांसस्नायुसङ्क्लेदो रक्तक्लेदाद्धि जायते ।। ८ ।।

निरामे श्लेष्मणि क्षीणे वातपित्तोत्तरे हितम् ।
घृतं तिक्तं महातिक्तं शृतं वा त्रायमाणया ।। ९ ।।

निर्हृतेऽस्रे विशुद्धेऽन्तर्दोषे त्वङ्मांससंश्रिते ।
बहिःक्रियाः प्रदेहाद्याः सद्यो वीसर्पशान्तये ।। १० ।।

शताह्वामुस्तत्वग्राहीवंशार्तगळधान्यकम् ।
सुराह्वं कृष्णगन्धा च कुष्ठं चालेपनं चले ।। ११ ।।

न्यग्रोधाधिगणः पित्ते तथा पद्मोत्पलादिकम् ।
न्यग्रोधपादास्तरुणाः कदलीगर्भसंयुताः ।। १२ ।।

बिसग्रन्थिश्च लेपः स्याच्छतधौतघृताप्लुतः ।
पद्मिनीकर्दमः शीतः पिष्टं मौक्तिकमेव वा ।। १३ ।।

शङ्खः प्रवालं शुक्तिर्वा गैरिकं वा घृतान्वितम् ।
त्रिफलापद्मकोशीरसमङ्गाकरवीरकम् ।। १४ ।।

1 आर्त्तगळं = ഓടക്കാരനിയാൻ

नळमूलान्यनन्ता च लेपः श्लेष्मविसर्पहा ।
धवसप्ताह्वखदिरदेवदारुकुरूटकम् ॥ १५ ॥

समुस्तारग्वधं लेपो वर्गो वा वरणादिकः ।
आरग्वधस्य पत्राणि त्वचः श्लेष्मातकस्य[1] वा ॥ १६ ॥

इन्द्राणिशाकं काकाह्वा शिरीषकुसुमानि वा ।
सेकव्रणाभ्यङ्गहविर्लेपचूर्णान् यथायथम् ॥ १७ ॥

एतैरेवौषधैः कुर्याद्वायौ लेपान् घृताधिकान् ।

सर्वाङ्गसुन्दरी

अविशोध्यस्येत्यादि ॥ अशोधनार्हस्य पुंसोऽल्पे दोषे शमनं चन्दनोत्पलं योज्यम् । मुस्तानिम्बपटोलं वा पटोलकटुरोहिणीत्यादिकं वा शारिबादिकं वा जले कथितम् । दुरालभादिकं कथितं शीतकषायं वा तृष्णादिमान् पिबेत् । तथा दार्व्यादिकं निम्बादिभिः सह कथितः सर्पिर्मिश्रितं पिबेत् । रक्ते च शाखासु दुष्टे सति प्रथमं रुधिरमेव हरेत् । कुत इत्याह— त्वङ्मांसेत्यादि । यस्मात्त्वगादिषु क्लेदो रक्तक्लेदाज्जायते तस्माद्रक्तं निर्हरेत् । निरामे पुंसि तथा वातपित्ताधिके कफे च क्षीणे घृतं तिक्तकादिकं हितम् । पूर्वं सामान्येन विसर्पिणः स्नेहनं निषिद्धम् । अवस्थाविशेषेण च स्नेहनमिदमुक्तमिति पूर्वापरव्याहतत्वमत्र नाशङ्कनीयम् । रक्ते निर्हृतेऽन्तर्विशुद्धे च दोषे त्वङ्मांसाश्रिते सति प्रलेपसेकाद्या बहिःक्रियाः शीघ्रमेव विसर्पशान्तये स्युः । शतपुष्पादिकं चले विसर्पे प्रलेपनं हितम् । आर्तगळो नीलसहचरः । न्यग्रोधादिगणः पित्ते पित्तविसर्पे प्रलेपो हितः । तथा पद्मोत्पलादिकश्च । पद्मोत्पलादिकं सङ्ग्रहाख्यात्तन्त्रादवधार्यम् । यथा षड्ढरणाख्यो योगः । सङ्ग्रहे चैवं पठ्यते । 'पद्मोत्पलशैवालपङ्कदूर्वामृणाळशृङ्गाटककशेरुकशर्कराह्रीबेरचन्दनमुक्तामणिगैरिकपयस्याप्रपौण्डरीकमधुकपद्मकघृतक्षीराणि' इति । न्यग्रोधस्य पादास्तरुणा अभिनवाः कदळीगर्भान्विता विसग्रन्थिश्च लेपः शतधौतघृतालोडितः स्यात् । तथा पद्मिनीपङ्कः शिशिरो मौक्तिकं वा जलपिष्टम् । शङ्खो वा पिष्टो विद्रुमो वा शुक्तिर्वाऽथवा गैरिकं घृतयुतं लेपो हितः । त्रिफलादिभिर्लेपः श्लेष्मविसर्पजित् । समुस्तारग्वधं धवादिकं वा वरणसैर्यकेत्यादिर्वर्गो वा कर्णिकारस्य पत्राणि वा श्लेष्मातकत्वचो

1 श्लेष्मातकः=നറുവരി । इन्द्राणिशाकं=കരിനൊച്ചി (കരന്തു°)

इन्द्राणिशाकादयो वा लेपः। इन्द्राणिशाकं इन्द्रवल्लीशाकम्। काकाह्वा काकनासा। यथायथमेभिरेव विसर्पलेपौषधैः सेकादीन् कुर्यात् व्रणाभ्यङ्गाय हविरित्यक्षधासवत्समासः। वायौ ये लेपा उक्तास्ते घृताधिकाः कार्याः। नत्वघृता इत्यर्थः॥

शशिलेखा

अविशोध्यस्येत्यादि सुबोधम्। त्वङ्मांसादिक्लेदो रक्तस्रावहेतुः। निरामे क्षीणकफे तिक्तकादिघृतं क्वाथादिना ज्ञितम्। शताह्वेत्यादि। आर्तगळो नीलसहचरः। हिन्ताल इत्यन्ये॥ कृष्णगन्धा सौभञ्जनकः। पद्मोत्पलादिकमित्यादिग्रहणात् सङ्ग्रहोक्ता शैवालपङ्कदूर्वामृणाळशृङ्गाटककशेरुकशर्कराह्रीबेरकुचन्दनमुक्तामणिगैरिकपयस्यादि परिग्रहः। पङ्कः कर्दमः प्रसिद्धः। अमृणाळमुशीरं मृणाळं बिसाङ्कुरं वा। ह्रीबेरं वाळकम्। पयस्या क्षीरिका। सुबोधम्॥

कफस्थानगते सामे पित्तस्थानगतेऽथवा ॥ १८ ॥
[1]शीतोष्णा हिता रूक्षा रक्तपित्ते घृतान्विताः।
अत्यर्थशीतास्तनवस्तनुवस्त्रान्तरास्थिताः ॥ १९ ॥
योज्याः क्षणे क्षणेऽन्येऽन्ये मन्दवीर्यास्त एव च।
संसृष्टदोषे संसृष्टमेतत्कर्म प्रशस्यते ॥ २० ॥

सर्वाङ्गसुन्दरी

कफस्थानगत इत्यादि ॥ कफस्थानगते सामे विसर्पे तथा पित्तस्थानगते च किञ्चिच्छीतोष्णा रूक्षाश्च लेपा हिताः। रक्तपित्ते घृतान्विताः। अत्यन्तशीतास्तनवस्तथा तनुवस्त्रान्तरस्थिताः क्षणे क्षणेऽपरेऽपरे लेपा योज्याः। चशब्दो यस्मादर्थे। यस्मात्त एव पुनः पुनः प्रयुज्यमाना मन्दवीर्याः स्युः। संसृष्टदोषे विसर्पे उभयरूपे च संसर्गाख्ये सन्निपाताख्ये चैतत् कर्म इदं चिकित्सितम्। यत्प्रतिदोषमुक्तं तदेव यथायथं संसृष्टं कृत्वा प्रशस्यते॥

शशिलेखा

कफस्थानाश्रिते सामे विसर्पे पित्तस्थानगते च सामे विसर्पे विशीतोष्णारूक्षाश्च प्रलेपा हिताः। विशीतोष्णा इति स्पर्शेऽम्बुवत् शीतानां प्रतिषेधः।

1 "विशितोष्णा" इतीन्दुः।

उष्णप्रतिषेधो विसर्पत्वादेव। तेनानुष्णाशीतत्वमभिमतम्। रक्तपित्तेऽधिके यदा लेपादयो युज्यन्ते तदा घृतान्विता इत्यादिकाः। तनुवस्त्रान्तरस्थिता इति अङ्गे तनुवस्त्रं दत्वा वस्त्रान्तरितो लेपः शीतो लघुश्च स्यात्। ऊष्माणञ्च न निगृह्णातीत्यवगन्तव्यम्। अन्येऽन्ये क्षणे क्षणे योज्याः पूर्वदत्तास्त्यक्त्वा। संसृष्टदोषे विसर्पे एतदेव कर्म पृथग्दोषचिकित्सितं दोषबलानुगुण्येन संसृष्टं कृत्वा प्रशस्यते। संसर्गोऽत्र दोषयोर्मिश्रीभावमात्रं न त्वग्निविसर्पादिप्रादुर्भावः, यस्मात् द्वन्द्वजेषु पुनर्वक्ष्यति ॥

इति सामान्येन संसृष्टदोषचिकित्सितमुक्त्वा वातपित्तजादिष्वग्निविसर्पादिषूपक्रममाह।

शतधौतघृतेनाऽग्निं प्रदिह्यात् केवलेन वा।
सेचयेद्घृतमण्डेन शीतेन मधुकाम्बुना ॥ २१ ॥

सिताम्भसाम्भोजजलैः क्षीरेणेक्षुरसेन वा।
पानलेपनसेकेषु महातिक्तं परं हितम् ॥ २२ ॥

ग्रन्थ्याख्ये रक्तपित्तघ्नं कृत्वा सम्यग्यथोदितम्।
कफानिलघ्नं कर्मेष्टं पिण्डस्वेदोपनाहनम् ॥ २३ ॥

ग्रन्थिवीसर्पशूले तु तैलेनोष्णेन सेचयेत्।
दशमूलत्रिपक्वेन तद्वन्मूत्रैर्जलेन वा ॥ २४ ॥

सुखोष्णया प्रदिह्याद्वा पिष्टया कृष्णगन्धया।
नक्तमालत्वचा शुष्कमूलकैः कलिनऽथवा ॥ २५ ॥

दन्तीचित्रकमूलत्वक् सौधार्कपयसी गुडः।
भल्लाकास्थि कासीसं लेपो भिन्द्याच्छिलामपि ॥ २६ ॥

बहिर्मार्गाश्रितं ग्रन्थिं किं पुनः कफसम्भवम्।
दीर्घकालस्थितं ग्रन्थिमेभिर्भिन्द्याच्च भेषजैः ॥ २७ ॥

1 कलि: = ൩൦൩൩ ൧൧

मूलकानां कुलत्थानां यूषैः सक्षारडाडिमैः ।
गोधूमान्नैर्यवान्नैश्च ससीधुमधुशर्करैः ॥ २८ ॥

सक्षौद्रैर्वारुणीमण्डैर्मातुलुङ्गरसान्वितैः ।
त्रिफलायाः प्रयोगैश्च पिप्पल्याः क्षौद्रसंयुतैः ॥ २९ ॥

देवदारुगुडूच्योश्च प्रयोगैर्गिरिजस्य च ।
मुस्तभल्लातसक्तूनां प्रयोगैर्माक्षिकस्य च ॥ ३० ॥

धूमैर्विरेकैः शिरसः पूर्वोक्तैर्गुल्मभेदनैः ।
ताम्रायोहेमलवणपाषाणादिप्रपीडनैः ॥ ३१ ॥

सर्वाङ्गसुन्दरी

शतधौत इत्यादि ॥ अग्निशब्देनाऽग्निविसर्प उपलक्ष्यते । तस्य च लक्षणं "वातपित्ताज्वर इत्यादि" याव' दुष्प्रबोधोऽश्नुते निद्रां सोऽग्निवीसर्प उच्यते" इति। तमग्निवीसर्पं शतधौतघृतेन प्रलेपयेत्। सेचयेदित्यादि। अथवा केवलेन घृतमण्डेन सेचयेत्। शिशिरेण मधुयष्टीजलेन वा सेचयेत्। एवं शर्कराजलेन अम्भोजजलैः क्षीरेण इक्षुरसेन वा सेचनं योज्यम्। पानादिषु महातिक्तं घृतं सुष्ठु हितम्। ग्रन्थिवीसर्पे यथोदितं रक्तपित्तघ्नं कर्म सम्यक् कृत्वा ततः कफानिलघ्नं कर्म पिण्डस्वेदादिकमिष्टम्। ग्रन्थिविसर्पशूले सति दशमूलविपक्वेनोष्णेन तैलेन सेचयेत्। तथैव मूत्रैर्दशमूलविपक्वैरिति वचनविपरिणामेन सम्बन्धः। जलेन वा दशमूलक्वथितेन सेचयेत्। अथवा कृष्णगन्धया पिष्टया सुखोष्णया प्रदिह्यात्। कृष्णगन्धा सौभाञ्जनकम्। अथवा नक्तमालत्वचा पिष्टया सुखोष्णया प्रदिह्यात्। शुष्कमूलकैः पिष्टैः सुखोष्णैरथवा कलिना विभीतकेन सुखोष्णेन लेपयेत्। दन्त्यादिभिर्लेपः शिलामपि भिन्द्यात्। किमुत कफजं बाह्यमार्गाश्रितं ग्रन्थिं न भिन्द्यात्। चिरकालावस्थितं ग्रन्थिमेभिरेव पूर्वोक्तैरौषधैः भिन्द्यात्। मूलकादियूषैः सक्षारडाडिमैर्गोधूमादिभिर्भोजनैस्तथा पानैः ससीधुमधुशर्करैस्तथा सक्षौद्रैर्वारुणीमण्डैर्मातुलुङ्गरसान्वितैस्तथा त्रिफलायाः प्रयोगैरित्यारभ्य यावत्ताम्रायोहेमलवणपाषाणादिप्रपीडनैर्दीर्घकालस्थितं ग्रन्थिं भिन्द्यादित्यनुवर्त्य योज्यम् ॥

शशिलेखा

शतधौतेनेत्यादि सुबोधम्। ग्रन्थिविसर्पे रक्तपित्तघ्नं विसर्पपूर्वरूपोक्तलङ्घनादि कर्म सम्यग्यथोदितं कृत्वाऽनन्तरं कफानिलहरं पिण्डस्वेदादीष्टम्। उपनाहनं

बन्धः। ग्रन्थिविसर्पशूले दशमूलसाधितेन तैलादिनोष्णेन सेचयेत्। दन्त्यादिभिर्लेपः शिलामपि भिन्द्यात्। किं पुनर्ग्रन्थिमित्यर्थः। दीर्घकाल इत्यादि। प्राधान्यमुखेन प्रयोगः। गिरिजं शिलाजतु। सुबोधम्॥

आभिः क्रियाभिः सिद्धाभिर्विविधाभिर्बले स्थितः।
ग्रन्थिः पाषाणकठिनो यदि नैवोपशाम्यति ॥ ३२ ॥

अथास्य दाहः क्षारेण शरैर्हेम्नाऽपि वा हितः।
पाकिभिः पाचयित्वा तु पाटयित्वा तमुद्धरेत् ॥ ३३ ॥

मोक्षयेद्बहुशश्चाऽस्य रक्तमुत्क्लेशमागतम्।
पुनश्चापहृते रक्ते वातश्लेष्मजिदौषधम् ॥ ३४ ॥

प्रक्लिन्ने दाहपाकाभ्यां बाह्यान्तर्व्रणवत्क्रिया।
दार्वीविडङ्गकम्पिल्लैः सिद्धं तैलं व्रणे हितम् ॥ ३५ ॥

दूर्वास्वरससिद्धं तु कफपित्तोत्तरे घृतम्।

सर्वाङ्गसुन्दरी

आभिरित्यादि॥ आभि. पूर्वोक्ताभिः क्रियाभिः सिद्धाभिः सिद्धर्षिप्रणीतत्वाद विसंवादिनीभि. फलसम्पादिनीभिर्वा तथा विविधाभिरनेकप्रकाराभिः प्रयुक्ताभिर्बले स्थिता दीर्घकालानुबन्धित्वादतिप्रवृद्धः अत एव पाषाणकठिनो ग्रन्थिर्यदि नैवोपशाम्यति, अथानन्तरमस्य दाहः क्षारेण हितः। अतितप्तैः शरैर्हेम्नाऽपि वा हितः। अथवा पाकिभिरौषधैर्बाह्यान्तःसेवितैः पाचयित्वा पाटयित्वा तं ग्रन्थिमुद्धरेत्। अस्य ग्रन्थेर्ग्रन्थिविसर्पतो वा रक्तमुत्क्लेशमागतं विकारकरणं प्रत्युन्मुखतां प्राप्तं बहुशो मोक्षयेत् पुनश्च रक्तेऽपहृते वातश्लेष्मजिदौषधं तत्र हितम्॥ प्रक्लिन्ने विशेषेण क्लिन्ने सर्वस्मिन् विसर्पे दाहपाकाभ्यां चोपलक्षिते बाह्यान्तर्व्रणवत् क्रिया स्यात्। दार्व्यादिभिः सिद्धं तैलं व्रणे हितम्। वातकफप्रधाने विसर्प इत्यर्थाद्गम्यते। तथा कफपित्तोत्तरे विसर्पे दूर्वास्वरसेन पक्वं घृतं हितम्॥

शशिलेखा

आभिरित्यादिना सामान्येन। सुबोधम्। उत्क्लेशमागतं पाकाभिमुखं रक्तं तदपनयनं ग्रन्थिनां स्वेदौषधत्वतद्योग्यतापादनाय। दार्व्यादिभिस्तैलं साधितं व्रणे ग्रन्थिव्रणे हितमुपशमाय ॥

एकतः सर्वकर्माणि रक्तमोक्षणमेकतः ॥ ३६ ॥

विसर्पो ह्यसंसृष्टः सोऽस्रपित्तेन जायते।
रक्तमेवाश्रयश्चास्य बहुशोऽस्रं हरेदतः ॥ ३७ ॥

न घृतं बहुदोषाय देयं यन्न विरेचनम्।
तेन दोषो ह्युपस्तब्धस्त्वग्रक्तपिशितं पचेत् ॥ ३८ ॥

सर्वाङ्गसुन्दरी

एकत इत्यादि ॥ एकतः एकस्मिंश्चिकित्सापक्षे सर्वकर्माणि यथानिर्दिष्टानि रक्तमोक्षणमेकतः एकस्मिन् पक्षे। विसर्पोद्दिष्टायाः सर्वचिकित्साया रक्तमोक्षणस्य च तुल्यत्वात्। कथमेतत्स्यादित्याह—विसर्प इत्यादि। यस्माद्विसर्पः सर्वो रक्तपित्तेनासंसृष्टोऽसम्बद्धो न जायते। न कदाचिद्रक्तपित्तसम्बन्धमन्तरेणोत्पद्यत इत्यर्थः। अस्य च विसर्पस्य रक्तमेवाश्रयो नान्यः। अतोऽस्माद्बहुशो बहून् वारान् रक्तं हरेत्। न घृतमित्यादि। बहुदोषाय विसर्पिणे घृतं न देयं यद्विरेचनं न भवति। पित्तं हि विसर्पे प्राधान्येन चिकित्स्यम्। पित्तस्य च विरेचनं उपक्रमः प्रधानमिति। तेन विरेचनेन घृतेन यस्मादुपस्तब्धः स्तम्भितो दोषः त्वग्रक्तमांसानि पचेत्। तस्माद्विरेचनकरमेव घृतं बहुदोषाय योज्यमिति ॥

शशिलेखा

यस्मात्स विसर्पो रक्तपित्तेनासंसृष्टो न जायते तत्कारणमपि रक्ताश्रयं भवति। यतोऽस्य विसर्पस्याश्रयो रक्तमतोऽस्मात् बहुशोऽस्रं रक्तं हरेदेव। अपि च बहुदोषाय विसर्पिणे यद्घृतं न विरेचयति तत्कदाचिन्न देयम्। तेन ह्यविरेचनेन घृतेन प्राप्तस्तम्भो दोषस्त्वगादिकं पचेत् ॥

इति चिकित्सितेऽष्टादशोऽध्यायः ॥

एकोनविंशोऽध्यायः ।

विसर्पचिकित्सितादनन्तरं कुष्ठचिकित्सितमारभ्यते । सम्बन्धश्चास्य निदानत एवोक्त इत्याह —

अथाऽतः कुष्ठचिकित्सितं नामाध्यायं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ।

त्वग्रक्तमांसादिदूषणात्तत्स्रवणादामयस्वभावाच्च कायकार्श्यं कुष्ठिनां प्रायेणावश्यंभावि अनेनैवानुसारेण वक्ष्यति । 'स्नेहैराप्याययेच्चैनं कुष्ठघ्नैरन्तरान्तरा" इति ॥ अत एवाह—

कुष्ठिनं स्नेहपानेन पूर्वं सर्वमुपाचरेत् ।
तत्र वातोत्तरे तैलं घृतं वा साधितं हितम् ॥ १ ॥

दशमूलामृतैरण्डशाङ्गर्येष्टामेषशृङ्गिभिः ।

सर्वाङ्गसुन्दरी

कुष्ठिनमित्यादि ॥ कुष्ठवन्तं नरं सर्वं स्नेहपानेन पूर्वमुपक्रमेत् । शरीराप्यायनार्थं पूर्वमस्य स्नेहप्रयोगो युक्त इत्यर्थः । तत्रेत्यादि । तत्र तस्मिन् वातोत्तरे कुष्ठे दशमूलादिभिः पक्वं तैलं घृतं वा हितम् ॥

शशिलेखा

कुष्ठिनमित्यादि ॥ कुष्ठिनमित्यादि सामान्येन । पूर्वं पूर्वरूपेष्वेव । तत्रेति विशेषः । वातोत्तरे कुष्ठे दशमूलादिभिः साधितं तैलं वा घृतं वा हितम् । सर्वत्र जलस्य स्मर्तव्यम् । मेषशृङ्गचजशृङ्गी ॥

पटोलनिम्बकटुकादार्वीपाठादुरालभाः ॥ २ ॥

पर्पटं त्रायमाणाञ्च पलांशं पाचयेदपाम् ।
द्र्याढकेऽष्टांशशेषेण तेन कर्षोन्मितैस्तथा ॥ ३ ॥

त्रायन्तीमुस्तभूनिम्बकलिङ्गकणचन्दनैः ।
सर्पिषो द्वादशपलं पचेत्तत्तिक्तकं जयेत्   ॥ ४ ॥

पित्तकुष्ठपरीसर्पपिटकादाहतृड्भ्रमान् ।
कण्डूपाण्ड्वामयान् गण्डान् दुष्टनाडीव्रणापचीः   ॥ ५ ॥

विस्फोटविद्रधीगुल्मशोफोन्मादमदानपि ।
हृद्रोगतिमिरव्यङ्गग्रहणीश्वित्रकामिलाः   ॥ ६ ॥

भगन्दरमपस्मारमुदरं प्रदरं गरम् ।
अर्शोऽस्रपित्तमन्यांश्च सुकृच्छ्रान् पित्तजान् गदान्   ॥ ७ ॥

सर्वाङ्गसुन्दरी

पटोलेत्यादि ॥   पटोलादि पलांशं जले द्व्याढके पाचयेत् । तेनाष्टभागशेषेण क्वाथेन तथा कर्षमात्रैस्त्रायन्त्यादिभिः घृतस्य पलानि द्वादश पचेत् तदेदं तिक्तकाख्यं सर्पिः पित्तकुष्ठादीन् जयेत् । अपरानपि पित्तजानामयान् हन्ति । तच्च द्वादशपलमात्रं पक्वं प्रकृष्टगुणं स्यादिति दृष्टं तत्त्वदर्शिभिर्महर्षिभिः ॥

शशिलेखा

पटोलादिभिस्तिक्तकं नाम घृतं भवति । तन्त्रेऽप्यनेनैव व्यवहारः, न केवलं भिषजाम् । तच्च पित्ताधिककुष्ठादीन् जयेत् । पिटकाः शराविकाद्याः । अस्रपित्तं रक्तपित्तम् । कटुका कटुरोहिणी । कणा हस्तिपिप्पली ॥

सप्तच्छदः पर्पटकः शम्याकः कटुका वचा ।
त्रिफला पद्मकं पाठा रजन्यौ शारिवे[1] कणे   ॥ ८ ॥

[2]निम्बचन्दनयष्ट्याह्वविशालेन्द्रयवामृताः ।
किराततिक्तकं सेव्यं वृषो मूर्वा शतावरी   ॥ ९ ॥

---

1 शारिवे = നന്നാറിയും പാൽവള്ളിയും. 2 സംഗ്രഹത്തിൽ നിമ്ബം ഇല്ല.

पटोलातिविषामुस्तात्रायन्तीधन्वयापकम्।
तैर्जलेऽष्टगुणे सर्पिर्द्विगुणामलकीरसम् ॥ १० ॥

सिद्धं तिक्तान्महातिक्तं गुणैरभ्यधिकं मतम्।

सर्वाङ्गसुन्दरी

सप्तच्छद इत्यादि ॥ तैः सप्तच्छदादिभिः कल्कैः घृतादष्टगुणे जले द्विगुणामलकरसं सर्पिः पक्वं महातिक्तकसंज्ञं गुणैश्चाभ्यधिकं तिक्तान्मतम्। मुनीनामिति शेषः॥

शशिलेखा

सप्तच्छदादीनामौषधानां द्वात्रिंशतां कल्कं स्नेहाच्चतुर्थांशेन। स्नेहादेव द्विगुणमामलकरसम्। घृतं महातिक्तकं नाम्ना तिक्तकादधिकगुणम्। सप्तच्छदो गुच्छपुष्पः प्रसिद्धः। रजन्यौ पिण्डहरिद्रा दार्वी च। शारिबे वल्लीशारिबा काष्ठशारिबा च। कणे पिप्पली हस्तिपिप्पली च। विशाला गवाक्षी इन्द्रयवं कुटजबीजम्। किराततिक्तकं भूनिम्बम् ॥

कफोत्तरे घृतं सिद्धं निम्बसप्ताह्वचित्रकैः ॥ ११ ॥

कुष्ठोषणवचासालप्रियालचतुरङ्गुलैः।
सर्वेषु चारुष्करजं तौवरं सार्षपं पिबेत् ॥ १२ ॥

स्नेहं घृतं वा कृमिजित्पथ्याभल्लातकैः शृतम्।
आरग्वधस्य मूलेन शतकृत्वः शृतं घृतम् ॥ १३ ॥

पिबन् कुष्ठं जयत्याशु भजन् सखदिरं जलम्।
एभिरेव यथास्वं च स्नेहैरभ्यञ्जनं हितम् ॥ १४ ॥

सर्वाङ्गसुन्दरी

कफोत्तर इत्यादि ॥ कफोत्तरे निम्बादिभिः कल्कीकृतैः पक्वं घृतं पिबेत्। सर्वेषु च कुष्ठेषु भल्लातकोत्थं तुवरजं सर्षपजं वा स्नेहमथवा घृतं विडङ्गादिभिः साधितं पिबेत्। आरग्वधस्य कर्णिकारस्य मूलेन शतवारान् घृतं

पक्वं पिबन् कुष्ठं जयति खदिरयुतं पानीयं सेवमानः। एभिरेव पूर्वोक्तैः स्नेहैर्यथायोगमभ्यञ्जनं हितम् ॥

शशिलेखा

कफोत्तरे च निम्बादिभिः सिद्धं घृतं स्नेहनाय शस्यते। ऊषणं मरिचम्। भल्लातकादिफलानामन्यतमनिष्पीडितं तैलं सर्वेषु कुष्ठेषु सामान्येन। कृमिजिदादिसिद्धं वा घृतं सर्वेषु। सुबोधम् ॥

स्निग्धस्य शोधनं योज्यं विसर्पे यदुदाहृतम्।
ललाटहस्तपादेषु सिराश्चास्य विमोक्षयेत् ॥ १५ ॥

प्रच्छानमल्पके कुष्ठे शृङ्गाद्याश्च यथायथम्।
स्नेहैराप्याययेच्चैनं कुष्ठघ्नैरन्तरान्तरा ॥ १६ ॥

मुक्तरक्तविरिक्तस्य रिक्तकोष्ठस्य कुष्ठिनः।
प्रभञ्जनस्तथा ह्यस्य न स्याद्देहप्रभञ्जनः ॥ १७ ॥

सर्वाङ्गसुन्दरी

स्निग्धस्येत्यादि ॥ स्निग्धस्य कुष्ठिनः शोधनं योज्यम्, यद्विसर्पे कथितम्। तत्र चोक्तम्—"प्रच्छर्दनं विसर्पघ्नं सयष्टीन्द्रयवं फलम्। रसेन युक्तं त्रायन्त्या द्राक्षया" इत्यादि। ललाटादिषु चास्यातुरस्य वैद्यो सिरां विमोक्षयेत्। अत्यल्पे कुष्ठे प्रच्छानं स्यात्। यथायथं यथास्वं शृङ्गाद्याश्च स्युः। अन्तरान्तरा मुक्तरक्तं कृतविरेकं चैनं कुष्ठिनं कुष्ठघ्नैः स्नेहैराप्याययेत्। यस्मात्तथाकृते सत्यस्य कुष्ठिनो मुक्तरक्तस्य तथा विरिक्तस्यात एव रिक्तकोष्ठस्य प्रभञ्जनः पवनो देहस्य प्रभञ्जनो विघातको न स्यात् ॥

शशिलेखा

स्निग्धस्य स्नेहयोजनेनानन्तरं शोधनं वमनादि विसर्पोक्तं "सयष्टीन्द्रयवं फल"मित्यादि योज्यम्। ललाटादिषु सिराश्चास्य कुष्ठिनो दोषव्याप्तिमवेक्ष्य एकां द्वे तिस्रः पञ्च वा विमोक्षयेद्विध्येत्। सुबोधम्। अन्तरान्तरा स्नेहैराप्यायने हेतुमाह— मुक्तरक्तेत्यादि ॥

वाशामृतानिम्बवरापटोलव्याघ्रीकरञ्जोदककल्कपक्वम् ।
सर्पिर्विसर्पज्वरकामिलास्रकुष्ठापहं वज्रकमामनन्ति ॥ १८ ॥

त्रिफलात्रिकटुद्विकण्टकारी-
कटुकाकुम्भनिकुम्भराजवृक्षैः ।
सवचातिविषाग्निकैः सपाठैः
पिचुभागैर्नववज्रदुग्धमुष्ट्या ॥ १९ ॥
पिष्टैः सिद्धं सर्पिषः प्रस्थमेभिः
क्रूरे कोष्ठे स्नेहनं रेचनं च ।
कुष्ठश्वित्रप्लीहवर्ध्माश्मगुल्मान्
हन्यात् कृच्छ्रांस्तन्महावज्रकाख्यम् ॥ २० ॥

दन्त्याढकमपां द्रोणे पक्त्वा तेन घृतं पचेत् ।
[1]धामार्गवपले पीतं तदूर्ध्वाधो विशुद्धिकृत् ॥ २१ ॥

[2]आवर्तकीतुलां द्रोणे पचेदष्टांशशेषितम् ।
तन्मूलैस्तत्र निर्यूहे घृतप्रस्थं विपाचयेत् ॥ २२ ॥

पीत्वा तदेकदिवसान्तरितं सुजीर्णे
भुञ्जीत कोद्रवमसंस्कृतकाञ्जिकेन ।
कुष्ठं किलासमपचीं च विजेतुमिच्छ-
न्निच्छन् प्रजां च विपुलां ग्रहणं स्मृतिं च ॥ २३ ॥

यवैर्[3]लेलीतकवसा क्षौद्रजातीरसान्विता ।
कुष्ठघ्नी समसर्पिर्वा सगायत्र्यसनोदका ॥ २४ ॥

शालयो यवगोधूमाः कोरदूषाः प्रियङ्गवः ।
मुद्गा मसूरास्तुवरीतिक्तशाकानि जाङ्गलम् ॥ २५ ॥

वरापटोलखदिरनिम्बारुष्करयोजितम् ।
मद्यान्यौषधगर्भाणि मथितं चे[2]न्दुराजिमत् ॥ २६ ॥

---

1 धामार्गवं=പീരപ്പെട്ടി. 2 आवर्तकी=പെരുംപീരപ്പെട്ടി.
3 लेलीतकवसा=ഗന്ധകവസാ. 4 इन्दुराजी=കാർകോകിലരി.

अन्नपानं हितं कुष्ठे न त्वम्ललवणोषणम् ।
दधिदुग्धगुडानूपतिलमाषांस्त्यजेत्तराम् ॥ २७ ॥

सर्वाङ्गसुन्दरी

वाशेत्यादि ॥ वाशादिभिः सिद्धं सर्पिर्विसर्पादिघ्नम् । एतच्च वज्रकसंज्ञं घृतमामनन्ति वदन्ति । इन्द्रवज्रा वृत्तम् । त्रिफलादिभिः कार्षिकैः प्रत्यग्रस्नुहीक्षीरपलेन सह पिष्टैरेभिरौषधैर्घृतप्रस्थं चतुर्गुणजलसिद्धं क्रूरे कोष्ठे स्नेहनं स्याद्विरेचनं च । तत् कुष्ठादीन् दारुणान् हन्यात् । तच्च महावज्रकं नाम । औपच्छन्दसिकशालिन्यौ वृत्ते । दन्त्याः चतुःषष्टिपलानि जलद्रोणे पचेत् । तेन क्वाथेन राजकोशातकीपले घृतं पचेत् । तत् पीतमूर्ध्वाधोविशुद्धिकरम् । आवर्तक्यास्तुलां पलशतं द्रोणेऽपामष्टांशशेषितं पचेत् । तत्र तस्मिन् क्वाथे तस्या मूलैः कल्कीकृतैर्घृतप्रस्थं विपाचयेत् । तद्घृतमेकदिनान्तरितं पीत्वा सुष्ठु जीर्णे च घृते कोद्रवमसंस्कृतेन काञ्जिकेन सह भुञ्जीत कुष्ठादीन् विजिगीषुः, प्रजां च विस्तीर्णामिच्छन्, ग्रहणं स्मृतिं चाभिलषन् । वसन्ततिलकं वृत्तम् । आवर्तकी महाजालिनी । यतेर्ब्रह्मचर्यस्थितस्य लेलीतकवसा माक्षिकजातीरसयुता कुष्ठघ्नी स्यात् । जातीरसो बोळः । अथवा समघृता खदिरासनोदकसहिता कुष्ठघ्नी स्यात् । शाल्यादिकमन्नपानञ्च वरादिभिर्योजितं कुष्ठे हितम् । इन्दुराजिर्वाकुची । अम्लादिकमन्नपानन्तु न हितं स्यात् कुष्ठे । तथा दध्यादीनतिशयेन वर्जयेत् । प्रतिरोगं यन्निदानवर्जनम्, तच्चिकित्सितमेवेत्यवगन्तव्यम् ॥

शशिलेखा

वाशादीनामुदकेन क्वाथेन कल्केन चैषामेव पक्वं सर्पिर्विसर्पादिघ्नं नाम्ना वज्रकमित्याचार्या आमनन्ति शब्दयन्ति । त्रिफलादीनां पिचुभागैः प्रत्येकं कर्षांशैर्नवस्य वज्रदुग्धस्य सुधाक्षीरस्य मुष्ट्या पलेन च सिद्धं सर्पिर्महावज्रकम् । सुबोधम् । दन्त्याढकमित्यादि । ऊर्ध्वाधोविशुद्धिकृद्वमनं विरेचनं च । आवर्तकीघृतं सुबोधम् । आवर्तकी रक्तपुष्पा महाजालिनी नाम वमनद्रव्यम् । द्रोणोर्मणः पलशतानि पञ्चद्वादशाधिकानि । आवर्तक्या एव मूलानि कल्कपरिभाषाया । सुबोधम् । यतेर्ब्रह्मचर्यादियुक्तस्यारण्यवासिनः पुंसो लेलीतकवसा क्षौद्रजातीरसाभ्यामन्विता कुष्ठघ्नी भवति । अथवा समसर्पिर्लेलीतकवसा गाय-

-व्यसनयोरुदकेन क्वाथेन संयुक्ता सत्युपयुक्ता कुष्ठघ्नी भवति। लेलीतकवसो-त्तरापथे रसरूपा प्रसिद्धा। जातीरसो जात्याः स्वरसः। गायत्री खदिरः। शाल्य इत्यादिना सर्वकुष्ठहितमन्नपानमुच्यते। जाङ्गलं जाङ्गलमांसम्। सर्वञ्च त्रिफलादिभिर्योजितम्। निम्बोऽरिष्टः! तानि मद्यानि, येषां कुष्ठहितान्यौषधानि गर्भे। मथितं तक्रमिन्दुराजिमत् सोमराजीयुक्तम्। एवंविधमन्नपानं कुष्ठे हितम्। नत्वम्लादिगुणमन्नपानं हितम्। दध्यादिकं च कुष्ठी नितरां त्यजेत् सुतरां जह्यात्॥

पटोलमूलत्रिफलाविशालाः
पृथक्त्रिभागापचितत्रिशाणाः।
स्युस्त्रायमाणा कटुरोहिणी च
भागार्धिके नागरपादयुक्ते ॥ २८ ॥

एतत्पलं जर्जरितं विपक्व
जले पिबेद्दोषविशोधनाय।
जीर्णे रसैर्धन्वमृगद्विजानां
पुराणशाल्योदनमाददीत ॥ २९ ॥

कुष्ठं किलासं ग्रहणीप्रदोष-
मर्शांसि कृच्छ्राणि हलीमकं च।
षड्रात्रियोगेन निहन्ति चैतत्
हृद्बस्तिशूलं विषमज्वरं च ॥ ३० ॥

सर्वाङ्गसुन्दरी

पटोलेत्यादि॥ पृथक् प्रत्येकं त्रिभागेनापचितो न्यूनस्तृतीयः शाणो येषां ते पटोलादयः पञ्च पृथक् त्रिभागापचितत्रिशाणाः। लोकेऽपि चैव प्रयुज्यते। यथा त्रिभागोनास्त्रयो द्रक्खुमा देया इति। अत्र हि द्वौ द्रक्खुमौ तृतीयश्च द्रक्खुमस्त्रिभागेन हीन इति गम्यते। तदेवं पटोलस्य त्रिभागापचित-त्रिशाणस्य षोडश धानका भवन्ति। षड्धानको हि शाणः। एवं पटोल-मूलादिद्रव्याणां पञ्चानां प्रत्येकं षोडश धानकाः स्युः। त्रायमाणा कटुरोहिणी च भागार्धिके। किंभूते—नागरपादयुक्ते सत्यौ, न तु केवले। तदयमर्थः—

त्रायन्त्याः धानकाः षट् । कटुरोहिण्या धानकाः षट् । नागरस्य धानकाश्चत्वारः । षोडश धानको ह्यत्र मूलद्रव्यभागः । तदेवं पटोलादीनां पञ्चानामशीतिर्धानकाः त्रायन्तीकटुकयोः शुण्ठीपादयुतयोः षोडश धानका इति षण्णवतिधानकाभिः पलं भवति । तदिदं पलं जर्जरितं किञ्चिच्चूर्णितं जले विपक्वं दोषविशुद्ध्यर्थं पिबेत् । जीर्णे सत्यौषधे जाङ्गलमृगपक्षिणां मांसरसैः सह पुराणशाल्योदनमश्नीयात् । उपजाती वृत्ते । एतच्च पीतं षड्रात्रयोगेन षड्दिनान्युपयुक्तं कुष्ठादीन् हन्ति । इन्द्रवज्रा वृत्तम् ॥

शशिलेखा

पटोलेत्यादि ॥ पटोलमूलादीनां पञ्चानां पृथक् त्रयः शाणाः ग्राह्याः । तेषु तृतीयशाणस्य तृतीयभागोऽपनेयः । तृतीयशाणस्येत्युपलक्षणम् । अन्यतमशाणस्य तृतीयभागेऽपनीते न दोषः । गणनावैचित्र्यमेवाचार्येणोक्तत्वात् । शाणः कर्षस्य पादः । त्रायमाणाकटुरोहिण्यौ भागाधिके नागरपादयुक्ते गृहीतव्ये इत्यर्थः । पटोलमूलं हरीतकीविभीतकामलकानां फलानि विशालामूलञ्च भवति । एषां पञ्चानामशीतिर्धानकाः । त्रायमाणाकटुरोहिण्यौ भागाधिके इति द्वौ शाणौ द्वादशधानकाः । एवमेकीकृत्य द्विनवतिर्धानका भवन्ति । नागरपादयुक्ते शुण्ठ्यास्त्रिभागोनः शाण इति चत्वारो धानकाः पूर्वैः सह षण्णवतिर्धानका भवन्तीति । एतत्परिमितं द्रव्यम् । समुदायेन धृतं पलं स्यात् । तथा च सङ्ग्रहे— "पटोलविशालयोर्मूलं त्रिफला च पृथक् त्रिभागोनत्रिशाणाः कटुकात्रायमाणे शाणांशे शुण्ठ्यास्त्रिभागोनः शाणः तदेतत् पलमैकध्यम् ।" इत्यादि । अस्यायमर्थः — त्रिभागोनत्रिशाणाः तृतीयभागोनतृतीयशाणाः षड्धानकाः । शाणः, यद्यपि चत्वारो धानकाः शाण इत्याचार्याभिप्रायः, तथापि गणनासौकर्यार्थं तन्त्रान्तरानुसारेणैवमत्र व्यवहृतम् । तेन पटोलादिपञ्चकं प्रत्येकं निष्कद्वयपरिमाणं भवति । कटुकात्रायमाणे शाणांशे प्रत्येकं षड्धानके भवतः । तेन द्वावपि समुच्चित्याध्यर्धनिष्कम् । शुण्ठ्यास्तृतीयभागोनः शाण इत्यर्धनिष्कं भवति । एवं पूर्वैस्सह द्वादशनिष्कं पलं स्यादिति । चरके तु, "मूलं पटोलस्य तथा गवाक्ष्याः पृथक् पलांशं त्रिफलात्वचश्च । स्यात्त्रायमाणा कटुरोहिणी च भागाधिका नागरपादयुक्ता ॥ पलं तथैषां सह चूर्णितानां जले श्रृतं दोषहरं पिबेच्च" इति । अनेन ग्रन्थेनैव षट्पलपरिमितानामौषधानां षष्ठं भागमपकृष्य प्रक्वाथ्य पेयमित्युक्तम् । तत्र गणनायां यद्विनिगूढमर्थतत्त्वम्,

तदप्यनेनाचार्येणैवंवदता प्रकाशितमिति मन्तव्यम्। अन्ये पुनरेवं व्याख्यानयन्ति—त्रिफला समुदितैव गृह्यते। तेन पटोलादीनि त्रीण्यौषधानि प्रत्येकं द्विनिष्कप्रमाणानि स्युः। कटुकादिकं पूर्ववद्व्याख्येयम्। एवमष्टनिष्कं पलं स्यादिति। अपरे त्वेवं वर्णयन्ति— तृतीयभागेनापचितान्यूनानि त्रीणि भागानि येषां ते त्रिभागापचितत्रिशाणाः। तदेवं पटोलादिपञ्चकं प्रत्येकमध्यर्धनिष्कं स्यात्। कटुकात्रायमाणे शाणांशे शाणश्चांशश्च शाणांशम्। अंशः पुनस्तस्यैव शाणस्यार्धभागो विज्ञेयः। तदेवं कटुकात्रायमाणे प्रत्येकमध्यर्धशाणे स्याताम्। शुण्ठ्यास्त्रिभागोनः शाणः तृतीयभागो यथाऽवशिष्टः स्यात्। तथोनः शाणः चत्वारो धानका इत्यर्थः। एवं पूर्वैः सह दशनिष्कं पलं स्यात्। केचित्तु भागार्धिके नागरपादयुक्त इत्यत्रार्धशब्दो लुप्तनिर्दिष्टः। तेन भागार्धार्ध इति सिद्धः स्यात्। भागोऽत्र द्वादशधानको मूलद्रव्यस्यांशतस्तस्यार्धः शाणः। द्वितीयेनार्धशब्देन तस्यैव शाणस्यार्धभागो गृह्यते। पादशब्देन चार्थबलाच्छाणस्य तृतीयभागो निष्कचतुर्थांशः परिगृह्यते, न शाणस्य चतुर्थो भाग इत्यनवद्यमित्याहुः। जीर्णे त्वौषधे जाङ्गलरसेनाश्नीयात्। विरिक्तस्य तु मांसरसभोजनं प्रयोगयोगिकत्वात्। षड्रात्रोपयोगेनैष शूलादिजित्। विषमज्वरः सन्ततादिः॥

विडङ्गसारामलकाभयानां
पलं पलं त्रीणि पलानि कुम्भात्।
गुडस्य च द्वादश मासमेष
जितात्मना हन्त्युपयुज्यमानः ॥ ३१ ॥

कुष्ठश्वित्रश्वासकासोदरार्शो-
मेहप्लीहग्रन्थिरुक्जन्तुगुल्मान्।
सिद्धं योगं प्राह यक्षो मुमुक्षो-
र्भिक्षोः प्राणान्माणिभद्रः किलेमम् ॥ ३२ ॥

विडङ्गसारेत्यादि ॥ विडङ्गसारादीनां समुदितानां पलत्रयं त्रीणि पलानि कुम्भात् त्रिवृतायाः त्रीणि पलानि गुडस्य च द्वादशपलानि। एष प्रयोगो जितेन्द्रियेण मासमुपयुज्यमानो वक्ष्यमाणान् गदान् हन्ति। उपेन्द्रवज्रा वृत्तम्। मासशब्दोपादानात् प्रत्यहमस्माद्योगादर्धपलं नवधानकरक्तिकात्रय-

साहितमभ्यवहरणीयत्वेनात्रावतिष्ठते। अन्यत्रापि प्रदेशे य एवंविधो निर्देशस्तत्रापि परिमाणकल्पनायामयमेव न्यायोऽनुसर्तव्यः। माणिभद्राख्यो यक्षो भिक्षोः प्राणान् मुमुक्षोर्जीवितं जिहासोरिमं सिद्धं योगं प्राणकरं प्राह जगादेत्यर्थः। अत्र भूतकाले प्राहेति न तथा साधु। किलेत्यागमिकत्वं सूचयति। शालिनीवृत्तम्॥

शशिलेखा

विडङ्गसारादीनां प्रत्येकं पलम्। विडङ्गसारो विडङ्गमज्जा। कुम्भात्त्रिवृतायास्त्रीणि पलानि। गुळस्य द्वादश पलानि। मासशब्दोपादानात् प्रत्यहमस्माद्योगाद्वराटिकात्रयोपहितनवधानकान्वितमर्धपलमभ्यवहरणीयमिति प्राप्तम्। वराटिका गुञ्जा। जन्तवः क्रिमयः। माणिभद्राख्यो यक्षः भिक्षोः प्राणान् मुमुक्षोरिमं सिद्धं योगं प्राणकरं प्राह जगादेत्यर्थः। अत्र भूतकाले प्राहेति। किलेत्यागमिकत्वं सूचयति। अन्येत्वेवं वर्णयन्ति। गुळस्य षड्द्वादशपलानीति। तथा गृहीते चूर्णात् त्रिगुणं गुळं स्यात्। एवमेव तालीसवटकादावपि प्रसिद्धम्। तस्माद्यत्र गुळस्य प्रमाणमनुक्तं तत्र चूर्णात् त्रिगुणं गुळं ग्राह्यम्। एवं कृतेऽप्यग्निमान्द्यं न स्यात्। तदुक्तं सङ्ग्रहे। "गुळः कर्ताग्निसादस्य सह त्वभयादिभिः" इति॥

भूनिम्बनिम्बत्रिफलापद्मकातिविषाकणाः।
मूर्वापटोलद्विनिशापाठातिक्तेन्द्रवारुणीः ॥ ३३ ॥

सकलिङ्गवचास्तुल्या द्विगुणाश्च यथोत्तरम्।
लिह्याद्दन्तीत्रिवृद्ब्राह्मीश्चूर्णिता मधुसर्पिषा ॥ ३४ ॥

कुष्ठमेहप्रसुप्तीनां परमं स्यात्तदौषधम्।
वराविडङ्गकृष्णा वा लिह्यात्तैलाज्यमाक्षिकैः ॥ ३५ ॥

काकोदुम्बरिकावेल्लनिम्बाब्दव्योषकल्कवान्।
हन्ति वृक्षकनिर्यूहः पानात्सर्वांस्त्वगामयान् ॥ ३६ ॥

कुटजाग्निनिम्बनृपतरुखदिरासनसप्तपर्णनिर्यूहे।
सिद्धा मधुघृतयुक्ताः कुष्ठघ्नीर्भक्षयेदभयाः ॥ ३७ ॥

दार्वीखदिरनिम्बानां त्वक्क्वाथः कुष्ठसूदनः।

सर्वाङ्गसुन्दरी

भूनिम्बेत्यादि ॥ भूनिम्बादयस्तुल्या दन्त्यादयश्च यथोत्तरं द्विगुणाश्चूर्णिता मधुसर्पिषा लिह्यात्। कुष्ठादीनामेतत् परं भेषजम्। त्रिफलादीन् वा तैलघृतमाक्षिकैर्यथादोषं लिह्यात्। काकोदुम्बरिकादिकल्कवान् वृक्षककाथः पानात् सर्वांस्त्वगामयांस्त्वग्रोगान् हन्ति। काकोदुम्बरिका फल्गुः। वृक्षको वत्सकः। कुटजादिक्वाथे सिद्धाः पक्का हरीतकीर्मधुघृतसंयुक्ताः कुष्ठनुदो भक्षयेत्। आर्यावृत्तम्। दार्व्यादीनां त्वक्क्वाथः कुष्ठनाशनः स्यात् ॥

शशिलेखा

भूनिम्बादयो वचान्तास्तुल्यभागास्तथा दन्ती त्रिवृद्ब्राह्मीश्च यथोत्तरद्विगुणाः सम्मिश्रय चूर्णिता मधुसर्पिषा लिह्यात्। एतत् भूनिम्बादिकं ब्राह्म्यन्तं कुष्ठादीनां परमौषधं स्यात्। भूनिम्बः किराततिक्तकम्। कणा पिप्पली। द्वे निशे द्विहरिद्रे। तिक्ता कटुका। इन्द्रवारुणी ऐन्द्री प्रसिद्धा। अङ्गानां प्रसुप्तिरिव प्रसुप्तिरचैतन्यम्। कुष्ठी वरादीर्वा तैलादिभिर्लिह्यात्। सुबोधम् ॥

निशोत्तमानिम्बपटोलमूल-
तिक्ता[1]वचालोहितयष्टिकाभिः।
कृतः कषायः कफपित्तकुष्ठं
सुसेवितो धर्म इवोच्छिनत्ति ॥ ३८ ॥

एभिरेव च शृतं घृतमुख्यं
भेषजैर्जयति मारुतकुष्ठम्।
कल्पयेत्खदिरनिम्बगुडूची-
देवदारुरजनीः पृथगेवम् ॥ ३९ ॥

पाठादार्वीवह्निघुणेष्टाकटुकाभि-
र्मूत्रं युक्तं शक्रयवैश्चोष्णजलं वा।
कुष्ठी पीत्वा मासमरुक् स्याद्गुदकीली
मेही शोफी पाण्डुरजीर्णी क्रिमिमांश्च ॥ ४० ॥

1 तिक्ता=കടുകരോഹിണി

सर्वाङ्गसुन्दरी

निशेत्यादि ॥ निशादिभिः कृतः कषायः कफपित्तजं कुष्ठमुन्मूलयति। सुष्ठु सेवितो यथा धर्मः। एभिरेव पूर्वोक्तैरौषधैः पक्वं वरं घृतं वातकुष्ठं जयति। एवमनयैव कल्पनया पृथक् खदिरादीन् कल्पयेत्। उपजातिस्वागते वृत्ते। पाठादिभिरिन्द्रयवैश्च युक्तं गोमूत्रमथवोष्णजलं मासं पीत्वा कुष्ठी नीरुक् स्यादर्शसादिश्च। वेदैरब्धैर्म्तौ यसगा मत्तमयूरम् ॥

शशिलेखा

निशादिभिर्नवभिः कृतः कषायः सुसेवितः संशीलितः कफपित्तकुष्ठमुच्छिनत्ति नाशयति। सुसेवितो धर्म इवेत्युपमालङ्कारः। उत्तमा त्रिफला। लोहितयष्टी मञ्जिष्ठा। एभिर्निशादिभिः क्वथितकल्कितैः स्नेहपाकपरिभाषया शृतं पक्वं घृतमुख्यं गोघृतं मारुतकुष्ठं जयति। खदिरादिभिः पृथक् प्रत्येकं घृतं कल्पयेत्। एवमिति क्वाथकल्कविधानेन विषयश्चात्र गुणैर्विकल्प्यः। पाठादिभिरिन्द्रयवान्तैर्युक्तं गोमूत्रमुष्णजलं वा मासं पीत्वा कुष्ठादिमानरुक् स्यात्। घुणेष्टा अतिविषा ॥

लाक्षादन्तीमधुरसवराद्वीपिपाठाविडङ्ग—
प्रत्यक्पुष्पीत्रिकटुरजनीसप्तपर्णाटरूषम्।
रक्ता निम्बं सुरतरुकृतं पञ्चमूल्यौ च चूर्णं
पीत्वा मासं जयति हितभुग्गव्यमूत्रेण कुष्ठम् ॥ ४१ ॥

निशाकणानागरवेल्लतौवरं
सवह्निताप्यं क्रमशो विवर्धितम्।
गवाम्बुपीतं वटकीकृतं तथा
निहन्ति कुष्ठानि सुदारुणान्यपि ॥ ४२ ॥

त्रिकटूत्तमातिलारुष्करा-
ज्यमाक्षिकसितोपला विहिता।
गुळिका रसायनं स्यात्
कुष्ठजिच्च वृष्या च सप्तसमा ॥ ४३ ॥

चन्द्रशकलाग्निरजनी-
विडङ्गतुवरास्थ्यरुष्करत्रिफलाभिः ।
वटका गुडांशक्लृप्ताः
समस्तकुष्ठानि नाशयन्त्यभ्यस्ताः ॥ ४४ ॥

विडङ्गभल्लातकबाकुचीनां
सद्वीपिवाराहिहरीतकीनाम् ।
सलाङ्गलीकृष्णतिलोपकुल्या[1]
गुडेन पिण्डी विनिहन्ति कुष्ठम् ॥ ४५ ॥

सर्वाङ्गसुन्दरी

लाक्षेत्यादि ॥ लाक्षादिचूर्णं गोमूत्रेण मासं पीत्वा हितभोजी सन् कुष्ठं जयति । रक्ता मञ्जिष्ठा । सुरतरुशब्दस्य नपुंसकत्वमौषधवाचित्वात् । लोकाश्रयत्वात् लिङ्गस्येति वा । पञ्चमूल्यौ दशमूलमित्यर्थः । मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ तादृगुरू चेत् । निशादिकं क्रमेण विवर्धितं गोमूत्रेण पीतमथवा वटकीकृतं कुष्ठानि सुकृच्छ्राण्यपि निहन्ति । वंशस्थं वृत्तम् । त्रिकटुकादिभिर्विहिता कृता गुळिका रसायनं कुष्ठहृद्वृष्या च स्यात् । एषा च सप्तसमाख्या । त्रिकटुकत्रिफले ह्यत्र समुदायरूपत्वात् द्वे एव कल्पिते । आर्या विपुला तु यान्यथा पादभाक् । चन्द्रशकलादिभिर्वटका गुडांशेन क्लृप्ताः शीलिता निश्शेषकुष्ठानि घ्नन्ति । चन्द्रशकला बाकुची । आर्या गीतिः । विडङ्गादीनां चूर्णेन गुडेन च सह पिण्डी लाङ्गलिकाद्यन्वित कुष्ठं विजयते ॥

शशिलेखा

लाक्षादिचूर्णं मासं गोमूत्रेण पीत्वा हिताशी कुष्ठं जयति । मधुरसा मूर्वा । वरा त्रिफला । द्वीपिश्चित्रकः । प्रत्यक्पुष्प्यपामार्गः । सप्तपर्णं प्रसिद्धम् । आटरूषं वाशा । रक्तामाञ्जिष्ठा । पञ्चमूल्यावादी । अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यत इति स्त्रीलिङ्गत्वात् पञ्चमूलशब्दात् स्त्रीप्रत्ययदीर्घः । निशेत्यादि सुबोधम् । गवाम्बुपीतं गोमूत्रभावितम् । त्रिकट्वादिभिः सप्तसमा

---

1 उपकुल्या=തിപ്പലി

नाम गुळिका । चन्द्रशकलादिभिर्वटकः । गुळस्यांशेन भागेन कल्पाः अभ्यस्तास्समस्तकुष्ठानि नाशयन्ति । चन्द्रशकला सोमराजिः । तुवरकफलस्यास्थि मज्जाधारम् विळङ्गादीनां सलाङ्गल्यादिका गुळेन कृता पिण्डी कुष्ठं विनिहन्ति । द्वीपिश्चित्रकः । वाराही सौकरी । लाङ्गली विशल्या । उपकुल्या पिप्पली ॥

शशाङ्कलेखा सविडङ्गसारा
सपिप्पलीका सहुताशमूला ।
सायोमला सामलका सतैला
कुष्ठानि कृच्छ्राणि निहन्ति लीढा ॥ ४६ ॥

पथ्यातिलगुडैः पिण्डी कुष्ठं सारुष्करैर्जयेत् ।
गुडारुष्करजन्तुघ्नसोमराजीकृताऽथवा ॥ ७४ ॥

विडङ्गाद्रिजतु क्षौद्रसर्पिष्मत्खादिरं रजः ।
किटिभश्वित्रदद्रुघ्नं खादेन्मितहिताशनः ॥ ४८ ॥

सितातैलकृमिघ्नानि धात्र्ययोमलपिप्पलीः ।
लिहानः सर्वकुष्ठानि जयन्त्यतिगुरूण्यपि ॥ ४९ ॥

मुस्तं व्योषं त्रिफला मञ्जिष्ठा दारु पञ्चमूले द्वे ।
सप्तच्छदनिम्बत्वक् सविशाला चित्रको मूर्वा ॥ ५० ॥

चूर्णं तर्पणभागैर्नवभिः संयोजितं समध्वंशम् ।
नित्यं कुष्ठनिबर्हणमेतत्प्रायोगिकं खादेत् ॥ ५१ ॥

श्वयथुं सपाण्डुरोगं श्वित्रं ग्रहणीप्रदोषमर्शांसि ।
वर्ध्मभगन्दरपिटकाकण्डूकोठापचीर्हन्ति ॥ ५२ ॥

रसायनप्रयोगेण तुवरास्थीनि शीलयेत् ।
भल्लातकं बाकुचिकां वह्निमूलं शिलाह्वयम् ॥ ५३ ॥

सर्वाङ्गसुन्दरी

शशाङ्कलेखेत्यादि ॥ शशाङ्कलेखा विडङ्गसारादिभिस्सह तैलेन लीढा कृच्छ्राणि कुष्ठानि नाशयति । उपजातिर्वृत्तम् । पथ्यादिभिः सारुष्करैः सभ-

ल्लातकैः पिण्डी कुष्ठं जयेत्। गुडादिभिर्वा कृता पिण्डी। खदिरचूर्णं विडङ्गादि-युतं मितहितभोजिना खादेत् किटिभादिघ्नम्। सितादीनि लिहानोऽशेषकुष्ठानि कृच्छ्राण्यपि जयति। मुस्तादिकं समभागं सक्तुभागैर्नवभिः संयोजितं मध्वंशेन युतमेतच्चूर्णं प्रायोगिकं प्रयोगयोग्यं कुष्ठघ्नं सततं खादेत्। आर्यास्तिस्रः। रसाय-नोक्तेन विधिना तुवरास्थीनि शीलयेत्। भल्लातकं वा बाकुचिकां सोमराजीं वा चित्रकमूलं वा शिलाजतु वा शीलयेत्॥

शशिलेखा

शशाङ्कलेखा सोमराजिर्विडङ्गसारादिभिर्युगपद्युक्ता लीढा कृच्छ्राणि कृच्छ्र-साध्यानि कुष्ठानि निहन्ति। हुताशमूलं चित्रकमूलम्। अयोमलं लोहमलम्। सारुष्करैरभयादिभिः पिण्डी कुष्ठं जयेत्। गुडादिभिः कृता वा। सुबोधम्। कुष्ठ-निबर्हणं प्रायोगिकमेतन्मुस्तादिचूर्णं नवभिर्नवगुणैस्तर्पणभागैर्युक्तं मध्वंशयुतं नित्यं नित्यं खादन् पुरुषः श्वयथ्वादीन् हन्ति। द्वे पञ्चमूले दशमूलम्। विशाला गवाक्षी। तर्पणा यवसक्तवः। कोठाः सोत्सेधरागाग्निमण्डलानि। तुवराणां पश्चिमोदधिकच्छप्रसिद्धानां फलविशेषाणामस्थीनि मज्जाधाराणि। भल्लातकमरु-ष्करम्। शिलाह्वयमद्रिजतु। पृथगेतानि रसायनद्रव्यप्रयोगविहितविधानेन शीलयेत्। गतानुगतिका॥

इति दोषे विजितेऽन्त-
स्त्वक्स्थे शमनं बहिः प्रलेपादि हितम्।
तीक्ष्णालेपोत्क्लिष्टं
कुष्ठं हि विवृद्धिमेति मलिने देहे ॥ ५४ ॥

स्थिरकठिनमण्डलानां कुष्ठानां पोट्टलैर्हितः स्वेदः।
स्विन्नोत्सन्नं कुष्ठं शस्त्रैर्लिखितं प्रलेपनैर्लिम्पेत् ॥ ५५ ॥

येषु न शस्त्रं क्रमते स्पर्शेन्द्रियनाशनेषु कुष्ठेषु।
तेषु निपात्यः क्षारो रक्तं दोषं च विस्राव्य ॥ ५६ ॥

लेपोऽतिकठिनपरुषे सुप्ते कुष्ठे स्थिरे पुराणे च।
पीतागदस्य कार्यो विषैः समन्त्रागदैश्चानु ॥ ५७ ॥

स्तब्धानि सुप्तसुप्तान्यस्वेदनकण्डुलानि कुष्ठानि।
घृष्टानि शुष्कगोमयफेनकशस्त्रैः प्रदेह्यानि ॥ ५८ ॥

सर्वाङ्गसुन्दरी

इतीत्यादि ॥ इत्येवंप्रकारेणान्तर्विजिते दोषे अत एव त्वक्स्थे शमनं बहिःप्रलेपादि हितम्। आदिशब्देन स्नानादीनां ग्रहणम्। ननु बहिर्मार्गस्थं कुष्ठं किमिति पूर्वमेव प्रलेपादिना न जीयत इत्याह—तीक्ष्णेत्यादि। यस्मात्ती-क्ष्णेनालेपेनोत्क्लिष्टमुत्क्लेशं प्रापितं कुष्ठं मलिने सदोषे देहे सत्यतिवृद्धिमेति प्राप्नोति। तस्मादन्तश्शुद्धे काये प्रलेपादि हितम्। आर्या गीतिः स्थिराणि कठिनानि च मण्डलानि येषां कुष्ठानां तेषां पोट्टलैः स्वेदो हितः। स्विन्नोत्सन्नं कुष्ठं शस्त्रैर्लिखितं कृत्वा प्रलेपनैर्लिम्पेत्। गीतिरार्या। येषु कुष्ठेषु स्पर्शेन्द्रियनाशनेषु शस्त्रं न क्रमते तेषु रक्तं दोषञ्च विस्राव्य क्षारो निपातनीयः। क्रमत इति वृत्तिसर्गेत्यादिना तङ्। पाषाणवत्कठिने तथा परुषस्पर्शे तथा सुप्ते स्वापयुक्ते तथा स्थिरे स्थिरीभूते तथा पुराणे च कुष्ठे सत्यातुरस्योपयुक्तागदस्य विषं यत्र यत्र प्रसज्यते तत्र तत्र विषैर्लेपः कार्यः। अनु पश्चात् समन्त्रागदैर्लेपः। स्तब्धानि तथाऽतिसुप्तानि तथा अस्वेदनानि कण्डूमन्ति च कुष्ठानि शुष्कगोमयादिभिर्घृष्टान्यनन्तरं प्रलेप्यानि।

शशिलेखा

इतीत्यादि सुबोधम्। स्थिरत्वादियुक्तानां कुष्ठानां पोट्टलैरौषधमूटकै रूक्षैः स्वेदो हितः। स्विन्नञ्चोत्सन्नमुन्नतञ्च कुष्ठं रक्तागमनाय शस्त्रैर्लिखितं प्रले पनैर्लिम्पेत्। येष्वित्यादिना कुष्ठेषु बाह्यस्य क्षारस्य विषयं दर्शयति। स्पर्शे-न्द्रियनाशनेषु सुप्त्यादियुक्तेषु येषु कुष्ठेषु निष्फलत्वाच्छस्त्रं न क्रमते न प्रभवति तेषु बहिरन्तश्च रक्तं दोषञ्च विस्राव्य क्षारो निपात्यः। अतिकठिनत्वादियुक्ते कुष्ठे तत्कालपीतागदस्य पुंसो विषैर्लेपः कार्यः। अनु च विषलेपस्य पश्चात मन्त्रयुक्तैरगदैर्लेपः कार्यः। स्तब्धत्वादियुक्तानि कुष्ठानि शुष्कगोमयादिभि-र्घृष्टानि प्रदेह्यानि ॥

मुस्तं त्रिफला मदनं करञ्ज आरग्वधकलिङ्गयवाः।
सप्ताह्वकुष्ठफलिनीदार्व्यः सिद्धार्थकं स्नानम् ॥ ५९ ॥

एष कषायो वमनं विरेचनं वर्णकृत्तथोद्वर्षः ।
त्वग्दोषकुष्ठशोफप्रबाधनः पाण्डुरोगघ्नः ॥ ६० ॥

करवीरनिम्बकुटजाच्छम्याकाच्चित्रकाच्च मूलानाम् ।
मूत्रे दर्वीलेपी क्वाथो लेपेन कुष्ठघ्नः ॥ ६१ ॥

श्वेतकरवीरमूलं कुटजकरञ्जात्फलं त्वचो दार्व्याः ।
सुमनःप्रवाळयुक्तो लेपः कुष्ठापहः सिद्धः ॥ ६२ ॥

शैरीषीत्वक्पुष्पं कार्पास्या राजवृक्षपत्राणि ।
पिष्टा च काकमाची चतुर्विधः कुष्ठहा लेपः ॥ ६३ ॥

[1]व्योषसर्षपनिशागृहधूमै-
र्यावशूकपटुचित्रककुष्ठैः ।
कोलमात्रगुटिकार्धविषांशैः
श्वित्रकुष्ठहरणो वरलेपः ॥

सर्वाङ्गसुन्दरी

मुस्तमित्यादि ॥ मुस्तादयः स्नानं स्यात् । एष एव कषायो वमनं-विरेचनं तथा वर्णकृदुद्घर्षस्त्वग्दोषादिप्रबाधनः पाण्डुरोगहृच्चास्यात् ! । करवीरादिमूलानां गोमूत्रे दर्वीलेपीक्वाथो लेपेन कुष्ठापहः । सितकरवीरमूलादिभिः सुमनःपल्लवयुतो लेपो निश्चितं कुष्ठघ्नः । शिरीषत्वगादिको लेपश्चतुष्प्रकारः कुष्ठजित् । आर्याष्टौ ॥

शशिलेखा

मुस्तादीनि सिद्धार्थकं नाम स्नानम् । एष च योगो वमनाय कषायो भवति । विरेचनश्च । वर्णकर अङ्गोद्वर्षश्च । उद्घृष्यतेऽनेनाङ्गानीत्युद्घर्षः । एष च प्रयोगस्त्वग्दोषादीनां प्रबाधनः पाण्डुरोगघ्नश्च । ननु त्वग्दोषकुष्ठयोरन्यतराभिधानं न्याय्यम्, न द्वयोरिति । उच्यते । पिप्लुव्यङ्गादीनां त्वचं दूषयितॄणां परिहारार्थमेवं वचनमिति । करवीरेत्यादि सुबोधम् । श्वेतकरवीरादिभिर्लेपः

1 प्रक्षिप्तश्लोकः

कुष्ठापहः सिद्धः कार्यसम्पादने। शिरीषत्वगादिभिः पृथक् चत्वारो लेपाः कुष्ठापहाः। राजवृक्ष आरग्वधः॥

निम्बं हरिद्रे सुरसं पटोलं
कुष्ठाश्वगन्धे सुरदारुशिग्रू।
ससर्षपं तुम्बुरुधान्यवन्यं
चण्डा च चूर्णानि समानि कुर्यात् ॥ ६४ ॥

तैस्तक्रपिष्टैः प्रथमं शरीरं
तैलाक्तमुद्वर्तयितुं यतेत।
तथाऽस्य कण्डूपिटकाः सकोठाः
कुष्ठानि शोफाश्च शमं व्रजन्ति ॥ ६५ ॥

मुस्तामृताऽसङ्गकटङ्कटेरी
कासीसकम्पिल्लककुष्ठलोध्राः।
गन्धोपलः सर्जरसो विडङ्गः
मनश्शिलाले करवीरकत्वक् ॥ ६६ ॥

तैलाक्तगात्रस्य कृतानि चूर्णा-
न्येतानि दद्यादवचूर्णनाऽर्थम्।
दद्रूस्सकण्डूः किटिभानि पामा
विचर्चिका चेति तथा न सन्ति ॥ ६७ ॥

स्नुकाण्डे सर्षपाकल्कः कुकूलानलपाचितः।
लेपाद्विचर्चिकां हन्ति रागवेग इव त्रपाम् ॥ ६८ ॥

मनश्शिलाले मरिचानि तैल-
मार्कं पयः कुष्ठहरः प्रदेहः।
तथा करञ्जप्रपुनाटबीजं
कुष्ठान्वितं गोसलिलेन पिष्टम् ॥ ६९ ॥

सर्वाङ्गसुन्दरी

निम्बमित्यादि॥ पूर्वं तैलाभ्यक्तं शरीरं निम्बादिभिः समभागैश्चूर्णीकृतैस्तक्रयुक्तैरुद्वर्तयितुं यत्नं कुर्यात्। तथा एवं कृतेऽस्यातुरस्य कण्ड्वादयः शाम्य-

न्ति। मुस्तादीन्येतानि समानि चूर्णानि कृतानि तैलाभ्यक्तदेहस्यावचूर्णनार्थं दद्यात्। तथैवमवचूर्णिते सति दद्र्वादयो नश्यन्ति। चत्वार्येतानि उपजातिसंज्ञानि वृत्तानि। आसङ्गो मूर्वा। ज्योतिष्मतीति केचित्। कटङ्कटेरी दार्वी। सर्षपाणां कल्कः स्नुह्याः काण्डे न्यस्तः कुकूलाग्नौ पाचितो लेपेन विचर्चिकां हन्ति। रागवेगो लज्जां यथा। मनश्शिलादयः प्रलेपः कुष्ठहृत्। तद्वदेव कुष्ठान्वितं करञ्जादि गोमूत्रेण पिष्टम्। उपजातिर्वृत्तम्॥

शशिलेखा

तैलाभ्यक्तं शरीरं निम्बादिभिः समभागैस्तक्रपिष्टैरुद्वर्तयितुं यतेत। तथा कुर्वतः कुष्ठिनः कण्ड्वादीनि शमं व्रजन्ति। वन्यं परिपेलवम्। चण्डा चोरकः। कोठाः सिध्मादिमण्डलानि। मुस्तादिभिः कृतान्येतानि चूर्णानि तैलाभ्यक्तदेहस्याऽवचूर्णनार्थं दद्यात्। एवं कृते दद्र्वादीनि न भवन्ति। अमृता गुडूची। आसङ्गः रसाञ्जनम्। यद्वा अमृतासङ्गः कर्परिकः। तुत्थो रसाञ्जनाख्यः। कटङ्कटेरी दारुहरिद्रा। कम्पिल्लको रजनकः। गन्धोपलो गन्धपाषाणः। सर्षपाकल्कः स्नुक्काण्डे सुधाकाण्डे सुधाकाण्डान्तर्लीन इत्यर्थः। कुकूलानले करीषाग्नौ पाचितः पुटपाकयुक्त्या स्विन्नोऽन्यस्मिन् वा प्रशान्ते मृदुन्यग्नौ पाचितः। लेपाद्विचर्चिकां हन्ति। यथा रागवेगः प्रवृद्धो लज्जां हन्ति। मनश्शिलादिकः प्रदेहः कुष्ठहरो भवति। अलं हरितालम्। तथेत्यादि सुबोधम्। प्रपुन्नाटश्चक्रमर्दः। गोसलिलं गोमूत्रम्॥

गुल्गुलुमरिचविडङ्गैः सर्षपकासीससर्जरसमुस्तैः।
श्रीवेष्टकालगन्धैर्मनश्शिलाकुष्ठकम्पिल्लैः ॥ ७० ॥

उभयहरिद्रासहितैश्चाक्रिकतैलेन मिश्रितैरेभिः।
दिनकरकराभितप्तैः कुष्ठं घृष्टं च नष्टं च ॥ ७१ ॥

मरिचं तमालपत्रं कुष्ठं समनश्शिलं सकासीसम्।
तैलेन युक्तमुषितं सप्ताहं भाजने ताम्रे ॥ ७२ ॥

तेनालिप्तं सिद्धं सप्ताहात् घर्मसेविनोऽपैति।
मासान्नवं किलासं स्नानेन विना विशुद्धस्य ॥ ७३ ॥

मयूरकक्षारजले सप्तकृत्वः परिस्रुते ।
सिद्धं ज्योतिष्मतीतैलमभ्यङ्गात्सिध्मनाशनम् ॥ ७४ ॥

वायसजङ्घामूलं वमनीपत्राणि मूलकाद्बीजम् ।
तक्रेण भौमवारे लेपः सिध्मापहः सिद्धः ॥ ७५ ॥

सर्वाङ्गसुन्दरी

गुल्गुल्वित्यादि ॥ गुल्गुल्वादिभिरेतैश्चाक्रिकतैलेन मिश्रितैः सूर्यरश्मितप्तैः घृष्टं कुष्ठं नष्टं भवति। चाक्रिकतैलं सद्यःपीडितं चक्रस्थमेवोष्णं तैलम् । केचित्तु बहुकालकृततैलपीडनोपकरणकाष्ठादेवदारुकाष्ठवत् खण्डशः पाटिताद्युक्त्या यत्तैलं गृह्यते तच्चाक्रिकतैलमित्याहुः । मरिचादिकं तैलेन युक्तं सप्त दिनानि ताम्रभाजने स्थितम्। तेन मरिचादिना सिध्ममालिप्तं घर्मसेविनो नरस्य सप्ताहेनापैति । मासात् सद्योत्थितं श्वित्रं नश्यति । स्नानेन विना विशुद्धस्य नरस्य । चतस्र आर्याः । आद्यात्र जघनचपला । अपामार्गक्षारोदके सप्तवारान् परिस्रुते सुवर्णलतातैलं पक्वमभ्यङ्गेन सिध्म नाशयति । काकजङ्घामूलं वमन्याः शीतिवारकस्य पत्राणि मूलकबीजञ्च तक्रेणाङ्गारकदिने लेपः सिध्माघ्नः सिद्धः ॥

शशिलेखा

गुल्गुल्वादिभिश्चाक्रिकतैलेन मिश्रितैर्दिनकररश्मितप्तैः कुष्ठं घृष्टञ्चेत्यनेन घर्षणनाशनयोरेककालता प्रदर्शिता । श्रीवेष्टको वायसको दधिश्यावश्च शब्दितः । कालगन्धः सौभञ्जनकः । चाक्रिकं तैलं चक्रस्थं सद्यःपीडितम् । मरिचादिकं तैलेन युक्तं ताम्रे भाजने सप्ताहमुषितम् । तेनालिप्तं सिध्म घर्मसेविनः सूर्यरश्मिसेविनः सप्ताहादपैत्यपगच्छति । नवं किलासं श्वित्रमालिप्तं घर्मसेविनो मासादपैति । किंभूतस्याह– स्नानवर्ज्यं कृतसंशुद्धेः । मयूरकक्षाराम्भसि सप्तकृत्वः सप्तवारान् परिस्रुते गालिते ज्योतिष्मतीतैलं प्रियङ्गुतैलं सिद्धमभ्यङ्गात् सिध्मनाशनम् । मयूरकमपामार्गः । सुबोधम् ।

जीवन्ती मञ्जिष्ठा दार्वी कम्पिल्लकं पयस्तुत्थम् ।
एष घृततैलपाकः सिद्धः सिद्धे च सर्जरसः ॥ ७६ ॥

देयः समधूच्छिष्टो विपादिका तेन नश्यति ह्यक्ता ।
चर्मैककुष्ठकिटिभं कुष्ठं शाम्यत्यलसकं च ॥ ७७ ॥

सर्वाङ्गसुन्दरी

जीवन्तीत्यादि ॥ जीवन्त्यादिभिरेष घृततैलपाकः घृततैलाभ्यां पाको यस्य स घृततैलपाकः। गमकत्वात् समासः। सिद्धो निष्पन्नः। सिद्धेऽस्मिन् पाके सर्जरसो मदनेन सह देयः। तेन सिद्धेन योगेन विपादिकाऽभ्यक्ता नश्यति। तथा चर्मैककुष्ठादिकञ्च शाम्यति। क्षीरमत्रार्द्धं ग्राह्यम्। यौगिकत्वाद्वृद्ध-वैद्यप्रयोगाच्च। आर्यास्तिस्रः ॥

शशिलेखा

जीवन्त्यादिभिर्घृततैलपाकः सुबोधः। मधूच्छिष्टं मदनमिति ॥

मूलं सप्ताह्वात्त्वक् शिरीषाश्वमारा-
दर्कान्मालत्याश्चित्रकास्फोतनिम्बात्।
बीजं कारञ्जं सार्षपं प्रापुनाटं
श्रेष्ठा जन्तुघ्नं त्र्यूषणं द्वे हरिद्रे ॥ ७८ ॥

तैलं तैलं साधितं तैः समूत्रै-
स्त्वग्दोषाणां दुष्टनाडीव्रणानाम्।
अभ्यङ्गेन श्लेष्मवातोद्भवानाम्
नाशायालं वज्रकं वज्रतुल्यम् ॥ ७९ ॥

एरण्डताक्ष्यघननीपकदम्बभार्ङ्गी —
कम्पिल्लवेल्लफलिनीसुरवारुणीभिः।
निर्गुण्ड्यरुष्करसुराह्वसुवर्णदुग्धा-
श्रीवेष्टगुल्गुलुशिलापट्टतालविश्वैः ॥ ८० ॥

तुल्यस्नुगर्कदुग्धं सिद्धं तैलं स्मृतं महावज्रम्।
अतिशयितवज्रकगुणं श्वित्रार्शोग्रन्थिमालाघ्नम् ॥ ८१ ॥

कुष्ठाश्वमारभृङ्गार्कमूत्रस्नुक्क्षीरसैन्धवैः।
तैलं सिद्धं विषावापमभ्यङ्गात् कुष्ठजित्परम् ॥ ८२ ॥

सिद्धं सिक्थकसिन्दूरपुरतुत्थकताक्ष्यजैः।
कण्डूं विचर्चिकां वाऽशु कटुतैलं नियच्छति ॥ ८३ ॥

सर्वाङ्गसुन्दरी

मूलं सप्ताह्वादित्यादि ॥ सप्तपर्णमूलं शिरीषादीनां त्वक् करञ्जादीनां बीजम्। तथा त्रिकटुकादय एतैर्गोमूत्रसहितैस्तिलतैलं स्नेहपाकपरिभाषया विपक्वं वातकफोद्भवानां त्वग्दोषाणां तथा दुष्टनाडीव्रणानामभ्यङ्गेन नाशाय वज्रकसंज्ञमेतदलं समर्थम्। तथा वज्रतुल्यमव्याहतशक्तित्वात्। एरण्डादिभिस्तुल्यस्नुगर्कदुग्धं पक्वं तैलं महावज्रसंज्ञं स्मृतमतिशयितवज्रकगुणं श्वित्रादिघ्नम्। वसन्ततिलकमार्या च। कुष्ठादिभिः सिद्धं तैलं विषावापमभ्यङ्गात्परं कुष्ठहृत्। विषं वत्सनाभम्। कारस्करफलमित्यन्ये। सिक्थकादिभिः पक्वं सर्षपतैलं कण्ड्वादीन् निहन्ति ॥

शशिलेखा

सप्तपर्णमूलादिभिर्गोमूत्रेण च तैलं स्नेहपाकपरिभाषया पाचितमभ्यङ्गेन श्लेष्मवातोद्भवानां त्वग्दोषाणां दुष्टनाडीव्रणानां च नाशायालं समर्थम्। नाम्ना वज्रकम्। शिरीषादीनां त्वक्। आस्फोतोऽर्कः। एरण्डादिभिः स्नेहाच्चतुर्थांशैः स्नुगर्कयोर्मिश्रीभूतेन क्षीरेण तैलसमेन पक्वं तैलं नाम्ना महावज्रं स्मृतं वज्रवद्दारणादेव। तार्क्ष्यं वट्टमाक्षिकम्। नीपो धूलीकदम्बः। सुरवारुणी इन्द्रवारुणी। निर्गुण्डी सिन्दुवारकः। सुराह्वं देवदारु। सुवर्णदुग्धा काञ्चनी। शिला मनश्शिला। विश्वं शुण्ठी। सुबोधम्। सिक्थकादिभिः साधितं कटुतैलं आशु कण्ड्वादिजित्। सिक्थकं मदनम्। सिन्दूरं सिन्दुवारकम्। पुरं गुग्गुलु। तार्क्ष्यजं रसाञ्जनम् ॥

लाक्षा व्योषं प्रापुनाटं च बीजं
सश्रीवेष्टं कुष्ठसिद्धार्थकाश्च।
तक्रोन्मिश्रः स्याद्धरिद्रा च लेपो
दद्रूघ्नोक्तो मूलकोत्थं च बीजम् ॥ ८४ ॥

चित्रकसौभाञ्जनकौ गुडूच्यपामार्गदेवदारूणि।
खदिरो धवश्च लेपः श्यामा दन्ती द्रवन्ती च ॥ ८५ ॥

लाक्षारसाञ्जनैला पुनर्नवा चेति कुष्ठिनां लेपाः।
दधिमण्डयुताः पादैः षट् प्रोक्ता मारुतकफघ्नाः ॥ ८६ ॥

जलवाप्यलोहकेसरपत्रप्लवचन्दनमृणालानि।
भागोत्तराणि सिद्धं प्रलेपनं पित्तकफकुष्ठे ॥ ८७ ॥

तिक्तघृतैर्धौतघृतैरभ्यङ्गो दह्यमानकुष्ठेषु ।
तैलैश्चन्दनमधुकप्रपौण्डरीकोत्पलयुतैश्च ॥ ८८ ॥

क्लेदे प्रपतति चाङ्गे दाहे विस्फोटके च चर्मदले ।
शीताः प्रदेहसेकाः व्यधनविरेकौ घृतं तिक्तम् ॥ ८९ ॥

सर्वाङ्गसुन्दरी

लाक्षेत्यादि ॥ लाक्षादयो निशा च तक्रोन्मिश्रो दद्रुषु लेपः स्यात्। मूलकबीजं च तक्रमिश्रं तद्वल्लेप उक्तः । शालिनीवृत्तम्। चित्रकादयो दधिमण्डान्विताः पादैः षड्वातश्लेष्मकुष्ठघ्ना लेपा गदिताः । तत्र चित्रकसौभञ्जनकाविल्येको लेपः । गुळूच्यपामार्गदेवदारूणीति द्वितीयः । एवमन्येऽपि वेद्याः । आर्ये द्वे । जलादीनि भागोत्तराणि सिद्धः पित्तकफकुष्ठे प्रलेपः । जलं वालकम् । वाप्यं कुष्ठम् । जघनचपलार्या । तिक्तघृतैस्तिक्तद्रव्यसाधितैर्घृतैः तथा जलेन धौतैर्धौतघृतैरभ्यङ्गो दाहयुक्तेषु कुष्ठेषु हितः । क्लेदे च प्रकर्षेण पतति सति तैलैश्चन्दनादियुक्तैरभ्यङ्गः । चशब्दाद्घृतैश्च । प्रकृत्यादिवशाद्धितः । अङ्गे दाहादिमति हिमाः प्रदेहादयस्तिक्तं च घृतं हितम् । व्यधनं सिराव्यधः ।

शशिलेखा

लाक्षादिभिर्हरिद्रान्तैर्दद्रुषु तक्रोन्मिश्रो लेप. स्यात् । मूलकोत्थश्च बीजं केवलं दद्रुषु लेप उक्तः । प्रापुनाटं बीजं चक्रमर्दः । चित्रकेत्यादिना पादैर्वृत्तपादैः षट् प्रलेपा वातश्लेष्मकुष्ठहरा उक्ताः । किंभूताः—दधिमण्डयुताः । सौभञ्जनकः कृष्णगन्धा । सुबोधम् । कुष्ठेषु क्लेदादौ शीतप्रदेहादिकं हितम् । प्रपतति चाङ्गे त्वङ्मांसावदरणात् । चर्मदलं त्वगुच्चटनम् ॥

खदिरवृषनिम्बकुटजाः
श्रेष्ठाः कृमिजित्पटोलमधुपर्ण्यः ।
अन्तर्बहिः प्रयुक्ताः
कृमिकुष्ठनुदः सगोमूत्राः ॥ ९० ॥

वातोत्तरेषु सर्पिर्वमनं श्लेष्मोत्तरेषु कुष्ठेषु।
पित्तोत्तरेषु मोक्षो रक्तस्य विरेचनं चाग्रे ॥ ९१ ॥

ये लेपाः कुष्ठानां युज्यन्ते निर्हृतास्रदोषाणाम्।
संशोधिताशयानां सद्यः सिद्धिर्भवति तेषाम् ॥ ९२ ॥

दोषे हृतेऽपनीते रक्ते बाह्यान्तरे कृते शमने।
स्नेहे च कालयुक्ते न कुष्ठमतिवर्तते साध्यम् ॥ ९३ ॥

बहुदोषः संशोध्यः कुष्ठी बहुशोऽनुरक्षता प्राणान्।
दोषे ह्यतिमात्रहृते वायुर्हन्यादबलमाशु ॥ ९४ ॥

सर्वाङ्गसुंदरी

खदिरेत्यादि ॥ खदिरादयो गोमूत्रान्विता अभ्यन्तरे बाह्यतश्च प्रयुक्ताः कृमियुतकुष्ठहृतः। वातोत्तरेषु कुष्ठेषु घृतमग्रे पूर्वं हितम्। श्लेष्माधिकेषु च वमनं पित्तोत्तरेषु रक्तमोक्षो विरेचनश्चाग्रे हितम्। निर्हृतास्रदोषाणां तथा संशोधिताशयाना कुष्ठानां ये लेपा युज्यन्ते तेषां लेपानां सद्यः शीघ्रमेव सिद्धिरामयनिवृत्तिर्भवति। अत एवेदमाह—दोषे वातादौ हृते रक्तेऽपनीते बाह्येऽभ्यन्तरे च शमने कृते स्नेहे घृतादौ च कालयुक्ते कुष्ठं साध्यं नाऽतिवर्तते। अपि तूपशाम्यति। आर्याः षट्। आद्यात्र जघनचपला। बहुदोषः कुष्ठी प्राणान् रक्षता भिषजा बहुशः पुनः पुनः संशोध्यः। एकवेलयैव कस्मान्न शोध्यत इत्याह—यस्माद्दोषेऽतिमात्रहृते सत्य-बलं नरं वायुर्द्रागेव हन्यात्। आर्या॥

शशिलेखा

खदिरादिः सुबोधः। मधुपर्णी गुळूची। अन्तर्बहिः पाने स्नानादौ च प्रयुक्ताः कृमियुतकुष्ठनाशनाः सुबोधम्। ये लेपा इत्यादिना उक्तानां लेपानां विषयप्रत्यवक्षेपः। उक्तस्य रक्तविस्रावणादिकस्य च प्रयोजनकथनम्। निर्हृतास्राणां निर्हृतदोषाणां संशोधिताशयानाञ्च कुष्ठानां ये लेपा युज्यन्ते तेषां लेपानां सद्यः शीघ्रमेव सिद्धिर्भवति। निर्हृतास्राः सिराव्यधादिना। निर्हृतदोषा वमनादिना। संशो-धितो निष्कृमिक्लेदादिकृतः आशयः। स्थानं त्वगादि। सुबोधम्॥

पक्षात्पक्षाच्छर्दनान्यभ्युपेया-
न्मासान्मासाच्छोधनञ्चाप्यधस्तात् ।
शुद्धिर्मूर्ध्नि स्यात्त्रिरात्रात्त्रिरात्रात्
षष्ठे षष्ठे मास्यसृङ्मोक्षणञ्च ॥ ९५ ॥

यो दुर्वान्तो दुर्विरिक्तोऽथवा स्यात्
कुष्ठी दोषैरुद्धतैर्व्याप्यतेऽसौ ।
निस्सन्देहं यात्यसाध्यत्वमेव
तस्मात् कृत्स्नान्निर्हरेदस्य दोषान् ॥ ९६ ॥

व्रतदमयमसेवात्यागशीलाभियोगो
द्विजसुरगुरुपूजा सर्वसत्त्वेषु मैत्री ।
जिनजिनसुततारभास्कराराधनानि
प्रकटितमलपापं कुष्ठमुन्मूलयन्ति ॥ ९७ ॥

सर्वाङ्गसुन्दरी

पक्षात्पक्षादित्यादि ॥ कुष्ठी पक्षेण पक्षेण वमनानि सेवेत । मासान्मासादधस्तादधः शोधनानि भजेत् । शिरसः शुद्धिः त्रिरात्रे त्रिरात्रे स्यात् । षष्ठे षष्ठे मास्यसृङ्मोक्षणं रक्तमोक्षश्च स्यात् । यः कुष्ठी कृतासम्यग्वमनः कृतासम्यग्विरेचनश्च स्यादसावुद्धतैर्दोषैर्व्याप्यते । एवञ्च निश्चयेनासाध्यत्वमेव याति । तस्माद्धेतोरस्य कुष्ठिनः कृत्स्नान्निखिलान् दोषान् निर्हरेत् । शालिन्यौ वृत्ते । व्रतादिसेवा त्यागाभ्यासः द्विजादिपूजा सर्वसत्त्व मैत्री तथा जिनाद्याराधनानि च कुष्ठं प्रकटितमलपापं नाशयन्ति । मालिनीवृत्तम् ॥

शशिलेखा

पक्षात्पक्षादिति ग्रहणं वमनादिक्रियान्तरपरिहारदिवसज्ञापनार्थम् । शोधनं विरेचनम् । मूर्ध्नः शिरसः शुद्धिर्नस्येन । किमर्थमेवमित्याह—यो दुर्वान्त इत्यादि । असम्यक्शुद्धया दोषैरुद्धतैर्व्याप्यते । एवं कुष्ठं निस्सन्देहमसाध्यत्वं याति तस्मादस्येति कुष्ठिनः सर्वस्य च कृत्स्नान्निरवशेषान् दोषान्निर्हरेत् ।

व्रतादीनि कुष्ठमुन्मूलयन्ति। तच्च कुष्ठं प्रकटितमलपापं प्रकाशितदोषपापम्। तेन हि कुष्ठेन मला वातादयो दुष्टदुष्टश्चादृष्टं कर्म प्रकाश्यते। व्रतः शास्त्रतो नियमितश्चान्द्रायणादिः। दमः अक्रोधादिः। यमः इन्द्रियजयः। व्रतादिसेवाया अत्यागो व्रतादिसेवाऽत्यागः। जिनो बुद्धः। जिनसुता अवलोकितेशादयः। तारा बुद्धसमयदेवता। अथवा दमः कायिकी शान्तिः। यमो मनःषष्ठानामिन्द्रियाणां शान्तिः। त्यागशीलाभियोगः त्यागशीलत्वेन स्थितिः। जिनजिनसुततारादयो बुद्धसमयप्रसिद्धा देवताः। जिनो बुद्धमुनिः। जिनसुतः षण्मुखावतार इत्यार्यदढबलतत्पक्षाणां व्यवहारः। तारा पार्वत्यवतारः। आर्यागारे तु जिनव्यवहाररूपी भगवान् परपुरुषो नित्याभिमानं कुरुते। तत्र प्रदक्षिणादि कुर्यादित्यर्थः। तदुक्तं पारमेश्वरे—"श्रीपर्वते वेशगिरौ कौञ्चे च तथा गिरौ। अर्कक्षेत्रे देवसभे जिनरूपी वसाम्यहम् जम्बूद्वीपे चक्रतोटे तारारूप्यहम्।" इत्यादि ॥

इति चिकित्सिते एकोनविंशोऽध्यायः।

विंशोऽध्यायः

कुष्ठचिकित्सितादनन्तरं श्वित्रकृमिचिकित्सितं नामाध्यायं व्याख्यायते चिकित्सासामान्यादित्याह—

अथातः श्वित्रकृमिचिकित्सितं नामाध्यायं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ।

कुष्ठादपि बीभत्सं यच्छीघ्रतरं च यात्यसाध्यत्वम् ।
श्वित्रमतस्तच्छान्त्यै यतेत दीप्ते यथा भवने ॥ १ ॥

संशोधनं विशेषात्प्रयोजयेत्पूर्वमेव देहस्य ।
श्वित्रे स्रंसनमग्र्यं मलयूरस इष्यते सगुडः ॥ २ ॥

तं पीत्वाऽभ्यक्ततनुर्यथाबलं सूर्यपादसन्तापम् ।
सेवेत विरिक्तश्च त्र्यहं पिपासुः पिबेत्पेयाम् ॥ ३ ॥

श्वित्र्यङ्गे ये स्फोटा जायन्ते कण्टकेन तान् भिन्द्यात् ।
स्फोटेषु निस्स्रुतेषु प्रातः प्रातः पिबेत् त्रिदिनम् ॥ ४ ॥

मलयूमसनं प्रियङ्गू शतपुष्पां चाम्भसा समुत्क्वाथ्य ।
पालाशं वा क्षारं यथाबलं फाणितोपेतम् ॥ ५ ॥

फल्ग्वक्षवृक्षवल्कलनिर्यूहेणेन्दुराजिकाकल्कम् ।
पीत्वोष्णस्थितस्य जाते स्फोटे तक्रेण भोजनं निर्लवणम् ॥

सर्वाङ्गसुन्दरी

कुष्ठादपीत्यादि ॥ यद्यस्मात् कुष्ठादपि बीभत्सं जुगुप्सितं निन्द्यं तथा शीघ्रतरमसाध्यत्वं श्वित्रं यात्यतोऽस्माद्धेतोस्तस्य श्वित्रस्य शमनाय यत्नं कुर्यात् । यथा ज्वलिते गृहे । आर्या । प्रथममेव शरीरस्य संशोधनं विशेषेण प्रयोजयेत् । तदेवाह—श्वित्रे मलयूरसो वाकुचीक्वाथः सह गुडया स्नुह्या सगुडो विरेचनं वरमिष्यते । मुखचपला । तं क्वाथं पीत्वाऽभ्यक्तशरीरः सन् यथाशक्ति सूर्यकिरणसन्तापं भजेत् ।

विरिक्तश्च सन् पिपासितः पेयां त्रीणि दिनानि पिबेत् । श्वित्रवत्यङ्गे ये स्फोटा उद्भवन्ति तान् स्फोटान् कण्टकेन भिन्द्यात् । स्फोटेषु निस्स्रुतेषु सत्सु प्रातः प्रातस्त्रीणि दिनानि मलय्वादीनि समुत्क्वाथ्य पिबेत् । पलाशजं क्षारं वा फाणितयुतं यथाशक्ति पिबेत् । तिस्र आर्याः । फल्ग्वक्षेत्यादि । फल्गोरक्षस्य च त्वचो यो निर्यूहः क्वाथस्तेन वाकुच्याः कल्कं पीत्वा उष्ण आतपे स्थितस्य स्फोटेषु जातेषु सत्सु तक्रेण सह भोजनं निर्लवणं हितम् । आर्यागीतिः ॥

शशिलेखा

यतः श्वित्रं कुष्ठादपि बीभत्सं जुगुप्सितं शीघ्रतरमेवासाध्यत्वं यात्यतस्तच्छान्त्यै श्वित्रस्य शान्त्यर्थं शीघ्रमेव यतेत दीप्तगृहवत् । पूर्वं प्रथममेव देहस्य संशोधनं विशेषात् प्रयोजयेत् । संशोधनमेव विशिष्यते विशिष्टं भवति । नान्यत् किञ्चित् । तत्रापि श्वित्रेऽग्र्यं प्रधानं स्रंसनं विरेचनमिष्यते । किमित्याह--सगुडो मलयूरसः । मलयूः सोमराजिः । यद्वा, अल्पविटपा ह्रस्वफला काकोदुम्बरिका मलयूः । अभ्यक्तो रविकरसन्तापश्च यथाबलं निषेवमाणोऽनेन विरिक्तस्त्र्यहं विपासुस्तृष्णावान्यदा भवति तदा पेयां पिबेत् । एवं त्र्यहं विरेचनम् । तृषिते पेया, नान्यत् किञ्चित् । श्वित्रेऽङ्गे ये स्फोटा जायन्ते उक्तेन स्रंसनविधिना । सुबोधम् । पालाशं क्षारं वा फाणितेन क्षुद्रगुडेन युक्तम् । यथाबलमिति बलापेक्षत्वादनियतमात्रम् । फल्ग्वित्यादिना स्फोटोद्भवाय विधिः । फल्गुः काकोदुम्बरिका । अक्षवृक्षो विभीतकः । इन्दुराजिका सोमराजिः । उष्णस्थितस्यातपस्थस्य । अभ्यक्तस्येति प्रकरणात् । सुबोधम् ॥

गव्यं मूत्रं चित्रकव्योषयुक्तं
सर्पिःकुम्भे स्थापितं क्षौद्रमिश्रम् ।
पक्षादूर्ध्वं श्वित्रिभिः पेयमेतत्
कार्यं चास्मै कुष्ठदृष्टं विधानम् ॥ ७ ॥

मार्कवमथवा खादेत् भृष्टं तैलेन लोहपात्रस्थम् ।
बीजकशृतं च दुग्धं तदनु पिबेच्छ्वित्रनाशाय ॥ ८ ॥

सर्वाङ्गसुन्दरी

गोमूत्रं चित्रकादियुक्तं माक्षिकान्वितं घृतकुम्भे स्थापितं पक्षं यावत् पक्षादूर्ध्वं श्वित्रवता एतत् पेयम् । अस्मै च श्वित्रिणे कुष्ठोक्तं विधानं कार्यम् । अस्मै इति

क्रियाग्रहणात् सम्प्रदानत्वम्। भृङ्गराजं वा तैलेन भृष्टं लोहपात्रस्थं खादेत्। भुक्त्वा च पश्चात् बीजकशृतं क्षीरं पिबेच्छित्रलशान्त्यै। बीजकोऽसनः। आर्या॥

शशिलेखा

गव्यमित्यादि॥ अस्मै श्वित्रिणे कुष्ठोक्तं विधानं कार्यम्। कुष्ठश्वित्राणामेकरूपत्वात्। अथवा मार्कवं भृङ्गरजो लोहपात्रस्थं तैलेन भृष्टं खादेत्। पश्चात् बीजकशृतं दुग्धं श्वित्रनाशाय पिबेत्। बीजकमसनम्॥

पूतीकार्कव्याधिघातस्नुहीनां
मूत्रे पिष्टाः पल्लवा जातिजाश्च।
घ्नन्त्यालेपाच्छ्वित्रदुर्नामदद्रू-
पामाकोठान्दुष्टनाडीव्रणांश्च ॥ ९ ॥

द्वैप्यं दग्धं चर्म मातङ्गजं वा
श्वित्रे लेपस्तैलयुक्तो वरिष्ठः।
पूतीकीटो राजवृक्षोद्भवेन
क्षारेणाक्तः श्वित्रमेको निहन्ति ॥ १० ॥

रात्रौ गोमूत्रे चासितान् जर्जराङ्गा-
नह्नि छायायां शोषयेत् स्फोटहेतून्।
एवं वारांस्त्रींस्तैस्ततः श्लक्ष्णपिष्टैः
स्नुह्याः क्षीरेण श्वित्रनाशाय लेपः ॥ ११ ॥

अक्षतैलद्रुतालेपः कृष्णसर्पोद्भवा मषी।
शिखिपित्तं तथा दग्धं ह्रीबेरं वा तदाप्लुतम् ॥ १२ ॥

सर्वाङ्गसुन्दरी

पूतीक इत्यादि॥ पूतीकादीनां पल्लवा गोमूत्रे पिष्टाः अथवा जातिपल्लवा गोमूत्रेण पिष्टाः प्रलेपनात् श्वित्रादीन् घ्नन्ति। द्वीपिसम्बन्धि चर्म दग्धं हस्तिजं वा चर्म दग्धं तैलान्वितो लेपः श्वित्रेऽतिशयेन वरः। पूतीकीटो राजवृक्ष-

जेन क्षारेणाक्त एक एव श्वित्रं हन्ति। पूतीकीटो[1] वर्षाकालोद्भवः प्राणिविशेषः। पीतिकेति लोकप्रसिद्धः। शालिन्यौ वृत्ते। स्फोटहेतून् भल्लातकान् जर्जरीकृतान् निशि गोमूत्रे स्थितान् दिवसे छायायां शोषयेत्। एवं त्रीन् वारान् मूत्रस्थितान् शोषितांश्च ततोऽनन्तरं स्नुहीक्षीरेण श्लक्ष्णपिष्टैः श्वित्रशान्त्यै लेपः। वैश्वदेवी। कृष्णसर्पजा मषी अक्षतैलेन द्रुतो लेपो मयूरलेपश्च पूर्वगुणः। अथवा ह्रीवेरं दग्धं तेनाक्षतैलेनालोळितं लेपस्तद्वत्॥

शशिलेखा

पूतीकादीनां जात्यन्तानां पल्लवा गवादिमूत्रैः पिष्टा आलेपात् श्वित्रादीन् घ्नन्ति। पूतीकः करञ्जः। व्याधिघात आरग्वधः। स्नुही सुधा। द्वीपिनः हस्तिनो वा चर्म दग्धं तैलेन युक्तं श्वित्रे लेपो वरिष्ठ. श्रेष्ठः। पूतीकीटः कर्कटीकारवल्लीवद्दुर्गन्धी कृमिविशेषः प्रसिद्धः। राजवृक्षः आरग्वधः। रात्राविल्यादि सुबोधम्। स्फोटहेतुर्भल्लातकः। नयेत्यक्षतैलद्रुतम्। अक्षं विभीतकम् तदाप्लुतं शिखिपित्ताप्लुतम्। ह्रीवेरं वाळकम्। शिखी मयूरः॥

कुडुबोऽवल्गुजबीजाद्धरितालचतुर्थभागसम्मिश्रः।
मूत्रेण गवां पिष्टः सवर्णकरणः परं श्वित्रे ॥ १३ ॥

क्षारे सुदग्धे गजलिण्डजे च
गजस्य मूत्रेण परिस्रुते च।
द्रोणप्रमाणे दशभागयुक्तं
दत्वा पचेद्बीजमवल्गुजानाम् ॥ १४ ॥

श्वित्रं जयेच्चिक्कणतां गतेन
तेन प्रलिम्पन् बहुशः प्रघृष्टम्।
कुष्ठं मशं वा तिलकाळकं वा
यद्वा व्रणे स्यादधिमांसजातम् ॥ १५ ॥

भल्लातकद्वीपिसुधार्कमूलं
गुञ्जाफलत्र्यूषणशङ्खचूर्णम्।
तुत्थं सकुष्ठं लवणानि पञ्च
क्षारद्वयं लाङ्गलिकां च पक्त्वा ॥ १६ ॥

---
1 पूतीकीटः = കമ്പളക്കൊററൻ

स्नुगर्कदुग्धे घनमायसस्थं
शलाकया तद्विदधीत लेपम् ।
कुष्ठे किलासे तिलकाळकेषु
मशेषु दुर्नामसु चर्मकीले ॥ १७॥

शुद्ध्या शोणितमोक्षैर्विरूक्षणैर्भक्षणैश्च सक्तूनाम् ।
श्वित्रं कस्यचिदेव प्रशाम्यति क्षीणपापस्य ॥ १८॥

सर्वाङ्गसुन्दरी

कुडुव इत्यादि ॥ वाकुचीबीजात् पलचतुष्टयं हरितालपलं गोमूत्रेण पिष्टं श्वित्रे परं सवर्णकरणं स्यात् । आर्या । गजपुरीषजे क्षारे सुदग्धे द्रोणप्रमाणे गजस्य मूत्रेण क्षारविधिना परिस्रुतेऽस्मिन् वाकुचीबीजं दत्वा पचेत् । किंभूतम्—दशभागयुक्तम् । दशभिर्भागैः प्रकृतत्वात् क्षारस्य सम्बन्धिभिर्मिश्रितं तेन चिक्कणतां मदनरूपतां गतेन पुरुषो बहुशः प्रघृष्टं श्वित्रं प्रलिम्पन् जयेत् । कुष्ठादींश्च । अधिमांसरूपञ्च यद्व्रणे स्यात्तच्च जयेत् । उपजाती । भल्लातकादिकं स्नुगर्कयोर्दुग्धे पक्त्वा घनमायसपात्रस्थितं तदेतच्छलाकया लेपं कुष्ठादिषु विदधीत । इन्द्रवज्रोपजाती । श्वित्रं कस्यचिदेव नरस्य क्षीणकल्मषस्य शुद्ध्यादिभिः शाम्यति । इति श्वित्रचिकित्सितम् ॥

शशिलेखा

कुडुव इत्यादि सुबोधम् । हरितालचतुर्थभागो वाकुचीबीजापेक्षया पलमित्यर्थः । जिते दोषे सवर्णकरणार्थमयं लेपः । सुष्ठु दग्धे गजलण्डात् हस्तिशकृतो जाते क्षारे हस्तिमूत्रेण परिस्रुते गाळिते द्रोणप्रमाणे अवल्गुजानां बीजं दशभागयुक्तं दत्वा पचेत् । चिक्कणपाकतां गतेन तेन शुष्कगोमयादिना घृष्टं श्वित्रं बहुशः प्रलिप्तमेतदेव श्वित्रं जयेत् । कुष्ठादींश्च । भल्लातकेत्यादि । स्नुगर्कदुग्धे मिश्रीभूते भल्लातकादिकं पक्त्वा पश्चाल्लोहपात्रस्थं शलाकया लेपं कुष्ठादिषु विदधीत । द्वीपिश्वित्रकः । लाङ्गलिका[1] विशल्या गर्भपातनी च । शुद्ध्यादिभिरवश्यं श्वित्रं प्रशाम्यति । किं सर्वस्य । न । अपि तु कस्यचिदेव क्षीणपापस्य । अक्षीणपापस्य न कथञ्चिदपि शमं याति ॥

इति श्वित्रचिकित्सा

1 लाङ्गलिका = മേന്തോന്നിക്കിഴങ്ങ്

कृमिचिकित्सितम्

अस्मादनन्तरं कृमिचिकित्सितं व्याख्यायते। चिकित्सासामान्यात्।

स्निग्धस्विन्ने गुडक्षीरमत्स्याद्यैः कृमिणोदरे।
उत्क्लेशितकृमिकफे शर्वरीं तां सुखोषिते ॥ १९ ॥

सुरसादिगणं मूत्रे क्राथयित्वार्धवारिणि।
तं कषायं कणागालकृमिजित्कल्कयोजितम् ॥ २० ॥

सतैलस्वर्जिकाक्षारं युञ्ज्याद्वस्तिं ततोऽहनि।
तस्मिन्नेव निरूढं तं पाययेत विरेचनम् ॥ २१ ॥

त्रिवृत्कल्कं फलकणाकषायालोडितं ततः।
ऊर्ध्वाधःशोधिते कुर्यात्पञ्चकोलयुतं क्रमम् ॥ २२ ॥

कटुतिक्तकषायाणां कषायैः परिषेचनम्।
काले विडङ्गतैलेन ततस्तमनुवासयेत् ॥ २३ ॥

शिरोरोगनिषेधोक्तमाचरेन्मूर्धगेषु तु।
उद्रिक्ततिक्तकटुकमल्पस्नेहं च भोजनम् ॥ २४ ॥

सर्वाङ्गसुन्दरी

स्निग्धेत्यादि ॥ कृमिणमुदरं यस्येति पामादित्वान्नप्रत्ययः। तस्मिन् कृमिणोदरे स्निग्धस्विन्ने तथा गुडादिभिरुत्क्लेशिताः स्वस्थानाच्च्याविताः कृमयः कफश्च यस्य तस्मिंस्तथाभूत उदरे तथा समुत्क्लेशनादनन्तरं तां रात्रिं सुखोषिते सति सतैलस्वर्जिकाक्षारं वस्तिं युञ्ज्यात्। कथमित्याह—सुरसादिगणं गोमूत्रेऽर्धवारिणि क्राथयित्वा ततस्तं कषायं कणादीनां कल्केन योजितं मिश्रित कृत्वा। ततो निरूहादनन्तरं तस्मिन्नेवाहनि निरूढं तं विरेचनं त्रिवृत्कल्कं फलादिकषायालोडितं पाययेत्। ततोऽनन्तरमूर्ध्वाधः शोधिते तस्मिन् पञ्चकोलयुतं क्रमं पेयाविलेप्यादिकं कुर्यात्। ततः कट्वादीनां कषायैः परिषेचितं सन्तमनन्तरं यदा सन्धुक्षितोऽग्निस्तदा तस्मिन् काले विडङ्गतैलेन तमनुवासयेत्। शिरोरोगप्रतिषेधे यदुक्तं तन्मूर्धगेषु कृमिष्वाचरेत्। अनु पश्चात् प्रभूततिक्तकटुकमल्पस्नेहञ्च भोजनमाचरेत् ॥

शशिलेखा

स्निग्धस्विन्न इत्यादिना क्रिमिचिकित्सा। प्रथममेव स्नेहस्वेदौ। तैः स्निग्धस्विन्न आतुरे। क्रिमयो विद्यन्ते यस्मिन्निति पामादिपाठान्नः। तस्मिन्। गुळादिभिरुत्क्लेशितौ क्रिमिकफौ यस्य। ताञ्च शर्वरीं गुळाद्युपयोगरात्रिं सुखोषिते सुखेन सुप्ते द्वितीयेऽहन्यर्धोदके गोमूत्रे सुरसादिगणं क्वाथयित्वा तं कषायं कणादिकल्कसंयोजितं तैलादियुक्तं च वस्तिं युञ्ज्यात्। ततस्तस्मिन्नेवाहनि-यस्मिन् वस्तिः प्रयुक्तस्तस्मिन् निरूढं तमातुरं विरेचनं पाययेत्। किमित्याह– त्रिवृत्कल्कं फलादिकषायालुळितम्। अत्र हि विरेचनशब्देन दोषरेचना-द्वमनमप्युच्यते। फलं मदनफलम्। कणा पिप्पली। तत इति। त्रिवृत्-प्रयोगाद्वमनविरेचनाभ्यां ऊर्ध्वाधःशोधिते क्रमं पेयादिकं पञ्चकोलयुतं कुर्यात्। कट्वादिरसानाञ्च द्रव्याणां कषायैः क्वाथैः परिषेचनञ्च कुर्यात्। ततस्तं क्रिमि-णोदरं काले योग्ये विळङ्गतैलेनानुवासयेत्। मूर्धगेषु शिरोगतेषु क्रिमिषु शिरो-रोगप्रतिषेधाध्यायोक्तं हितम्। पश्चाच्च उद्रिक्ततिक्तकट्वादिभिर्भोजन-माचरेत् स्वल्पस्नेहम्॥

विळङ्गकृष्णामरिचपिप्पलीमूलशिग्रुभिः।
पिबेत्सस्वर्जिकाक्षारां यवागूं तक्रसाधिताम् ॥ २५ ॥

रसं शिरीषकिणिहीपारिभद्रककेबुकात्।
पलाशबीजपत्तूरपूतिकाद्वा पृथक् पिबेत् ॥ २६ ॥

सक्षौद्रं सुरसादीन्वा लिह्यात्क्षौद्रयुतान् पृथक्।
शतकृत्वोऽश्वविट्चूर्णं विडङ्गक्वाथभावितम् ॥ २७ ॥

क्रिमिमान्मधुना लिह्यात् भावितं वा वरारसैः।
शिरोगतेषु क्रिमिषु चूर्णं प्रधमनं च तत् ॥ २८ ॥

सर्वाङ्गसुन्दरी

विळङ्गकृष्णेत्यादि ॥ तथा विळङ्गादिभिस्तक्रसाधितां पेयां पिबेत्। शिरीषादिरसं पिबेत्। किणिही गिरिकर्णिका। पलाशबीजादीनां वा रसं माक्षि-कान्वितं पृथक् पिबेत्। अथवा सुरसादीन् क्षौद्रयुतान् पृथग्लिह्यात्। अश्वपुरीष-चूर्णं बहून् वारान् विळङ्गक्वाथेन भावितमथवा त्रिफलाक्वथेन भावितं मधुना

कृमिमान् लिह्यात्। शिरोगतेषु कृमिषु तच्छिरोरोगनिर्देशोक्तं चूर्णं प्रधमनमाचरेत् ॥

शशिलेखा

तथा तक्रेण साधितां यवागूं विळङ्गादिचूर्णेन सह पिबेत्। अथवा शिरीषादेः पृथक् प्रत्येकस्य रसं पिबेत्। किणिही अपामार्गः। पारिभद्रको मन्दारः। पत्तूरो मत्स्याक्षकः। पूतीकः करञ्जः। किंभूतं शिरीषादिरसमाह—सक्षौद्रम्। अथवा सुरसादीन् सुरसादिगण एव पठितान् पृथक् प्रत्येकं क्षौद्रद्रुतान् लिह्यात्। तथाश्वपुरीषचूर्णं शतकृत्वो बहून् वारान् विळङ्गक्वाथेन भावितं कृमिमान् पुरुषो मधुना लिह्यात्। अथवाऽश्वविट्चूर्णं वरारसैस्त्रिफलाक्वाथैर्भावितं कृमिमान् मधुना लिह्यात्। तच्च चूर्णं भाविताश्वविशः शिरोगतेषु कृमिषु नासया प्रधमनं योज्यम्।

आखुकर्णीकिसलयः सुपिष्टैः पिष्टमिश्रितैः।
पक्त्वा पूपलिकां खादेद्धान्याम्लं च पिबेदनु ॥ २९ ॥

सपञ्चकोललवणमसान्द्रं तक्रमेव वा।
निम्बमार्कवनिर्गुण्डीपल्लवेष्वप्ययं विधिः ॥ ३० ॥

विडङ्गचूर्णमिश्रैर्वा पिष्टैर्भक्ष्यान् प्रकल्पयेत्।
विडङ्गतण्डुलैर्युक्तमर्धांशैरातपस्थितम् ॥ ३१ ॥

दिनमारुष्करं तैलं पाने वस्तौ च योजयेत्।
सुराह्वसरळस्नेहं पृथगेवं प्रकल्पयेत् ॥ ३२ ॥

सर्वाङ्गसुन्दरी

आखुकर्णीत्यादि ॥ तथा मूषिककर्णीपल्लवैः सूक्ष्मचूर्णितैः शालिचूर्णमिश्रितैः पूपळिकां पक्त्वा खादेत्। अनु पश्चाच्च धान्याम्लं पिबेदथवा असान्द्रमघनं पञ्चकोललवणयुतं तक्रं पिबेत्। नीपादिष्वप्ययमेव पूर्वोक्तो मूषिककर्णीपल्लवविधिः कल्प्यः। अथवा पिष्टैर्विडङ्गचूर्णमिश्रितैर्भक्ष्यान् प्रकल्पयेत्। आरुष्करं तैलं पाने वस्तौ च योजयेत्। किंभूतम्—अर्धभागप्रमाणैर्विडङ्गतण्डुलैर्मिश्रितं तथा दिनमातपस्थितम्। दिनमित्यत्यन्तसंयोगे द्वितीया। देवदार्वादितैलमपि पृथगेवं विडङ्गतण्डुलचूर्णान्वितमातपस्थितं प्रकल्पयेत् ॥

शशिलेखा

आखुकर्णीत्यादि । पिष्टेन शालिपिष्टेन मिश्रितैराखुकर्ण्याः किसलयैस्सुपिष्टैः पूपलिकां पक्त्वा खादेत्। अनु धान्याम्लञ्च पिबेत् । किसलयमभिनवोद्भिन्नं पल्लवम् । किंभूतं धान्याम्ळमाह—सपञ्चकोलादिकम् । अथवा असान्द्रं तनु स्वच्छं तक्रमेव केवलमनु पिबेत् । अयञ्च विधिराखुकर्णीकिसलयवन्नीपादिपल्लवेष्वपि पृथग्विधेयः । नीपो धूळीकदम्बः । मार्कवो भृङ्गराजः । निर्गुण्डी सिन्दुवारकः । अथवा पिष्टैः शालिपिष्टैः विडङ्गचूर्णमिश्रैर्नानाविधं भक्ष्यं प्रकल्पयेत् । अथवाऽरुष्करं भल्लातकजं तैलं पाने वस्तौ च कल्पयेत् । किंभूतमाह—तैलस्यार्धांशैर्विडङ्गबीजैर्युक्तं सकलञ्च दिनमातपे स्थितं सुराह्वस्य देवदारुणः सरळस्य पीडाख्यायाः देवदारुसमायाः सम्बन्धी स्नेहः । पृथगेवमारुष्करतैलविधानेनार्धांशविडङ्गचूर्णयुतं सकलं दिनञ्चातपस्थितं पाने वस्तौ च कल्पयेत् ॥

पुरीषजेषु सुतरां दद्याद्बस्तिविरेचने ।
शिरोविरेकं वमनं शमनं कफजन्मसु ॥ ३३ ॥

रक्तजानां प्रतीकारं कुर्यात् कुष्ठचिकित्सितात् ।
क्षीराणि मांसानि घृतं गुडं च
दधीनि शाकानि च पर्णवन्ति ।
समासतोऽम्लान्मधुरान् रसांश्च
क्रमीन् जिघांसुः परिवर्जयेच्च ॥ ३४ ॥

सर्वाङ्गसुन्दरी

पुरीषजेष्वित्यादि ॥ पुरीषजेषु क्रमिषु सुतरां वस्तिं विरेचनञ्च दद्यात् । कफजन्मसु क्रमिषु शिरोविरेकादीन् कुर्यात् । रक्तोत्थानां क्रमीणां कुष्ठचिकित्सितात् प्रतीकारं विदध्यात् । ल्यब्लोपे पञ्चमी । कुष्ठचिकित्सितोक्तं वीक्ष्येत्यर्थः । रोमभोजिषु क्रमिषु इन्द्रलुप्तविधिरुत्तरे वक्ष्यमाणशिरोरोगप्रतिषेधः कार्यः । क्रमीन् जिघांसुः क्षीरादीन् वर्जयेत् । उपजातिर्वृत्तम् ॥

शशिलेखा

पुरीषजेषु कृमिषु वस्तिविरेचने सुतरां दद्यात्। अन्यदपि कृमिघ्नं योज्यमिति सुतरां ग्रहणम्। कफजन्मसु कृमिषु शिरोविरेकादिकं दद्यात्। रक्तजानां कृमीणां कुष्ठचिकित्सितोक्तं कृमिनाशनप्रकरणे विहितं प्रतीकारं कुर्यात्। रोमभोजिषु कृमिषु यत् प्रखादाद्येकदेशे रोमाणि न भवन्ति तेषामिन्द्रलुप्तविधिर्विधेयः। स च शिरोरोगप्रतिषेधे वक्ष्यते। समासतः संक्षेपत इदमुच्यते। यः पुरुषः कृमीन् जिघांसुस्त्यक्तुमिच्छुः सः क्षीरादिकं वर्जयेत्॥

इति चिकित्सिते विंशोऽध्यायः।

एकविंशोऽध्यायः ।

कृमिचिकित्सितादनन्तरं वातव्याधिचिकित्सितं व्याख्यातुमुपक्रमते सर्व-चिकित्साव्यापित्वात् ॥

अथाऽतो वातव्याधिचिकित्सितं नामाध्यायं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ।

केवलं निरुपस्तम्भमादौ स्नेहैरुपाचरेत् ।
वायुं सर्पिर्वसामज्जातैलपानैर्नरं ततः ॥ १ ॥

स्नेहक्लान्तं समाश्वास्य पयोभिः स्नेहयेत्पुनः ।
यूषैर्ग्राम्योदकानूपरसैर्वा स्नेहसंयुतैः ॥ २ ॥

पायसैः कृसरैः साम्ळलवणैः सानुवासनैः ।
नावनैस्तर्पणैश्चान्नैः सुस्निग्धैः स्वेदयेत्ततः ॥ ३ ॥

स्वभ्यक्तं स्नेहसंयुक्तैः शङ्कराद्यैः पुनः पुनः ।
स्नेहाक्तं स्विन्नमङ्गन्तु वक्रं स्तब्धं सवेदनम् ॥ ४ ॥

यथेष्टमानामयितुं सुखमेव हि शक्यते ।
शुष्काण्यपि हि काष्ठानि स्नेहस्वेदोपपादनैः ॥ ५ ॥

शक्यं कर्मण्यतां नेतुं किमु गात्राणि जीवताम् ।
हर्षतोदरुगायामशोफस्तम्भग्रहादयः ॥ ६ ॥

स्विन्नस्याशु प्रशाम्यन्ति मार्दवं चोपजायते ।
स्नेहश्च धातून् संशुष्कान् पुष्णात्याशु प्रयोजितः ॥ ७ ॥

बलमग्निबलं पुष्टिं प्राणं चास्याभिवर्धयेत् ।
असकृत्तं पुनः स्नेहैः स्वेदैश्च प्रतिपादयेत् ॥ ८ ॥

तथा स्नेहमृदौ कोष्ठे न तिष्ठन्त्यनिलामयाः ।

सर्वाङ्गसुन्दरी

केवलमित्यादि॥ केवलं शुद्धं तथा निरुपस्तम्भमन्येनावारकेणोपस्तम्भिना नासादितमीदृशं वायुं स्नेहैरादावेवोपाचरेत्। कथमित्याह—सर्पिरित्यादि। ननु तैलस्य पवनविजये प्राधान्यादेवं निर्देशः कर्तुं युक्तः—तैलवसामज्जासर्पिष्पानैरिति। युक्तमाह भवान्। किन्त्वाजन्मसात्म्यात्सर्पिषः पानं वरतरमिति सर्पिः प्रागुपन्यस्तम्। सर्पिष्पानादिभिस्तावत् स्नेह्यः, यावत् स्नेहोद्वेगः क्लम इत्यादि सम्यक्स्निग्धलक्षणं स्यात्। स्नेहक्लान्तं च नरं पयोभिः समाश्वास्य पुनर्यूषादिभिः स्नेहान्वितैः स्नेहयेत्। तथा तर्पणैश्चान्नैस्सुस्निग्धैः। ततोऽनन्तरं सुष्ठ्वभ्यक्तं सन्तं स्नेहसंयुक्तैः सङ्कराद्यैः स्वेदविधिगदितैः स्वेदैः पुनः पुनः स्वेदयेत्। एवं स्वेदिते सति को गुणः स्यात्तमाह—स्नेहाभ्यक्तं गात्रं स्विन्नं मृद्वङ्गं तथा स्तब्धं सरुजं यथेष्टं सुखमेवानामयितुं शक्यते। 'ज्वलह्वलह्मलनमामनुपसर्गाद्वे'ति मित्वम्। नामयितुमित्यत्र न ह्रस्वत्वम्। एतदेव दृष्टान्तद्वारेण प्रतिपादयितुमाह—हि यस्माच्छुष्काण्यपि काष्ठानि स्नेहस्वेदसंयोजनेन कर्मण्यतां नेतुं शक्यन्ते। किं पुनर्जीवतां गात्राणि न शक्यन्त इति। अपि तु शक्यन्त एवेत्यर्थः। शक्यमिति पूर्वोक्तक्रममात्रे नपुंसकत्वमेकत्वं च। यथा कालिदासस्य—"शक्यमङ्गुलिभिरुद्धृतैरधः शाखिनां पतितपुष्पकोमलैः। पत्रजर्जरशशिप्रभालवैरेभिरुत्कचयितुं तवालकानि"ति। हर्ष इत्यादि। स्विन्नस्य पुंसो हर्षादयः शीघ्रं प्रशाम्यन्ति। मृदुत्वं च गात्रेषु जायते। तथा स्विन्नस्य स्नेह उपयोजितो धातूनतिशुष्कान् द्रागेव पुष्णाति। तथाऽस्य वातरोगिणो बलादीनभिवर्धयेत्। पुनस्तमातुरमसकृत् पुनः पुनः स्नेहस्वेदाभ्यां योजयेत्। तथा एवं कृते स्नेहमृदौ कोष्ठे सति वातरोगा नश्यन्ति॥

शशिलेखा

केवलमन्यदोषासंसृष्टं निरुपस्तम्भमावरणरहितम्। औदकानामानूपत्वेऽपि पृथक्करणेन तेषां प्रचुरसेव्यत्वं द्योतयति। सुबोधम्। स्नेहस्वेदफलं दर्शयितुमाह—हर्षेत्यादि। स्विन्नस्य स्निग्धस्विन्नस्य। स्नेहश्चेत्यादिना स्नेहस्य विशेषः। स्नेहमृदौ स्नेहस्वेदाभ्यां मृदूकृते कोष्ठेऽनिलामया वातव्याधयो देहे न तिष्ठन्ति। कोष्ठमूलत्वाद्दोषाणामिति केवलानिलामयचिकित्सा॥

यद्यनेन सदोषत्वात् कर्मणा न प्रशाम्यति ॥ ९ ॥
मृदुभिः स्नेहसंयुक्तैर्भेषजैस्तं विशोधयेत् ।
घृतं तिल्वकसिद्धं वा सातलासिद्धमेव वा ॥ १० ॥
पयसैरण्डतैलं वा पिबेद्दोषहरं शिवम् ।
स्निग्धाम्ललवणोष्णाद्यैराहारैर्हि मलश्चितः ॥ ११ ॥
स्रोतो रुध्वाऽनिलं रुन्ध्यात्तस्मात्तमनुलोमयेत् ।
दुर्बलो योऽविरेच्यः स्यात्तं निरूहैरुपाचरेत् ॥ १२ ॥
दीपनैः पाचनीयैर्वा भोज्यैर्वा तद्युतैर्नरम् ।
संशुद्धस्योत्थिते चाऽग्नौ स्नेहस्वेदौ पुनर्हितौ ॥ १३ ॥

सर्वाङ्गसुन्दरी

यदीत्यादि ॥ अनेन कर्मणा चेन्न शाम्यति वातामयो दोषान्तरसंसर्गतस्तदा तं वातामयिनं मृदुभिर्द्रव्यैः कर्णिकारादिभिः स्नेहान्वितैर्विशोधयेत् । तिल्वकेन पक्वं घृतं सातलया वा पक्वम् । क्षीरेण वा सहैरण्डतैलं पिबेत् । तच्च पीतं दोषहरं शिवञ्च स्यात् । ननु किमित्यनुलोमनं क्रियत इत्याह—स्निग्धेत्यादि । यस्मात् स्निग्धादिभिराहारैर्मलश्चितः स्रोतांसि रुध्वा वायुं रुन्ध्यात् तस्माद्धेतोस्तं मारुतमनुलोमयेत् । यो नरो दुर्बलो विरेचनार्हो न भवेत्तं नरं निरूहैरुपाचरेत् । किंभूतैः—दीपनैः पाचनीयैश्च । अथवा तद्युतैर्दीपनीयपाचनीययुतैर्भोज्यैरुपाचरेत् । अनन्तरं सम्यक्शुद्धस्य वह्नावुत्थिते सति पुनरपि स्नेहस्वेदौ हितौ ॥

शशिलेखा

इदानीमन्यदोषसंसृष्टानिलामयचिकित्सामाह—यदीत्यादि । यद्यनेनानन्तरोक्तेन कर्मणा न प्रशाम्यति वातामयः सदोषत्वाद्दोषान्तरसंसर्गाद्धेतोस्ततस्तं वातामयिनं मृदुभिः सस्नेहैर्विरेचनौषधैर्विशोधयेत् । तिल्वकघृतादीनां क्षीरेण प्रयोगो विरेचनाय । ननु केवलं निरुपस्तम्भमित्यनेन संसर्गावरणरहित इत्यङ्गीकारात् किमिदं सदोषाभिधानम् । दोषेण सह वर्तत इति सदोषः । अतैतत्

स्यात् । नात्र सदोषत्वं वायुसंबन्धि, किञ्चानन्तरोक्तकर्मसम्बन्धि । कर्मणो हि स्वकार्याकरणं सदोषत्वमिति । अन्ये त्वाचक्षते । सदोषत्वादुत्कटत्वाद्यदि गदो न शान्तिमुपयातीति । यद्वा, मलोऽत्र दोषत्वेन विवक्षितः मलेऽपि दोषशब्दप्रवृत्तेः । मलः पित्तकफाख्यः । शकृदादिश्च । यदीत्यादिना संसृष्टवातामयचिकित्सा । स्निग्धाम्लेत्यादिना मार्गावरणकुपितवातामयचिकित्सोच्यत इति । स्निग्धाम्लेत्यादि । यत्र वायोः कोपे निजं कारणं नास्ति केवलं स्निग्धादिभिराहारैश्चितो मलः पित्तश्लेष्माख्यः स्रोतोबन्धं कृत्वाऽनिलं वातं रुन्ध्यात्तत्राप्यनुलोमनमुच्यते । यो वातामयी दुर्बलः विरेच्यो विरेचनार्हः न स्यात् तं नरं दीपनपाचनीयद्रव्ययुतैर्निरूहैस्तद्युतैर्दीपनपाचनीययुतैर्भोज्यैश्चोपाचरेत् । पटोलपत्रादि पाचनमपि कस्यचिन्न दीपनम् दीपनमपि किञ्चिन्न पाचनीयं त्रिफलादीति तद्व्यावृत्त्यर्थं द्वयोर्ग्रहणम् । संधुक्षस्य दोषभस्मापनयनेन पेयादिक्रमेणोत्थिते समिद्धेऽग्नौ पुनर्भूयोऽपि स्नेहस्वेदौ हितौ । इत्ययं विधिः सर्ववातशमन इति । [सर्ववातविकाराणां सामान्यं विधानमेतद्विशेषाश्रुतेरिति जर्जटाचार्यः] ।

आमाशयगते वायौ वमितप्रतिभोजिते ।
सुखाम्बुना षड्धरणं वचादिं वा प्रयोजयेत् ॥ १४ ॥

संधुक्षितेऽग्नौ परतो विधिः केवलवातिकः ।
मत्स्यान्नाभिप्रदेशस्थे सिद्धान्बिल्वशलाटुभिः ॥ १५ ॥

वस्तिकर्म त्वधोनाभेः शस्यते चाऽऽवपीडकः ।
कोष्ठगे क्षारचूर्णाद्या हिताः पाचनदीपनाः ॥ १६ ॥

हृत्स्थे पयः स्थिरासिद्धं शिरोवस्तिः शिरोगते ।
स्नैहिकं नावनं धूमः श्रोत्रादीनां च तर्पणम् ॥ १७ ॥

सर्वाङ्गसुन्दरी

आमाशयगत इत्यादि ॥ आमाशयगते वाते सति तथा वमितश्चासौ प्रतिभोजितश्च तस्मिन् वमितप्रतिभोजिते नरे उष्णजलेन षड्धरणं वचादिं वा गणं प्रयोजयेत् । षड्धरणयोगः सङ्ग्रहादेवावगन्तव्यः । तत्र चैवं पठ्यते —"दार्वीकलिङ्गकटुकातिविषाग्निपाठामूत्रेण सूक्ष्मरजसा धरणप्रमाणाः । पीता जयन्ति गुदजोदरगुल्मकुष्ठकोष्ठानिलाढ्यपवनग्रहणीप्रमेहान्"इति । धरणं पलस्य दशमो भागः ।

अग्नौ सन्दीपिते सति परतोऽनन्तरं केवलवातिको विधिः कार्य इति शेषः। नाभिप्रदेशस्थे वाते मत्स्यान् विल्वशलाटुभिः सिद्धान् योजयेत्। नाभेरधः-स्थिते तु वाते बस्तिकर्म प्राक्स्नेह एक इत्यादिनोक्तमवपीडकस्नेहपानञ्च शस्यते। चशब्दान्मर्त्स्याश्च। कोष्ठगे बायौ क्षाराद्याः पाचना दीपनाश्च हिताः। हृत्स्थे हृदयस्थिते समीरणे क्षीरं शालिपर्ण्या शृतं हितम्। शिरोगते तु शिरोवस्तिः शस्यते। स्नैहिकं नस्यं तथा धूमः कर्णादितर्पणञ्च हितम्॥

शशिलेखा

आमाशयगत इत्यादि सुबोधम्। षङ्ढरणं पाठादार्वीत्यादि कुष्ठोक्तम्। वातस्य वमनन्न युक्तमिति न वाच्यम्। स्थानिवत् प्रतीकारत्वादस्य। एतदुक्तं हि। तत्र बायोः पित्तस्थानगतस्य पित्तवत् क्रियाविभागः। श्लेष्मस्थानगतस्य श्लेष्मवदिति। परत इति वमनषड्ढरणयोः कृतयोः। विल्वशलाटुर्बालविल्वम्। बस्तिकर्म प्राक्-स्नेह इत्यादि॥ अवपीडक इति रोगानुत्पादनीये प्राग्भक्तजीर्णान्तिकप्रयुक्त-स्नेहयोजनाद्वयमुक्तम्। कोष्ठगे आमाशयपक्वाशययोर्व्याप्य प्रवृत्ते वाते क्षाराद्याः पाचना दीपनाश्च हिताः। स्थिरा सालपर्णी। शिरोगते शिरोवस्ति स्नैहिकं नावनं सूत्रोक्तं नस्यं तथा धूमश्च कर्णादीनां स्नेहतर्पणञ्च॥

स्वेदाभ्यङ्गनिवातानि हृद्यं चान्नं त्वगाश्रिते।
शीताः प्रदेहा रक्तस्थे विरेको रक्तमोक्षणम् ॥ १८ ॥

विरेको मांसमेदस्थे निरूहाः शमनानि च।
बाह्याभ्यन्तरतः स्नेहैरस्थिमज्जगतं जयेत् ॥ १९ ॥

प्रहर्षोऽन्नं च शुक्रस्थे बलशुक्रकरं हितम्।
विबद्धमार्गं दृष्ट्वा तु शुक्रं दद्याद्विरेचनम् ॥ २० ॥

विरिक्तप्रतिभुक्तं च पूर्वोक्तां कारयेत् क्रियाम्।
गर्भे शुष्के तु वातेन बालानाञ्च विशुष्यताम् ॥ २१ ॥

सिताकाष्मर्यमधुकैः सिद्धमास्थापने पयः।
स्नावसन्धिसिराप्राप्ते स्नेहदाहोपनाहनम् ॥ २२ ॥

तैलं सङ्कुचितेऽभ्यङ्गो माषसैन्धवसाधितम् ।
अगारधूमलवणतैलैर्लेपः स्रुतेऽसृजि ॥ २३ ॥
सुप्तेऽङ्गे वेष्टयुक्ते तु कर्तव्यमुपनाहनम् ।

सर्वाङ्गसुन्दरी

स्वेदेत्यादि ॥ त्वक्स्थे मरुति स्वेदादीनि हितानि । हृद्यं हृदयप्रियश्चान्नं हितम् । रक्तस्थे मरुति शीताः प्रलेपाः विरेको रक्तमोक्षणञ्च हितम् । मांसमेदःस्थिते वायौ विरेचनादयो हिताः । अस्थिमज्जस्थं वायुं बाह्याभ्यन्तरैः स्नेहैर्जयेत् । शुक्रस्थे समीरणे प्रहर्षणं बलशुक्रकारि चान्नं हितम् । शुक्रञ्च रुद्धमार्गं दृष्ट्वा विरेचनं दद्यात् । विरिक्तं प्रतिभुक्तं च नरं पूर्वोदितां क्रियां कारयेत्। द्वयोरन्यतरस्यामिति प्रतिभुक्तस्याऽपि कर्मत्वम् । वातेन गर्भे शुष्के सति बालानाञ्च विशुष्यतां शर्करादिभिः सिद्धं क्षीरमास्थापने हितम् । [आस्थापनं पोषणमित्यर्थ इति जर्जटाचार्यः ।] स्नावादिप्राप्ते स्नेहदाहोपनाहनं हितम् । सङ्कुचितेऽङ्गे सति माषसैन्धवसाधितं तैलमभ्यङ्गः । रक्ते स्रुते सत्यऽगारधूमादिभिर्लेपः । सुप्ते स्वापयुक्ते गात्रे । तथा वेष्टनयुक्तेऽङ्गे तूपनाहनं कार्यम् ॥

शशिलेखा

त्वगाश्रिते त्वचि स्थिते पवने स्वेदादीनि । निवातमिति सामान्येन गृहप्रावरणादि । रक्तस्थे शीतप्रदेहादि रक्तमोक्षणान्तम् । मांसस्थे विरेकादिकं क्रमेण । मेदस्थे च । अस्थनि मज्ञि च स्थितमन्तर्बहिः प्रयुक्तैः स्नेहैर्जयेत् । शुक्रस्थे सुबोधम् । विबद्धमार्गमसम्यग्वाहि शुक्लम् । पूर्वोक्तामनन्तरोक्तां क्रियां प्रहर्षः बलशुक्रकरश्चान्नपानम् । गर्भबाल्योर्वातेन शुष्यतोः शुक्रसमन्वयोऽपि हृदि स्फुरत्याचार्यस्य । सुबोधम्। आस्थापनं पोषणमित्यर्थः । काष्मर्यं काष्मर्यफलम् । स्नावादित्रयस्यान्यतमं प्राप्ते स्नेहादीनि । स्नेहोऽभ्यङ्गः । दाहोऽग्निकर्म नानाविधं मधुस्नेहादिना । उपनाहनं पिण्डबन्धः । सङ्कुचितेऽङ्गे माषादिसाधितं तैलमभ्यङ्गः । सुप्तेऽङ्गे रक्तेऽपनीते अगारधूमादिभिर्लेपम् । वेष्टनयुक्तेऽङ्गे तूपनाहनम् ॥

आक्षेपकादीनां मध्ये महात्ययत्वादपतानकस्य प्राक्चिकित्सामाह—

अथाऽपतानकेनार्तमस्रस्ताक्षमवेपनम् ॥ २४ ॥

अस्तब्धमेढ्रमस्वेदं बहिरायामवर्जितम् ।
अखट्वाघातिनं चैनं त्वरितं समुपाचरेत् ॥ २५ ॥

तत्र प्रागेव सुस्निग्धस्विन्नाङ्गे तीक्ष्णनावनम् ।
स्रोतोविशुद्धये युञ्ज्यादच्छपानं ततो घृतम् ॥ २६ ॥

विदार्यादिगणक्वाथदधिक्षीररसैः शृतम् ।
नाऽतिमात्रं तथा वायुर्व्याप्नोति सहसैव च ॥ २७ ॥

सर्वाङ्गसुन्दरी

अथेत्यादि ॥ यद्वा अथाऽनन्तरं वातव्याधयः संज्ञानिर्दिष्टाः सचिकित्सिता वक्ष्यन्ते। अपतानकेनार्तमेनं नरमस्रस्ताक्षादियुक्तं यावदखट्वाघातिनञ्च त्वरितं कृत्वोपक्रमेत् । तत्रेत्यादि । तत्र तस्मिन्नपतानकार्ते नरे पूर्वमेव सुष्ठु स्निग्धस्विन्नाङ्गे तीक्ष्णं नस्यं त्रिकटुकादिना स्रोतोविशुद्धये युञ्ज्यात् । ततोऽनन्तरमच्छपानं घृतं युञ्जीत। कतरदित्याह—विदार्यादिगणक्वाथादिशृतम् । घृताद्विदार्यादिगणक्वाथश्चतुर्गुणो दधिक्षीररसा घृतसमा ग्राह्याः । तथा एवं कृते सति मारुतोऽतिमात्रं न व्याप्नोति सहसा झटित्येव च नाश्नुते ॥

शशिलेखा

अथेत्यादिनाऽपतानकचिकित्सा । अपतानकिनमस्रस्ताक्षत्वादिरहितमेवोपक्रमेत साध्यत्वान्नतु तद्युक्तमसाध्यत्वात् । अस्तब्धमेढ्रमस्तंभितलाङ्गूलम् । अखट्वाघातिनं खट्वाघाती यः शय्यात उत्थाय वातवेगात् पादेन शय्यामाहन्ति, तदन्यमित्यर्थः। तत्र तस्मिन्नपतानकार्ते सुष्ठु स्निग्ध स्विन्नश्चाङ्गं यस्य तस्मिन् तीक्ष्णनस्यं व्योषविळङ्गश्वेतमरिचैरन्यैश्च तीक्ष्णैः शिरोविरेचनैः स्रोतोविशोधनाय युञ्ज्यात् । ततोऽनन्तरं विदार्यादिवर्गक्वाथादिभिः सिद्धं सर्पिरच्छपानं विचारणारहितमन्यतमया मात्रया युञ्ज्यात् । तथैवं कृते मारुतोऽतिमात्रं सहसा झटित्येव न व्याप्नोति ॥

कुलत्थयवकोलानि भद्रदार्वादिकं गणम् ।
निःक्वाथ्यानूपमांसं च तेनाम्लैः पयसाऽपि च ॥ २८ ॥
स्वादुस्कन्धप्रतीवापं महास्नेहं विपाचयेत् ।
सेकाभ्यङ्गावगाहान्नपाननस्यानुवासनैः ॥ २९ ॥
स हन्ति वातं ते ते च स्नेहस्वेदाः सुयोजिताः ।

सर्वाङ्गसुन्दरी

कुलत्थेत्यादि ॥ कुलत्थादीन्यानूपमांसञ्च निःक्वाथ्य तेन क्वाथेनाम्लै-र्धान्याम्लादिभिर्मधुरवर्गकल्कयुक्तं महास्नेहं विपाचयेत् । स महास्नेहः सेकादिभिर्वातं हन्ति । ते ते च पूर्वोक्ताः स्नेहाः स्वेदाश्च सम्यग्योजिता वातं घ्नन्ति ॥

शशिलेखा

कुलत्थादीनि भद्रदार्वादिकं गणं सूत्रोक्तमानूपप्राणिमांसञ्च क्वाथयित्वा तेन क्वाथेनाम्लैः काञ्जिकमद्यादिभिः क्षीरेण च मधुरवर्गकल्कं दत्वा महास्नेहं स्नेहचतुष्टयं साधयेत् । औषधानां मांसस्य च दोषाद्यपेक्ष प्रयोगो युक्तः स्यात् । पञ्चप्रभृति तु द्रवं पृथक् स्नेहसमं योज्यमिति स्मर्तव्यम् । स्वादुस्कन्धः स्नेहाच्चतुर्थांशेन । स महास्नेहः सेकादिभिर्वातं हन्ति । सुबोधम् ॥

वेगान्तरेषु मूर्धानमसकृच्चास्य रेचयेत् ॥ ३० ॥
अवपीडैः प्रधमनैस्तीक्ष्णैः श्लेष्मनिबर्हणैः ।
श्वसनासु विमुक्तासु तथा संज्ञां स विन्दति ॥ ३१ ॥

सर्वाङ्गसुन्दरी

वेगान्तरेष्वित्यादि ॥ वेगानामन्तरालेषु मूर्धानमसकृत् बहून् वारान् रेचयेत् । कैरित्याह —अवपीडैः “कल्काद्यैरवपीडस्तु सतीक्ष्णैर्मूर्धरेचन” इत्युक्तैः । तथा प्रधमनैः “ध्मानं विरेचनश्चूर्णो युञ्ज्या”दित्युक्तैस्तैश्च तीक्ष्णैस्तीक्ष्णद्रव्यकृतैरत एव श्लेष्मनाशनैः । तथा एवं कृते सति श्वसनासु श्वास-

नाडीषु श्लेष्मणा विमुक्तासु स रोगी संज्ञां चेतनां लभते। प्राणनाड्यो हृदाश्रिताः श्वसना इत्युच्यन्ते ॥

शशिलेखा

वेगान्तरेष्वित्यादिना प्रयोगान्तरमाह। वेगान्तरमेकस्य वेगस्यापगमोऽन्यस्याप्राप्तिः। अवपीड कल्कादिनस्यम्। प्रधमनं नाड्या नसि चूर्णस्य ध्मापनम्। संज्ञा चैतन्यम्। सुबोधम् ॥

पलाष्टकं तिल्वकतो वरायाः
प्रस्थं पलांशं गुरुपञ्चमूलम्।
सैरण्डसिंहीत्रिवृतं घटेऽपां
पक्त्वा पचेत्पादशृतेन तेन ॥ ३२ ॥

दध्नः पात्रे यावशूकात्त्रिबिल्वैः
सर्पिःप्रस्थं हन्ति तत्सेव्यमानम्।
दुष्टान्वातानेकसर्वाङ्गसंस्थान्
योनिव्यापद्गुल्मवर्ध्मोदरं च ॥ ३३ ॥

सर्वाङ्गसुन्दरी

पलाष्टकमित्यादि ॥ तिल्वकतो लोध्रात्पलाष्टकं त्रिफलायाः प्रस्थं षोडशपलानि। महत् पञ्चमूलं पलभागिकम्। किंभूतम्—पञ्चमूलमेरण्डव्याघ्रीत्रिवृताभिर्युक्तम्। एतेऽपि पलांशा इत्यर्थः। अपां घटे जलद्रोणे पचेत्। पादावशेषेण तेन कषायेण तथा दध्नः पात्र आढके यावशूकाद्यवक्षारात् त्रिभिः पलैः सह सर्पिषो घृतस्य प्रस्थं द्वात्रिंशत्पलानि पचेत्। तद्घृतं सेव्यमानं दुष्टानेकसर्वाङ्गसंस्थान् वातान् योनिव्यापदादिकञ्च हन्ति। उपजातिशालिन्यौ वृत्ते। तिल्वकस्येव तिल्वकवत् महानिम्बस्याशोकस्य च विधिर्ज्ञेयः ॥

शशिलेखा

पलाष्टकमित्यादिना तैल्वकं सर्पिः। सुबोधम्। तिल्वकः पट्टिकालोध्रः। तिल्वकवदेभिरेव रम्यकयुक्तैरशोकयुक्तैश्च घृतं विधेयम् ॥

चिकित्सितमिदं कुर्याच्छुद्धवातापतानके ॥ ३४ ॥
संसृष्टदोषे संसृष्टं, चूर्णयित्वा कफान्विते।
तुम्बुरूण्यभयाहिङ्गुपौष्करं लवणत्रयम् ॥ ३५ ॥
यवक्काथाम्बुना पेयं हृत्पार्श्वार्त्यपतन्त्रके।
हिङ्गु सौवर्चलं शुण्ठी डाडिमं साम्लवेतसम् ॥ ३६ ॥
पिबेद्वा श्लेष्मपवनहृद्रोगोक्तं च शस्यते।

सर्वाङ्गसुन्दरी

चिकित्सितमित्यादि ॥ इममुपक्रमं शुद्धवातापतानके कुर्यात्। संसृष्टदोषे संसृष्टं दोषद्वयोक्तं चिकित्सितं कुर्यात्। कफयुक्ते तुम्बुर्वादिकं चूर्णयित्वा यवक्काथाम्बुना पेयम्। हृत्पीडादियुक्तेऽपतन्त्रकेऽथवा हिङ्ग्वादिकं यवक्काथजलेन पेयम्। चले वायावधिके सौवर्चलादिभिः कल्कीकृतैः सिद्धं सर्पिः पिबेत्। अथवा श्लेष्मवातहृद्रोगे यत्कथितं तच्च शस्यते ॥

शशिलेखा

इदमनन्तरोक्त चिकित्सितं शुद्धवातज एवापतानके कुर्यात्। संसृष्टदोषे दोषान्तरसंसृष्टे तु वाते संसृष्टं संसृष्टदोषानुरोधे नैतद्योज्यमित्यर्थः। कफान्विते कफसंसर्गे तुम्बुर्वादिचूर्णं यवक्काथेन हृत्पार्श्वार्त्यपतन्त्रके पेयम्। हिङ्ग्वादिचूर्णं वा यवक्काथेन। सौवर्चलादिसिद्धं सर्पिर्वायावधिके पिबेत्। अथवा श्लेष्मवातहृद्रोगे यच्चिकित्सितमुक्तं तच्च शस्यते ॥

आयामयोरर्दितवद्बाह्याभ्यन्तरयोः क्रिया ॥ ३७ ॥
तैलद्रोण्याश्च शयनमान्तरोऽत्र सुदुस्तरः।
विवर्णदन्तवदनः स्रस्ताङ्गो नष्टचेतनः ॥ ३८ ॥
प्रस्विद्यंश्च धनुष्कम्पी दशरात्रं न जीवति।
वेगेष्वतोऽन्यथा जीवेन्मन्देषु विनतो जडः ॥ ३९ ॥
खञ्जः कुणिः पक्षहतः पङ्गुलो विकलोऽथवा।
हनुस्रंसे हनू स्निग्धस्विन्नौ स्वस्थानमानयेत् ॥ ४० ॥
उन्नामयेच्च कुशलश्चिबुकं विवृते मुखे।

नामयेत्संवृते शेषमेकायामवदाचरेत् ॥ ४१ ॥
जिह्वास्तंभे यथावस्थं कार्यं वातचिकित्सितम् ।
अर्दिते नावनं मूर्धतैलं श्रोत्राक्षितर्पणम् ॥ ४२ ॥
सशोफे वमनं दाहरागयुक्ते सिराव्यधः ।
स्वेदनं स्नेहसंयुक्तं पक्षाघाते विरेचनम् ॥ ४३ ॥
अपबाहौ हितं नस्यं स्नेहश्चोत्तरभक्तिकः ।

सर्वाङ्गसुन्दरी

आयामेत्यादि ॥ आयामयोर्बाह्याभ्यन्तरयोरर्दितवत् क्रिया स्यात् । तैलद्रोण्यां शयनञ्च । अत्रानयोर्मध्यादान्तर आयामः सुष्ठु दुस्तरोऽतिकष्टसाध्यः । विवर्णदन्तास्यः स्रस्ताङ्गो नष्टसंज्ञः प्रस्वेदवांश्च धनुष्कम्पी दशरात्रं न जीवति । अतोऽन्यथा विवर्णदन्तत्वादिविपर्यये तथा वेगेषु मन्देषु सत्सु जीवेत् । जीवंश्च विनतादिगुणः स्यात् । हनुस्रंसे सति हनू स्निग्धस्विन्नौ सन्तौ स्वस्थानं प्रापयेत् । कुशलो भिषग्विवृते मुखे सति चिबुकमूर्ध्वं नामयेत् । संवृते तु वदने चिबुकं नामयेत् । शेषं चिकित्सितमेकायामवदर्दितवदाचरेत् । जिह्वायाः स्तंभे सति यथावस्थं वातव्याध्युपक्रमः कार्यः । अर्दिते नावनादि चिकित्सितम् । शोफान्विते सति वमनं कार्यम् । दाहादियुक्ते सति सिराव्यधः कार्यः । पक्षाघाते स्नेहस्वेदान्वितो विरेकः कार्यः । अपबाहौ नस्यादि हितम् । सामे तूपवास एव हितः इत्युवाच सङ्ग्रहे ॥

शशिलेखा

बहिरायामोन्तरायाम इति तयोर्नाम । तैलद्रोण्यां शयनमनयोर्विशेषः । अत्रानयोर्द्वयोरन्तरायामः सुदुस्तरो घोरतरः । सुदुस्तर इति प्रयोगात् बाह्यायामो दुस्तरो घोर इति सूचितम् । तेन यत्नाच्चिकित्सेदित्यर्थः । दुस्तरत्वप्रसङ्गेनोपेक्षणीयत्वमुच्यते विवर्णेत्यादिना । धनुष्कम्पो बाह्यायामः । अतोऽन्यथा विवर्णदन्तवदनत्वादितो वैपरीत्ये मन्देषु च वेगेषु कदाचिज्जीवनं संभाव्यते । यदा च जीवेत्तदा विनतत्वादियुक्तो नरत्वनुपहतः । विनतः कुब्जः । जडोऽज्ञः । खञ्जः कुण्ठपादः । कुणिः कुण्ठबाहुः । पक्षहतो निष्क्रियदेहार्धः । पङ्गुलः सक्थिद्वयविकलः । विकलो हीनवाक् । हनुस्तंभे हि कदाचिद्विवृतास्यता कदाचित् संवृतास्यता च भवति । एकायाम इत्यर्दितस्य नाम । जिह्वास्तम्भे

यथावस्थमवस्थानतिक्रमेण सामान्यानिलामयचिकित्सितं कार्यम्। अर्दिते नावनादि हितं शोफयुक्ते सिराव्यधः। पक्षाघाते स्नेहनादि हितम्। अपबाहौ भक्तादूर्ध्वं स्नेहपानं घृतं तैलं वा दोषाद्यपेक्ष हितम्॥

ऊरुस्तम्भे न च स्नेहो न च संशोधनं हितम् ॥ ४४ ॥
श्लेष्मामेदोबाहुल्याद्युक्त्या तत्क्षपणान्यतः।
कुर्याद्रूक्षोपचारं च यवश्यामाककोद्रवाः ॥ ४५ ॥
शाकैरलवणैः शस्ताः किञ्चित्तैलैर्जले भृतैः।
जाङ्गलैरघृतैर्मांसैर्मध्वम्भोरिष्टपायिनः ॥ ४६ ॥
वत्सकादिर्हरिद्रादिर्वचादिर्वा ससैन्धवः।
आढ्यवाते सुखाम्भोभिः पेयः षड्धरणोऽथवा ॥ ४७ ॥
लिह्यात्क्षौद्रेण वा श्रेष्ठाचव्यतिक्ताकणाघनान्।
कल्कं समधु वा चव्यपथ्याग्निसुरदारुजम् ॥ ४८ ॥
मूत्रैर्वा शीलयेत्पथ्यां गुल्गुलुं गिरिसंभवम्।
व्योषाग्निमुस्तत्रिफलाविडङ्गैर्गुल्गुलुं समम् ॥ ४९ ॥
खादन् सर्वान् जयेद्व्याधीन् मेदःश्लेष्मामवातजान्।
शाम्यत्येवं कफाक्रान्तः समेदस्कः प्रभञ्जनः ॥ ५० ॥
क्षारमूत्रान्वितान् स्वेदान् सेकानुद्वर्तनानि च।
कुर्याद्दिह्याच्च मूत्राढ्यैः करञ्जफलसर्षपैः ॥ ५१ ॥
मूलैर्वाप्यर्कतर्कारीनिम्बजैः ससुराह्वयैः।
सक्षौद्रसर्षपापक्वलोष्टवल्मीकमृत्तिकैः ॥ ५२ ॥
कफक्षयार्थं व्यायामो सह्ये चैनं प्रवर्तयेत्।
स्थलान्युल्लङ्घयेन्नारीः शक्तितः परिशीलयेत् ॥ ५३ ॥
स्थिरतोयं सरः क्षेमं प्रतिस्रोतो नदीं तरेत्।
श्लेष्ममेदःक्षये चाऽत्र स्नेहादीनवचारयेत् ॥ ५४ ॥
स्थानदूष्यादि चालोच्य कार्या शेषेष्वपि क्रिया।

सर्वाङ्गसुन्दरी

उरुस्तम्भ इत्यादि॥ ऊरुस्तम्भे स्नेहादि न हितम्। श्लेष्मामेदोबाहुल्यात्। अतोऽस्माद्धेतोस्तेषां श्लेष्मामेदसां क्षपणानि क्षयकराणि युक्त्या

कुर्यात्। रूक्षोपचारार्थं यवादयः शस्ताः। कैस्सह—शाकैरीषल्लवणैर्जले श्रुतैः किञ्चित्तैलैस्तथा मांसैः। किंभूतैः—जाङ्गलैरघृतैर्घृतरहितैः। माक्षिकजल-मरिष्टञ्च पानशीलस्य नरस्य। आढ्यवाते कोष्णजलैर्वत्सकादीनामन्यतमः सलवणः पेयः। अथवा षड्धरणः सुखाम्भोभिः पातव्यः। अथवा क्षौद्रेण त्रिफलादिकान् कल्कं लिह्यात्। चव्यादिजं वा कल्कं माक्षिकान्वितं लिह्यात्। अथवा गोमूत्रेण हरीतकीमभ्यसेत्। अथवा गुग्गुलुं शिलाजतु वा शीलयेत्। व्योषादिभि-स्तुल्यं गुग्गुलुं खादन् भक्षयन् सर्वान् मेदःश्लेष्मामवातजान् व्याधीन् हन्ति। एवं प्रागुक्ते क्रियाक्रमे कृते सति कफावृतो मरुत् समेदस्कश्च शाम्यति। तथा क्षार-मूत्रयुतान् स्वेदादीन् कुर्यात्। तथा करञ्जफलसर्षपैः प्रभूतमूत्रालोळितैः लिम्पेत्। अथवा ससुराह्वयैरर्कादिजैर्मूलैः क्षौद्रादियुतैर्लिम्पेत्। एनमूरुस्तम्भिणं सोढुं शक्ये व्यायामे च कफमेदःक्षयाय प्रवर्तयेत्। सह्य इति। शक्तिसहोश्चेति यत्। व्यायामं शनैः कारयेदित्यर्थः। तमेव व्यायाममाह — स्थलान्युल्लङ्घयेत्। नारीर्यथाशक्ति शीलयेत्। स्थिरतोयं सरस्तरेत्। क्षेमं ग्राहादिरहितम्। तथा नदीं तरेत्। कथम् — प्रतिस्रोतः स्रोतोऽभिमुखम्। श्लेष्ममेदःक्षये सत्यस्मिन् स्नेहादीनवचारयेच्च। शेषेषु च वातरोगेषु स्थानदूष्यादीन् निरूप्य चिकित्सितं कार्यम्॥

शशिलेखा

ऊरुस्तम्भे स्नेहादीनि परिहरेत्। स्नेहग्रहणेन पानानुवासनस्यात्मकानि स्नेहकर्माणि गृह्यन्ते। संशोधनशब्देन वमनविरेचनास्थापनास्रस्रावकर्माणि। स्नेहशोधनपरिहरणे हेतुः श्लेष्मामेदोबाहुल्यादिति। यतोऽसौ न शुद्धेन वातेन भवति। श्लेष्मादेश्च स्नेहादिना विरोधः। स्नेहादिभिरग्निर्मन्दो भवति, अग्नि-मान्द्याच्च श्लेष्मादिवृद्धिरित्यभिप्रायः। अतोऽस्माद्धेतोः तत्क्षपणानि तेषां श्लेष्मामेदसां क्षपणानि शमनानि रूक्षोपचारञ्च युक्त्या यथान्तर्लीनतां श्लेष्मादय-स्त्यजन्ति तथा कुर्यात्। तत्रादौ शमनानि युक्त्या योजयेत्। यदि तथा न शाम्यन्ति ततो रूक्षोपचारादिकं यवाद्याः शाकैः सह शस्ताः। सुबोधम्। वत्सकाद्या-दीनां गणानामन्यतमः ससैन्धवोऽथवा षड्धरणः पाठादार्वीत्यादि कुष्ठोक्तसुखाम्भो-भिरुष्णजलैराढ्यवात ऊरुस्तंभे पेयः। श्रेष्ठादेः कल्कं मधुना लिह्यात्। चव्यादिजं कल्कं वा। मूत्रैर्गोमूत्रादिभिः पथ्यादिकं पृथक् शीलयेदभ्यसेत्। सुबोधम्। तमेव व्यायाममाह—स्थलानीति। क्षेमं ग्राहादिरहितम्। प्रतिस्रोतो विमुखम्। शेषेषु

विश्वमीप्रभृतिषु पाददाहान्तेषु वातरोगेषु स्थानादि निरूप्य क्रिया सामान्यवातचिकित्सा कार्या ॥

सहचरं सुरदारु सनागरं
क्वथितमम्भसि तैलविमिश्रितम् ।
पवनपीडितदेहगतिः पिबेत्
द्रुतविलम्बितगो भवतीच्छया ॥ ५५ ॥

रास्नामहौषधद्वीपिपिप्पलीशठिपौष्करम् ।
पिष्ट्वा विपाचयेत्सर्पिर्वातरोगहरं परम् ॥ ५६ ॥

सर्वाङ्गसुन्दरी

सहचरमित्यादि ॥ सहचरादि क्वथितं तैलयुतं पिबन् मारुतार्दितशरीरगतिरिच्छया द्रुतगमनो विलम्बितगमनो वा भवति। तन्त्रकृता च मतिवैभवादस्य वृत्तस्य नामापि श्लिष्टं कृत्वा निबद्धम् । द्रुतविलम्बिताख्यमेतद्वृत्तम् । अस्य लक्षणं द्रुतविलम्बितमाह नभौ भरौ इति । रास्नादीन् पिष्ट्वा सर्पिः सामान्यपरिभाषया विपाचयेत् । तच्च सुष्ठु वातरोगहृत् ॥

शशिलेखा

अथेदानीं सर्ववातामयानां सामान्येन भेषजमाह । सहचरादिभिस्तैलमिश्रितं कषायं पिबन् द्रुतगमनो विलम्बितगमनो वा भवति । तन्त्रकृता च मतिवैभवादस्य च वृत्तस्य नामापि श्लिष्टं कृत्वा कथितम् । रास्नादिभिः साधितं घृतं परं वातरोगहरम् । द्वीपिश्चित्रकः ॥

निम्बामृतावृषपटोलनिदिग्धिकानां
भागान् पृथक् दश पलान् विपचेद्घटेऽपाम् ।
अष्टांशशेषितरसेन पुनश्च तेन
प्रस्थं घृतस्य विपचेत्पिचुभागकल्कैः ॥ ५७ ॥

पाठाविडङ्गसुरदारुगजोपकुल्या-
द्विक्षारनागरनिशामिसिचव्यकुष्ठैः ।
तेजोवतीमरिचवत्सकदीप्यकाग्नि-
रोहिण्यरुष्करवचाकणमूलयुक्तैः ॥ ५८ ॥

मञ्जिष्ठयातिविषया विषया यवान्या
संशुद्धगुल्गुलुपलैरपि पञ्चसंख्यैः ।
तत्सेवितं विधमति प्रबलं समीरं
सन्ध्यस्थिमज्जगतमप्यथ कुष्ठमीदृक् ॥ ५९ ॥

नाडीव्रणार्बुदभगन्दरगण्डमाला-
जत्रूर्ध्वसर्वगदगुल्मगुदोत्थमेहान् ।
यक्ष्मारुचिश्वसनपीनसकासशोफ-
हृत्पाण्डुरोगमदविद्रधिवातरक्तम् ॥ ६० ॥

सर्वाङ्गसुन्दरी

निम्बेत्यादि ॥ निम्बादीनां पृथक् दशपलानम्बुद्रोणे पचेत् । तेनाष्टांशशेषितेन क्वाथेन पाठादिभिः कर्षांशैः कल्कैः श्रेष्ठगुल्गुलुपलैश्च पञ्चभिः सर्पिषः प्रस्थं पुनः पचेत् । तत्सर्पिः शीलितं वायुमतिबलं सन्ध्यादिगतमपि पराकरोति कुष्ठमपीदृशं सन्ध्यादिगतमपि हन्ति । तथा नाडीव्रणादीन् जयति । वसन्ततिलकम् ।

शशिलेखा

निम्बादीनां पृथग्दश पलान् भागानपां घटे द्रोणे विपचेत् । अष्टांशशिष्टेन तेन क्वाथेन पिचुभागकल्कैः कर्षांशकल्कैः पञ्चभिः गुल्गुलुपलैः घृतस्य प्रस्थं द्वात्रिंशत्पलानि विपचेत् । तद्घृतं सेवितं वातादीन् विधमति नाशयति । गजोपकुल्या श्रेयसी । द्विक्षारं सौवर्चलयवक्षारौ । मिसिः शतपुष्पा । तेजोवती ज्योतिष्मती । कणमूल इत्यत्र कणाशब्दो लुप्तनिर्दिष्टः । तेनात्र कणा च कणामूलं च ग्राह्यम् । अत एव च मुनिनात्र व्योषशब्दो निर्दिष्टः । युक्ता रास्ना । गुदोत्थान्यर्शांसि । हृत्पाण्डुभ्यां रोगः संबध्यते । मदो मदात्ययनिदानोक्तलक्षणः । शेषं सुबोधम् ॥

बलाबिल्वशृते क्षीरे घृतमण्डं विपाचयेत् ।
तस्य शुक्तिः प्रकुञ्चो वा नस्यं वाते शिरोगते ॥ ६१ ॥

तद्वत्सिद्धा वसा नक्रमत्स्यकूर्मबुलूकजा ।
विशेषेण प्रयोक्तव्या केवले मातरिश्वनि ॥ ६२ ॥

सर्वाङ्गसुन्दरी

बलाबिल्वेत्यादि ॥बलाबिल्वाभ्यां कथिते क्षीरे घृतमण्डं विपाचयेत्। तस्य घृतमण्डस्य पक्वस्य कर्षद्वयं पलं वा नस्यं शिरोगते वाते प्रयोक्तव्यम्। तद्वत् घृतमण्डवत्। नक्रादिजा वसा केवले वाते विशेषेण प्रयोज्या ॥

शशिलेखा

सुदग्धस्य घृतस्य स्त्यानस्योपर्यच्छस्तस्य शुक्तिरर्धपलं प्रकुञ्चः पलं वा शिरोगते मूर्धगतेऽनिले नस्यं बाहुशिरोगते वा आदिलोपात्। तद्वत् बलाबिल्वशृते क्षीरे सिद्धा नक्रादिजा वसा शुक्तिः प्रकुञ्चो वा। बुलुकी मत्स्यविशेषो दत्याकार ॥

जीर्णं पिण्याकं पञ्चमूलं पृथक् च
क्वाथ्यं क्वाथाभ्यामेकतस्तैलमाभ्याम्।
क्षीरादष्टांशं पाचयेत्तेन पाना-
द्वाता नश्येयुः श्लेष्मयुक्ता विशेषात् ॥ ६३ ॥

सर्वाङ्गसुन्दरी

जीर्णमित्यादि॥ जीर्णं पुराणं पिण्याकं तिलकल्कं पञ्चमूलञ्च महत् पृथक् क्वाथ्यम्। क्वाथाभ्यामाभ्यां तैलमेकत एकस्मिन् तैलं क्षीरादष्टांशं पाचयेत्। तेन तैलेन पानाद्वाता नश्यन्ति विशेषेण श्लेष्मयुक्ताः। वैश्वदेवीवृत्तम्।

शशिलेखा

जीर्णं बहुवर्षोषितम्,क्षीरादष्टांशमिति। तैलादष्टगुणं क्षीरमिति। चरकेऽप्युक्तम्। "पञ्चमूलकषायेण पिण्याकं बहुवार्षिकम्। पक्त्वा तस्य रसं पूत्वा तैलप्रस्थं विपाचयेत्॥ पयसाऽष्टगुणेनैतत् सर्ववातविकारनुत्। संसृष्टे श्लेष्मणा चैतद्वाते शस्तं विशेषतः" ॥ इति ॥

प्रसारिणीतुलाक्वाथे तैलप्रस्थं पयस्समम्।
द्विमेदामिसिमञ्जिष्ठाकुष्ठरास्नाकुचन्दनैः ॥ ६४ ॥

जीवकर्षभकाकोलीयुगलामरदारुभिः ।
कल्कितैर्विपचेत्सर्वमारुतामयनाशनम् ॥ ६५ ॥

समूलशाखस्य सहाचरस्य
तुलां समेताद्दशमूलतश्च ।
पलानि पञ्चाशदभीरुतश्च
पादावशेषं विपचेद्वहेऽपाम् ॥ ६६ ॥

तत्र सेव्यनखकुष्ठहिमैला-
स्पृक्प्रियङ्गुनलिकाम्बुशिलाजैः ।
लोहितानलदलोहसुराह्वैः
कोपनामिसितुरुष्कनतैश्च ॥ ६७ ॥

तुल्यं क्षीरं पालिकैस्तैलपात्रं
सिद्धं कृच्छ्रान् शीलितं हन्ति वातान् ।
कम्पाक्षेपस्तम्भशोषादियुक्तान्
गुल्मोन्मादौ पीनसं योनिरोगान् ॥ ६८ ॥

सहाचरतुलायास्तु रसे तैलाढकं पचेत् ।
मूलकल्काद्दशपलं पयो दद्याच्चतुर्गुणम् ॥ ६९ ॥

अथवा नतषड्ग्रन्थास्थिराकुष्ठसुराह्वयान् ।
सैलानलदशैलेयशताह्वारक्तचन्दनान् ॥ ७० ॥

सिद्धेऽस्मिन् शर्कराचूर्णादष्टादशपलं क्षिपेत् ।
भेळस्य सम्मतं तैलं तत्कृच्छ्रानानिलामयान् ॥ ७१ ॥

वातकुण्डलिकोन्मादगुल्मवर्ध्मादिकान् जयेत् ।

सर्वाङ्गसुन्दरी

प्रसारिणीत्यादि ॥ प्रसारिणीतुलाक्वाथे तैलप्रस्थं क्षीरसमं द्विमेदादिभिः कल्कितैः सामान्यपरिभाषोक्तकल्कप्रमाणैः विपाचयेत् । तच्चाशेषवातरोगघ्नम् । समूलशाखस्य मूलशाखासहितस्य तुलां समेताद्दशमूलाच्च तुलां शतावर्याः पलानि पञ्चाशत् जलस्य चतुर्द्रोणे पादावशेषं पचेत् । तस्मिन् पादशेषे सेव्यादिभिः पालि-

कैस्तैलाढकं तुल्यक्षीरं सिद्धं शीलितं कृच्छ्रान्मारुतान् कम्पादियुक्तान् गुल्मादींश्च हन्ति। स्वागताशालिन्यौ वृत्ते। सहाचरतुलायाः क्वाथे तैलाढकं पचेत्। मूलकल्कात् प्रकृतत्वात् सहाचरस्य दश पलानि क्षीरं तैलचतुर्गुणं दद्यादित्येवं पाकः। अथवा सहाचरतुलायाः क्वाथे नतादिकात् दशपलानि दत्वा सिद्धेऽस्मिंस्तैले शर्करारजसोऽष्टादशपलानि क्षिपेत्। एतच्च भेळाख्यस्य महर्षेः सम्मतम्। तद्दारुणान् वातरोगान् वातकुण्डलिकादींश्च जयेत् ॥

शशिलेखा

प्रसारिणीत्यादि सुबोधम्। सहाचरतुलेत्यादि। तुला पलशतम्। चतुर्गुणं पयस्तैलात्। अथवेति पक्षान्तरे। नतादिभिः कल्कितैस्तैलाढकं पचेत्। सिद्धेऽस्मिन् पूते शर्करायाश्चूर्णादष्टादशपलं क्षिपेत्। भेळाख्यस्य महर्षेः सम्मतं तत् कृच्छ्रान् कृच्छ्रसाध्यानिलामयान् वातकुण्डलिकादींश्च नाशयेत्। वातकुण्डलिका मूत्राघातभेदः ॥

बलाशतं छिन्नरुहापादं रास्नाष्टभागिकम् ॥ ७२ ॥

जलाढकशते पक्त्वा शतभागस्थिते रसे।
दधिमस्त्विक्षुनिर्यासशुक्तैस्तैलाढकं समैः ॥ ७३ ॥

पचेत्साजपयोर्धांशं कल्कैरेभिः पलोन्मितैः।
शटीसरळदार्वेलामञ्जिष्ठागरुचन्दनैः ॥ ७४ ॥

पद्मकातिबलामुस्तासूर्पपर्णीहरेणुभिः।
यष्ट्याह्वसुरसव्याघ्रनखर्षभकजीवकैः ॥ ७५ ॥

पलाशरसकस्तूरीनळिकाजातिकोशकैः।
स्पृक्काकुङ्कुमशैलेयजातीकटुफलाम्बुभिः ॥ ७६ ॥

त्वक्कुन्दरुककर्पूरतुरुष्कश्रीनिवासकैः।
लवङ्गनखकङ्कोलकुष्ठमांसीप्रियङ्गुभिः ॥ ७७ ॥

स्थौणेयतगरध्यामवचामदनकप्लवैः।
सनागकेसरैः सिद्धे दद्याच्चात्रावतारिते ॥ ७८ ॥

पत्रकल्कं ततः पूतं विधिना तत्प्रयोजितम् ।
कासश्वासज्वरच्छर्दिमूर्च्छागुल्मक्षतक्षयान् ॥ ७९ ॥
प्लीहशोषमपस्मारमलक्ष्मीं च प्रणाशयेत् ।
बलातैलमिदं श्रेष्ठं वातव्याधिविनाशनम् ॥ ८० ॥

सर्वाङ्गसुन्दरी

बलाशतमित्यादि ॥ बलायाः पलशतं गुळूच्याः पञ्चविंशतिपलानि रास्नायाः सार्धानि द्वादशपलानि। एतच्च जलाढकशते पक्त्वा आढकमात्रस्थिते क्वाथे दध्यादिभिस्तुल्यैस्तैलाढकमजाक्षीरस्यार्धाढकं शट्यादिभिः पलोन्मितैः पचेत्। कटुफलं कटुकङ्कोलकम्। प्लवः कुटन्नटः । अवतारिते चाऽस्मिन् पत्रकल्कं दद्यात्। ततोऽनन्तरं पूतं तत्तैलं विधिना प्रयोजितं कासादीन् हन्ति । एतद्बलातैलं श्रेष्ठं गर्भव्यापदुक्तात् बलातैलात्। तथा वातरोगघ्नम् ॥

शशिलेखा

बलाशतं पलशतमित्यर्थः। छिन्नरुहापादं गुळूच्याः पञ्चविंशतिपलानीति यावत्। रास्नाष्टभागिकं रास्नायाः सार्धानि द्वादशपलानि। रसे शतभागस्थिते तैलाढकं पचेत्। समैर्दध्यादिभिः शुक्तान्तैरेतेषां एकैकमाढकं इक्षुनिर्यासः स्वरसः। सहाजक्षीरस्यार्धांशेनार्धाढकेन वर्त्तते यत्तैलं तत साजपयोर्धांशमित्युक्तम्। पलप्रमाणैरेभिर्वक्ष्यमाणैः शट्यादिभिः कल्कैश्च युक्तम्। सूप्यपर्णी माषपर्णी मुद्गपर्णी च। व्याघ्रनखः समुद्रजः। पलाशं पत्रकम्। तच्च तमालम्। रसो बोळः। नळिका विद्रुमलता जातिकोशकं जातिपत्री। स्पृक्का ब्राह्मी। जाती मालती। कटुफलं कर्कोटफलम्। कटुफलो लताकस्तूरिका। [कटुफलं दक्षिणावर्ते प्रसिद्धं गन्धद्रव्यमित्यन्ये इति जर्जटाचार्यः]। अम्बु वाळकम्। कुन्दुरुष्कं कुन्दुरुः। तुरुष्कः तुवरमृत्तिका। श्रीनिवासकः मृत्तिकायवनो वरकः। लवङ्गः लवङ्गकुसुमम्। स्थौणेयं तैलपीतकम्। तगरं नतम्। ध्यामकं प्लवम्। "कुटन्नटं प्लवं धान्यं वितुन्नं परिपेलवम्"। अवतारिते तैले गन्धपत्रं संस्काराधानमात्रम् ॥

पाने नस्येऽन्वासनेऽभ्यञ्जने च
　स्नेहाः काले सम्यगेते प्रयुक्ताः ।
दुष्टान्वातानाशु शान्तिं नयेयु-
　र्वन्ध्या नारीः पुत्रभाजश्च कुर्युः　　॥ ८१ ॥

स्नेहस्वेदैर्द्रुतः श्लेष्मा यदा पक्वाशये स्थितः ।
पित्तं वा दर्शयेद्रूपं वस्तिभिस्तं विनिर्जयेत्　　॥ ८२ ॥

सर्वाङ्गसुन्दरी

पान इत्यादि ॥　एते पूर्वोक्ताः स्नेहाः पानादिषु कालेऽवसरे सम्यक्-प्रयुक्ताः दुष्टान् वातान् द्रागेव शमं नयेयुः । वन्ध्याश्च नारीः पुत्रभाजो विदध्युः । शालिनीवृत्तम् । स्नेहस्वेदैश्च यदा कफो द्रुतो द्रवत्वं प्राप्तः पक्वाशयस्थो रूपं दर्शयेत्, अथवा पित्तं रूपं दर्शयेत्तं कफं पित्तं वा वस्तिभिर्विनिर्जयेत् ॥

शशिलेखा

अध्यायमुपसंहरन्नाह—एतेऽनन्तरोक्ताः स्नेहाः काले स्नेहयोग्ये पानादिषु प्रयुक्ताः सम्यक् च स्वविषये विधिना प्रयुक्ता दुष्टान् वातान् व्रणादीननेकसंयोग-भिन्नानाशु शीघ्रं शान्तिं नयेयुः । वन्ध्याश्च युवतीः पुत्रभाजः कुर्युः । स्नेहा-न्तोचितत्वादिदमुच्यते । वातकोपेऽवश्यं रूक्षादित्वात् श्लेष्मा प्रायेण कोपरहितो भवति । सः स्नेहस्वेदैर्वातव्याधिप्रयुक्तैर्द्रुतो द्रवत्वं प्राप्तः पक्वाशये स्थितः केनचित्प्रकारेण श्वेतमूत्रपुरीषादिना स्वं रूपं दर्शयेत् । तथाविधं पित्तं वा स्वं रूपं दर्शयेत् । तदा तं श्लेष्माणं पित्तं वा मिश्रं वा वस्तिभिर्योग्यैर्विनिर्जयेत् ॥

इति चिकित्सितस्थाने वातव्याधिचिकित्सितं
नाम एकविंशोऽध्यायः

द्वाविंशोऽध्यायः

वातव्याधिचिकित्सितादनन्तरं वातशोणितचिकित्सितमारभ्यते । यतो वातशोणिताख्यो व्याधिः प्रायो वातव्याधिरेव, शोणितयुक्तेन वायुना कृतत्वात्। बहुवक्तव्यात्तु पृथगस्योपदेश इत्याह ॥

अथाऽतो वातशोणितचिकित्सितं नामाध्यायं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः।

वातशोणितिनो रक्तं स्निग्धस्य बहुशो हरेत्।
अल्पाल्पं पालयन् वायुं यथादोषं यथाबलम् ॥ १ ॥

रुग्रागतोददाहेषु जलौकोभिरसृक्हरेत्।
शृङ्गतुम्बैश्चिमिचिमाकण्डूरुग्दूयनान्वितम् ॥ २ ॥

प्रच्छानेन सिराभिर्वा देशाद्देशान्तरं व्रजत्।
अङ्गग्लानौ तु न स्राव्यं रूक्षे वातोत्तरं च यत् ॥ ३ ॥

गम्भीरं श्वयथुं स्तम्भं कम्पस्नायुसिरामयान्।
ग्लानिमन्यांश्च वातोत्थान् कुर्याद्वायुरसृक्क्षयात् ॥ ४ ॥

विरेच्यः स्नेहयित्वा तु स्नेहयुक्तैर्विरेचनैः।

सर्वाङ्गसुन्दरी

वातशोणितिन इत्यादि ॥ वातशोणितिनो नरस्य स्निग्धस्य सतो बहून् वारान् लोहितमल्पाल्पं हरेद्वातकोपभयात्। अत एवाह—पालयन् वायुम्। तथा यथादोषं दोषानतिक्रमेण तथा बलानतिक्रमेण। यथादोषं यथाबलमित्युपलक्षणार्थं दूष्याद्यनतिक्रमेणाऽपि रक्तं हरेत्। रुग्रागादिषु सत्सु जलौकोभी रुधिरं हरेत् ॥ चिमिचिमान्वितं रक्तं शृङ्गतुम्बैर्हरेत्। देशाद्देशान्तरं गच्छदसृक् प्रच्छानेन सिराभिर्वा हरेत्। अङ्गग्लानौ तु सत्यां न स्राव्यं स्यात्। तथा रूक्षे वातोत्तरं च यद्रक्तं

तदपि न साध्यम्। रूक्षे सति वातचिकित्सितं सेवेत। ननु कस्माद्रक्तस्रावो न विधीयत इत्याह— वायुरसृक्क्षयात् गम्भीरशोफादीन् कुर्यात्। विरेचनयोग्यः पुरुषस्तु स्नेहयित्वा विरेचनद्रव्यैः स्नेहयुक्तैर्विरेचनीयः॥

शशिलेखा

सर्वस्य वातशोणितवतः स्निग्धस्य रक्तं बहुशोऽसकृदल्पमल्पं स्तोकं स्तोकं हरेद्वायुं पालयन्। कथं—यथादोषं यथाबलञ्च। तत्र विशेषाद्रुगादिषु जलौकोभिर्हरेत्। चिमिचिमाद्यन्वितं शृङ्गतुम्बैः। अनियतदेशस्थितं रक्तं प्रच्छानेन सिराभिर्वा हरेत्। जलौकादिभिरसृक्स्रावे क्रियमाणे रक्तस्यावसेचनं सकृदेव न कार्यम्। न बहु। कुत एवमित्याह। अथ किमेकान्ते नैवमसृक् साध्यम्। नेत्याह—अङ्गग्लानावित्यादि। सुबोधम्। गम्भीरमित्यादि। यस्मात् सकृदेवास्रे विस्राविते असृक्क्षयाद्वायुः गम्भीरश्वयथ्वादीन् कुर्यात्। गम्भीरः शोफोऽवगाढः। ग्लानिरुपशोषः। अन्यांश्चेति सर्वेषामपतर्पणजानां ग्रहणम्। सुबोधम्॥

वातोत्तरे वातरक्ते पुराणं पाययेद्घृतम् ॥ ५ ॥

श्रावणीक्षीरकाकोलीक्षीरिणीजीवकैः समैः।
सिद्धं सर्षभकैः सर्पिः सक्षीरं वातरक्तनुत् ॥ ६ ॥

द्राक्षामधूकवारिभ्यां सिद्धं वा ससितोपलम्।
घृतं पिबेत्तथा क्षीरं गुडूचीस्वरसे शृतम् ॥ ७ ॥

तैलं पयः शर्करां च पाययेद्वा सुमूर्छितम्।
बलाशतावरीरास्नादशमूलैः सपीलुभिः ॥ ८ ॥

श्यामैरण्डस्थिराभिश्च वातार्तिघ्नं शृतं पयः।
धारोष्णं मूत्रयुक्तं वा क्षीरं दोषानुलोमनम् ॥ ९ ॥

सर्वाङ्गसुन्दरी

वातोत्तर इत्यादि॥ वाताधिके वातरक्ते पुराणं घृतं पाययेत्। श्रावण्यादिभिर्ऋषभकयुतैः कल्कितैः दुग्धयुक्तं सिद्धं घृतं वातशोणितहृत्। द्राक्षा-

मधूकयोः क्वाथयोः पृथक् सिद्धं वा घृतं सशर्करं पिबेत्। मधूकं मधुककुसुमम्। तथा क्षीरञ्च गुळूचीस्वरसे क्वथितं पिबेत्। तैलादि वा सम्मिश्रितं पाययेत्। बलादिभिः शृतं पयो वातरुजानाशनं स्यात्। श्यामादिभिश्च। श्यामा शारिबा। धारोष्णं क्षीरं गोमूत्रयुक्तं वा दोषानुलोमनं स्यात् ॥

शशिलेखा

अथ वातादिविशेषेण चिकित्सामाह—वातोत्तर इत्यादि। पुराणं घृतं पञ्चदशादिवर्षोषितम्। सुबोधम्। द्राक्षामधुकतोयाभ्यां सिद्धं वा ससितोपलम्। 'पिबेद्घृतं तथा क्षीरं गुळूचीस्वरसे शृतम्, इति चरकपाठः। [अत्र जर्जटः। द्राक्षामधुकतोयाभ्यामित्यत्र द्विवचनसामर्थ्यात् प्रत्येकं घृतमिति] तथा क्षीरं गुळूचीस्वरसे शृतम्। तथेति सहसितोपलमिति। बलाशतावरीरास्नादशमूलैः सपीलुभिः शृतं क्षीरमेकम्। श्यामादिभिः शृतमपरम्। कुतः। पूर्वस्मिन् दशमूलश्रवणात् धारोष्णं वा मूत्रयुक्तं वा क्षीरं दोषस्य पुरीषस्यानुलोमनमनुलोमकरम् ॥

पैत्ते पक्त्वा वरीतिक्तापटोलत्रिफलामृताः।
पिबेद्घृतं वा क्षीरं वा स्वादुतिक्तकसाधितम् ॥ १० ॥

क्षीरेणैरण्डतैलं वा प्रयोगेण पिबेन्नरः।
बहुदोषो विरेकार्थं जीर्णे तक्ररसाशनः[1] ॥ ११ ॥

कषायमभयानां वा पाययेद्घृतभर्जितम्।
क्षीरानुपानं त्रिवृताचूर्णं द्राक्षारसेन वा ॥ १२ ॥

निर्हरेद्वा मलं तस्य सघृतैः क्षीरवस्तिभिः।
नहि वस्तिसमं किञ्चिद्वातरक्तचिकित्सितम् ॥ १३ ॥

विशेषात्पायुपार्श्वोरुपर्वास्थिजठरार्तिषु।

सर्वाङ्गसुन्दरी

पैत्त इत्यादि ॥ पैत्ते पित्ताधिके वातशोणिते शतावर्यादीन् पक्त्वा पिबेत्। स्वादुतिक्तकद्रव्यैः साधितं घृतं क्षीरं वा पिबेत्। दुग्धेन वैरण्डतैलं

1 क्षीरोदनाशनः इति पाठान्तरम्।

प्रयोगेण युक्त्या बहुदोषो नरो विरेकार्थं पिबेत्। एतस्मिन् क्षीरे युक्त्या प्रयोजिते जीर्णे तक्ररसाशी स्यात्। अथवा हरीतकीनां क्वाथं घृतभर्जितं पाययेत्। त्रिवृतामूलचूर्णं क्षीरानुपानं द्राक्षारसेन वा पाययेत्। अथवा तस्य वातरक्तवतो मलं क्षीरवस्तिभिर्घृतान्वितैः निर्हरेत्। यस्माद्वस्तितुल्यं नान्यद्वातरक्तचिकित्सितमस्ति। विशेषेण पाय्वादिपीडासु वस्तिर्हितः॥

शशिलेखा

पैत्ते पित्तप्रबले शतावर्यादीः पक्त्वा पिबेत्। शर्करामधुमधुर इति सङ्ग्रहोक्त्याऽत्रापि शर्करामधुयोगः कार्यः। तथा सूत्रोक्ताभ्यां मधुरतिक्तवर्गाभ्यां सिद्धं घृतं क्षीरं वा पिबेत्। बहुदोषो बहुपुरीषो नरः विरेकार्थं क्षीरेण सहैरण्डतैलं युक्त्या पिबेत्। जीर्णे क्षीरे तक्ररसाशनः स्यात्। सुबोधमिति। [जर्जटाचार्येणाप्युक्तम् — एरण्डतैलं क्षीरेण सह प्रयोगेण युक्त्या पिबेत्] कषायमभयानां वा घृतभृष्टं पिबेन्नरः क्षीरानुपानमिति छेदः। निर्हरेद्वा मलं पुरीषादिकं क्षीरवस्तिभिः क्षीरप्रधानैरित्यर्थः। "न हि वस्तिसमं किञ्चिद्वातरक्तचिकित्सितम्।" तद्धि मलहरं दोषहरञ्चेति। पाय्वाद्यार्तिषु विशेषात्॥

मुस्ताद्राक्षाहरिद्राणां पिबेत्क्वाथं कफोल्बणे ॥ १४ ॥

सक्षौद्रं त्रिफलाया वा गुडूच्या वा यथायथम्।
यथार्हस्नेहपीतश्च वामितं मृदु रूक्षयेत् ॥ १५ ॥

त्रिफलाव्योषपत्रैलात्वक्क्षीरीचित्रकं वचाम्।
विडङ्गं पिप्पलीमूलं लोमशं वृषकं त्वचम् ॥ १६ ॥

ऋद्धिं तामलकीं चव्यं समभागानि पेषयेत्।
काल्यं लिप्त्वायसीं पात्रीं मध्याह्ने भक्षयेदिदम् ॥ १७ ॥

वातास्रे सर्वदोषेऽपि परं शूलान्विते हितम्।
कोकिलाक्षकनिर्यूहः पीतस्तच्छाकभोजिना ॥ १८ ॥

कृपाभ्यास इव क्रोधं वातरक्तं नियच्छति।
पञ्चमूलस्य धात्र्या वा रसैर्लैलीतकीं वसाम् ॥ १९ ॥

खुडं सुरूढमप्यङ्गे ब्रह्मचारी पिबन् जयेत्।

सर्वाङ्गसुन्दरी

मुस्तेत्यादि ॥ मुस्तादीनां क्वाथं माक्षिकान्वितं कफोत्तरे वातशोणिते पिबेत्। त्रिफलाया: क्वाथं वा समाक्षिकं पिबेत्। सर्वेण प्रकारेण गुळूचीं वा पिबेत्। यो यस्यार्ह: स्नेह: स यथार्हस्नेह: । यथार्हस्नेहं पीतं कृतवमनञ्च मृदु कृत्वा रूक्षयेत्। त्रिफलादीनि समांशानि जलेन पेषयेत्। पिष्ट्वा च प्रभाते लोहीं पात्रीं लिप्त्वा मध्याह्न इदं भक्षयेत्। एतच्च वातरक्ते सर्वदोषेऽपि परं शूलयुक्ते हितम्। कोकिलाक्षकशाकभोजिना कोकिलाक्षकक्वाथ: पीतो वातरक्तं शमयति। कृपाभ्यास: क्रोधं यथा। पञ्चमूलस्य रसैरामलकरसैर्वा लेलीतकीं वसां ब्रह्मचारी पिबन् शरीरे खुडमत्यर्थं स्थिरीभूतमपि जयेत् ॥

शशिलेखा

कफोल्बणे श्लेष्मप्रबले वातशोणिते मुस्तादिकषायं माक्षिकयुक्तं पिबेत्। त्रिफलाकषायं वा। सर्वप्रकारेण गुळूचीं वा पिबेत्। तच्च यथायोग्यस्नेहपीतं मृदु स्तोकं वामयेत्। मृदु रूक्षयेच्च। सुबोधमिति। त्रिफलेत्यादि—वृषकत्वचमिति केचित् पठन्ति। कास्यं लिप्त्वेऽति प्रातरित्यर्थ:। वातास्रे सर्वदोषेऽपि हितम्। किमाह—पुनरेकदोषजे। प्रभाव कीर्तनमेतत्। अन्यस्तु व्याचष्टे—सर्वशब्दोऽह्यकृत्स्नवाच्यपि दृष्टो यथा सर्वस्वं मया दत्तमिति। शूलार्दिते परं हितम्। अतिशयेन शूलपीडानिवर्तकमित्यर्थ: ॥

इत्याभ्यन्तरमुद्दिष्टं कर्म बाह्यमत: परम् ॥ २० ॥
आरनाळाढके तैलं पादसर्जरसं श्रृतम्।
प्रभूते खजितं तोये ज्वरदाहार्तिनुत्परम् ॥ २१ ॥
समधूच्छिष्टमञ्जिष्ठं ससर्जरसशारिवम्।
पिण्डतैलं तदभ्यङ्गाद्वातरक्तरुजापहम् ॥ २२ ॥
दशमूलश्रृतं क्षीरं सद्य: शूलनिवारणम्।
परिषेकोऽनिलप्राये तद्वत्कोष्णेन सर्पिषा ॥ २३ ॥
स्नेहैर्मधुरसिद्धैर्वा चतुर्भि: परिषेचयेत्।
स्तम्भाक्षेपकशूलार्तं कोष्णैर्दाहे तु शीतळै: ॥ २४ ॥

तद्वद्गव्याविकच्छागैः क्षीरैस्तैलविमिश्रितैः ।
निष्क्वाथैर्जीवनीयानां पञ्चमूलस्य वा लघोः ॥ २५ ॥

द्राक्षेक्षुरसमद्यानि दधिमस्त्वम्लकाञ्चिकम् ।
सेकार्थं तण्डुलक्षौद्रशर्कराम्भश्च शस्यते ॥ २६ ॥

प्रियाः प्रियंवदा नार्यश्चन्दनार्द्रकरस्तनाः ।
स्पर्शशीताः सुखस्पर्शा घ्नन्ति दाहं रुजं क्लमम् ॥ २७ ॥

सर्वाङ्गसुन्दरी

इतीत्यादि ॥ इत्येवमाभ्यन्तरं कर्म चिकित्सितमुक्तम्। अतः परं बाह्यं कर्मोच्यते। आरनालाढक इत्यादि। काञ्चिकस्याढके तैलं चतुर्भागसर्जरसं पक्वं प्रभूते जले मथितं परं ज्वरदाहार्तिजित्। पूर्वोक्तं तैलं पक्वं सहमधूच्छिष्ट मञ्जिष्ठासर्जरसशारिवाभिरावापरूपाभिर्वर्तते यत्तदेवंभूतं सरिपण्डतैलमुच्यते। तच्चाभ्यङ्गाद्वातरक्तरुजाहरम् ॥ [जर्जटः – आरनालाढके तैलमित्यस्मादारभ्य बाह्यं चिकित्सितम्। प्रभूते तोये खजितं मथितमित्यर्थः। तैलं ज्वरदाहार्तिनुत्परम्। समधूच्छिष्टमञ्जिष्ठं ससर्जरसशारिवं पिण्डतैलम्। कथं पिण्डतैलम् – अत्र केचिद्व्याख्यानयन्ति। गौण्याऽपि हि संज्ञा प्रवर्तते। सप्तपर्ण्यादिवत्। तच्चात्र तैलं पूर्वोक्तमनुवर्त्यमनुक्तमपि संज्ञासामर्थ्यादत एव च पिण्डतैलमिति।] दशमूलशृतमित्यादि। दशमूलेन सिद्धं क्षीरं शीघ्रमेव शूलहृत्। परिषेकेणेत्यर्थादवगम्यते। अत एवाह—परिषेकोऽनिलप्राये तथैव कोष्णेन सर्पिषा हितः। अथवा मधुरद्रव्यसाधितैः स्नेहैश्चतुर्भिः परिषेचयेत्। स्तम्भादिपीडितं कोष्णैः स्नेहैश्चतुर्भिः परिषेचयेत्। दाहे तु सति शीतलैः स्नेहैः परिषेचयेत्। तथैव गव्यादिभिः क्षीरैस्तैलसंयुक्तैः परिषेचयेत्। जीवनीयानां निष्क्वाथैर्वा, अथवा ह्रस्वपञ्चमूलस्य क्वाथेन परिषेचयेत्। द्राक्षारसादीनि सेकार्थं प्रशस्यन्ते। प्रियंवदत्वादियुक्ता नार्यो दाहादीन् घ्नन्ति। प्रिया वल्लभाः। प्रियंवदाः प्रियवचसः। चन्दनेनार्द्राः कराः स्तनाश्च यासां ताः। एवं स्पर्शेन शीताः सुखस्पर्शाश्च। [जर्जटः— स्नेहैर्मधुरसिद्धैर्वा मधुराणि जीवनीयानि। दाहे तु शीतलैः परिषेचयेत्। तद्वत् गव्याविकच्छागैः क्षीरैस्तैलविमिश्रितैः परिषेकः। प्रायेण हि गव्यादिक्षीरं स्वाद्वादिगुणवत्वात्प्रियं परिषेकाय। कस्मादत्र माहिषव्युदासः। उच्यते। क्वचित्

कस्यचित् सामर्थ्यमचिन्त्या हि द्रव्यप्रभावाः। एते च वक्ष्यमाणा विशेषेण शास्त्रकारेणैव विभक्ता एव निर्दिष्टाः]॥

शशिलेखा

अनिलप्राये वाताधिके वातास्रे दशमूलसिद्धं दुग्धं सद्यः शूलघ्नं सेकः। तद्वद्दशमूलसिद्धाज्येन वा ईषदुष्णेन। मधुरवर्गसिद्धमहास्नेहेन वा स्तम्भाद्यार्तं कोष्णैरेभिः, दाहे तु शीतलैः सेचयेत्। तद्वदिति स्वादुवर्गसिद्धैः। स्तम्भादौ सति कोष्णैर्दाहे तु शीतलैः, सतैलैर्गोक्षीरादिभिर्वा। जीवनीयौषधक्काथैर्वा लघुपञ्चमूलस्य क्वाथेन वा जीवनीयपञ्चमूलक्वाथैरिति वा। द्राक्षारसादि सेकार्थं शस्यते। गतानुगतिका। सुबोधम्॥

सरागे सरुजे शोफे रक्तं हृत्वा प्रलेपयेत्।
प्रपौण्डरीकमञ्जिष्ठादार्वीमधुकचन्दनैः ॥ २८ ॥

सितोपलैरकासक्तुमसूरोशीरपद्मकैः।
लेपो रुग्दाहवीसर्परागशोफनिबर्हणः ॥ २९ ॥

सर्वाङ्गसुन्दरी

सराग इत्यादि॥ शोफे सरागे सरुजे सति रक्तं हृत्वा प्रपौण्डरीकादिभिः प्रलेपयेत्। अयं च लेपो रुगादिहरः। सितोपला शर्करा। एरकासक्तुरेरकाबीजसक्तुः॥

शशिलेखा

प्रपौण्डरीकादिभिः पद्मकान्तैर्घृतादियुक्तैर्लेपो रुग्दाहादिहरः। एरकासक्तुरेरकाबीजसक्तुः। [पासीति जर्जटः।] समांशाः प्रपौण्डरीकादयः। एरका पट्टेरका। रक्तपित्तोत्तरे त्वेष लेपः॥

वातघ्नैः साधितः स्निग्धः कृसरो मुद्गपायसः।
तिलसर्षपपिण्डाश्च शूलघ्नमुपनाहनम् ॥ ३० ॥

औदकप्रसहानूपवेशवाराः सुसंस्कृताः।
जीवनीयौषधस्नेहयुक्ताः स्युरुपनाहने ॥ ३१ ॥

स्तम्भतोदरुगायामशोफाङ्गग्रहनाशनाः ।
जीवनीयौषधैः सिद्धा सपयस्का वसाऽपि वा   ॥ ३२ ॥

सर्वाङ्गसुन्दरी

वातघ्नैरित्यादि ॥ वातहरद्रव्यैः रास्नादिभिः साधितः कृसरादिः स्निग्धो घृतादिभिस्तिलसर्षपपिण्डैश्चोपनाहनं शूलघ्नं स्यात् । औदकादिमांसवेशवाराः सुसंस्कृताः जीवनीयौषधस्नेहयुक्ता उपनाहेन स्तम्भादिनाशनाः स्युः । अथवा औदकादीनां वसा जीवनीयौषधैः सिद्धा क्षीरसहिता उपनाहने स्यात् ॥

शशिलेखा

वातघ्नैः काकोळ्यादिभिः सङ्ग्रहोक्तैः साधितो घृतादिः स्निग्धः कृसरः तिलान्नं मुद्गपायसादि चोपनाहनं पिष्टबन्धः । सुबोधम् ॥

घृतं सहचरान्मूलं जीवन्ती छागलं पयः ।
लेपः पिष्टा तिलास्तद्वद्भृष्टाः पयसि निर्वृताः   ॥ ३३ ॥

क्षीरपिष्टमुमालेपमेरण्डस्य फलानि वा ।
कुर्याच्छूलनिवृत्त्यर्थं शताह्वां वाऽनिलेऽधिके   ॥ ३४ ॥

सर्वाङ्गसुन्दरी

घृतमित्यादि ॥ घृतादीनि लेपः । तद्वत्तथैव तिला भृष्टाः क्षीरे निर्वापिताः पिष्टाः लेपः । क्षीरेण पिष्टातसीलेपः । एरण्डस्य फलानि वा क्षीरपिष्टानि लेपः । शूलनिवृत्त्यर्थं वातेऽधिके शतपुष्पां वा लेपं कुर्यात् ॥

शशिलेखा

घृतादिकं लेपः । सहचरजीवन्त्योर्मूलम् । पयसि निर्वृताः क्षीरे प्रक्षिप्योष्माणं त्याजिताः । सुबोधम् । [जर्जटः— भृष्टाः पयसि निर्वृताः निर्वाणाः शीता इत्यर्थः ।] उमा अतसी । शताह्वाञ्चानिलाधिके । शतपुष्पा या वाते वीर्यवत्तरत्वादधिकः शस्तो लेपः ॥

मूत्रक्षारसुरापक्वं घृतमभ्यञ्जने हितम् ।
सिद्धं समधु शुक्तं वा सेकाभ्यङ्गे कफोत्तरे   ॥ ३५ ॥

गृहधूमो वचा कुष्ठं शताह्वा रजनीद्वयम् ।
प्रलेपः शूलनुद्वातरक्ते वातकफोत्तरे ॥ ३६ ॥

मधुशिग्रोर्हितं तद्वद्बीजं धान्याम्लसंयुतम् ।
मुहूर्तलिप्तमम्लैश्च सिञ्चेद्वातकफोत्तरे ॥ ३७ ॥

उत्तानं लेपनाभ्यङ्गपरिषेकावगाहनैः ।
विरेकास्थापनैः स्नेहपानैर्गम्भीरमाचरेत् ॥ ३८ ॥

वातश्लेष्मोत्तरे कोष्णा लेपाद्यास्तत्र शीतलैः ।
विदाहशोफरुक्कण्डूविवृद्धिः स्तम्भनाद्भवेत् ॥ ३९ ॥

पित्तरक्तोत्तरे वातरक्ते लेपादयो हिमाः ।
उष्णैः प्लोषोषरुग्रागस्वेदावदऽरणोद्भवः ॥ ४० ॥

सर्वाङ्गसुन्दरी

मूत्रमित्यादि ।। गोमूत्रादिसिद्धं सर्पिरभ्यङ्गे हितम् । माक्षिकशुक्ताभ्यां वा पक्वं सर्पिः सेकाभ्यङ्गयोर्हितम् । कफाधिके वातरक्ते गृहधूमादिभिः प्रलेपो रुजाहृद्वातशोणिते वातकफाधिके । मधुशिग्रोर्बीजं काञ्जिकान्वितं प्रलेपनं तद्वत् पूर्वगुणम् । वातकफाधिकं वातरक्तं मुहूर्तमात्रलिप्तमम्लैः काञ्जिकादिभिः सिञ्चेत् । [जर्जटः—मधुशिग्रुशाकं सौभञ्जनकसदृशमल्पम् । मुहूर्तलिप्तमम्लैश्च सिञ्चेत् । तीक्ष्णत्वाल्लेपानामिति ।] उत्तानमित्यादि । उत्तानं वातरक्तं लेपनादिभिरुपाचरेत् । गम्भीरं विरेकादिभिराचरेत् चिकित्सेत् । वातकफाधिके वातशोणिते कोष्णलेपाद्या हिताः । यतस्तत्र तस्मिन् वातकफोत्तरे शीतलैर्लेपादिभिः स्तम्भनाद्धेतोर्विदाहादिवृद्धिः स्यात् । पित्तरक्ताधिके वातशोणिते लेपादयो हिमा हिताः । यत उष्णैः प्लोषाद्युद्भवः स्यात् ।।

शशिलेखा

उत्तानं बाह्यं वातशोणितं लेपनादिभिर्जयेत् । विरेकादिना गम्भीरमान्तरम् । वातश्लेष्मोत्तरे वाताधिके कफाधिके च कोष्णद्रव्यलेपादिविधाने शीतलेपादिप्रतिषेधे च हेतुर्विदाह इत्यादिनोच्यते । तत्र शीतलैः प्रलेपाद्यैः दोषस्य स्तम्भनाद्विदाहादेर्विवृद्धिर्भवति । अथ पित्तरक्तोत्तरे उष्णलेपदोषाविष्करणार्थमाह — पित्तरक्तोत्तरे पित्तोत्तरे रक्तोत्तरे च उष्णैर्दाहाद्युद्भव इति ।।

मधुयष्ट्याः पलशतात्कषाये पादशेषिते ।
तैलाढकं समक्षीरं पचेत्कल्कैः पलोन्मितैः ॥ ४१ ॥

स्थिरातामलकीमूर्वापयस्याभीरुचन्दनैः ।
लोहहंसपदीमांसीद्विमेदामधुपर्णिभिः ॥ ४२ ॥

काकोलीक्षीरकाकोलीशतपुष्पर्द्धिपद्मकैः ।
जीवन्तीजीवकर्षभत्वक्पत्रनखवालकैः ॥ ४३ ॥

प्रपौण्डरीकमञ्जिष्ठाशारिवैन्द्रीवितुन्नकैः ।
चतुष्प्रयोगं वातासृक्पित्तदाहज्वरार्तिनुत् ॥ ४४ ॥

सर्वाङ्गसुन्दरी

मधुयष्टीत्यादि ॥— मधुयष्ट्याः पलशतात् क्वाथे पादावशेषिते सति तैलाढकं तुल्यदुग्धं स्थिरादिभिः पलप्रमाणैः कल्कैर्युक्तं पचेत् । तत्तैलं चतुष्प्रयोगं पाननस्यानुवासनाभ्यङ्गसंयुक्तं वातास्राद्यार्तिजित् ॥

शशिलेखा

मधुयष्ट्याः पलशतादित्यादिना मधुयष्टीतैलं चतुष्प्रयोगं पाननस्याभ्यञ्जन सेकप्रयोगं वातरक्ताद्यर्तिनुत् । दाहशब्दो ज्वरशब्देन सम्बध्यते । स्थिरा सालपर्णी । तामलकी भूधात्री । पयस्या क्षीरिका । अभीरुः शतावरी । लोहमगरु । हंसपदी घृतमण्डा । त्रिपादी कीटमारीति च । मधुपर्णी मेदा । गुळूचीत्यन्ये । ऐन्द्री इन्द्रवारुणी विशाला । वितुन्नकं धान्यकम् । [जर्जटः— मधुयष्ट्याः पलशतादित्यादि — वरी शतावरी । मूर्वा मोरटा । हंसपदी घृतमण्डा । मधुपर्णी आनूपयष्टीमधुः । तामलकी दरफलिका । ऐन्द्री मत्स्याक्षकः । वितुन्नकस्तुत्थम् । धान्यकमपरे ॥

बलाकल्ककषायाभ्यां तैलं क्षीरसमं पचेत् ।
सहस्रशतपाकं तद्वातासृग्वातरोगनुत् ॥ ४५ ॥

रसायनं मुख्यतममिन्द्रियाणां प्रसादनम् ।
जीवनं बृंहणं स्वर्यं शुक्रासृग्दोषनाशनम् ॥ ४६ ॥

कुपिते मार्गसंरोधान्मेदसो वा कफस्य वा ।
अतिवृद्ध्यानिले शस्तमादौ स्नेहनबृंहणम् ॥ ४७ ॥

कृत्वा तत्राढ्यवातोक्तं वातशोणितिकं ततः ।
भेषजं स्नेहनं कुर्याद्यच्च रक्तप्रसादनम् ॥ ४८ ॥

सर्वाङ्गसुन्दरी

बलाकल्ककषायाभ्यामित्यादि ॥— बलाकषायेण बलाकल्केन च तैलं क्षीरतुल्यं पचेत्। तत्तैलं सहस्रशतपाकं सहस्राणां शतं पाका यस्य तदेवंभूतं वातासृग्विजित्। तथा तन्मुख्यतमं श्रेष्ठं रसायनं तथा इन्द्रियाणां चक्षुरादीनां प्रसादनं प्रसादजनकम् । जीवनं प्राणधारणम् । बृंहणमुपचयकरम् । स्वर्यं स्वरकरम् । शुक्रासृग्दोषाणां नाशनं च । मेदसः कफस्य वा अतिवृध्या मार्गसंरोधात् कारणाद्वायौ कुपिते सति आदौ प्रथममेव स्नेहनं बृंहणं च न शस्तम् । कथमुपक्रमः स्यादित्याह । तत्र तस्मिन् आढ्यवातोक्तं चिकित्सितं कृत्वा पश्चाद्वातास्रोक्तं स्नेहनं चिकित्सितं कुर्यात् । यच्च रक्तस्य प्रसादनं तच्च कुर्यात् ॥

शशिलेखा

मेदसोऽतिवृध्या कफस्य वाऽतिवृध्या यो मार्गरोधः स्रोतःपिधानं ततो हेतोरनिले कुपिते प्रथमं स्नेहनबृंहणं न शस्तम् । तत्राढ्यवातविधानं कृत्वा ततोऽनन्तरं वातशोणितिकं भेषजं स्नेहनं यद्रक्तप्रसादनं तच्च कुर्यात् । [जर्जटः - इदानीं वातरक्तसारूप्यादावरणविशेषेणावस्थितवातचिकित्सितं वक्तुमारब्धवानाह — कुपित इत्यादि । कुपितेऽनिले मार्गसंरोधात् स च संरोधो मेदसो वा कफस्य वा अतिवृध्या तस्मिन्नावृतेनादौ शस्तं स्नेहनबृंहणम् । तत्रावारकापेक्षया कफमेदःक्षपणमावरणपरिक्षयार्थमाढ्यवाऽतोक्तं कर्म कृत्वा क्षपयेत् । कफमेदसी पश्चाद्वातशोणितिकं स्नेहनं भेषजं कुर्याद्यच्च रक्तप्रसादनं रक्तस्यानुबन्धं ज्ञात्वा विस्रावणविरेकवस्तिकर्मादिका क्रिया कार्या । तस्माद्यतः संसर्गादावरणमेव ज्यायः । ननु मेदसो वा कफस्य वाऽतिवृध्या वरणादनिलः कुपितोऽपि रक्तापेक्षेति न कश्चिद्विशेषोऽस्ति । ब्रूमः । यस्मात्तत्र सर्वमेवापेक्ष्यम् । यथा "कोष्णालेपाश्च शस्यन्ते वातरक्ते कफोत्तरे । तथा कफवातोत्तरे शीतैः प्रलिप्ते वातशोणिते विदाहशोफरुक्कण्डूविवृद्धिः स्तम्भनाद्भवेत्" इत्यादि । तस्मात् क्रियास्तथाविधाः कार्याः । दाहोष्मपाकाप्रशमादत्र रक्तपित्तमेव । कुतः यच्च रक्तप्रसादनमिति वचनात् ॥]

- वातशोणितचिकित्सितमुक्त्वा प्राणादिचिकित्सामाह-

प्राणादिकोपे युगपद्यथोद्दिष्टं यथामयम्।
यथासन्नं च भैषज्यं विकल्प्यं स्याद्यथाबलम् ॥ ४९ ॥
नीते निरामतां सामे स्वेदलङ्घनपाचनैः।
रूक्षैश्चालेपसेकाद्यैः कुर्यात्केवलवातनुत् ॥ ५० ॥
शोषाक्षेपणसङ्कोचस्तम्भस्वपनकम्पनम्।
हनुस्रंसोऽर्दितं खाञ्ज्यं पाङ्गुल्यं खुडवातता ॥ ५१ ॥
सन्धिच्युतिः पक्षवधो मेदोमज्जास्थिगा गदाः।
एते स्थानस्य गाम्भीर्यात्सिद्ध्येयुर्यत्नतो न वा ॥ ५२ ॥
तस्माज्जयेन्नवानेतान् बलिनो निरुपद्रवान्।

सर्वाङ्गसुन्दरी

प्राणादीत्यादि ॥ प्राणादीनां युगपत्तुल्यकाले कोपे सति यथोद्दिष्टं यथोक्तं यथामयं यथासन्नं यथाबलञ्च भैषज्यं विकल्प्यं स्यात्। सामे वाते स्वेदादिभिर्निरामतां नीते सति केवलवातनुत् भैषज्यं कुर्यात्। शोषादयो मेदोमज्जास्थिगता गदा यत्नेनोपचर्यमाणाः स्थानस्य गाम्भीर्यात् सिध्येयुरथवा न सिध्येयुरेव। तस्मात्कारणादेतान् शोषादीन् बलिनो नरस्य नवान् निरुपद्रवांश्च जयेत् ॥

शशिलेखा

निदानानुक्रमेण प्राणादीनां चिकित्सितमाह। प्राणादिकोप इत्यादि। यत्र युगपत् प्राणादीनां कोपस्तत्र यथोद्दिष्टमुद्दिष्टवातव्याधिचिकित्सानतिक्रमेण। यथामयमिति प्राणादिकोपजनितरोगाद्यपेक्षया। यथासन्नमिति प्राणादीनामन्यतममासन्नमनतिक्रम्य यस्मिन्नेव गदे य एव प्राणादीनामन्यतम आसन्नस्तमेव चिकित्सेदित्यर्थः। यथाबलमिति बलानतिक्रमेण प्राणादीनामन्यतमस्य बलिनः पूर्वं प्रतीकारं कुर्यादित्येवमत्र भैषज्यं विकल्प्यम्। सामे सर्वत्र चामयुक्ते वाते स्वेदादिभिर्निरामतां नीते केवलवातनुत् सर्वं कर्म कुर्यात्। सुबोधम् ॥

वायौ पित्तावृते शीतामुष्णां च बहुशः क्रियाम् ॥ ५३ ॥
व्यत्यासाद्योजयेत्सर्पिर्जीवनीयं च पाययेत्।
धन्वमांसं यवाः शालिर्विरेकः क्षीरवान्मृदुः ॥ ५४ ॥

सक्षीरा वस्तयः क्षीरं पञ्चमूलबलाश्रृतम् ।
कालेऽनुवासनं तैलं मधुरौषधसाधितम् ॥ ५५ ॥

यष्टीमधुबलातैलघृतक्षीरैश्च सेचनम् ।
पञ्चमूलकषायेण वारिणा शीतलेन वा ॥ ५६ ॥

सर्वाङ्गसुन्दरी

वायावित्यादि ॥ वाते पित्तावृते सति बहुशः शीतामुष्णां च क्रियां व्यत्यासेन योजयेत् । जीवनीयेन साधितं घृतञ्च पाययेत् । तथा धन्वमांसादयो हिताः । विरेकः क्षीरवान् मृदुर्हितः । सक्षीरा वस्तयो हिताः । पञ्चमूलं महत् । तेन बलासहितेन श्रृतं क्षीरं हितम् । काले यथावसरमनुवासनयोग्यैर्मधुरौषधैः साधितं तैलं अनुवासनं देयम् । मधुयष्टीतैलेन बलातैलेन धृतेन क्षीरेण च सेचनं हितम् । पञ्चमूलक्काथेन शीतलेन वारिणा वा सेचनं हितम् ॥

शशिलेखा

अथ वायौ पित्तावृते इत्यादिना अवृतवातचिकित्सामाह । पित्तावृते वायौ व्यत्यासात् पर्यायेण शीतामुष्णाञ्च क्रियां योजयेत् । जीवनीयञ्च सर्पिः पाययेत् । एतच्च सङ्ग्रहे वातशोणितचिकित्सिते दशमूलादिनोक्तम् । धन्वमांसादिकञ्च योज्यम् । सुबोधम् । काल इत्यनुवासनयोग्ये । मधुरद्रव्यसाधितैस्तैलैरनुवासनम् । यष्टीतैलादिभिः सेचनं पञ्चमूलकषायेण वा शीतोदकेन वेति पित्तावृतचिकित्सा ॥

कफावृते यवान्नानि जाङ्गला मृगपक्षिणः ।
स्वेदास्तीक्ष्णा निरूहाश्च वमनं सविरेचनम् ॥ ५७ ॥

पुराणसर्पिस्तैलं च तिलसर्षपजं हितम् ।
संसृष्टे कफपित्ताभ्यां पित्तमादौ विनिर्जयेत् ॥ ५८ ॥

सर्वाङ्गसुन्दरी

कफावृत इत्यादि ॥ कफावृते यवान्नादीनि हितानि । तीक्ष्णा निरूहा आस्थापनविशेषाः । तीक्ष्णं वमनं विरेचनञ्च । कफपित्ताभ्यां वाते संसृष्टे सति प्राक् पित्तं विनिर्जयेत् । पश्चात् कफं वातयुक्तं जयेत् ॥

शशिलेखा

कफावृते वाते यवान्नादिकं हितम्। कफपित्ताभ्यां युगपत्संसृष्टे वाते पूर्वं पित्तं विनिर्जयेत्। ततः कफम् ॥

कारयेद्रक्तसंसृष्टे वातशोणितिकीं क्रियाम्।
स्वेदाभ्यङ्गरसाः क्षीरं स्नेहो मांसावृते हितः ॥ ५९ ॥
प्रमेहमेदोवातघ्नमाढ्यवाते भिषग्जितम्।
महास्नेहोऽस्थिमज्जस्थे पूर्वोक्तं रेतसावृते ॥ ६० ॥

सर्वाङ्गसुन्दरी

कारयेदित्यादि ॥ रक्तसंसृष्टे सति वातशोणितोक्तां चिकित्सां मांसावृते स्वेदादयो हिताः। आढ्यवाते मेदसावृते प्रमेहादिघ्नमौषधम्। अस्थिस्थे मज्जस्थे च महास्नेहः पूर्वं वातव्याधावुक्तो हितः। रेतसा शुक्रेनावृते पूर्वोक्तं वातव्याधौ शुक्रस्थवातोक्तं चिकित्सितं हितम् ॥

शशिलेखा

रक्तसंसृष्टे सामान्यां वातशोणितचिकित्सां कारयेत्। मांसावृते स्वेदादयः स्नेहान्ताश्चेति हिताः। आढ्यवाते मेदसावृते वा यौ प्रमेहघ्नं मेदोघ्नं वातघ्नं भिषग्जितमौषधं हितम्। अस्थिस्थे मज्जस्थे च महास्नेहः स्नेहचतुष्टयं युगपत्। रेतसा शुक्रेनावृते पूर्वोक्तं वातव्याधौ शुक्रस्थवातोक्तं गर्भावक्रान्तीयोक्तं च ॥

अन्नावृते पाचनीयं वमनं दीपनं लघु।
मूत्रावृते मूत्रलानि स्वेदा उत्तरवस्तयः ॥ ६१ ॥
एरण्डतैलं वर्चस्थे वस्तिस्नेहाश्च भेदिनः।

सर्वाङ्गसुन्दरी

अन्नावृत इत्यादि ॥ अन्नावृते पाचनीयमौषधं वमनं दीपनं आग्नेयमौषधं लघु प्रकृत्या तत्सर्वं शस्यते। मूत्रावृते मूत्रलानि त्रपुसादीनि स्वेदाश्चोत्तरवस्तयो हिताः। पुरीषस्थे पवने एरण्डतैलं हितम्। तथा वस्तिः स्नेहाश्च भेदिनो हिताः ॥

शशिलेखा

अन्नावृत इत्यादि सुबोधम् । मूत्रावृते मूत्रलान्यन्नादीनि । उत्तरबस्ति-र्मेढ्रयोज्यः । वर्चस्थे पुरीषावृते एरण्डतैलादिकम् ॥

कफपित्ताविरुद्धं यद्यच्च वातानुलोमनम् ॥ ६२ ॥

सर्वस्थानावृते त्वाशु तत्कार्यं मातरिश्वनि ।
अनभिष्यन्दि च स्निग्धं स्रोतसां शुद्धिकारणम् ॥ ६३ ॥

यापना बस्तयः प्रायो मधुराः सानुवासनाः ।
प्रसमीक्ष्य बलाधिक्यं मृदु कार्यं विरेचनम् ॥ ६४ ॥

रसायनानां सर्वेषामुपयोगः प्रशस्यते ।
शिलाह्वस्य विशेषेण पयसा शुद्धगुग्गुलोः ॥ ६५ ॥

लेहो वा भार्ङ्गवस्तद्वदेकादशसिताशतः ।

सर्वाङ्गसुन्दरी

कफपित्तेत्यादि ॥ कफपित्तयोरविरुद्धं यत् यद्वा तस्य चानुलोमनं तत् सर्वस्थानावृतेऽपि मरुति शीघ्रमेव कार्यम् । अनभिष्यन्दि स्निग्ध च यत् द्रव्यं यत् स्रोतसां शुद्धिकरं तद्धितम् । यापना वस्तयः प्रायो मधुरद्रव्यसाधिताः सहानुवासनं हिताः । बलाधिक्यं प्रसमीक्ष्य मृदु राजवृक्षादिभिर्विरेचनं कार्यम् । रसायनानां रसायनविध्युक्तानां सर्वेषामुपयोगः प्रशस्यते । विशेषेण शिलाजतुन उपयोगः प्रशस्यते । शुद्धस्य गुग्गुलोः पयसा सह प्रयोगः शस्यते । अथवा भार्ङ्गवाख्यो लेहश्च्यवनप्राशस्तद्वत्तथैव एकादशसिताशत एकादशशतपलशर्करा-लेहः यो रसायनाध्याये ब्राह्मो वक्ष्यमाणः स च शस्यते ॥

शशिलेखा

कफपित्ताविरुद्धमित्यादिना सर्वावरणानां सामान्येन चिकित्सा । अनभि-ष्यन्द्यादिगुणं च यत्किञ्चित् । प्रायो बाहुल्येन यापना वस्तयस्ते च कल्पे वक्ष्यन्ते । सुबोधम् । रसायनानां स्वविषयविभागेन । भार्ङ्गवो लेहो रसा-यनोक्तश्च्यवनप्राशः ॥

अपाने त्वावृते सर्वं दीपनं ग्राहि भेषजम् ॥ ६६ ॥
वातानुलोमनं कार्यं मूत्राशयविशोधनम्।

सर्वाङ्गसुन्दरी

अपान इत्यादि ॥ अपाने येनकेनचिदावृते सर्वमेव दीपनं सङ्ग्रहणीयञ्चौषधं वातस्यानुलोमनं मूत्राशयस्य च विशोधनं कार्यम् ॥

शशिलेखा

अपाने तु येनकेनचिदावृते सर्वं भेषजं दीपनत्वादि गुणं कार्यम् ॥

इति संक्षेपतः प्रोक्तमावृतानां चिकित्सितम् ॥ ६७ ॥
प्राणादीनां भिषक्कुर्याद्वितर्क्य स्वयमेव तत्।

सर्वाङ्गसुन्दरी

इतीत्यादि ॥ इत्येवं संक्षेपेणावृतानां चिकित्सितं प्रोक्तं न विस्तरेण। प्राणादीनामावृतानां वैद्यः स्वयमेव वितर्क्य ऊहापोहादिना यथायोग्यं तच्चिकित्सितं कुर्यात् ॥

शशिलेखा

इत्यनन्तरोक्तप्रकारेण आवृतानां संक्षेपेण चिकित्सितमुक्तम्। प्राणादीनां स्वविशेषेणावृतानां तदिति चिकित्सितं विकल्प्य स्वयमूह्य कुर्यात् ॥

उदानं योजयेदूर्ध्वमपानं चानुलोमयेत् ॥ ६८ ॥
समानं शमयेद्विद्वांस्त्रिधा व्यानं च योजयेत्।
प्राणो रक्ष्यश्चतुर्भ्योऽपि तत्स्थितौ देहसंस्थितिः ॥ ६९ ॥
स्वं स्वं स्थानं नयेदेवं वृत्तान्वातान्विमार्गगान्।

सर्वाङ्गसुन्दरी

उदानमित्यादि ॥ उदानाख्यं वायुमूर्ध्वं नयेत्। यतोऽसौ सदैवोर्ध्वगामी तथा प्रयतेत यथोर्ध्वगामी भवति। अपानाख्यं चाऽनिलमनुलोमयेदधोगतिर्ह्ययं सदैव समीरणस्तस्मादधोगमनं यथास्य सम्पद्यते तथा चिकित्सितं कार्यमित्यर्थः। समानाख्यं वायुं विद्वान् वैद्यः शमयेत्। अयमभिप्रायो

ग्रन्थकृतः। यथा किल नास्योर्ध्वगामिता न चाधोगामिता सम्पद्यते तथा चिकित्सितं हितम्। किं तर्हि स्वस्थानप्रतिपत्तिरेवेत्येवं चिकित्सा कार्येति। व्यानाख्यं तु वायुं त्रिधा योजयेदूर्ध्वाधोमध्यगमनं यथाऽस्य शरीरे सम्पद्यते तथा चिकित्सा कार्येति। तथा प्राणाख्यो वायुः चतुर्भ्योऽप्युदानादिभ्योऽपि रक्ष्यः। यथोऽदानादिभिर्नास्य बाधा सम्पद्यते तथा चिकित्सा कार्येत्यर्थः। यतस्तस्य प्राणस्य स्थितौ देहस्य शरीरस्य स्थितिर्भवति। प्राणं विना न जीवतीत्यर्थः। एवमनेन प्रकारेणावृतान् वातान् विमार्गगान् स्वं स्वं स्थानं नयेत् ॥

शशिलेखा

उदानमित्यावृतं विज्ञेयम्। व्यानं त्रिधा योजयेदूर्ध्वमधस्तिर्यक् च। चतुर्भ्योऽप्युदानादिभ्यः सर्वथा प्राणो यत्नेन रक्ष्यः। यत्तस्य प्राणस्य स्थितौ देहस्य सम्यक्स्थितिर्भवति। एवं स्थिते वृताना वृतान् वातानुन्मार्गगान् नानाविधेनोपायेन स्वं स्वं स्थानं नयेत॥

सर्वं चावरणं पित्तरक्तसंसर्गवर्जितम् ॥ ७० ॥

रसायनविधानेन लशुनो हन्ति शीलितः।
पित्तावृते पित्तहरं मरुतश्चानुलोमनम् ॥ ७१ ॥

रक्तावृतेऽपि तद्वच्च खुडोक्तं यच्च भेषजम्।
रक्तपित्तानिलहरं विविधं च रसायनम् ॥ ७२ ॥

सर्वाङ्गसुन्दरी

सर्वमित्यादि ॥ सर्वमेवावरणं पित्तरक्तसंसर्गेण वर्जितं रसायनविधिना शीलितो लशुनो हन्ति। पित्तावृते उदानादौ पित्तहरं पवनस्य चानुलोमनं हितम्। रक्तावृतेऽपि तद्वत्तथैव पित्तहरं मरुतोऽनुलोमनं च हितम्। यच्च खुडे वातशोणिते उक्तं भेषजं तथा रक्तपित्तानिलहरं यत्तच्च हितं विविधं रसायनञ्च ॥

शशिलेखा

लशुनश्च सर्वमावरणं रसायनविधिना शीलितो हन्ति। पित्तरक्तसंसर्गं वर्जयित्वा। पित्तावृत इत्यादि सुबोधम्। खुड इति वातशोणितस्य नाम। नानाप्रकारं पित्तादिहितञ्च रसायनं पित्तरक्तावृते हितम् ॥

यथानिदानं निर्दिष्टमिति सम्यक्चिकित्सितम् ।
आयुर्वेदफलं स्थानमेतत्सद्योऽर्तिनाशनम् ॥ ७३ ॥

चिकित्सितं हितं पथ्यं प्रायश्चित्तं भिषग्जितम् ।
भेषजं शमनं शस्तं पर्यायैः स्मृतमौषधम् ॥ ७४ ॥

सर्वाङ्गसुन्दरी

यथेत्यादि ॥ इत्यनेन प्रकारेण यथानिदानं निदानानतिक्रमेण यथोद्देशस्तथा निर्देश इत्यनया रीत्या सर्वमेव चिकित्सितं निर्दिष्टम् । एतच्चायुर्वेदफलभूतं स्थानमेतदुपदेशेन सद्योऽर्त्तिनाशनाद्धेतोः चिकित्सादय औषधस्य पर्याया स्मृता इति ॥

शशिलेखा

यथेत्यादिना चिकित्सितमुपसंह्रियते । इत्यनन्तरोक्तैरध्यायैर्यथानिदानं निदानोक्तार्थानतिक्रमेण चिकित्सितं सम्यङ्निर्दिष्टम् । एतच्च चिकित्सितमायुर्वेदस्य फलं सद्य एवार्त्तिनाशनाद्धेतोः स्थाने चिकित्सितशब्द उपचारात् प्राधान्येन चिकित्सितमित्यादिभिः पर्यायैरौषधं स्मृतमाचार्यैरिति । चिकित्सायामनुगतं चिकित्सितम् । पथोनपेतं पथ्यम् । प्रायश्चित्तं कर्मक्षयहेतुत्वात् । न हि कर्म क्षीयते प्रायश्चित्तमन्तरा । अथवा दैवव्यपाश्रयं कर्म प्रायश्चित्तम् । एवं भिषग्जितादावप्यूह्यम् । औषधशब्देन चत्वारोऽपि पादा अभिप्रेताः । ननु किमौषधपर्यायकथनस्य प्रयोजनमिति ब्रूमः । संव्यवहारार्थमिति ॥

इत्यरुणदत्तविरचितायामष्टाङ्गहृदयटीकायां सर्वाङ्गसुन्दराख्यायामिन्दुविरचितशशिलेखामिळितायां द्वाविंशोऽध्यायः ॥

अक्षरं यत्परिभ्रष्टं मात्राहीनन्तु यद्भवेत् ।
क्षन्तुमर्हन्ति विद्वांसः कस्य नास्ति व्यतिक्रमः ॥

सतच्छदारण्यपुरवासिना रुद्रनाम्ना लिखितमिदं ग्रन्थम् । शुभं भवतु
श्रीपूर्णत्रयीशाय नमः (११—१०—१०९६)

990
145
9950
4950
3960
990
14355.0
1435-50
990
2425.50
2425.50
200
60
30
20
10
2745.50
2745-50

A. R.L.